तमसो मा ज्योतिर्गमय

VISVA BHARATI
LIBRARY
SANTINIKETAN

16.51
R189
Pt 3
161447

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
No. 124.

श्री अणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितभाष्य-
प्रकाशाख्यव्याख्यासमेतम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितम् ।

ANU BHÂSHYA,

ON BRAHMASÛTRA BY SRÎ VALLABHÂCHÂRYA,
With the Commentary called Bhâshya Prakâsa,
By Goswâmi Sri Purushottamjee Mahâraj.
EDITED BY RATNA GOPÂL BHATTA.
Fasciculus XI.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,
BENARES.

1906.

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्मशास्त्रसंग्रहः	०	९	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	१	०
•पाणिनीयशिक्षा भाष्यसहिता	७	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	७	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०
छन्दःकौमुदी	०	६	०
[illegible]	२	०	०

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥३१॥

धर्मिधर्मविरोधः परिहृतः । धर्म्यन्तरविरोधपरिहारार्थमधिकरणमारभते । तत्र पूर्वपक्षमाह । परमतः । अतोऽपि ब्रह्मणः परमन्यदुत्कृष्टं फलमस्ति । तत्र वैदिकहेतवः । सेतून्मानसम्बन्धभेद-

---

रूपवत्त्वमप्राकृतरूपवत्त्वायेति । अत एव चेत्येकसूत्रे तृतीये जीवस्य ब्रह्माभिन्नत्वाय प्रतिबिम्बत्वमुच्यत इति। अम्बुवदित्येकसूत्रे चतुर्थे भक्तिं विना जीवस्य न स्वरूपसुखाभिव्यक्तिरिति । वृद्धिह्रासेतित्रिसूत्रे पञ्चमे भक्तिः सर्वत्र नैकविधेति तत्फलदानेऽपि तारतम्यमिति। प्रकृतैतावत्त्वेत्येकसूत्रे षष्ठे भगवान् पालकोऽपीति । तदव्यक्तेति चतुःसूत्रे प्रकाशवच्चावैशेष्यमिति भेदनेन पञ्चसूत्रतां कृत्वा तत्र सप्तमे परमात्मा सदा अव्यक्तस्वभावः स च भक्तिसाध्यात् प्रसादाद् व्यक्तो भवतीति । उभयव्यपदेशादिति चतुःसूत्रेऽष्टमे, आनन्दादिरूपोऽपि श्रुतिबलादानन्दादिगुणकोऽपीति सर्वत्र माहात्म्यमेवोच्यते भक्त्यर्थमित्याहुः । तत्रापि वयमुदासीनाः । आद्ये हेतोरध्याहार्यत्वात् । द्वितीयार्थस्य प्रागपि सिद्धत्वेन निष्प्रयोजनकत्वात् । तृतीयेऽपि जीवस्य मुख्यप्रतिबिम्बतायां मिथ्यात्वापत्तेर्भिन्नत्वस्य प्रागेव साधितत्वाच्च सूत्रवैयर्थ्यमित्यादिदोषाणां भानादिति ॥ ३० ॥ ९ ॥

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥

सङ्गतिकथनपूर्वकमधिकरणप्रयोजनमाहुः । * धर्मीत्यादि * ब्रह्म सर्वधर्मशून्यं, न तु धर्मीति । धर्माश्चेतरेतरविरुद्धा, नः ह्येकत्र सम्भवन्तीति । धर्माश्च कार्या, न ब्रह्मेत्यादिरूपो यो विरोधः सोऽधिकरणचतुष्टयेन परिहृतः । अतः परं धर्म्यन्तरस्यापि सहावस्थानमाशङ्क्य तत्परिहारार्थमारभते । तथाच प्रसङ्गः सङ्गतिरुक्तविरोधपरिहारश्च प्रयोजनमित्यर्थः। तत्र यथा ज्ञेयाद् ब्रह्मणः फलरूपमुत्कृष्टमेवं ततोऽप्यन्यदुत्कृष्टमस्ति नवेति सन्देहः । तद्बीजन्तु, अक्षरात् परतः परः, पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरिति व्यपदेशः सेत्वादिव्यपदेशश्च । तयोः पूर्वपक्षादेव बुध्यमान-

व्यपदेशेभ्यः । यद्यपि समन्वय एवैते दोषाः परिहृतास्तथापि स्वरूपविरोधपरिहारप्रस्तावात् पुनरुच्यन्ते । सर्ववाक्यप्रतिपाद्यमेकमेवेत्यपि न सिद्धम्। एतैर्हेतुभिः परिच्छेदेन धर्मिभेदे सिद्धे, न पूर्वाधिकरणसिद्धान्तविरोधः । ननु समन्वयेन ब्रह्मत्वमुत्तरपादेनैक्यं पूर्वाधिकरणेनाविरोध इति व्यर्थमिदमधिकरणमितिचेन्न । अर्थबलविचारोऽयं, समन्वये चोत्तरपादे च शब्दबलविचारः । धर्मिविचारान्न पूर्वेण गतार्थत्वम् ।

त्वात् तमेव वदतीत्याशयेनाहुः । * तत्रेत्यादि * । * तत्र वैदिकहेतव इति * । फलान्तरसत्त्वे वैदिका एव हेतवः ।तथाच शब्दबलेन अद्वितीयत्वादर्थबलेन फलान्तरस्यापि सिद्ध्या प्राप्ते विरोधे वेदान्तवाक्यार्थनिर्धाराय प्रवृत्तस्यैतद्विचारणमावश्यकमिति बोधितम् । ननु सत्त्वादिवाक्यानां पूर्वं विचारितत्वात् पुनः कथनस्य किं प्रयोजनमित्यत आहुः । * यद्यपीत्यादि * । सर्वेषां वेदान्तानां ब्रह्मपरत्वविचारे यद्यप्येते सत्त्वादिपदोक्ता अवान्तरवर्त्तित्वादयः परिहृतास्तथापि परस्वरूपविरोधित्वेन बाधका इत्येवं न परिहृता इति तथा परिहर्त्तुं पुनरुच्यन्ते । किञ्च । तेषु तेषु वाक्येषु तत्तद्रूपाणां प्रतिपादनात् सर्ववाक्यप्रतिपाद्यमेकमेवेत्यपि न सिद्धमतस्तत्साधनायापि पुनरुच्यन्ते इत्यर्थः । ननु पूर्वाधिकरणे ब्रह्मणः परत्वमद्वितीयत्वं च सिद्धम् । अत्र चैतैर्हेतुभिस्तदाक्षिप्यत इत्याक्षेप एवात्र सङ्गतिरस्तु, स प्रसङ्ग इत्यत आहुः * एतैरित्यादि * । सत्त्वादिभिर्हेतुभिः परिच्छेदेन ब्रह्मणोऽवान्तरत्वनिश्चयेन धर्म्यन्तरे सिद्धे तस्मिन्नेव परत्वमद्वितीयत्वं च पर्यवसास्यतीति न पूर्वाधिकरणसिद्धान्तानां विरोधोऽतो नाक्षेपः सङ्गतिः, किन्तु प्रसङ्ग एव सङ्गतिरित्यर्थः । पुनः प्रकारान्तरेण वैयर्थ्यमाशङ्क्य परिहरति । * नन्वित्यादि * । * अविरोध इति * । प्रतिषेधबोधकस्याद्वितीयपदस्याऽसङ्कुचितवृत्तिकत्वात् तेन धर्म्यन्तरस्यापि निवृत्तेः स्वरूपस्याप्यविरोध इत्यर्थः । * धर्मिविचारादित्यादि * । पूर्वाधिकरणे धर्माणां ब्रह्मणः सकाशाद्भेदो निवारित, इह तु धर्म्यन्तरं निवार्यत इति धर्मिविचारात् तथेत्यर्थः । अतः परं सूत्रं व्याकरिष्यन्तो हेतुचतुष्टय-

फलतः साधनेभ्यश्च प्रमेयाच्च प्रमाणतः ।
विचारेणाबृहत् तच्चेत् कोऽन्यः साधयितुं क्षमः ॥

अतो हेतून् बाधकानाह । एकदेशबाधकत्वात् । तत्र फलतो बाधहेतुमाह । सेतुव्यपदेशात्। अथ य आत्मा स सेतुर्विधृतिरिति। दहर उत्तरेभ्य इत्यत्र ब्रह्मत्वमस्य सिद्धम् । अथ य इहात्मानमनुविद्य व्रजन्तीत्युपक्रम्य, सर्वेषु लोकेषु कामचारो भवतीत्युक्त्वा कामनुपपाद्याज्ञानव्यवधानं ज्ञानप्रशंसार्थमुक्त्वा ज्ञानानन्तरं संसारसम्बन्धाभावाय सेतुत्वं वदति । पापाब्धितरणार्थं, यश्च तराति तद्गताश्च दोषा गच्छन्तीति च । अतः संसारफलयोर्मध्ये विद्यमानत्वात् तीर्णस्यैव फलश्रवणात् फलरूपं वस्तु किञ्चिदन्यदस्तीति

कथनप्रयोजनं गृह्णन्ति । * फलत इत्यादि * । फलत इत्यादौ ल्यब्लोपे पञ्चमी । फलमनुसन्धायेत्यर्थः । एवमग्रेऽपि * अबृहत्तदिति * । न परं ब्रह्म पूर्वाधिकरणेषु विचारितम् । * कोऽन्य इत्यादि * । फलादिव्यतिरिक्तः कोऽन्यो हेतुस्तस्य परब्रह्मत्वं साधयितुं समर्थ इत्यर्थः । साधयितुमिति स्वार्थेणिच् । रामो राज्यमचीकरदितिवत् । विभजन्ते । * अत इत्यादि * । यत एवं विचारेऽन्यो हेतुर्न साधनसमर्थोऽतः परत्वबाधकान् हेतून् क्रमेणाहेत्यर्थः । क्रमे हेतुमाहुः । * एकेत्यादि * । परब्रह्मत्वे साधनीये परत्वमेकदेशस्तद्बाधकत्वादित्यर्थः । ब्रह्मविदाप्नोति परमिति फलत्वात् परत्वमुक्तमतस्तद्बाधकं हेतुं पूर्वं वदतीत्याशयेनाहुः । * तत्रेत्यादि * । एकदेशबाधकत्वे मानमाहुः । * दहरेत्यादि * । * अस्येति * । सेतोरित्यर्थः । फलतो बाधकं हेतुं व्युत्पादयन्ति * अथेत्यादि * । * तद्गताश्च दोषा गच्छन्तीति * । एतं सेतुं तीर्त्वा अन्धः सन्ननन्धो भवतीति तत्र श्रावणादित्यर्थः । ननु पूर्वं, तद्यथाऽपि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तोऽपि न विन्देयुरित्यादिना तस्मिन् फलत्वमपि दृष्टान्ते बोधितमिति कथं फलतो बाधकत्वमित्यत आ-

ज्ञायते । निधित्वेन फलवचनमवान्तरफलपरं भविष्यति । एतमानन्दमयमात्मानमुपसंक्रम्येत्यप्यत्रोदाहरणम् । तथा, उन्मानव्यपदेशात् । तत्रैव यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति साधनयुक्तिप्रश्ने उन्मानेन परिच्छेदं निरूपयति । दृष्टान्तदार्ष्टान्तिकत्वेन ज्ञानं साधनम् । तत्र बाहराकाशज्ञानमपि साधनं भवति । चतुष्पाच्च ब्रह्म । भूतादिपादाश्च ज्ञातव्याः । तथा, सं-

---

हुः । * निधित्वेनेत्यादि * । निधेरर्थरूपत्वेन परतः पुरुषार्थत्वात् तद्दृष्टान्तेनात्र फलकथनात् तथेत्यर्थः । * अत्रोदाहरणमिति * । ल्यबन्तप्रयोगादवान्तरत्वे उदाहरणमित्यर्थः । अत्र मध्ये विद्यमानत्वादित्यनेनाव्यापकत्वबोधनाद्देशपरिच्छेदो ज्ञापितः । साधनतो बाधकं व्युत्पादयन्ति । * तथा उन्मानेत्यादि * । * तत्रैवेति * । दहरविद्यायामेव । तत्र हि दहरपुण्डरीकान्तर्यो दहर आकाशस्तदन्तःस्थितस्य ज्ञानार्थकयत्नरूपमन्वेषणं साधनं तस्य युक्तिर्योजनं विषयावगमानुकूलत्वं तदर्थके प्रश्ने, तं चेद् ब्रूयुरित्यादिना कृते तदुत्तरं वदन्, यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति यावत्तावत्पदाभ्यामाकाशसमानताव्यपदेशेन दहराकाशस्य परिच्छेदं निरूपयति । ततश्च दृष्टान्तदार्ष्टान्तिकत्वेनाकाशद्वयज्ञानं दहराकाशस्वरूपज्ञानसाधनम् । तत्र च दृष्टान्तभूतबहिराकाशज्ञानमपि साधनं भवति । तथाच बहिराकाशः कालतः परिच्छिन्न इति दार्ष्टान्तिकभूतो दहराकाशोऽपि तथा भवति । नच यावत्तावत्पदाभ्यां परिमाणसाम्यमेवायाति, नान्यत्साम्यमिति वाच्यम् । प्रजापतिर्यज्ञानसृजतेत्यत्र तानुदमिमीत, यावदग्निहोत्रमासीत्तावानग्निष्टोम इति फलतः साम्यवदत्रापि साम्यान्तरलाभस्य बोधनायोन्मानपदस्य सूत्रे उक्तत्वादिति । तथाच दृष्टान्ते कालपरिच्छेदात् तत्समानत्वज्ञानरूपसन्धानतः परत्वनिवारणमित्यर्थः । उदाहरणान्तरमाहुः । * चतुष्पादित्यादि * अत्रापि भूतादीनां पादानामनित्यत्वात् तज्ज्ञानरूपसाधनतः कालपरिच्छेदात्तथा । तृतीयं हेतुं व्युत्पादयन्ति

म्बन्धव्यपदेशात्। तत्रैव प्रमेयनिरूपणप्रस्तावे, उभावस्मिन्नित्या-
दिना आधाराधेयसम्बन्धो निरूपितः। अत्र च वस्तुपरिच्छेदो निरूपितः। प्राज्ञेनात्मना सम्परिष्वक्त इति च। तथा, भेदव्यपदेशात्। य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते, य एषोऽन्तरक्षिणि पुरुषो दृश्यते इत्यत्र स्थानद्वयास्थितयोः पुरुषयोः परस्परं धर्मातिदेशमाह। अक्षिस्थितानरूपकमतिदेशः प्रमाणमिति। धर्म्यभेदे तु स एवायमिति वदेत्। अतो देशकालवस्तुस्वरूपपरिच्छेदाच्चतुर्विधपरिच्छेदराहितमन्यत् किञ्चिदस्तीति प्रतिपत्तव्यमित्येवं प्राप्तम्॥ ३१॥

सामान्यात् तु॥ ३२॥

तुशब्दः पक्षं व्यावर्तयति। समानस्य भावः सामान्यम्। सेत्वाकाशादिशब्दास्तद्धर्मातिदेशार्थमुच्यन्ते, न तु तद्गतं दोषमपि कल्पयन्ति। संसारसागरोत्तरणोपायत्वात् सेतुत्वं, निर्लेपायाका-

---

* तथा सम्बन्धेत्यादि *। * तत्रैवेति *। दहरवाक्ये। तथाचाधारत्वेनैव प्रमेयत्वं, न तु सर्वोत्कृष्टत्वेनेति प्रमेयतो वस्तुपरिच्छेदाच्च परत्वसिद्धिरित्यर्थः। वस्तुपरिच्छेदे उदाहरणान्तरमाहुः। * प्राज्ञेनेत्यादि *। चतुर्थे हेतूदाहरणमाहुः * य एष इत्यादि *। * अतिदेशः प्रामाणमिति * तस्यैतस्य तदेव रूपं यदमुष्य रूपं यदमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति श्रावणात् तथेत्यर्थः। * गेष्णाविति, पर्वणी इत्यर्थः। केचिदाहुः। गेष्णौ तु नटगायनाविति कोशात् ताविति वयं प्रतीमः॥ ३१॥

सामान्यात्तु॥ सिद्धान्तसूत्रं व्याकुर्वन्ति * तुशब्द इत्यादि * * पक्षमिति * एतैर्हेतुभिः परत्वनिराकरणपक्षम्। * न तु तद्गतं दोषमपि कल्पयन्तीति * पूर्वाधिकरणे दोषनिरासस्य श्रुत्यैव कृतत्वाद्दोषं न कल्पयन्ति। सामान्यादिति सौत्रो हेतुः प्रयोजनगर्भ इत्याशयेन व्याकुर्वन्ति। * संसारेत्यादि *। षोडशकलश्रुतिरत्र पूर्वं

शत्वं, कामादिभिर्दोहाय चतुष्पात्त्वम्, अमृतत्वाय षोडशकलत्वम्, अदुर्लभत्वाय सम्बन्धः । दिव्यत्वाय धर्मातिदेशः । कुण्डपायिनामयने मासाग्निहोत्रवद् गुणार्थमेव वचनं, न दोषार्थमिति न ततोऽन्यशङ्कोत्पादनीया । तस्मान्न पूर्वोक्ता दोषाः ॥ ३२ ॥

बुद्ध्यर्थः पादवत् ॥ ३२ ॥

अन्यसमानधर्मवत्त्वं कुत्रोपयुज्यत इत्यत आह ॥ बुद्ध्यर्थः ॥ तथा व्यपदेशो बुद्ध्यर्थः । बुद्धिरेव प्रयोजनं यस्य । तथोपासनार्थमयुक्तमित्याशङ्क्य दृष्टान्तमाह । यथा भूतादीनां पादत्वज्ञानमुपासार्थं, तथा तत्तद्गुणवत्त्वेन ज्ञानार्थं स्वधर्मप्रशंसार्थमेवमुच्यते ॥ ३३ ॥

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

ननु स एवायमित्यतिदेशेऽपि तथा बुद्धिः सम्पद्यतैवेति व्यर्थो धर्मातिदेश इत्याशङ्क्य, तथोक्तेऽपि समानधर्मत्वज्ञानाभावे हेतुमाह ॥

नोदाहृता । तथाप्यन्यैरुदाहृतेति तत्तात्पर्यमप्युक्तम्, एवमन्यत्रापि बोधार्थम् । अतिदेशकपदाभावे सेत्वादिशब्दैः कथं सामान्यावगमः, कथं च तद्गुणानामेव ग्रहणमित्याकाङ्क्षायामाहुः । * कुण्डपायीत्यादि * तथाच पूर्वतन्त्रे यथा अग्निहोत्रनाम्ना तद्गुणानामतिदेशस्तथात्रापीत्यर्थः । * ततोऽन्यशङ्केति * नाममात्रात् तद्दोषशङ्का ॥ ३२ ॥

बुद्ध्यर्थः पादवत् ॥ सूत्रमवतारयन्ति । * अन्येत्यादि * । * अयुक्तमिति * उत्तमस्य हीनसामान्यकथनमयुक्तम् । * स्वधर्मप्रशंसार्थमिति * सेत्वादीनां तारकत्वादेर्धर्मस्य प्रशंसार्थम् । उपासनाधर्मस्य फलतः प्रशंसार्थं वा ॥ ३३ ॥

स्थानविशेषात् प्रकाशादिवत् ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । * तथोक्तेऽपीति ।* स एवायमित्युक्तेऽपि । व्याकुर्वन्ति ।

स्थानविशेषादिति ॥ धर्म्यैक्येऽपि स्थानविशेषमाप्त्या न समानधर्मवत्त्वं दृश्यते । अन्यत्रापि न तथात्वमायास्यतीत्यतिदेशो धर्मिणामपि कृत इत्यर्थः । अस्मिन्नर्थे दृष्टान्तमाह ॥ प्रकाशादिवदिति ॥ यदादित्यगतं तेज इति वाक्यादादित्यचन्द्राग्निगततैजसामैक्येऽपि न समानप्रकाशत्वं यथा तथात्रापीति ज्ञानसम्भवादित्यर्थः । आदिपदादेकस्यैव कालस्य यथोपाधिविशेषसम्बन्धादुत्तरायणत्वाद्युत्तमधर्मवत्त्वं तद्विपरीतधर्मत्वं तथेत्यपि संगृह्यते ॥३४॥

उपपत्तेश्च ॥ ३५ ॥

किञ्च । सत्यज्ञानाद्युक्तधर्मविशिष्टब्रह्मणोऽन्य उत्तमोऽस्तीति वदता तत्रैत उत्कृष्टधर्मवत्त्वं वाच्यम् । तच्चाशक्यम् । प्रमाणाभावात् । साम्येऽपि तथा विशेषाभावोऽद्वैतश्रुतिविरोधश्च । तस्मादितः परस्यानुपपन्नत्वादुक्तरूपमेव परमकाष्ठापन्नं वस्त्वित्युपपद्यत इत्यर्थः ॥ ३५ ॥

तथाऽन्यप्रतिषेधात् ॥ ३६ ॥

यथा सत्यादयः श्रुत्युक्तास्तथैव, न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुत्यैव ततोऽधिकस्य प्रतिषेधात् त्वयाऽप्यस्मदुक्त एव मार्गोऽनुसर्तव्य इत्यर्थः । अवतारकाले पूर्वं स्वशक्त्याविर्भावमकृत्वा

---

* धर्म्यैक्येऽपीत्यादि *।* अन्यत्रेति * स्फटिकादौ, वक्ष्यमाणदृष्टान्ते च । शेषं स्फुटम् । इत आरभ्य, प्रभूणामिति प्रतिभाति ॥ ३४ ॥

उपपत्तेश्च ॥ अन्यो नेत उत्कृष्ट इत्यत्रोपपत्त्यन्तरं सूत्राभ्यामाहेत्याहुः । * किञ्चेत्यादि * । * विशेषाभाव इति * अन्यस्योत्कर्षाभावः ॥ ३५ ॥

तथान्यप्रतिषेधात् ॥ * अस्मदुक्तमार्ग इति * एतस्यैव परत्वमितिप्रकारः । पूर्वसूत्रेणास्य गतार्थत्वमाशङ्क्य तन्निवृत्त्यर्थमा-

पश्चात् तदाविर्भावे कुतो लोकानां पूर्वावस्थातो भगवत्येवाधिक्य-
मिव प्रतीतं भवतीत्यभिप्रायेणान्यपदोपादानम् ॥ ३६ ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

प्रकरणमुपसंहरन् फलितमर्थमाह । अनेन सेत्वादिव्यपदेशानां मुख्यार्थकत्वनिराकरणेन व्यापकत्वं ब्रह्मणः सिद्धमित्यर्थ इति केचित् । तन्न । जन्माद्यस्य यत इत्यादिना सर्वदेशगतकार्यकर्तृत्वमुक्तमिति तेनैव व्यापकत्वस्य सिद्धत्वात् । नचाविरोधसाधनप्रकरणत्वात् पूर्वसिद्धं सर्वगतत्वमनेनोक्तग्रन्थेन कृत्वा, सेत्वादिवाक्यैः सर्वमविरुद्धमित्यर्थमिति वाच्यम् । अग्रिमपदवैयर्थ्यापत्तेरितिचेत् । अत्रैवं ज्ञेयम् । नोक्तकर्तृत्वेन व्यापकत्वमेकान्ततो ब्रह्मणि रोद्धुं शक्नोति । योगसिद्धदूरश्रवणादिवत् परिच्छिन्नेनाप्यनेकदेशगतकार्यकरणसामर्थ्यविशेषस्य वक्तुं शक्यत्वात् । अन्यथा पूर्वसिद्धव्यापकत्वविरोधेन सेत्वादिव्यपदेशैः परिच्छिन्नत्वेन ब्रह्मणोऽन्यस्य परत्वं न शङ्केत । विरोधपरिहाराय तु, सामान्यात् त्वविरोध इति वदेत् । तस्मादेवं सूत्रार्थो ज्ञेयः । अनेन ब्रह्मणोऽन्यस्य

हुः । * अवतारेत्यादि * । * आधिक्यमिव प्रतीतं भवतीति * तन्नाम्यहेतुकत्वशङ्का स्यादिति तन्निवृत्त्यर्थभिप्रायेण तथेत्यर्थः ॥ ३६ ॥

अनेन सर्वगतत्वमयामशब्दादिभ्यः ॥ सूत्रप्रयोजनमाहुः । * प्रकरणमित्यादि * । * प्रकरणमिति * अविरोधप्रकरणम् । उक्तोपष्टम्भायैकदेशिव्याख्यानं दूषयितुमुपक्षिपन्ति । * अनेनेत्यादि * । * केचिदिति * शाङ्कराः । दूषयन्ति । * तन्नेत्यादि * अर्थान्तरमुद्भाव्य दूषयन्ति * नचेत्यादि * कथमग्रिमपदवैयर्थ्यमित्यत उपपादयन्ति । * अत्रैवमित्यादि * । * शक्नोतीति * सूत्रकारः शक्नोति। कुतो न शक्नोतीत्याकाङ्क्षायामशक्तौ गमकमाहुः । * अन्यथेत्यादि * यदुक्तमविरोधसाधनेत्यादिना, तत्राप्युत्तरमाहुः । * विरोधेत्यादि * एवं मतान्तरमपाकृत्य सूत्रं व्याकुर्वन्ति । * तस्मादित्यादि * ।

परत्वानिरासेनाऽऽयामशब्दादिभ्यो व्यापकत्ववाचकश्रुतिवाक्यादिभ्यः साक्षात् सर्वगतत्वाप्रतिपादकेभ्य एव सर्वगतत्वं सिद्ध्यति, न तु गौतमीयानामिव कर्तृत्वाद्यनुपपत्त्येत्यर्थः । ते च शब्दा, आकाशवत् सर्वगतश्च नित्यः, ज्यायान् दिवो ज्यायान् आकाशात्, वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमित्यादयः । आदिपदात् "सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठती"त्यादिस्मृतयः संगृह्यन्ते। अनेन ब्रह्मणि श्रुतिरेव मुख्यं प्रमाणम्, अनुमानं तु विलम्बोपस्थितिकत्वेन साध्यसिद्धिपराहतमपीच्छाविशेषेण जननीयं चेदभ्युच्चयमात्रं पर्यवसास्यतीति भावः ॥ ३७ ॥

फलमत उपपत्तेः ॥ ३८ ॥

एवं सर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणां भजनीयत्वप्रयोजकं रूपमुक्त्वा तदितराधिकारिणां तदाह । ते हि फलेप्सव एव भजिष्यन्ति । तच्च फलदातृत्व एव सम्भवतीति तदाह । अत

---

* आयामशब्दादिभ्य इति * । आयामो दैर्घ्यं व्याप्तिरिति यावत् । शब्द्यतेऽनेनेति शब्दः । आयामस्य शब्दो यत्र ते आयामशब्दाः । ते आद्यो येषां तद्गुणसंविज्ञानः । तेभ्यः । * व्यापकत्ववाचकश्रुतिवाक्यादिभ्य इति * । व्यापकत्ववाचकयुक्तानि यानि श्रुतिवाक्यादीनि तेभ्य इत्यर्थः । फलितार्थबोधकत्वं स्फुटीकुर्वन्ति * अनेन ब्रह्मणीत्यादि * । * अभ्युच्चयमात्रमिति * । अनुमानस्य समुच्चयमात्रम् ॥ ३७ ॥ १० ॥

फलमत उपपत्तेः ॥ अन्ते एतदधिकरणप्रणयनेन अस्मिन् पादे, अविरोधादिनिरूपणप्रयोजनं सूचयन्ननुप्रसङ्गेनाधिकरणमारभत इत्याशयेनाहुः * एवमित्यादि * । * तदाहेति * भजनीयत्वमाह । नन्वत्र फलदातृत्वमेवोच्यत इति कथमेवमधिकारिविभागज्ञानमित्यत आहुः । * ते हीत्यादि * । व्याकुर्वन्ति । * अत इत्या-

ईश्वरादेव फलं भवति यत्किञ्चिदैहिकं पारलौकिकं वा ।कुतः?। उपपत्तेः । सर्वस्य वशी सर्वस्येशान इति श्रुतिर्वस्तुमात्रेशितृत्वमसङ्कुचितमाह । न ह्यन्यस्य वस्त्वन्यो दातुं समर्थोऽतो भगवानेव तथेत्यर्थः । केचित्त्वत्रैव कर्मणस्तत्कार्यापूर्वस्य च फलदातृत्वमाशङ्क्य तत्रानुपपत्तिमत्रोपपत्तित्वेन व्याकुर्वन्ति । तत्त्वग्रे जैमिनिमतोपन्यासस्वमतोपन्यासाभ्यां व्यास एव व्यक्तीकरिष्यतीत्यधुनैवाभासनिराकरणमग्रिमसूत्रद्वयवैयर्थ्यं स्यादिति चिन्त्यम् ॥३८॥

श्रुतत्वाच्च ॥ ३९ ॥

पूर्वसूत्रेण श्रुतमीशितृत्वं फलदान उपपत्तित्वेन निरूपितम् । इह तु साक्षाच्छ्रुतिमेव फलदातृत्ववाचिकां प्रमाणयति । सा च, स वा एष महानज आत्माऽन्नादो वसुदान इत्यादिरूपा।चकारात्, सुखं दुःखं भवो भाव इत्युपक्रम्य, भवन्ति भावा भूतानां मत्त एव पृथग्विधा इत्यादिरूपा स्मृतिः संगृह्यते ॥ ३९ ॥

धर्मं जैमिनिरत एव ॥ ४० ॥

अत्र कर्मवादी प्रत्यवतिष्ठते । ननु कर्मण एव फलमिति पक्षे-

दि * । एतेन प्रकृते ऐहिकामुष्मिकं फलं कर्मसाचिवेभ्यस्तत्तद्देवेभ्यो वा भगवतो वेति संशयः । तत्र तत्र तेषां तेषामुद्देश्यत्वेन श्रावणं सर्वस्य वशी सर्वस्येशान इत्यादिश्रुतिश्च सन्देहबीजम् । तेभ्य एवेति युक्तं, प्रतिनियमितत्वादिति पूर्वपक्षश्च बाधितः । एकदेशिमतमनूद्य दूषयन्ति । * केचित्त्वित्यादि * । * तत्त्वित्यादि च * ॥ ३८ ॥

श्रुतत्वाच्च ॥ भाष्यमत्र निगदव्याख्यातम् ।

माध्वास्तु विज्ञानमानन्दं ब्रह्म, रातिर्दातुः परायणमित्युदाहरन्ति ॥ ३९ ॥

धर्मं जैमिनिरत एव ॥ सूत्रं व्याकुर्वन्ति * अत्रेत्यादि *

ऽप्युपपत्तिश्रवणे तुल्ये। तथाहि । ईश्वरवादिनापि कर्मनिरपेक्षेण तेन फलमिति न वक्तुं शक्यम्। विधिवैयर्थ्यप्रवृत्त्यनुपपत्तिप्रसङ्गाभ्याम्। तत्सापेक्षत्वे तदेवास्तु कृतं तत्सापेक्षेण तेन। नचाचेतनं चेतनाधिष्ठितमेव कार्यक्षममिति केवलेन तेन न फलं सम्भवतीति वाच्यम्। कर्मस्वरूपं स्वर्गादिकं च न लोकसिद्धम्। किन्तु श्रुतिसिद्धम्। तत्र च स्वर्गादिफलसाधकत्वेनैवोत्पत्तिवाक्येष्वर्थवादेषु चाग्निष्टोमेन स्वर्गकामो यजेत, अग्निहोत्रं जुहोति प्रजाकाम इत्यादि। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, परमेष्ठिनो वा एष यज्ञोऽग्र आसीत् तेन स परमां काष्ठामगच्छदित्यादिषु कर्म श्रूयते। स च तत्साध्यत्वेनैव। एवं सति लोकेऽन्यथा दर्शनेऽपि धर्मिग्राहकप्रमाणेन तथैव सिद्धत्वान्नात्र काचन शङ्का। ईश्वरवादिनो नित्यज्ञानादिमत्त्व इव। आमुष्मिकफलत्वेन तत्प्रतिबन्धकापगमे भवतीत्यावयोस्तुल्यम्। तस्याशुतरविनाशित्वेऽपि श्रुतिसिद्धकारणतानिर्वाहाय तद्व्यापारोऽपूर्वं कल्प्यते।

तुल्ये इति*तथाचात एव, उपपत्तिश्रवणाभ्यामेव हेतुभ्यां धर्मं फलकारणं जैमिनिराचार्यो मन्यत इति सूत्रयोजना। तदेतत्तौल्यं व्युत्पादयन्ति। * तथा हीत्यादि *। * प्रवृत्तीति * विध्यर्थज्ञानोत्तरप्रवृत्तेरनुपपत्तिप्रसङ्गो दूषणान्तरमित्यर्थः। * इत्यादीति * कामनावतः कर्माधिकारश्रावणात् स्वर्गकामादिपदैः कर्मफलं श्रूयत इत्यर्थः। * स चेति *। फलरूपः स्वर्गादिः। * अन्यथा दर्शनेऽपीति * राजादिभ्यः फलप्राप्तिदर्शनेऽपि। * अत्रेति *। वेदबोधिते कर्मणि तत्फले च। * नित्यज्ञानादिमत्त्व इवेति * धर्मिग्राहकेत्यादिकमत्रापि सम्बध्यते। ननु यदि कर्मणैव फलं तदा तदव्यवहितोत्तरं कुतो न जायत इत्यत आह। * आमुष्मिकेत्यादि *। * तदिति *। स्वर्गादिरूपं फलम्। दूषणान्तरमाशङ्क्य परिहरति। * तस्याश्वित्यादि *। तर्हि तौल्यान्नैकतरस्य फलहेतुत्वनिश्चय, उभयोः समुच्चयो

अविषमादीश्वराद् विषमफलोत्पत्त्यनुत्पत्तिर्वैषम्यनैर्घृण्ये च स्याताम् । अतः कर्मण एव फलमिति जैमिनिर्मनुते ॥ ४० ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

तुशब्दः पूर्वपक्षव्युदासार्थः । बादरायणस्त्वाचार्य इतः पूर्वोक्तमीश्वरमेव फलदत्वेन मनुते । कुतः? हेतुव्यपदेशात् । हेतुत्वेन श्रुतौ व्यपदेशादित्यर्थः । एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत, एष उ एवासाधु कर्म कारयति यमधो निनीषत इति श्रुतौ न केवलं कर्मकारयितृत्वमुच्यतेऽपि तु फलदित्सया तया तथात्वमतः फलदत्वमीश्वरस्यैव व्यपदिष्टं भवतीति नानुपपत्तिः काचित् । नन्वीश्वरस्य स्वतः फलदाने समर्थस्य फलदित्सायां सत्यां कर्मकारणे को हेतुः? कार्यवैचित्र्यं च कथमित्यादि चोद्यं निरस्तम् । विद्वन्मण्डने श्रीविट्ठलेन च । अतः सकामैरपि स एव भजनीयो नान्य इति सिद्धम् ॥ ४१ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥

वेत्याकाङ्क्षायां स्वमतोपष्टम्भायाह । * अविषमादित्यादि * ॥ ४० ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ दूषणमाशङ्क्य तत्परिहारः प्रागेवोक्त इति स्मारयन्ति । * नन्वित्यादि * ॥ ४१ ॥ ९१ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे तृतीयाध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥

तृतीयाध्यायस्य तृतीयः पादः ।

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

पूर्वपादे जडजीवधर्मनिराकरणेन शुद्धस्यैव सच्चिदानन्दविग्रहरूपत्वं ब्रह्मणो निरूपितम् । इह तु ब्रह्मगता एव धर्मा विचार्यन्ते । ते चेद् एकस्मिन् वाक्य एव सर्वे पठिता भवेयुस्तदा न विचारणीया भवेयुर्विरोधाभावात् ।पठिताश्च तत्तदुपासनप्रकरणेषु

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ अथ तृतीयपादं व्याचिख्यासवः सङ्गतिबोधनाय पूर्वपादार्थमनुवदन्तः प्रस्तूयमानस्यार्थमाहुः । * पूर्वपादेत्यादि * । उपनिषद एव ब्रह्मणि मुख्यं प्रमाणमिति तासां यथा बोधकता स प्रकारः साधनाध्याये विचार्योऽन्यथा ब्रह्मबोधाभावे तद्विषयकमुपासनादिसाधनं न कर्त्तुं शक्येताऽपराधं वा दध्यादिति तदर्थं पूर्वस्मिन् पादे जडजीवधर्मनिराकरणेन तत्र प्रत्याख्यमानानां धर्माणां ग्राह्यत्वस्य ब्रह्मणो विरुद्धधर्माश्रयत्वस्य च व्यवस्थापनात् प्रपञ्चविलक्षणशुद्धसच्चिदानन्दविग्रहरूपत्वं ब्रह्मणो निरूपितम् । तेनैतादृशतया ता ब्रह्म बोधयन्तीति सिद्धम् । इह तु तादृशब्रह्मगता एव धर्मा उपासनादेरन्तरङ्गसाधनत्वात् तच्छेषतया उपसंहाराद्यर्थं विचार्यन्ते । तथाच पूर्वस्यास्य च पादस्योपजीव्योपजीवकभावः सङ्गतिरित्यर्थः । नन्वतीते पादे उभयलिङ्गाद्यधिकरणैर्विरुद्धसर्वधर्माधारब्रह्मस्वरूपबोधनेनोपनिषदां बोधनप्रकारावधारणे धर्माऽसद्भावशङ्कानिवृत्तौ पुनः साधनशेषतयाऽपि तद्विचारस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः । * ते चेदित्यादि * । ते चेत्तथा भवेयुस्तदा तत्तदुपासने तेषामितरेतरविरुद्धानामपि, आसीनो दूरं व्रजतीत्यादिवद् ब्रह्मधर्मत्वेनोपादेयतया विरोधाभावाद्, अथ चेदं भावनादौर्घट्यं विभाव्यते तदापि, स्थितं व्रजन्तमासीनं शयानं वा गुहाशयमितिवत् कालभेदेन पर्यायभेदेन च भा-

क्वचित् त एव, क्वचिद् भिन्नाः । यथा वाजसनेयिनः पञ्चाग्नि-विद्यां प्रस्तुत्य षष्ठमन्यमग्निं पठन्ति । तस्याग्निरेवाग्निरिति । छन्दोगास्तु पञ्चसंख्ययैवोपसंहरन्ति । अथ य एतानेवं पञ्चाग्नीन् वेदेति । तथा प्राणसंवादे मुख्यप्राणादन्यांश्चतुरः प्राणान् वाक्-

---

वने विरोधाभावाच्च विचारणीया भवेयुः । पठितास्तु न सर्वे एकत्र किन्तु तत्तत्प्रकरणे क्वचित्त एव क्वचिद्भिन्नाः । यथा पञ्चाग्निविद्या-यामग्न्यन्तरांशे त एव, षष्ठस्त्वधिक इति भेदः । प्राणविद्यायामन्ये प्राणास्त एव,रेतस्तद्भिन्नमिति । एवं सत्यब्रह्मविद्यायां व्याहृतिश-रीरांशे तौल्यं स्थानभेदेनाहरित्यहमित्युपनिषदोर्भेद इति । तथाच तासूपासनासूपास्यविशेषणत्वादिना ब्रह्मपदस्याऽनुक्तत्वात् तेषां तद्धर्माणां च ब्रह्मत्वे ब्रह्मधर्मत्वे च सन्देहाद्विचारणीयाः । पादान्ते ब्रह्मण एव सकलफलदातृत्वस्य विचारितत्वात् । पूर्वोत्तरकाण्डयो-स्तु तेषु तेषु वाक्येषु तत्तत्कर्मणा तत्तद्देवप्रीत्या तेन तेन तैस्तैः फलस्य श्रावणात् कथं ब्रह्मणः फलदातृत्वमित्याकाङ्क्षायां तेन तेन साधनेन तुष्टं ब्रह्मैव तैस्तै रूपैः फलं ददातीति वक्तुं विचार्यन्त इत्यर्थः। यद्यपि प्राणादिविद्या न परविद्यास्तथापि प्राणादीनां ब्रह्मत्वेनोपास-नस्य वाक्यान्तरेषूक्तत्वात् तेषु च ब्रह्मशब्दस्य ओमित्येतदक्षरमुद्गी-थमित्यत्रोद्गीथशब्दवत् तद्विशेषणत्वेन कार्यरूपप्राणादिव्यावर्त्तनार्थ-तायास्तं यथा यथोपासते तथैव भवति तद्धैतान् भूत्वाऽवतीति श्रु-त्याऽध्यवसितत्वात् । प्राणादीनामपि ब्रह्माङ्गत्वेन तद्धर्मा अपि ब्रह्म-धर्मा एव, परं न मुख्या इति ब्रह्मधर्मत्वज्ञापनायैतदुदाहृतम् । तथाच यद्यपि ब्रह्मणि सर्वत्र सर्वे धर्माः सन्ति; तथापि तस्य तस्य संराध-कस्य तत्तत्फलार्थं तांस्तानेव धर्मान् ब्रह्म प्रदर्शयति, न सर्वेषां स-र्वानतस्तत्तदुपासनायां ते त एव ध्यातव्यास्तत्तद्विधायकवाक्यानु-रोधात् । तत्र चेदुक्तरीत्या संदेहस्तदोपासना न कर्त्तुं शक्येतेति तदर्थं विचार्यन्त इति भावः । अत्र षष्ठोऽग्निर्बृहदारण्यके पञ्चमप्रपा-ठके पठितः । पञ्चाग्नयस्तु छान्दोग्ये सप्तमे प्रपाठके । प्राणसंवादो-ऽपि छान्दोग्ये तत्रैव । बृहदारण्यके तु पञ्चमे प्रपाठके द्रष्टव्यः । अत्र

चक्षुःश्रोत्रमनांसि पठन्ति । वाजसनेयिनस्तु तमपि पंञ्चमं पठन्ति। अपरञ्च । अथर्वोपनिषत्सु क्वचिद् गोकुलवृन्दाकाननसञ्चरद्गोपरूपमनल्पकल्पद्रुमप्रसूनविरचितविचित्रस्थलीककालिन्दीसलिलकल्लोलसङ्गिमृदुतरपवनचलदलकविराजमानगण्डमण्डलद्युतिमण्डितकुण्डलप्रभानुभावितवामांसमिलन्मूर्द्धन्यमहामणिकमुरलिकामुखावलीमिलदतितरलकरकमलयुगलाङ्गुलीवशंवदविविधस्वरमूर्च्छनामोहितव्रजवरीनितम्बिनीकदम्बकटाक्षकुवलयार्चितं, क्वचित् कोदण्डमण्डितभुजदण्डखण्डितप्रचण्डदशमुण्डमतिविचित्रचरित्राभिरामं रामस्वरूपं, क्वचिदतीकरालवदनीवत्रासितकमलाकमलासनवृषभाऽऽसनादिकं नृकेसरिरूपं, क्वचिदुरुक्रमादिरूपञ्च निरूप्यते। तथाच

———

पादे अपरविद्योक्ता एव धर्मा विचार्यन्ते, न परविद्योक्ता अपीति शङ्कां निवारयन्त एव प्रस्तूयमानाधिकरणस्य विषयमाहुः । * अपरं चेत्यादि * । अयमर्थः । गोपालपूर्वतापिन्यां "सच्चिदानन्दरूपाय कृष्णायाऽक्लिष्टकर्मणे। नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे" इत्यादिना भगवतः कृष्णस्य परब्रह्मत्वमुक्त्वा, तदु होवाच हैरण्यो गोपवेषमभ्राभं तरुणं कल्पद्रुमाश्रितं तदिह श्लोका भवन्ति । सत्पुण्डरीकनयनमित्यारभ्य, चिन्तयँश्चेतसा कृष्णं मुक्तो भवति संसृतेरित्यन्तैः स्वरूपं ध्यानफलं चोक्तम्। 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति चोक्तम् । श्रीभागवते च, कृष्णस्तु भगवान् स्वयमित्युक्तम्। दशमस्कन्धसुबोधिन्यां च परब्रह्मत्वं व्युत्पादितम् । तथा रामतापनीये'रमन्ते योगिनो यस्मिन्नित्यानन्दे चिदात्मनि । इति रामपदेनाऽसौ परंब्रह्माभिधीयत' इति श्रावणात्। श्रीमदाचार्यैरपि पञ्चमस्कन्धनिबन्धप्रकाशे 'कदाचिद्रामः पुरुषोत्तमावतार एवेति पद्मपुराणादवसीयते' इति कथनात् । अग्निकुमाराणां च व्रजे वो मनोरथः संपत्स्यत इति श्रीरामेण वरदानाच्च नवमस्कन्धे श्रीरामचरित्रे, 'स यैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा । कोशलास्ते ययुः स्थानं यत्र गच्छन्ति योगिन'

द्रव्यदेवताभेदाद् यागभेदवद्धर्माणामावापोद्वापाभ्यां दृष्टादृष्टफल-भेदाच्च वेद्यभेदे प्राप्ते ब्रह्मानेकत्वापत्तौ श्रुतिविरोधाद् विनिगम-

---

इत्यविशेषेण सर्वेषां मुक्तिदानाच्च श्रीरामस्य पुरुषोत्तमरूपत्वम् । नृसिंहस्वरूपं तु, नृसिंहविद्यावत्युत्कर्षविश्रान्त्या नृसिंहस्य परत्वम-वसीयते । तद्विद्याया रहस्यत्वश्रावणाच्च । उरुक्रमरूपे तु विष्णुसू-क्तश्रीभागवतादिषु अनन्तवीर्यत्वकथनात्, सत्यलोकस्थापकत्वरूपा-द्भुतकर्मकथनाच्च परत्वं निरूप्यते । आदिपदेन नारायणानुवाकस-द्विद्यात्मविद्याश्वेताश्वतराद्युक्तनारायणसदात्मरूपं शिवरूपमन्यच्च तत्र तत्रोक्तं रूपान्तरं संगृह्यते । चकारेण तत्र तत्रोक्तविभूतिरूपसं-ग्रहः । तथाच श्रुतौ ब्रह्मणो नानारूपनिरूपणात् । तेषु किं समान-त्वमुत कस्यचिच्छीघ्रं फलदातृत्वेन सुगमोपायैः फलत्वेन परमद-यालुतया जीवापराधनिवारकत्वेनाधिक्यमिति संदेहाऽनपायात्तदर्थे विचार आवश्यक इत्यर्थः । एवमत्र विषय उक्तः । तथाच पूर्वत्र ब्रह्मप्राधान्येन विचारोऽत्र ब्रह्मरूपप्राधान्येनेति विशेषः ॥ संशयं व्युत्पादयन्ति । * तथाचेत्यादि * । तथा तेन धर्मभेदप्रकारेण द्रव्यदेवताभेदाद्यागभेदवत् । यथा पूर्वतन्त्र आमिक्षाधिकरणे, तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्य-त्रामिक्षावाजिनात्मकघनविरलद्रव्यद्वयरूपक एको याग उत याग-द्वयमिति सन्देहे द्रव्यदेवताविशिष्टयागान्तरविधौ गौरवं व्यापा-रान्तरकल्पनापत्तिश्चेति न यागद्वयं युक्तं, किन्त्वामिक्षायाग एव वाजिनं गुणो विधीयते । वाजिभ्य इत्यनेन च वाज आमिक्षारूपमन्नं येषामिति योगेन पूर्वोक्ता विश्वेदेवा एवोपलक्ष्यन्त इति पूर्वः पक्षः । तत्रोत्पत्तिशिष्टामिक्षाद्रव्यावरुद्धे यागे उत्पन्नशिष्टं वाजिनं गुणत्वेन प्रवेशं न लभते, निर्बलत्वात् । ततश्च तद् द्रव्यं स्वसम्बन्धिनं यागं पूर्वस्माद्भिनत्ति । वाजिपदं चाश्वे रूढत्वान्न योगेन विश्वान्देवान् उपलक्षयिष्यति । योगस्य रूढितो नैर्बल्यात् । तथा सति विधिव्या-पारान्तरयोः कल्पनस्य प्रामाणिकत्वात् तत्कृतं गौरवं न दोषायेति द्रव्यदेवताभेदात् तत्र यथा यागभेदस्तद्वदत्रोपासनायां गोपालराम-

काभावात् सर्वेषामुपासनाविषयाणामब्रह्मत्वमापतितम् । ननूपासनाविषयाणामौपाधिकत्वात् तेषाञ्चाविद्याकल्पितत्वात् तद्विशिष्टानां तथात्वं युक्तमेव । नचैवं तन्निरूपकाणां वेदान्तानामब्रह्मपरत्वप्रसङ्गः । शुद्धस्य ब्रह्मणो दुर्ज्ञेयत्वेनोपाधिविशिष्टोपासनया चित्तशुद्धौ सत्यां स्वत एव तज्ज्ञानं भविष्यतीत्येतत्तात्पर्यकत्वादिति चेत् । मैवम् । समन्वयविरोधापत्तेः । तासां ब्रह्मविद्यात्वहा-

---

नृसिंहादिरूपभेदेन परस्परं तेषां भेदात् धर्माणामावापोद्वापाभ्यां दृष्टादृष्टफलभेदाच्च प्रापञ्चिकानां मुरलीकोदण्डधरत्वादीनामावापेन तद्विलक्षणानां सदेकरसत्वास्थूलत्वादीनामुद्वापेन चेत्येवं ताभ्यां तत्तद्रूपगततत्तद्धर्मावापोद्वापाभ्यां च । साकारदर्शननिष्कलदर्शनाऽऽदिरूपयोर्दृष्टफलयोस्तत्तत्पदप्राप्तिब्रह्मभावरूपयोरदृष्टफलयोर्भेदाच्च ज्ञानवेद्यात् सर्वफलदातृत्वेन प्रतिपादितात् परब्रह्मणोऽपि सकाशाच्च तत्तद्वाक्यवेद्यानां भेदे प्राप्ते तत्तद्वाक्येषु ब्रह्मत्वेनैवोपासनस्य विहितत्वाद् ब्रह्मानेकत्वापत्तावेकमेवाद्वितीयमिति श्रुतिविरोधादुपास्यरूपेषु, किं ब्रह्म, किन्नेति विनिगमकाभावात् सर्वेषामुपासनाविषयाणामब्रह्मत्वमापतितम् । अतः किं सर्वेषामब्रह्मत्वमुत यागवद् ब्रह्मभेद, उत सर्वत्रैकमेव ब्रह्म प्रतिपाद्यमिति संशय इत्यर्थः । पूर्वपक्षमाहुः । * नन्वित्यादि * । ननूपासना नाम चिन्ता–भावनाद्यपरपर्याया शास्त्रप्राप्ता सविषयकज्ञानरूपा मनोवृत्तिः । ब्रह्म तु निर्विषयज्ञानैकरसम् । न तादृशनानाविधधर्मवत्तया वृत्तिविषयीभवितुमर्हतीत्युपासनाविषयाणां धर्माणामौपाधिकत्वादौपाधिकानां चाविद्याकल्पितत्वात् तद्धर्मविशिष्टानां तेषां तेषां रूपाणामब्रह्मत्वं युक्तमेवेत्यर्थः । * नचेत्यारभ्य चेदित्यन्तम् * स्पष्टम् । एवमत्रैकः पूर्वपक्षः । तमन्योदूषयन्नाहं । * मैवमित्यादि * । न वेदान्तानामुक्तविधतात्पर्यकत्वेन ब्रह्मपरत्वं शक्यवचनम् । समन्वयविरोधापत्तेः । सर्वे वेदा यत्पदमामनन्तीत्यादयः श्रुतयो हि, अणोरणीयान्महतो महीयानित्यादिभिर्विरुद्धधर्माश्रयमेवाशरीरमप्राकृततनुं सर्वाधारं मृत्यूपसेचनकं ब्रह्म बोधयन्ति । तथा, अदृश्यमग्राह्यमित्यादि प्रकृत्य, यथो-

नेश्च । श्रुतेः प्रतारकत्वापत्तेश्च । अपरञ्च । "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणा" इत्यन्यथाज्ञानं निन्दन्ती श्रुतिः कथं फलसाधकत्वेन तत्तदुपासनां वदेत् । स्पष्टार्थानां श्रुतिवाक्यानां निर्णयमकृत्वा सन्दिग्धार्थानां ज्योतिराकाशादिशब्दानां तद्वाचकत्वं न निर्णीयाद् भगवान् व्यासः । एवञ्च सत्युक्तरीत्या यागवत्तेषां परस्परं भेदश्चा-

---

भेनाभिः सृजते गृह्णते चेत्यादिभिः कारणत्वसर्वज्ञत्वादिकं तत्र वदन्ति । अक्षरम् अस्थूलम् अनण्वित्यादिना प्रपञ्चविलक्षणं प्रकृत्य प्रशासितृत्वादिधर्मकं वदन्तीति विरुद्धधर्माश्रय एव ब्रह्मणि श्रुतीनां समन्वयात् त्वदुक्तरीत्याङ्गीकारे तद्विरोधापत्तेः । उपासनाविषयाणामब्रह्मत्वे तद्बोधकानां ब्रह्मानिरूपकतया ब्रह्मविद्यात्वहानेः । चकारेण, परं ब्रह्म परं धामेत्यादिस्मृतीनामपि विरोधात् । अन्यथा सतो ब्रह्मणोऽन्यथा कथनेन तत्तच्छ्रुतेः प्रतारकत्वापत्तेश्च । अथाप्तोक्तविषभोजनकथनवदिदं क्रममुक्तिहेतुत्वेन वदतीति न प्रतारकत्वमिति विभाव्यते, तदप्ययुक्तमित्याह । * अपरञ्चेत्यादि * । यदि तथा स्यात् तदा योऽन्यथा सन्तमित्यादिनाऽन्यथाज्ञानं निन्दन्ती श्रुतिश्चित्तशुद्धिद्वारा क्रममुक्तिहेतुत्वेन तदुपासनां न वदेत् । आत्मापहारेण महापापापादकतया चित्ताशुद्धिजनकत्वात् । किञ्च । इदं व्यासस्यापि न सम्मतमित्याह । * स्पष्टार्थानामित्यादि * । यदि हि तेषामब्रह्मत्वं व्यासोऽभिप्रेयात् तदा कृष्णरामादिपदानि देवतावाचकानि ब्रह्मवाचकानि वेति सन्दिह्य तन्निर्णयमपि किञ्चित् कुर्यात् । अतः श्रुतिविरोधो व्यासाशयविरोधश्च न वैयासदर्शनानुसारिणो युक्त इत्यर्थः । एवं तन्मतं दूषयित्वा स्वमतमाह । * एवञ्च सतीत्यादि * । उक्तहेतुभिः सर्वासां श्रुतीनां ब्रह्मनिरूपकत्वेऽपि सति उक्तरीत्या यागवद् धर्मभेदकृतधर्मिभेदेनामिक्षावाजिनयागवत् तेषां तत्तद्विद्यावेद्यानां परस्परभेद आवश्यक इति । अतो हेतोरुभयतःपाशा रज्जुः । एतदङ्गीकारे भेदापत्त्या अयमेव स योऽयमित्याद्य-

वश्यक इत्युभयतःपाशारज्जुरिति प्राप्तेऽभिधीयते। सर्ववेदान्तप्रत्ययम्। अनेकरूपनिरूपकैः सर्ववेदान्तैः प्रत्ययो ज्ञानं यस्य तत्तथा। ब्रह्मणोऽनन्तरूपत्वेऽपि यानि यानि रूपाणि विविधैर्जीवैरुपासितुं शक्यानि तानि तानि रूपाणि तैस्तैर्वेदान्तैर्निरूप्यन्त इति तावद्रूपात्मकमेकमेव ब्रह्मेत्यर्थः। तत्र हेतुश्चोदनाद्यविशेषाद् इति। चोद्यते कर्त्तव्यत्वेन बोध्यतेऽनेनेति चोदना विधिवाक्यमिति यावत्।

भेदश्रुतिविरोधादेतदनङ्गीकारे चैकदेशिमतवद्रूपाणामविद्याकल्पितत्वापत्त्या चोभयथापि दोष इति प्राप्त इत्यर्थः। अत्र सूत्रप्रतीकमुपन्यस्य समादधते। * अभिधीयत इत्यादि *। सूत्रे व्यधिकरणपदो बहुव्रीहिः। प्रत्ययो विश्वासोत्पादकं ज्ञानम्। यद्यपि भाष्ये ज्ञानमेवोक्तं तथापि लोके प्रत्ययपदस्य विश्वासे प्रसिद्धत्वादत्र शब्दमहिम्ना तथा व्याख्यानेऽप्यदोषः। प्रतिज्ञा च ब्रह्मतदुपासनोभयविषयिणी बोध्या। नन्विदम्प्रतिज्ञावाक्यमुपासनापरतयैव व्याख्यातुमुचितम्। अतीतपादे ब्रह्मज्ञानप्रकारस्योक्तत्वात्। तेन निर्णीते वस्तुतत्त्वे यथा ज्ञातस्वरूपस्य गुरुप्रभृतेरुपासनं क्रियते तद्वद्ब्रह्मोपासनस्य कर्त्तव्यत्वेन विचार्यत्वाद्, न तु ब्रह्मपरतयाऽपि। तज्ज्ञानप्रकारस्य प्रागेवोक्तत्वात्। यदेकमव्यक्तमनन्तरूपमित्यनन्तरूपश्रुतौ वृत्तिसङ्कोचने मानाभावादसङ्कुचितवृत्तितया गणनापरिच्छेदरहितानां रूपाणां निरूपयितुमशक्यत्वाच्चेत्याशङ्कायामाहुः * ब्रह्मण इत्यादि *तथाच विरुद्धधर्माश्रयतया सामान्यतो ब्रह्मज्ञानस्योक्तत्वेऽपि, फलमत उपपत्तेरित्यत्र ब्रह्मणःफलदातृत्वस्य निर्णीतत्वात्तत्र कथं फलं ददातीत्याकाङ्क्षायां तैस्तैः रूपैस्तेन तेन साधनेन तत्तत्फलं ददातीति बोधयितुं तत्तत्फलसाधकोपासनार्थं तत्तद्रूपनिरूपणमिति प्रयोजनस्यानुक्तत्वेन तन्निरूपणस्यावश्यकत्वात् सर्वेषां निरूपणाशक्यत्वेऽपि कियतां निरूपणेऽनुपपत्त्यभावाच्चायमपि प्रतिज्ञार्थ इति भावः।

नन्वेवं हेतुबोधकपदासङ्गतिः। ब्रह्मणो नित्यत्वेन तज्ज्ञानस्य चाविधेयत्वेन पुरुषव्यापारविषयत्वस्य तत्र वक्तुमशक्यत्वादित्याशङ्कायां हेतुमुपन्यस्य व्याकुर्वन्ति।

* चोद्यत इत्यादि *। तथाच यद्यपि ब्रह्मत्वेन ब्रह्मणो न चोदना-

तस्याविशेषादित्यर्थः । यथैकस्मिन्नग्निष्टोमे शाखाभेदेऽपि चोदना तथैव भवत्यग्निष्टोमेन यजेतेति । तथेहापि सर्वेषु वेदान्तेषु ब्रह्मत्वेनैवोपासना विधीयत इति तथा । आदिपदात् साक्षात्परम्पराभेदेन मोक्षफलकत्वकथनमप्युपासनानामविशिष्टमिति प्रयोजनसंयोगः संगृह्यते ॥ १ ॥

विषयत्वं, तथाऽप्युपासनाविषयत्वादस्त्येव तद्द्वाराविषयत्वमित्यदोषः एतदेव बोधयितुं विभजन्ते * यथेत्यादि * । इहापीत्यस्यैव व्याख्यानम् * सर्वेषु वेदान्तेष्विति * । * तथेति * चोदनायामविशेषः । ननु शाखान्तराधिकरणे केवलानां रूपादीनां व्यभिचारित्वं हृदिकृत्य, एकं वा संयोगरूपचोदनाख्याऽविशेषादिति सूत्रे संयोगादिरूपहेतुचतुष्टयेनाभेदः साधित इति प्रकृते एकेन हेतुना कथमभेदसिद्धिरित्याकाङ्क्षायामाहुः । * आदीत्यादि * । अत्र भाष्ये रूपसंग्रहानुक्तिस्तु साध्यनिर्देशेनैव रूपस्यार्थादेव सिद्धिमभिप्रेत्य, सूत्रे चोदनायाः प्रथममुक्तिस्तु चोदनाविषयस्योपासनस्यापि सर्ववेदान्तप्रत्ययत्वज्ञापनेन तद्विषयस्य ब्रह्मणस्तद्द्वारा तथात्वज्ञापनार्था । तेनान्येषां त्रयाणामपि सङ्ग्रहः। अथवा चोदना च आदी च तत्समाहारश्चोदनादि । तस्याऽविशेषः समानत्वं चोदनाद्यविशेषस्तस्मादित्यर्थो बोध्यः । तथाचैवं संयोगरूपचोदनात्मकहेतुत्रयस्यापि चोदनादिपदेऽभिप्रेतत्वात् सुखेनाभेदसिद्धिरित्यर्थः । आख्याया व्यभिचारिता त्वग्रेप्रदर्शनीया ।

एवञ्चात्र सूत्रे ब्रह्म तदुपासनं च सर्ववेदान्तप्रत्ययं तत्तदुपासनावाक्येषु तत्तन्नानाधर्मवत्तया प्रतिपादनेऽपि न भिद्यते। चोदनाद्यविशेषात्।यत्र यत्र चोदनाद्यविशेषस्तदनेकवाक्येष्वनेकविधतया प्रतिपादनेऽप्यभिन्नम्। नानाशाखोक्तज्योतिष्टोमादिवदित्यनुमानं सिद्ध्यति तेन ब्रह्मणस्तत्साक्षात्कारस्य च साक्षात्पुरुषव्यापाराविषयत्वाभावेऽपि साक्षात्कारसाधनभूतप्रमाणसम्पादनद्वारा तादृशवृत्तिसम्पादनद्वारा च चोदनासम्बन्धो वर्त्तत एवेति तथा पुरुषव्यापारस्यापि सम्भवाद् ब्रह्मपक्षत्वेऽपि न हेतोः स्वरूपासिद्धत्वमिति ज्ञेयम् । नचैवं सति प्रतिज्ञापि केवलविज्ञानपरतयैव व्याख्यातुमुचितेति शङ्क्यम् । एक-

भेदान्नेतिचेदेकस्यामपि ॥ २ ॥

ननु द्रव्यदेवताभेदाद् यागभेदवदुपास्यानां धर्मभेदेन मिथोभेदादुक्तहेत्वसिद्धिं भेदान्नेति चेदित्यनेनाऽऽशङ्क्य तत्परिहारमाह सूत्रकार, एकस्यामपीति सूत्रावयवेन । यथैकस्यामपि गृहीतषोडशिकायामतिरात्रव्यक्तावऽगृहीतषोडशिकायाः सकाशाद् गुणाऽधिक्येऽपि नाऽतिरात्रभिन्नयागत्वम् । अतिरात्रलक्षणकर्मैवाधिकृत्य तत्तद्ग्रहणाग्रहणयोर्विधानादेवमिहापि ब्रह्मैवाधिकृत्य तत्तद्धर्मवैशिष्ट्यावैशिष्ट्ययोरुक्तत्वान्न ब्रह्मोपासनभिन्नत्वमुपासनासु । तथाच ब्रह्मधर्मत्वेनाभेदस्य विवक्षितत्वात् त्वदुक्तहेत्वसिद्धिः । एवं

वाचकविज्ञानपदाध्याहारापेक्षया पूर्वपादान्तिमसूत्रे जैमिनिमतोपन्यासे धर्मपदेन चोदनालक्षणतयाऽत्र विज्ञानपरामर्शवत् पूर्वं तु बादरायण इति पूर्वपदोक्तब्रह्मणः संनिहिततया तत्परामर्शस्यापि युक्तत्वाद् विद्याविचारस्य वेद्याधीनत्वाच्च तत्परतया व्याख्यानेऽप्यदोषात् ॥ १ ॥

भेदान्नेति चेदकस्यामपि ॥ अस्मिन् सूत्रे केचिन्नैकस्यामपीति पठन्ति । अर्थस्तु तत्रापि तुल्यः । सूत्रप्रयोजनं वदन्तो व्याकुर्वन्ति * नन्वित्यादि * । * मिथोभेदादुक्तहेत्वसिद्धिमिति * परस्परं रूपभेदाद्धेत्वेकदेशाभावेन पूर्वसूत्रोक्तस्य हेतोः स्वरूपासिद्धिम् । * इहापीति * उपासनावाक्येष्वपि । * नेत्यादि * न ब्रह्मणो भिन्नत्वंमतस्तदुपासनास्वपि न भिन्नत्वमित्यर्थः । एवं सूत्रं व्याख्याय सिद्धमाहुः । * तथाचेत्यादि * षोडशिग्रहणादिवत्तयोर्ब्रह्मधर्मत्वेन वेद्याभेदस्य विवक्षितत्वात् त्वदुक्तस्य भेदरूपस्य हेतोरेव प्रत्युत स्वरूपासिद्धिः । ब्रह्म तदुपासनं च न सर्ववेदान्तप्रत्ययं रूपभेदादित्येवं प्रतिसाधने धर्मभेदेन रूपभेदः साधनीयस्तत्र रूपभेदो धर्मभेदादामिक्षादियागवदित्यत्र, न भेदोऽतिरात्रवदिति दृष्टान्तेन हेतोः साधारण्याद् व्याप्यत्वासिद्धिरिति तेन रूपभेदासिद्धौ प्रतिपक्षहेतोरेवा-

सति यत्रैकस्मिन्नुपास्ये रूपेऽन्यस्माद्रूपादधिका गुणा उच्यन्ते तत्र तेषामुपसंहार उचित इति भावः । अत्रायं विशेषो ज्ञेयः । उपासनाविषयेष्वखिलेष्ववशिष्टं ब्रह्मत्वं ज्ञात्वैतेष्वेकतरं रूपं य उपास्ते

सिद्धिः । अत एव गोपालोपासनायां, चतुर्भुजं शङ्खचक्रशार्ङ्गपद्मगदान्वितमिति चतुर्भुजध्यानमुक्त्वा, ध्यायेन्मनसि मां नित्यं वेणुशृङ्गधरं तु वेति द्विभुजध्यानमप्युक्तमतो न धर्मभेदाद्रूपभेद इति तवैव दोषाद् राद्धान्तहेतुर्निर्दुष्ट इत्यर्थः । नन्विदं पूर्वपादान्त एव साधनीयम् । ब्रह्मणः फलदातृत्वस्य तत्रैवोक्तत्वात् । पादान्तरे तत्साधनस्य किं प्रयोजनमित्याकाङ्क्षायां वक्ष्यमाणोपसंहारसूत्रविचारेण तदाहुः । * एवं सतीत्यादि * । * एवं सतीति * उक्तरीत्या वेद्यैक्ये विद्यैक्ये च सति । * तत्र तेषामिति * न्यूनगुणकेऽधिकगुणानाम् । तथाच गुणोपसंहारः प्रयोजनमेतस्येति तदर्थमत्र विचार इत्यर्थः । ननु उपसंहारो नाम उप समीपे संहरणं, तत्र तत्रोक्तानां धर्माणां हेतुबलादावाप इति यावत् । तदत्र तत्तद्वाक्येऽनुक्तानां गुणानां तेन तेन हेतुना तद्वाक्योक्ते विषये सत्तामनुसन्धाय विशिष्टबुद्धौ विषयीकरणम् । एतच्चाग्रे, न वा विशेषादिति सूत्रानन्तरं, दर्शयतिसूत्राभासे वक्ष्यते । अत एतदर्थत्वमेतदधिकरणस्य न युज्यते । अत्र हि सर्वेषामुपासनाविषयाणां ब्रह्माभेदाद् ब्रह्मत्वेन रूपैक्यस्य यथाकथंचिन्मोक्षफलकत्वाच्च प्रयोजनैक्यस्य सर्वत्रोपासीतेत्यादिचोदनैक्यस्य ब्रह्मत्वेनोपासनाद् ब्रह्मोपासनेत्याख्यैक्यस्य च सिद्धत्वात् सर्वासामुपासनानामैक्ये प्राप्ते सर्वत्र सर्वधर्मोपसंहारप्राप्तेस्तत्र तत्र तत्तद्रूपतत्तत्फलकथनाच्च भेदे प्राप्ते सर्वानुपसंहारस्यापि प्राप्तेश्च तत्प्राप्त्यप्राप्तिविरोधादित्याकाङ्क्षायां, तथा यत्र ब्रह्मत्वेनोपासनं विधीयते तत्रैवं वेद्यैक्यात्तद्वाक्यवेद्यस्य गुणोपसंहारनिर्णयो भवति, यत्र पुनर्ब्रह्मत्वेनोपासनं न विधीयते यथा प्राणविद्यादौ, तत्र ब्रह्मत्वेनोपासनाया अभावेन वेद्यैक्याभावात् कथं निर्णय इत्याकाङ्क्षायां च सर्वत्रास्य न्यायस्य तौल्यादनेनैव निर्णयो विरोधाभावश्चेत्याशयेनाहुः । * अत्रेत्यादि * अत्र गुणोपसंहारे वक्ष्यमाणरूपो विशेषः प्रयोजकभेदबला-

तस्य तत्र सर्वे गुणा उपसंहर्त्तुमुचिताः। यस्त्वनन्तेषु विभूतिरूपेषु, ओँमित्येतदक्षरं ब्रह्मेति ज्ञात्वोपास्ते तस्य शाखान्तरीया अप्येतदक्षरोपासनप्रकरणोक्ता एवोपसंहर्त्तव्या, नान्ये । तद्रूपमधिकृत्यैव तेषां गुणानां कथनात् । अन्यथाऽतिप्रसङ्गात् । इयं तूपासनामार्गीया व्यवस्थोक्ता । भक्तिमार्गीया त्वेतद्विलक्षणा, साऽग्रेवाच्येति ॥ २ ॥

उक्तेय: । उपासनाविषयेष्वखिलेष्ववतार‍रूपेषु तुल्यं ब्रह्मत्वं वेदान्तवाक्यैरवधार्यम् ।तेष्वेकतरं रूपं यो, ब्रह्मत्वप्राधान्येनोपास्ते तस्य तस्मिन् रूपे सर्वे गुणा उपसंहर्त्तुमुचिताः । उपसंहारप्रयोजकस्य विरुद्धसर्वधर्माश्रयब्रह्मस्वरूपप्राधान्यस्य तत्र तेनानुसंहितत्वाद्युक्ताः । एतद्वैतत्पादोपान्त्ये समाहारादिसूत्रद्वये स्फुटीभविष्यति । यस्त्वनन्तेषु विभूतिरूपेषु वर्णात्मकोङ्कारादिषु तद्रूपप्राधान्यं ब्रह्मत्वस्य गौणत्वं चानुसन्धाय उपास्ते तस्यान्यत्रिकास्तदीया एवोपसंहर्त्तव्या नान्ये । तत्र हेतुः * तद्रूपमित्यादि * । * अन्यथातिप्रसङ्गादिति * प्रकरणानादरे तद्विरोधप्रसङ्गात् । तथाच तत्तद्रूपानुसन्धानकृतया व्यवस्थया विषयभेदेनोपसंहारानुपसंहारप्राप्त्यप्राप्तिविरोधाभावादस्याधिकरणस्योपसंहारार्थत्वं सुखेन युज्यते । किञ्चान्यत्रापि तत्तद्विभूतिरूपवेद्यैक्यादन्येषां च हेतूनां तत्र सत्त्वादनेनैव न्यायेन निर्णय इत्यर्थः । अत्रोपासनामात्रनिर्णयो न क्रियतेऽपि तु यद् ब्रह्मप्राप्तिसाधनत्वेन विवक्षितं तस्य सर्वस्येत्याशयेनाहुः । * भक्तीत्यादि * । * अग्र इति * । न वा प्रकरणभेदात् परोवरीयस्त्वादिवदित्यस्य द्वितीयव्याख्याने । नचोपासनातिरिक्ताया भक्तेरप्रसिद्धत्वादप्रस्तुतत्वाच्च तद्व्यवस्थास्मरणमाकस्मिकमिति वाच्यम् । गोपालतापनीये, भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन् मनःकल्पनमेव तदेव च नैष्कर्म्यमिति लक्षणभेदेन, समाप्तौ च, कृष्ण एव परो देवस्तं ध्यायेत् तं रसेत् तं भजेदिति ध्यानरूपोपासनातो भिन्नतया विधानेन चोपासनातिरिक्ताया भक्तेः प्रसिद्धत्वात् प्रस्तुतत्वाच्च तदभावात् । एकस्मिन्नेव प्रकरणे सृष्टिकर्तृत्वादिना माहात्म्यस्या-

नन्वग्निष्टोममेवोद्दिश्य यावन्तो धर्मास्तैत्तिरीयके पठ्यन्ते, तावन्तो वाजसनेयके। तथाच त्वदुक्तरीत्या वाजसनेयिनां तद्धर्मोपसंहारोऽपि न्याय्यो भवेन्न त्वेवं सः । शिष्टाचारादिविरोधात् । तथा पञ्चाग्निविद्यामधिकृत्योक्तोऽपि षष्ठोऽग्निर्न च्छन्दोगैः शक्यत उपसंहर्त्तुम् । तथैवाथर्वणिकैर्नैकस्मिन् रूपे रूपान्तरधर्मा इति प्राप्ते उत्तरं पठति ।

त्मत्वेन प्रियत्वस्य च बोधनेन श्रुत्यन्तरेऽपि श्रुतीनां माहात्म्यज्ञानपूर्वकसुदृढस्नेहरूपभक्तावेव तात्पर्यावसायाच्च । ननु विहिताविहितभेदेन भक्तिमार्गद्वैविध्यादत्र कस्य व्यवस्था वाच्येतिचेत् । श्रीभागवते श्रीनन्दादीनां फलकथनेनाविहितभक्तेरपि प्रामाणिकत्वसिद्धौ मन्दमध्यमयोरर्थे तद्व्यवस्थाबोधनस्याप्यावश्यकत्वादुभयोरपीति बुद्ध्यस्व । ननु सूत्रकारेणेदं कुत्रोक्तं येनैवमुच्यत इतिचेत् । उच्यते । अग्रिमसूत्रेऽधिकारस्यानुपसंहारहेतुताकथनेनात्र यथाधिकारनिर्णयसूचनात् सूचितमिति जानीहि । तस्मान्नात्र शङ्कालेशः । एवञ्चास्मिन्नधिकरणे इदं सिद्धम् । यो देवानां नामधा एक एव, एकं सद् विप्रा बहुधा वदन्तीत्यादिश्रुतिभिः, येऽप्यन्यदेवताभक्ता इत्यादिस्मृतिभिश्च भगवतः सर्वरूपत्वात् तेन तेन रूपेण भगवत एव तत्तत्फलदातृत्वं काण्डद्वये पुराणेषु चेति । तेनादित्याद्यङ्गोपासनास्वपि ब्रह्मोपासनात्वमेवेति च सिद्धम् ॥ २ ॥ १ ॥

अतः परं ताः कथं कर्त्तव्या इत्याकाङ्क्षायामग्रिमसूत्रेषु तत्प्रकार उच्यत इत्याशयेन सूत्रमवतारयन्ति । * नन्वित्यादि *। तथेति वैधर्म्ये दृष्टान्तः । अयमर्थः । यथा कर्मणां वैलक्षण्येऽपि संयोगरूपचोदनाख्याविशेषादिति शाखान्तराधिकरणोक्तन्यायादैक्यम्, एवमुपासनानामपि तेनैव न्यायेनावान्तरैक्यमपि सिद्धम् । तथात्रास्यैव हेतोर्गुणोपसंहारप्रयोजकतयाऽनेनैव हेतुना ज्योतिष्टोमादियागेषु शाखान्तरोक्तगुणोपसंहारोऽपि न्याय्यो भवेत् । तत्करणे शिष्टाचारविरोधस्तद्वियाशाखान्तरोक्तानादरे उपासनायामपि तदापत्त्या पञ्चाग्न्यादिविद्यासु षष्ठाग्न्याद्यनुपसंहारापत्तिरथर्वणाद्युक्तरूपेषु रूपा-

स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च
सववच्च तन्नियमः ॥ ३ ॥

स्वाध्यायो वेदः स एकमेव कर्म शाखाभेदेन भिन्नभिन्नप्रकारकं बोधयतीति तत्प्रयुक्तः सम्यग्भूतेऽग्निष्टोमादिलक्षण आचारे तत्तदङ्गाचारनियमोऽन्यूनानधिककरणलक्षण इत्यर्थः । तावद्भिरेवाङ्गैर्यागसम्पत्तेरधिककरणस्याप्रयोजकत्वात् तावतामेवाङ्गानां करणम् । ननूक्तं तद्धर्माणामप्युपसंहारस्त्वदुक्तरीत्या सम्भवतीत्यत आह । अधिकारादिति । सर्वेषां शाखिनां स्वस्वशाखोक्तकर्मण्येवाधिकारो न परशाखोक्तेऽप्यतोऽपि तथा नियमः । चकारात् स्वशाखोक्तात् कर्मणोऽतिरिक्ततत्करणे न्यूनकरणे च

न्तरधर्मानुपसंहारापत्तिश्चेति शिष्टाचारविरोधतौल्ये प्राप्ते तत्समाधानाय गुणानुपसंहारहेतुकथनेनोपसंहारप्रकारं वदन्नुत्तरं पठतीति बोध्यः ॥

स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ अत्र शाखान्तराधिकरणोक्तहेतोः पूर्वसूत्रे परामर्शात् पूर्वतन्त्रविचार्य्ये पूर्वकाण्डे च स्वाध्यायशब्दस्य वेदवाचकत्वेन प्रसिद्धेरस्मिन् सूत्रे तथात्वेनेत्यनेन तदुक्तस्य प्रसिद्धस्य प्रकारस्य, तन्नियम इति तच्छब्देन तत्प्रसिद्धाङ्गाचारस्य च ग्रहणमित्याशयेन व्याकुर्वन्ति । * स्वाध्यायो वेद इत्यादि * । तावन्मात्रनिरूपणस्य यागे तावदङ्गकरणनियमने बीजं स्फुटीकुर्वन्ति । * तावद्भिरित्यादि । * तथाच निरूपणप्रकारभेदस्य बाधकस्य सत्त्वान्नोपसंहार इत्यर्थः । द्वितीयं हेतुं व्याकर्त्तुमवतारयन्ति । * नन्वित्यादि * । तथाच शाखान्तरीयप्रकारविशेषकथनस्योत्पन्नशिष्टप्रायत्वेन नैर्बल्यात् स्वल्पकर्मभिर्वाजुसनेयिभिस्तैत्तिरीयाद्युक्तकरणे, अधिक तत्रानुप्रविष्टमिति न्यायेन बाधाभावाच्चास्याप्रयोजकत्वमाशङ्क्य हेत्वन्तरमाहेत्यर्थः । व्याकुर्वन्ति * सर्वेषामित्यादि * । अधिकारोपष्टम्भाय सम्मत्यन्तर-

यदस्यकर्मण इत्यादि प्रायश्चित्तश्रवणमपि तन्नियमे हेतुः समुच्चीयते । अत एव क्वचित् परशाखोक्तमपि व्यवस्थितविकल्पविषयत्वेन कल्पसूत्रे उच्यते । विकल्पे तूभयस्याशास्त्रार्थत्वमुपसंहारे तूभयस्यापि शास्त्रार्थत्वमतोऽपि नात्रोपसंहारशङ्का । अत्र दृष्टान्तमाह सववदिति । यथा सवा होमाः सप्तसूर्यादयः शतौदनपर्यन्ता वेदान्तरोदितत्रेताग्न्यनभिसम्बन्धादथर्वणोदितैकाग्निसम्बन्धाच्चाथर्वणिकानामेव कार्यत्वेन नियम्यन्ते । तथा तत्तच्छाखायास्तथात्वात्तत्तदुक्त एव कर्मणि तत्तच्छाखिनामधिकाराच्च स्वस्वशाखोक्ता-

---

माहुः । * अत एवेत्यादि * । यत उक्तहेत्वोरस्ति कर्मनियामकत्वमत एव हेतोः क्वचिद् यथा, कुटुरोऽसीत्यश्मानमादत्ते कुटरुरसीति वेत्यश्मादानमन्त्रे, यथा वा, उदितानुदितकालाभ्यां विकल्पिते होमे, उदिते जुहोत्यनुदिते जुहोतीति तैत्तिरीयवाक्यद्वयोक्तं व्यवस्थितविषयत्वेन तत्तत्कल्पसूत्र उच्यते । यदि प्रकारभेदोक्तेरधिकारस्य च नियामकत्वं न स्यात् तदा तत्र तत्र व्यवस्थाप्येत । यदि तत्र न व्यवस्थाप्येत तदा विकल्पो वा उपसंहारो वा प्राप्नुयात् । तत्राद्ये ऐच्छिकत्वेनाष्टदोषदुष्टत्वादुभयस्याशास्त्रार्थत्वम्, उपसंहारे तूभयस्यापि शास्त्रार्थत्वम् । तथापि विरुद्धत्वात् कर्तुं न शक्यमिति व्यवस्था आवश्यकी । अतो व्यवस्थावशादपि न कर्मण्युपसंहारशङ्केति म पूर्वोक्तस्याप्रयोजकत्वमित्यर्थः । ननु यदा शाखाभेदो न सिद्धस्तदा त्वधिकारनियामकत्वाभावादुपसंहारः स्यादित्यत आहुः । * अत्रेत्यादि * । ईदृशेऽपि स्थले दृष्टान्तमुखेन नियामकमाहेत्यर्थः । व्याकुर्वन्ति । * यथेत्यादि * । यथा सवाः सम्बन्धिभेदान्नियम्यन्ते तथा विभागाभावदशायामपि तत्तद्वेदे विद्यमानायास्तच्छाखाया एव नियामकत्वात् तथेत्यर्थः । एवमत्रोपसंहारहेतुः शोधितः । निरूपणप्रकारभेदादिबाधकरहित एव वेद्याभेद उपसंहारप्रयोजक इति । एवं कर्मण्युपसंहारबाधकान्युक्त्वा तेषामुपसंहारबाधकानामुपासनास्वपि तुल्यत्वात् सववच्चेति चकारेण ता-

दन्यूनानतिरिक्तकर्मकरणनियम इत्यर्थः। प्रकृतेऽपि •यद्रूपोपासना-प्रकरणे यावन्तो धर्मा उक्तास्तस्मिन् रूपे तावद्धर्मवत्त्वेनैवोपासना कार्या तद्बोधकप्रमाणानुरोधात्, न तु रूपान्तरोपासनप्रकरणोक्ता साधारणधर्मत्त्वेनापि। तथा सति मत्स्योपासकस्य चापशरादिकमपि भावनीयं स्यात्। पुरुषरूपोपासकस्य च लक्षयोजनायामश्रृङ्गादिकम्। नन्वाथर्वणोपनिषत्सु श्रीरामोपासनायां यो वै ये मत्स्यकूर्माद्यवतारा भुर्भूवः सुवस्तस्मै वै नमो नमः इति वाक्येन तदितरावतारूपत्वमुच्यते। तेन तद्धर्मवत्त्वमप्याक्षिप्यते?। सत्यमाक्षिप्यते तद्धर्मवत्त्वम्। तत्रायमभिसन्धिः। परमकाष्ठापन्नं ब्रह्मस्वरूपमिदमिति ज्ञात्वा उपासना कार्या। तेनैतस्यैवान्येऽवतारास्तत्तद्रूपेण तानि तानि कर्माण्ययमेव कृतवानिति ज्ञेयं परम्। न तु तस्मिन्नेव रूपेऽन्यावतारधर्मवत्त्वमपीति।

सामप्यत्र सङ्ग्रहादेतांस्तत्रापि सङ्क्रमयन्ति * प्रकृतेऽपीत्यादि *। * तथा सतीति * तद्बोधकप्रमाणमननुरुद्ध्य रूपान्तरासाधारणधर्मोपसंहारेऽङ्गीकृते सति। तथाचैवं तद्भावने निरूपणप्रकारभेदाधिकारभेदसम्बन्धभेदरूपस्यानुपसंहारनियामकत्रयस्यापि बाधापत्त्या अपराध आपद्येतातस्तथा न भावनीयमित्यर्थः। एतदेवैतत्पादान्ते, न वा तत्सहभावाश्रुतेरिति सूत्रद्वये सेत्स्यति। अत्र वादी साम्बन्धिकनियमस्याप्रयोजकत्वं शङ्कते। * नन्वित्यादि *। तथाचोक्तमन्त्रवर्णाच्छ्रीरामस्यावतारान्तररूपत्वे प्राप्ते तदुपासकस्य तथा भावनाधिकारस्यापि प्राप्तौ मन्त्रलिङ्गविरोधाद् यो यत्सम्बन्धी तेन तत्सम्बन्ध्येव ग्राह्यमिति सांबन्धिकोऽनुपसंहारनियमोऽत्राऽप्रयोजक इत्यर्थः। अत्र तदुक्तमुपगम्य सूक्ष्मेक्षिकया समादधते। * सत्यमित्यादि *। * तत्रायमभिसन्धिरिति *। आक्षेपप्रकाराशयः। * कार्येति *। अवतारूपोपासनकेन कार्या। * इति ज्ञेयं परमिति *। मन्त्रेऽवताराणामेव तत्त्वविधानदर्शनात् तथा भावनीयम्। * अन्यावतारधर्मवत्त्वमिति *। लक्षयोजनायामत्व-किणचक्रवत्त्वादि

तथाच तस्मिंस्तस्मिन्नवतारे तत्तद्धर्मवानिति श्रुत्या बोध्यते, न तु सर्वत्रापि। तत्र बाधकमुक्तमेव । प्राणाद्युपासनास्वेतावान् विशेषो, यथा कर्मण्यतिरेके प्रायश्चित्तश्रवणं बाधकम् । श्रीरामस्वरूपाद्युपासनासु च तेनावतारेणाकृतकर्मणस्तत्र भावनेऽपराधो बाधको, योऽन्यथा सन्तमात्मानमित्यादिवाक्यश्च । न तथा प्राणाद्युपासनासु अधिकगुणस्येतरत्रोपसंहारे किञ्चिद्बाधकं दृश्यत इति सत्कर्त्तुं शक्यते इति ।

कुतो न भावनीयमित्याकाङ्क्षायां तत्र हेतुमाहुः । * तथाचेत्यादि * । यथा तत्तच्छाखायां ज्योतिष्टोमादिस्तत्रधर्मवान् बोध्यते तथा तत्तत्तापनीयेषु तत्तदवतारे तत्तद्धर्मवानिति श्रुत्या बोध्यते, न तु सर्वत्र तद्भानतस्तथा भावने शास्त्रातिक्रम इति तथा न भावनीयमित्यर्थः । नन्वाक्षेपे कथमतिक्रम इत्यत आहुः । * तत्र बाधकमुक्तमेवेति * । आक्षेपे निरूपणप्रकारभेदादित्रयरूपं बाधकमुक्तमेव । तथाच तस्य यदि बाधकता नाङ्गीक्रियेत तदा शाखाकृतोऽग्निष्टोमाद्यङ्गनियमः सर्वेष्वप्याथर्वणिककार्यतानियमश्च भज्येत । अतस्तदभावायात्रापि तथा न भावनीयमित्यर्थः । ननु पूर्वसूत्रोक्तहेतुना सर्वैक्यसिद्धौ सर्वत्र सर्वगुणोपसंहारः प्राप्तस्तत्र समाचारसूत्रे निरूपणप्रकारभेदाधिकारभेदाधिकारभेदप्रायश्चित्तादिश्रवणसम्बन्धिभेदानामनुपसंहारनियामकत्वमादृतम् । तेन तच्छाखिभिस्तत्तदधिकारिभिस्तत्सम्बन्धिनियताः स्वाधिकारानुसारेण स्वशाखोक्ता गुणा उपसंहर्तव्या, नेतर इति सिद्धम् । तथा सति प्राणाद्युपासनायां शाखान्तरोक्तगुणोपसंहारो न स्यादित्यत आहुः।*प्राणादीत्यादि*।नच निरूपणप्रकारभेदरूपमुपसंहारबाधकमस्त्येवेति कथं बाधकाभाव इति वाच्यम् । कर्मणि न्यूनाधिक्ये प्रायश्चित्तवदुपासनायां तथा भावने प्रायश्चित्ताश्रवणान्निरूपणप्रकारभेदस्य प्रायश्चित्ताद्युन्नायकत्व एव बाधकत्वं, नान्यथेति तन्निश्चयात् । एवं प्रकारभेदेऽप्यधिकं तत्रानुप्रविष्टमिति न्यायेन दोषाभावात् तत्रत्यानां पदार्थानामबाधेनाधिकसंख्यायां न्यूनसंख्याया निवेशतस्तस्या अप्यबाधादधिकप्राणादिनिवेशेन पुरःस्फूर्त्तावभेदप्रतीतावपि प्राणाद्युपासनातो भिन्नतया तस्या बाधकत्वाभावात् । यो-

ननु पुरुषादिरूपस्य विग्रहस्यैव शुद्धब्रह्मत्वाद्यमेवावतारान्तरेष्वपि लीलाकर्त्तेति ज्ञानमनुपपन्नमितिचेत् । मैवम् । धर्मिग्राहकमानेनैकस्यैव शुद्धस्यैवानन्तरूपत्वेन* सिद्धत्वात् । वस्तुन एव तथात्वान्न काचिच्छङ्का । यथैकस्यैवान्योन्याभावस्यानन्तभावप्रतियोगिकतद्रूपत्वं तावत्प्रतियोगिकात्यन्ताभावरूपत्वं चाभावप्रतियोगिकान्योन्याभावात्यन्ताभावरूपत्वं चाभावाभावरूपत्वेऽप्यभावरूपत्वमेव चाङ्गीक्रियते, तथेहाप्यस्तु ।अभावत्वस्याप्रयोजकत्वात् । धर्मिग्राहकमानस्यैव तथात्वात् । तच्च तैत्तिरीयोपनिषत्सु । अतः परं नान्यदणीयसꣳ हि, परात् परं यन्महतो महान्तम् । यदेकमव्य-

---

ऽन्यथा सन्तमात्मानमितिवद्दोषबोधकवाक्याभावाच्च । अतः सुष्ठूक्तं तत्रोपसंहारे न किंचिद् बाधकं दृश्यत इति । एवं प्राणादिविद्यासूपसंहारबाधकाभावेन तस्मिन् साधितेऽपि परविद्यासु रूपान्तरे पूर्वोक्तरीतिकरूपान्तरगुणोपसंहारानुपपत्तिं शङ्कते । * नन्वित्यादि *।* इति ज्ञानमनुपपन्नमिति *। रूपान्तरविग्रहस्यापि शुद्धब्रह्मत्वादयमेव तथेत्यंशोऽनुपपन्नमित्यर्थः । तत्र समादधते । * मैवमित्यादि * । धर्मिग्राहकं मानं हि, यदेकमव्यक्तमनन्तरूपमिति वक्ष्यमाणश्रुतिरूपं तेन । वस्तुन एव तथात्वात् । ब्रह्मण एकत्वादत्र प्रकरणिनः श्रीरामचन्द्रस्यैव भगवत्त्वेन श्रावणात् तस्य विरुद्धधर्माश्रयत्वेन सर्वाकारत्वात् तस्यैव रूपान्तरेण तत्करणसम्भवेन न कापि शङ्केत्यर्थः । एतस्य बुद्धावारोहार्थं दृष्टान्तेनोपपादयन्ति । * यथेत्यादि * । नियतपदार्थवादिमते भावभिन्नो निषेधमुखप्रतीतिगोचरो य एको भावभेदरूपोऽन्योन्याभावपदार्थस्तस्यैव तादृशतादृशप्रतीतिबलेन अनन्तभावप्रतियोगिकेत्याद्युक्तप्रकारकतावद्रूपत्वं स्वीक्रियते, न तु निरूपकभेदमादाय स्वरूपनानात्वम् । तद्वदत्र ब्रह्मण औपनिषदत्वेन तद्वाक्यस्यैव नियामकत्वात् स्वरूपैक्येऽप्यनन्तरूपतया, तत्तल्लीलाकर्त्तृत्वज्ञानं स्वरूपैक्यं चोपपद्यत इत्यर्थः । ननु यद्येवं तल्लीलाकर्तृत्वेन ज्ञानं स्वरूपैक्यं चोपपन्नं तर्हि रूपान्तरेणापि रूपान्तरलीलाकर्त्ता रूपान्तरेऽपि रूपान्तरधर्मवानिति भावने

क्तमनन्तरूपं विश्वं पुराणं तमसः परस्तादित्यादिश्रुतिरूपं प्रसिद्धमेव । अपरञ्च । सर्वासामुपासनानां हि ब्रह्मविज्ञानसाधनत्वेन श्रुतौ निरूपणं क्रियते । यत्प्रकारिकोपासना विज्ञानहेतुः स प्रकारश्च निरूप्यते । एवं सत्येकस्यां शाखायां कतिपयगुणनिरूपणं तदितरस्यां शाखायां तदतिरिक्तानामपि गुणनामित्यत्र को हेतुरिति पृच्छामः । उपसंहारेण प्राप्तिमनिरूपणे हेतुं चेद् ब्रवीषि, तत्र वदामः । एवं सति न्यूनगुणनिरूपिका श्रुतिः स्वोक्तानपि गुणान्न वदेत् । तथाहि । उपासनानां ब्रह्मविज्ञानफलकत्वस्य निर्णीतत्वात् तस्य चैकजातीयत्वाद् घटवत् क्लृप्ताशेषसाधनसाध्यत्वादशेषतन्निरूपिकैव श्रुतिर्निरूपयेद् । अन्या तूपासनाया नामोक्त्वोपासीतेत्येतावदेव वदेद् । गुणानाक्षेपलभ्यत्वान्न वदेत् । उपसंहार्यानपि वा वदेत् । निरूपयति च गुणान्नोपसंहार्यान् । नच स्वस्वशाखामात्राध्येतॄणा-

---

को दोषः । सर्वत्रोभयलिङ्गत्वाविरोधस्य प्रागेव निर्णीतत्वादित्याशङ्कायां तथा भावने श्रुतितात्पर्यविरोधरूपं दोषं स्फुटीकर्तुं प्रतिबन्दिनमनुयुञ्जते । * अपरं चेत्यादि * । तत्रोत्तरमुद्भाव्य दूषयन्ति । * उपसंहारेत्यादि * । * तत्र वदाम इति * । तादृशे उत्तरे तथामिष्टापत्तिमुद्घाटयामः । न वदेदित्यनेन गृहीतं विभजन्ते । * तथाहीत्यादि * । * तस्य चेत्यादि * । तस्यैव ब्रह्मज्ञानस्य त्वन्मते सर्वगुणोपसंहारेणैकजातीयत्वाद् घटवत्क्लृप्ताशेषसाधनसाध्यत्वाद् यथा हि घटः कारणसमुदायेनैव जन्यते, न त्वेकेन तद्वत् त्वन्मते उपासनाया अप्यशेषगुणानुसन्धानरूपसाधनसाध्यत्वादशेषगुणनिरूपिकैव श्रुतिस्तामुपासनां निरूपदेयन्या तूक्तरीत्या वदेद्, गुणांस्तु न वदेदेव । उपसंहार्यानपि वा वदेत् । तैर्विना उपासनाया असिद्धेः । निरूपयति च कतिपयानेव, न त्वशेषान् । तथाचोपसनाश्रुतौ कतिपयगुणकथनमन्यथानुपपद्यमानं सद् रूपान्तरे रूपान्तरीयगुणोपसंहारो दोषायेति कल्पयत्यतः श्रुतितात्पर्यविरोध एव दोष इत्यर्थः । तत्कथनस्य तात्पर्यान्तरमाशङ्क्य निषेधन्ति । * नचेत्यादि * ।

मुपासनासिद्ध्यर्थं सर्वशाखासूपासनप्रकारोक्तिरितिवाच्यम् । परशाखाज्ञानेन तदुक्तगुणोपसंहारस्याप्यसम्भवेनोपासनाया एवासम्भवापातात् । तस्मात् स्वस्वशाखोक्तप्रकारिकोपासनायामेव सर्वेषामधिकारात्तथैव ब्रह्मविज्ञानं भवति । तैत्तिरीयाणां वाजसनेयिप्रभृतीनां चाग्निष्टोमसम्पत्त्या । स्वर्ग इव प्रकृते ब्रह्मैक्यात्तद्विज्ञानं ब्रह्मविज्ञानमेव । न हि रूपरसगन्धादिमत्यां भुवि पुरुषभेदनैकस्यैव चैकैकप्रकारकं यद्भूज्ञानं न तद्भूज्ञानम् । एतेनानन्तधर्मवत्त्वं ब्रह्मणि ज्ञापितम् । तदुक्तम्, परास्य शक्तिर्विविधैव श्रूयते स्वाभा-

---

तथाचोपासनाया नाममात्रोक्तौ प्रकाराज्ञानात् तत्तच्छाखिनाम् उपासनाया असिद्धेस्तदुपकाराय तथोक्तिरिति तु न वक्तुं शक्यमित्यर्थः । तत्र हेतुः । * परेत्यादि * । तथाचैवं तात्पर्यकल्पनेऽपि तावन्मात्रकथनानर्थक्यस्य त्वन्मते तादवस्थ्यमपरिहार्यमेवेत्यर्थः । तर्हि किं तथा कथनस्य तात्पर्यमित्याकाङ्क्षायां मन्दाधिकारिणां तावतैव फलसिद्ध्यर्थं तथा वदतीत्याशयं हृदिकृत्य तेन विवक्षितं साधयन्ति । * तस्मादित्यादि * । * तस्मादिति * । त्वदुक्तस्य तथा कथनाशयस्यानुपपन्नत्वात् । ब्रह्मविज्ञानं भवतीति तावद्धर्मविशिष्टब्रह्मसाक्षात्कारो भवति । तत्र दृष्टान्तस्तैत्तिरीयेत्यादि * । तथाच ब्रह्मणि सर्वत्र सर्वधर्मसत्त्वेऽपि कतिपयगुणोक्तिबलेन तत्रोक्तैरेव गुणैरुपासनायाश्चारितार्थ्यनिश्चयान्न रूपान्तरे रूपान्तरधर्मोपसंहारो युक्त इत्यर्थः । ननु तादृशस्य स्वल्पधर्मवत्ताज्ञानस्य ब्रह्मज्ञानत्वमित्यत आहुः । * प्रकृतेत्यादि * । तथाचाविज्ञातं विजानतामिति श्रुतेर्ज्ञानकृतपरिच्छेदो ब्रह्मणि नास्तीति यस्य भूयोधर्मवत्त्वेन ज्ञानं तस्यापि न पूर्णं ज्ञानमतोऽस्मिञ्ज्ञाने द्वावपि तुल्यावित्यर्थः । तेन सिद्धमाहुः । * एतेनेत्यादि * । * एतेनेति * । स्वल्पगुणज्ञानतोऽपि फलार्थं तत्र तत्र तत्तद्गुणकथनेन । अनन्तगुणवत्त्वे श्रुतिमपि प्रमाणयन्ति । * तदुक्तमित्यादि * । तथाच ब्रह्मणोऽनन्तधर्मवत्त्वेऽपि तत्तद्रूपोपासनया तत्तत्फलदानार्थं तत्र तत्र तांस्तानेव

विकी ज्ञानबलक्रिया चेति । अत्र स्वाभाविकीति विशेषणादविद्याकल्पितत्वं शक्तीनां निरस्तम् । केचित्त्वाथर्वणिकानां विद्यां

धर्मान् प्रकटयतीति तद्व्यवस्थास्मरणं युक्तमेवेत्यर्थः । ननु यदि स्वस्वशाखोक्तप्रकारिकायामेवोपासनायामधिकारो, न परशाखोक्तप्रकारिकायामितिचेत् तदा तैत्तरीयाणां गोपालाद्युपासने, आथर्वणिकानामानन्दमयाद्युपासने वाऽधिकाराभावात् ततः फलं न स्यात्। नचेष्टापत्तिः । अन्यशाखीयानामपि नृसिंहगोपालाद्युपासने भगवदनुभावप्रसादादेर्दर्शनादितिचेत् । मैवम् । अत्र मन्दानामर्थे स्वशाखोक्तकरणाऽधिकारस्य कथनात् । तत उत्तमानामधिकगुणोपसंहारे स्वस्वरुचिगोचररूपोपासने च बाधकाभावस्य ब्रह्मणः सर्ववेदान्तप्रत्ययत्वेनैव सिद्धत्वात् तैः स्वस्वशाखोक्तादधिकमपि कर्त्तव्यमिति बोधितम् । किञ्च । सर्वस्य स्वस्वशाखोक्तोपासनकरणे हि बीजं तत्तच्छाखायां तत्तदुपनिषन्निबन्धनम् । तच्च यादृशयागात्मकस्वरूपं यच्छिरो भवितुं युक्तं तत्र तादृशब्रह्मस्वरूपबोधनार्थं तन्निबन्धनमिति निबन्धे, कर्मवद् ब्रह्मभेदाश्चेत्यस्य प्रकाशे श्रीमदाचार्यैर्निरूपितम् । एवं सति यः स्वशाखाविहितकर्मप्रधान्येन स्वकामित फलसिद्धये उपास्ते, तस्य स्वशाखोक्तमेव कर्त्तव्यम् । कर्मणां कामाधिकारकत्वात् । यस्तूत्तरतन्त्रोक्तरीत्या नित्यकर्मणां सहकारित्वमवधार्य ब्रह्मप्राधान्येन तत्तद्रूपप्राधान्येन वोपास्ते, स तु तत्तदनुरूपं परशाखोक्तमुपसंहरताम् । इयमुपासनामार्गीया व्यवस्था । भक्तिमार्गे तु स्नेहस्यैव प्राधान्येन विहितत्वादेर्गौणत्वान्नचाशङ्का नचोत्तरम् । एवञ्च मन्दाधिकारिणां स्वस्वशाखोक्तब्रह्मज्ञानसिद्धावपि तावज्ज्ञानस्याल्पत्वेन फले विलम्बः । अधिकज्ञानेनाधिकाधिकगुणोपसंहारेण विलम्बनिवृत्तिरिति सिद्ध्यति । ननु स्वाध्यायसूत्रस्य तथार्थवत्त्वे हि कर्मादिस्मरणेन तादृशोपसंहारानुपसंहारचिन्ता । तदेव दुर्घटम् । अन्यैस्तथा तदर्थानङ्गीकारादित्याकाङ्क्षायां स्वोक्तं सूत्रव्याख्यानं दृढीकर्त्तुं शङ्करभास्कररामानुजाचार्याद्युक्तमेतत्सूत्रव्याख्यानमप्यसमञ्जसमिति बोधनाय तदनुवदन्ति । * केचित्त्वित्यादि * । यद्यपीदं तेषां सूत्रविवरणं शाखान्तराधिकर-

मति शिरोव्रतापेक्षणादन्येषां तदनपेक्षणाद् विद्याभेद इति प्राप्त उच्यते। स्वाध्यायस्यैष धर्मो न विद्यायाः। कथमिदमवगम्यत यतस्तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशनपरे ग्रन्थे आथर्वणिका इदमपि वेदव्रतत्वेन समामनन्ति। नैतदचीर्णव्रतोऽधीत इति चाधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्च स्वोपनिषदध्ययनधर्म एवैष इति निर्द्धार्यते। तस्मादनवद्यं विद्यैकत्वमिति सूत्रार्थं वदन्ति। स चिन्त्यते। न ह्यस्य विद्याधर्मत्वं विद्याभेदकम्। उक्तन्यायेनान्यत्रापि तदुपसंहारस्य वक्तुं शक्यत्वात्। नचा-

———

णस्यस्य, विद्यायां धर्मशास्त्रमिति सूत्रस्य यच्छाबरभाष्यं तच्छायामनुसरति। तत्र हि कारीरिवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति, नेतरे। तथैकेऽग्निमधीयाना उपाध्यायस्योदकुम्भमाहरन्ति, नेतरे। तथैकेऽश्वमधीयाना अश्वस्य घासमाहरन्ति, नेतरे इति धर्मभेदात् कर्मभेद आशङ्किते, विद्यायां धर्मशास्त्रमिति सूत्रेण विद्या वेदनमध्ययनमिति यावत्, तस्यायं धर्मो, न तु कर्मणः। तेनान्यधर्मस्यान्यभेदकत्वाभावान्न कर्मभेदकत्वमिति स्थितम्। तेन प्रामाणिकम्। तथापि सोऽर्थः सूत्रकारानुशयविरुद्ध इति तं स्फुटीकुर्वन्ति। * स चिन्त्यत इत्यादि *। * चिन्त्यत इति *। युक्तोऽयुक्तो वेति विचार्यते। हि यतो हेतोः। अस्य शिरोव्रतस्य विद्याधर्मत्वं निवार्य यदध्ययनधर्मत्वं व्यवस्थाप्यते तद्विद्याभेदकत्वाभावाय। तदस्य विद्याधर्मत्वं तु न विद्याभेदकम्। चोदनाद्यविशेषेण सिद्धे सर्वासां ब्रह्मविद्यानामैक्ये प्राणाद्युपासनासु रेतःप्रभृतेरिव ब्रह्मविद्यास्वेतस्याधिकस्यानुप्रवेशेऽपि दोषो न भवतीत्युक्तन्यायेनान्यत्रापि तदुपसंहारस्य वक्तुं शक्यत्वात्। सिद्धे च तस्य तथात्वे विद्याभेदकत्वस्याभावात्। नचानुपसंहारार्थमेवास्य विद्याधर्मत्वाभावो बोध्यत इति वाच्यम्। भवन्मतेऽधिकरणोपक्रमोपसंहाराभ्यां विद्यैकत्वनिर्णयस्यैव सूत्रकारानुशयगोचरतया दृश्यमानत्वादेतद्विचारस्याकस्मिकत्वापातात्। अतोऽस्य भेदकत्वमापाद्य ततोऽन्यधर्म-

ऽनुपसंहारार्थमेवातद्धर्मत्वं बोध्यत इति वाच्यम् । उपक्रमोपसंहारा-भ्यां विधैकत्वनिर्णयस्यैव दृश्यमानत्वादुपेक्ष्य इव भाति । ननु तदुक्तिर्यथा तथाऽस्तु, अतद्धर्मत्वबोधनस्यानुपसंहारार्थकत्वे काऽनु-पपत्तिरितिचेत् । उच्यते । सूत्रस्य तदुक्तार्थत्वे हि तत्तात्पर्य-कल्पना । स एव च न साधीयान् । तथाहि । स्वाध्यायोऽध्येतव्य इत्यादिषु स्वाध्यायशब्दस्य वेदवाचकत्वं प्रसिद्धम् । समाचार-शब्दस्य विहितक्रियावाचकत्वं च । तत्रोभयोरपि मुख्योऽर्थो बा-ध्यते । तस्मिन् सम्भवति तद्बाधस्त्वयुक्तः । किञ्चैवं, न त्व-

---

त्वसाधनेन तदसाधकत्वकथनमिति तद्व्याख्यातः सूत्रार्थ उपेक्ष्य इव प्रतिभातीत्यर्थः । उक्तार्थस्य शाबरभाष्यानुसारित्वेन प्रामाणि-कतया तस्योपेक्ष्यत्वमसहमानश्चोदयति । * नन्वित्यादि * । अत-द्धर्मत्वोक्तिः कथमप्यस्तु, तथापि तस्य तथात्वे काऽनुपपत्तिरित्यर्थः । तत्रोपेक्ष्यत्वबीजभूतामनुपपत्तिमुद्घाटयन्ति । * सूत्रस्येत्यादि * । सूत्रस्य तदुक्तार्थत्वे हि शिरोव्रतोपदेशतात्पर्यकल्पना, सूत्रार्थ एव तदुक्तो न युक्तः । तदुपपादयन्ति । * तथाहीत्यादि * । * तस्मि-न्निति * । मुख्यार्थे । ननु सत्यमस्ति मुख्यार्थबाधस्तथापि फलमुखो-न दोषायेत्यतो दूषणान्तरमाहुः । * किञ्चेत्यादि * । तथाच तर्हि विधैकत्वसाधनायेदं सूत्रमेवं व्याख्यातम् । तथा सति शिरोव्रतस्य प्रकृतोपनिषद्विशेषसंयोगेनासङ्कीर्णतया पूर्वसूत्रोक्तहेतोर्दृढत्वे सम्प-न्ने, तेषामेवैतां ब्रह्मविद्यां वदेतेत्यतच्छब्दो यथाऽस्यान्यत्रोपसंहारबा-धकस्तथा, यत्रैतच्छब्दो नास्ति । यथा, प्रागतिथिभ्योऽश्नीयादित्यादौ तादृशां धर्माणां त्वन्यत्रोपसंहारस्य प्राप्तावसरत्वाच्छाखान्तरीये क-र्मणि विद्यायां च शाखान्तरीयतद्धर्मस्य रूपान्तरे रूपान्तरधर्मस्य च प्राप्तिरित्यस्या आशङ्काया अनिवृत्तिस्तस्मान्मतान्तरीयव्याख्यानमुपे-क्ष्यमेवेत्यस्य सूत्रस्योक्तरीत्योपसंहारनियमबोधनेन विधैकत्वबाधक-निरासार्थतयैव व्याख्यानमुचितमित्यर्थः । एवं मतान्तरं परिहृत्य पूर्वे रूपान्तरे रूपान्तरगुणानुपसंहारे रूपभेदस्य नियामकताया उक्तत्वात्

ग्निष्टोममेवोद्दिश्येत्यादिनोक्ताशङ्काया अनिवृत्तिरिति । नन्वाथर्वणोपनिषत्सु पठ्यते, स होवाचाब्जयोनिर्यो ऽवताराणां मध्ये श्रेष्ठो ऽवतारको भविता येन लोकास्तुष्टा देवास्तुष्टा भवन्ति, यं स्मृत्वा मुक्ता अस्मात् संसाराद् भवन्ति कथं चास्यावतारस्य ब्रह्मता भवति । स होवाच तं हि नारायणो देव इत्युपक्रम्य मथुरास्वरूपं निरूप्य निगद्यते यत्रासौ संस्थितः कृष्णः स्त्रीभिः शक्त्या समाहित इति तेनास्यावतारस्याशेषावताराणां मध्ये श्रैष्ठ्यं निरूप्यते । श्रीभागवतेऽपि च, एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति गीयते । पूर्वोक्तरीत्या तु सर्वतुल्यता प्रतीयत इति नैकतरनिर्द्धारः सम्भवति । किञ्च । ब्रह्मणो निरवयवत्वेनैकस्यांशित्वमन्येषां तदं-

---

तं रूपभेदं स्फुटीकर्त्तुं चिन्तान्तरमारभन्ते। * नन्वाथर्वणेत्यादि * इयं श्रुतिरुत्तरतापनीस्था । तत्र हि दुर्वासाः स्वस्य भगवज्ज्ञानं वक्तुं ब्रह्मनारायणसंवादमुपाचिक्षेप । तत्र नाभिकमलाज्जातोऽब्जयोनिर्ब्रह्मा-एवं प्रश्नमुक्तवान् । अत्र यत्तदोर्नित्यसम्बन्धात् स को भवितेति तच्छब्द अध्याह्रियते । तत्र श्रैष्ठ्याभिज्ञापकं वाक्यं, येनेत्यादि, ब्रह्मता भवतीत्यन्तम् । तथाच लोकानां देवानां तोषजनकः स्मरणेन मुक्तिदाता यः स एव श्रेष्ठः । तस्य ब्रह्मता च केन प्रकारेणेति प्रश्नद्वयं सिद्ध्यति । तं होवाचेत्यादिना नारायणेनोत्तरमुच्यते । तत्र मथुरास्वरूपनिरूपणं भूम्यामवतारज्ञापनार्थम् । कथं च ब्रह्मतेत्यस्योत्तरं, यत्रासौ संस्थित इत्यादिभिः शक्तिसहितचतुर्व्यूहरूपेणेति सिद्ध्यति । तेनैवमस्य श्रीकृष्णावतारस्य पूर्वोक्तं श्रैष्ठ्यं निरूप्यत इति सिद्ध्यति । श्रीभागवते तु पुरुषांशावतारमध्ये, रामकृष्णाविति भुवो भगवानहरद्भरमिति भूभारहारकयो रामकृष्णयोः पुरुषांशावतारत्वमुक्त्वा एते चांशकलाः पुंस इत्यनेन सर्वसाम्यं चोक्त्वा, कृष्णस्तु भगवान् स्वयमिति केवलस्य कृष्णस्य परब्रह्मत्वमुच्यते । यदेकमव्यक्तमनन्तरूपमिति श्रुत्युक्तप्रकारिकया पूर्वोक्तरीत्या तु तथा प्रतीयत इत्येकः सन्देहः । * किञ्चेत्यादिनोक्तस्तु द्वितीयः । एवं

शत्वमित्यपि वक्तुमशक्यमिति प्राप्ते । अभिधीयते । सत्त्वं यस्य प्रिया मूर्त्तिः, विशुद्धसत्त्वं तत्र धाम शान्तमित्यादिवाक्यैरप्राकृतो भगवत्स्थानभूतः सत्त्वनामा भगवद्धर्मरूप एव कश्चनास्ति । यादृशेनैँ रूपेण भगवान् कार्यं कर्त्तुमिच्छति तादृग्रूपं तं प्रकटीकृत्य तस्मिन् स्वयमाविर्भूयाऽयःपिण्डे वह्निवत्तत्तत्कार्याणि करोति यस्मिन् यस्मिन्नवतारे स सोंऽश इत्युच्यते । तत्र हि विग्रहस्तत्राविर्-

---

प्राप्तम् । तथाच तापनीयानन्तरूपश्रुत्योरितरेतरनिरोधान्निरवयवत्वबोधकनिष्कलश्रुतिविरोधाच्च श्रेष्ठ्यादिनिर्द्धारासम्भवे धर्माणां मायिकत्वस्यैव शरणीकरणीयत्वात् स्वरूपपराणाम् अवतारान्तरे अवतारान्तरधर्मोपसंहारानुपसंहारचिन्तया अनुपयोगात् पूर्वोक्ताशङ्कया अनिवृत्तावष्यदोष इति मतान्तरीयव्याख्यानं साध्वेवेति पूर्वपक्षाशयः । तत्र समादधते । * अभिधीयत इत्यादि * अत्र, सत्त्वं यस्येत्यादिवाक्यद्वये यथायथं, प्रियेति, विशुद्धेति विशेषणाभ्यां विवक्षितस्य सत्त्वस्य प्राकृतात् सत्त्वाद् व्यावृत्तिः क्रियते । मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकामिति, विलज्जमानया यस्य स्थातुमीक्षापथेऽमुयेति वाक्याभ्यां तस्या गुणानामप्रियत्वस्याविशुद्धत्वस्य बोधनात् । नच प्राकृतगुणातिरिक्तसत्त्वस्याप्रसिद्धत्वं शङ्क्यम् । सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रय इति द्वितीयस्कन्धे प्राकृतव्यतिरिक्तानां गुणानां सिद्धत्वात् । यथा कार्पासे न हि सूत्रं, तदेव पुनः पौर्वापर्यमापद्यमानं सूत्रतामापद्यते, तथा भगवान्निर्गुणस्ते पुनर्गुणा इति तत्र विवरणात् । स च द्रव्यरूपः । अन्यथा तस्य मूर्त्तित्वधामत्वयोरनुपपत्तेः ।

रामानुजास्तु । शुद्धसत्त्वं नाम रजस्तमोमिश्रप्राकृतसत्त्वविलक्षणसत्त्वगुणाश्रयो द्रव्यविशेष इत्यङ्गीकृत्य, स्वसत्ताभासकं द्रव्यं त्रिगुणात्तद्विलक्षणमिति वाक्यं च तस्मिन् प्रमाणत्वेनाहुः । तस्यातिरिक्तत्वमेव, न त्वेतद्रूपत्वम् । एवमेतस्योपायत्वं साधयित्वा तेनांशान् साधयन्ति * यादृशेनेत्यादि * । स स इति * । अवतारः । नन्वयःपिण्ड आविर्भूतस्य वह्नेर्वह्नित्वमेवोच्यते, न त्वंशत्वम्-

भूतं ब्रह्मस्वरूपं च प्रतीयते विग्रहस्य सत्त्वात्मकत्वेनं धर्मरूपत्वात् तत्राविर्भूतस्यैव ब्रह्मत्वात् समुदितस्यावतारत्वेन गणनात् तत्रैकस्यैवांशस्य तद्रूपत्वं यत्र तदेवांशत्वम्। यत्राधिष्ठानमनपेक्ष्य स्वयमेव शुद्धं साकारं ब्रह्माविर्भवति भक्तार्थं स स्वयं पूर्णो भगवान्

तः कथमेवमित्याशङ्कायामाहुः। * तत्र हीत्यादि *।* एकस्यैवांशस्य तद्रूपत्वमिति *। आविष्टस्यांशस्य ब्रह्मरूपत्वम्। तथाच विरुद्धधर्माश्रये ब्रह्मण्याकारानाकारत्वयोरुभयोः सत्त्वाद्यत्राऽनाकारेण तेजोरूपेण प्रविशति सोऽंशावतारः। इदमेव निबन्धे प्रथमस्कन्धतृतीयाध्यायार्थविचारेऽपि, सत्त्वात्मके शरीरे अलौकिकतेजसः सर्वदा संक्रमोऽवतारः, कार्यकाले संक्रम आवेश इति तद्भेदकथनमुखेन बोधितम्। अतः परं श्रैष्ठ्यबोधनाय मूलस्वरूपं विवृण्वन्ति। * यत्राधिष्ठानेत्यादि *। अधिष्ठानं सत्त्वाद्यात्मकं शरीरमनपेक्ष्य स्वयमेव शुद्धसाकारं ब्रह्म आविर्भवतीत्यादिप्रकारेण पूर्णो भगवानुच्यते। एतदेव पूर्णभगवत्त्वमेव श्रैष्ठ्यम्। तापनीयवाक्येषु रामादीनां त्रयाणां प्रणवमात्रात्रयप्रतिपाद्यत्वमुक्त्वा तेन सत्त्वरजस्तमोऽधिष्ठानत्वं प्रतिपाद्य, अग्रे अहंग्रहोपासनायाम् ॐतत्सत् सोऽहं परं ब्रह्म कृष्णात्मको नित्यानन्दैकस्वरूप इत्यादिना निरधिष्ठानस्य केवलनित्यानन्दैकस्वरूपस्य कृष्णात्मकस्यैव श्रावणादेतदेव श्रैष्ठ्यमित्यर्थः। यद्यप्येतादृशत्वं रामनृसिंहतापिन्योस्तत्तत्स्वरूपे उच्यते, कल्पभेदेन च तथा सिद्ध्यति। तथाऽप्युरुक्रमावतारे देवमात्रकार्यार्थतायाः स्फुटत्वात् तेनावतारेण बलेरेवमुक्तेः स्फुटत्वाच्च स्वल्पं मोक्षदातृत्वम्। श्रीनृसिंहस्वरूपे तु, यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतमिति कम्पनाधिकरणविषयवाक्योक्तन्यायेन मुक्तिदातृत्वं नृसिंहराजमन्त्रे स्फुटति, न तु सौम्यरूपतया सुगमोपायेन वा।श्रीरामस्वरूपे तु बहूनां स्वल्पसाधनेनैव मोक्षदातृत्वेऽपि सौम्यरूपत्वेऽपि भूयान् मर्यादानुरोधः। पुष्टिकार्यन्तु स्वल्पम्। श्रीकृष्णावतारे तु 'गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः। सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो' इत्यादि-

उच्यते । एतदेव च श्रेष्ठयम् । अत एव सर्वतः पाणिपादान्तत्वं स्वस्मिन् स्फुटं ज्ञापयितुं तोकादिभावेनाविर्बभूव तेन यादृग्यादृग्लीलाविशिष्टं यद्यद्बाल्यपौगण्डाद्यवस्थाविशिष्टं तत्तद्रूपं नित्यमेवेति वयं जानीमः । नचैवं सच्चिदानन्दविग्रहोक्तिः सर्वत्र विरुद्धा भवेदिति वाच्यम् । सत्त्वस्यापि भगवद्धर्मत्वेन सच्चिदानन्दरूपत्वादविरोधात् । मन्त्राद्यधिष्ठातृरूपाणि तु विभूतिरूपाणि । एतच्च यथा तथा भक्तिहंसे प्रपञ्चितम् । तत्त्वं च प्रकाशाश्रयवद्वा तेजस्त्वादितिन्यायेन भगवद्धर्माणामपि सच्चिदानन्दरूपत्वाद्धीनाधिकारिणामप्युपासकानां फलप्रेप्सूनां तत्तत्फलदानार्थमैश्वर्यादिरूपे-

---

बाक्याद् बहुभिः प्रकारैर्मोक्षदत्वम् । तेन मर्यादाननुरोधश्चेत्याद्यनुसंधाय विशेषान्तरमाहुः । * अत एवेत्यादि * । एवमाविर्भूतशुद्धसाकारब्रह्मत्वादेव एवंरूपत्वं स्वस्मिन् स्फुटं ज्ञापयितुं वत्साहरणे, रासे, एकमौहूर्तिकनानास्त्रीविवाहे, नारदपरीक्षायां यथायथं तोकप्रौढराजभावेन बहुधा प्रकटो जातः । यदि हि तथा न स्यादवतारान्तर इवात्राप्येवं न ज्ञापयेत् । नाप्येवं प्रकटो भवेत् । अतस्तथा प्राकट्यमेव मूलरूपत्वमहामाहात्म्यादिगमकमित्यर्थः । तेन सिद्धमाहुः । * तेन यादृगित्यादि * । * तेनेति * । तोकादिभावेऽपि जृम्भाव्यादानदामोदरलीलासु सर्वात्मकत्वव्यापकत्वविरुद्धधर्माश्रयत्वप्रदर्शनेन । तथाचैवं निरवयवत्वेऽप्युपाधौ प्रवेशातो बहुधायोगोलकघटाकाशादिवदंशांशिभावाविरोधान्न प्रमाणविरोधो, न वा कृष्णावतारश्रैष्ठ्यविरोध इत्यर्थः । पुनः किंचिदाशङ्क्य परिहरन्ति । * नचैवमित्यादि * । * एवमिति * । सत्त्वस्याधिष्ठानत्वे । * सर्वत्रेति * कल्पान्तरीयेष्ववतारेषु । एवं मूलरूपव्यवस्थामुक्त्वा विभूतिरूपव्यवस्थामाहुः । * मन्त्रेत्यादि * । * भक्तिहंसे प्रपञ्चितमिति * । तद्यथा तथा भक्तिहंसविवरणे तदाशयो मया स्फुटीकृत इति ताभ्यामवगन्तव्यम् । विभूतिरूपस्वरूपमाहुः । * तत्त्व-

ण तत्र तत्र स्थितत्वमेव । नन्वेकस्यैव शुद्धस्यैवानन्तरूपत्वं भवतैवांक्तमतो मत्स्यादिरूपेष्वपि नाधिष्ठानत्वेन सत्त्वं वक्तुं शक्यं, किञ्चैवं निराकारस्वभावत्वं ब्रह्मणः सिद्ध्यतीति सत्त्वाव्यवहितप्राकट्योक्तिरप्यनुपपन्नेतिचेत् । मैवम् । सत्त्वाधिष्ठानत्वस्य प्रमाणसिद्धत्वेनानपनोद्यत्वात् । तच्चोक्तं, यदेकमव्यक्तमनन्तरूपमित्यादि । प्राकट्यं हि भक्तिनिमित्तकम् । सा तु बहुविधेति तदनुरूपं प्राकट्यमपि तथा। सर्गादिकार्येष्वधिकृतानां भक्तानामितरासक्तिरप्यस्तीत्युपाध्यन्तरितस्नेहवत्त्वाच्चानन्तरूपत्वेन मत्स्यादिरूपोऽपि तदर्थं तदव्यवहित एव प्रकटीभवति । ये तु भगवत्स्वरूपमात्रास-

---

मित्यादि * । * तत्र तत्रेति * । उद्गीथादिरूपेषु । एवं रूपत्रयविभागस्याप्रयोजकत्वं मन्वानश्चोदयति । * नन्वित्यादि * । * एवमिति * । सत्त्वस्याधिष्ठानत्वेनाकारसमर्पकत्वे । तथाच न्यायसिद्धत्वाद्विभूतिरूपं तथाऽस्तु । मूलावताररूपे तु न तथा। वदतो व्याघातादित्यर्थः । तत्र समादधते । * मैवमित्यादि * । * तच्चेति * । स्वतोऽनन्तरूपत्वे प्रमाणं च। आदिपदेन, क्षयं तमस्य रजसः पराक इत्यादीनां सङ्ग्रहः । तथाच, यदेकमित्यादिश्रुतिषु तमसः परस्तादित्यादिब्रह्मविशेषणाद् ब्रह्मसम्बन्धिरूपादौ प्रकृतिसंसर्गराहित्यसिद्ध्या आनन्दरूपममृतं यद् विभाति । आनन्दाऽमृतरूपं प्रणव षोडशान्ते इत्यादिभिः सच्चिदानन्दरूपताया ब्रह्मणः स्वतोऽनन्तरूपतायाश्च प्रमाणसिद्धत्वात् प्रकारत्रयमपि प्रमाणसिद्धमिति न व्याघात इत्यर्थः । ननु भवतु त्रयाणां प्रामाणिकत्वं, तथापि कुत्र कथं प्रकटीभवतीति न ज्ञातुं शक्यते इति विशेषानवधारणाद् वृथैवायं विचार इत्याशङ्कायां तदवधारणहेतुबोधनेन तां निवारयन्ति । * प्राकट्यं हीत्यादि *।* प्राकट्यमपि तथेति* ये यथा मां प्रपद्यन्ते इति भगवद्वाक्यात्तथा । तथाचैवं भक्तिभेदाद्रूपभेदोऽपि सुखेनावधारयितुं शक्य इत्यर्थः । तर्हि भक्तिभेदस्य कथमवधारणमित्यत आहुः । * सर्गेत्यादि * प्रादुर्भवतीत्यन्तेन * ।

एवं प्राकट्यप्रकारव्यवस्थापनेन निराकारत्वशङ्काया अपि नि-

कालस्तदर्थं स्वयमेवाऽतद्व्यवधानेन प्रादुर्भवति । एतेनैव निराकारत्वाशङ्कापि निरस्ता । एतेन सोपधिस्नेहवदर्थमेव मत्स्यादिरूपप्राकट्यस्य प्रमाणसिद्धत्वान्निरुपधितत्तदर्थमेव श्रीव्रजनाथप्राकट्यस्यापि तथात्वात् सोपाधिस्नेहवत्स्वपि पुरुषार्थदानस्यानुषङ्गिकत्वात् पुरुषविध इति श्रुतेश्चैतदेव रूपम्, रसो वै स इत्यादिश्रुतिप्रतिपाद्यं निरुपधिस्नेहवतां विषयः । इदमेव च श्रैष्ठ्यम् । मत्स्यादिरूपं तु सोपधितद्भतामेव तथा । तादृक्तद्भतामर्थ एव प्राकट्यादिसव-

---

वृत्तिमाहुः । * एतेनेवेत्यादि * । भगवति प्रपञ्चवैलक्षण्यस्य पूर्वपादान्त एव प्रतिपादिततया लौकिकाकारराहित्यमेव तत्र निराकारता, न तु यावदाकारराहित्यम् । उपाधिव्यवधानं तु शुद्धदर्शनयोग्यताभावेन हेतुभेदादतः प्राकट्यप्रकारव्यवस्थापनेनैव यावदाकारशून्यत्वशङ्काप्यपास्तेत्यर्थः । एवं रूपविभागं रूपाणां स्वरूपं च विशदीकृत्य भगवति श्रीकृष्णरूपे यच्छ्रैष्ठ्यम्, अन्यत्र यत् तद्राहित्यं तदुभयं व्यक्तीकुर्वन्ति । * एतेन सोपधीत्यादि * । एतेनेत्यस्याध्यवसीयत इत्यनेन सम्बन्धः । * तथात्वादिति * गोपालतापनीयबृहद्ब्रामनीयसन्दर्भे, ता नाविदन्नित्यादिप्रमाणसिद्धत्वात् । सोपाधिस्नेहवत्सु मथुराद्वारकावतीप्रभृतिस्थेष्वपि तत्तत्पुरुषार्थदानस्य तत्तद्व्यूहेन कृततया आनुषङ्गिकत्वात् । आनन्दमयनिरूपणे, स वा एष पुरुषविध एवेति पुरुषविधश्रुतेश्च । एतदेवानन्दमयं रूपं, रसो वै स इत्याद्यानन्दश्लोकविवरणश्रुत्या प्रतिपाद्यं निरुपधिस्नेहवतां व्रजस्थानां विषयः । इदमेव अधिष्ठानाव्यवहितकेवलानन्दमयतया मुख्याधिकारिप्रमाविषयत्वमेव तस्मिन्नवतारे श्रैष्ठ्यं परमं निष्कृष्टम् । मत्स्यादिरूपं तु सोपधिस्नेहवतामेव विषयः । सोपधिस्नेहवतां कार्यायैव प्राकट्यात् । अतो न तेषु पूर्वोक्तरूपं श्रैष्ठ्यमित्येतत् सर्वं तत्तद्रूपभेदतत्तत्प्राकट्यहेतुभेदबोधकप्रमाणगणेनावधार्यते । अतो न कोऽपि शङ्कालेशः । तथाच यदि यावद्विशेषशून्यं ब्रह्म स्यात् तदा तथा स्यादपि । तत्तु प्रागेव निरस्तम् । तथा सति विरुद्धधर्माधारस्यैवैवं स्वरूपनिर्द्धारसिद्धौ धर्माणाममायिकत्वेन वास्तवत्वात् त-

सीयते । एवं सति गुणभेदस्याऽप्रयोजकत्वात् सर्ववेदान्तप्रत्ययत्वं ब्रह्मणो निष्प्रत्यूहम् ॥ ३ ॥

दर्शयति च ॥ ४ ॥

वेद्यैकत्वेन विद्यानामेकत्वं श्रुतिर्दर्शयति, सर्वे वेदा यत्पदमामनन्तीत्यादिना । उपासनाप्रकारभेदेनोपास्यभेददर्शने दोषं च

त्तुपसंहारादिचिन्ताया अप्यावश्यकत्वादुक्ताशङ्का निवर्त्तनीयैवेत्यतो मतान्तरीयमेतत्सूत्रव्याख्यानमुपेक्ष्यमेवेत्यर्थः । सिद्धमाहुः । * एवं सतीत्यादि * पूर्वोक्तरीत्या तत्तद्धेतुकस्य गुणानुपसंहारस्य रूपभेदस्य चाबाधकत्वेऽनेकरूपतायामपि स्वरूपैक्ये निर्बाधे सति तत्तद्रूपगुणभेदस्य वेद्यभेदाप्रयोजकत्वाद् ब्रह्मणः सर्ववेदान्तप्रत्ययत्वं निष्प्रत्यूहम् । मायावादिमते तु धर्माणामौपाधिकत्वादुपाधीनां च भिन्नत्वादुपास्यरूपाणां चाब्रह्मरूपत्वान्न विद्यैक्यं स्वारस्येन प्रयोजयत्यत्र तु ब्रह्मणः सर्वरूपत्वात् स्वारस्येनातोऽपि तथेत्यर्थः ॥ ३ ॥

दर्शयतिच ॥ अस्मिन्नधिकरणे सर्वफलदातुः परब्रह्मणो वेद्यस्य तद्विषयकतया सर्वासां विद्यानामैक्यमवान्तरविद्यानामवान्तरैक्यं च प्रतिपादितमिति निगमयितुं सूत्रं विवृण्वन्ति । * वेद्यैकत्वेनेत्यादि * । * इत्यादिनेति * । आदिपदेन मुण्डके ब्रह्मविद्यां प्रक्रम्य तस्यामेव परापरविभागमुक्त्वा ऋग्वेदादिरूपा अपरा, अथ परा यया तदक्षरमधिगम्यत इति तयोर्लक्षणकथनेन सर्वासां ब्रह्मविद्यात्वं यद् बोधितं तस्य सङ्ग्रहः । तथाऽन्यैरुपन्यस्तानाम्, एतमेव बह्वृचा महत्युक्थे मीमांसत एतमग्नावध्वर्यव एतं महाव्रते छन्दोगा इत्यादीनां च सङ्ग्रहः । तथाच श्रुतिरपि प्रत्यक्षा वेद्यैकत्वेन विद्यैकत्वं दर्शयति । उपास्यभेददर्शने च दोषमतोऽपि निष्प्रत्यूहं ब्रह्मण स्तद्विधानां च सर्ववेदान्तप्रत्ययत्वमित्यर्थः ॥ अत्र आद्या श्रुतिः काठकेऽस्ति । अन्यत्र धर्मादन्यत्राधर्मादिति प्रश्नमुपक्रम्य तदुत्तरत्वेनोक्ता तत्र च सर्ववेदबीजभूतो य ॐकारस्तस्य तथात्वमुक्तम् । स च, सधाम्नो ब्रह्मणः साक्षाद्वाचक इति प्रश्नोत्तरसिद्धिः । तथाचोङ्कार-

दर्शयति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवतीति । उदित्यव्ययमप्यर्थकम् । तथाचाऽरमल्पमप्यन्तरं कुरुत इत्यर्थः ॥ ४ ॥

स्य सर्ववेदबीजत्वात् तदर्थस्यैव सर्वत्र प्रस्तुतत्वात् सर्वस्यापि वेदस्य तद्वाचकत्वमिति वेद्यैक्येन विद्यैक्यं सिद्धम् । द्वितीयां तैत्तरीयाणां ब्रह्मवित्प्रपाठकेऽस्ति । तत्र ह्यदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने इति विशेषणचतुष्टयविशिष्टं ब्रह्म, एतस्मिन्निति पदेन परामृश्यते । तथाच यच्छास्त्रीयसाधनमन्तरेणादृश्यं, यस्य चात्मान्यो नास्ति किन्तु तदेव सर्वासामात्मभूतमित्यनात्म्यम् । यत् पुनरेतदग्रे,, तत्त्वेव भयं विदुषोऽमन्वानस्येत्यनेन यः पूर्वोक्तरूपं ब्रह्म युक्तिभिर्नानुचिन्तयति तस्यापि तद्भयमुक्तम् । तादृशत्वं च मूलरूप एवेति तदवतारेषु यो भेदं कुरुते तस्य भयं भवतीति सिद्ध्यति । तेन सर्वासां विद्यानां सर्वेषामुपास्यानां चैक्यं सिद्धम् । अत्रैतद् बोध्यम् । अन्ये हि शाखान्तराधिकरणोक्तहेतुना तत्तदुपासनानामैक्यं साधयित्वा तस्यैक्यस्य तेषु तेषु गुणोपसंहारप्रयोजकत्वं वदन्ति । तदप्रयोजकम् । यासूपासनासु न कश्चिद् विशेषस्तास्वैक्यसाधनमनर्थकम् । यथा ज्यैष्ठ्यश्रैष्ठ्यगुणकप्राणोपासनायाम् । यत्र च विशेषगुण उपसंहर्त्तव्यो यथा पञ्चाग्निविद्यादिषु तत्राधिकगुणोपसंहारप्रयोजकत्वात् सार्थकम् । गुणोपसंहारश्चेत् समाचारसूत्रोक्तहेतुभिरेव सिद्ध्यति, तदा पूर्वसूत्रे तत्साधनमनर्थकम् । उक्तरीत्या सर्वासामैक्ये प्राप्ते सर्वत्र सर्वगुणोपसंहारप्राप्तेर्दुर्वारत्वात् । अतो ये ज्ञानमार्गीया ब्रह्मत्वप्राधान्येनोपासकास्तेषामेव तथोपसंहार इति पूर्वसूत्रतात्पर्यबोधनार्थमिदं सूत्रम् । ये पुनः सर्वत्र ब्रह्मत्वमनुसन्दधाना अपि तत्तद्रूपप्रधानास्तत्तत्फलाकाङ्क्षिणो वा तेषां तु समाचारसूत्रोक्तैरुपसंहारनियमहेतुभिरवान्तरैक्यमवधार्य, तत्तदुपयोगिन एव गुणा उपसंहर्त्तव्या भवन्ति । एवं सति यदैक्यमन्यैः पूर्वसूत्रे विचार्यते तदस्माकं समाचारसूत्रे सिद्ध्यतीति भिन्नभिन्नाधिकारसूचनार्थमेतत्सूत्रचतुष्टयमिति शेषम् ।

शंकराचार्यास्तु परस्य ब्रह्मणः पूर्वापरादिभेदरहितत्वात्

सैन्धवघनवदेकरसत्वाद्विज्ञानानां न तद्विषयत्वमतो ब्रह्मविज्ञानस्य प्रतिवेदान्तं भेदः शङ्कितुं न शक्यते, नापि ब्रह्मविज्ञानस्य चोदनाद्यविषयत्वाद्भेदः सिद्धान्तयितुम् । अविधिप्रधानैर्वस्तुपर्यवसायिभिर्हिवाक्यैर्ब्रह्मविज्ञानं जन्यत इति, तत्तु समन्वयादित्यत्र प्रतिपादितत्वात् । तत्कथमिमां भेदाभेदचिन्तामाचार्य आरभत इत्याशङ्क्य, सगुणब्रह्मविषया प्राणादिविषया वेद्यविज्ञानभेदाभेदचिन्तेत्यदोषः । सगुणे हि ब्रह्मणि कर्मवदुपासनानां भेदाभेदसम्भवात् कर्मवदेव चोपासनानां दृष्टादृष्टफलार्थचोदनाया अपि सम्भवात् सम्यग्ज्ञानोत्पत्तिद्वारेण केषाञ्चिदुपासनानां क्रममुक्तिफलत्वस्यापि सम्भवाच्च । तस्मात्तेष्वेवैषा चिन्तेत्याहुः । तदिदं प्रथमसूत्रपूर्वपक्षभाष्ये एव समन्वयविरोधापत्तेरित्यादिना निराकृतम् ।

यत्पुनर्भामत्यान्तद् भाष्यतात्पर्यमुक्तम् । सावयवस्य ह्यवयवानां भेदात्तत्तदवयवविशिष्टब्रह्मगोचराणि विज्ञानानि भिद्येरन्नित्यवयवा ब्रह्मणो निराकृताः, पूर्वापरादीत्यनेन। नच नानास्वभावं ब्रह्म यतः स्वभावभेदाद्, विज्ञानानि भिद्येरन्नित्यत उक्तमेकरसमितीति । तदप्युभयलिङ्गाद्यधिकरणविचारे अनुच्छित्तिधर्मा, य इह नानेव पश्यतीत्यादिश्रुतीनां विचारेण विरुद्धधर्माधारत्वसाधनादेव निरस्तं ज्ञेयम्।

भास्कराचार्यास्तु यदि विज्ञेयं ब्रह्म सर्वत्रैकं तदा तद्विषयकं ज्ञानमुत्पद्यते । कथं भिद्येत । नच बहूनि ब्रह्माणि सन्ति, येन तज्ज्ञानानि भिद्येरन्नतः प्रतिवेदान्तं विज्ञानभेद इत्याशङ्कानुपपन्ना । नापि चोदनाद्यविशेषादिति समर्थनं कर्त्तव्यम् । अचोदनालक्षणत्वाज्ज्ञानस्येत्याशङ्क्य विज्ञानमिहोपासनमभिप्रेतम् । प्रथमं तावद् वाक्याद् ब्रह्मस्वरूपविषयकं ज्ञानमुत्पद्यते । तच्च प्रमेयरूपावच्छेदकम् । घटादिविषयकप्रत्यक्षादिज्ञानवत् । उपासनं तु निर्णीते वस्तुतत्त्वे पश्चात् क्रियते । यथा गुरुमुपास्ते राजानमुपास्त इति ज्ञानस्वरूपस्य गुर्वादेरुपासनं भवति । तच्च विधिगम्यम् । यथा च तस्यावश्यकत्वं तथा चतुर्थस्याद्ये वक्ष्यते । तस्मादुपपन्नेयं चिन्तेत्याहुः ।

इदं चसिद्धान्तेऽपि संमतम् ॥

माध्वां रामानुजास्तत्रोरश्चैतच्चिन्तायामुपपत्तिमविचारयन्तोऽवसरसङ्गत्या विद्याभेदाभेदावेव विचारयन्ति । तत्रापि माध्वमते उपासना नाम ब्रह्मजिज्ञासा समस्तसच्छास्त्राभ्यासरूपा, श्रवण

मनने इति यावत् । सा च भक्तिसाध्यत्वाज्ज्ञानसाधनत्वाद् भक्त्यनन्तरं ज्ञानात् पूर्वं विचार्यते । ध्यानाङ्गत्वात् । सैव प्रथमाधिकरणे विचार्यते । समस्तसच्छास्त्रश्रवणमननाभ्यां दूरोत्सारिताऽज्ञानसंशयविपर्ययस्य ध्यानाधिकारित्वादिति । तत्र वेदोदितं ब्रह्म विषयः । तत्किमेकैकेन सर्वशाखोक्तं ज्ञातव्यं, स्वशाखोक्तं वेति सन्देहः । सर्वशाखोक्तं ज्ञातव्यमिति सिद्धान्तः । तेन वेद्याभेदाद्विद्याया अभेदसिद्धिः । तत्र सर्वशाखानामिदानीमप्रसिद्धत्वात् सर्वपदे सङ्कोचस्त्वावश्यकः । अविज्ञातं विजानतामिति श्रुत्या ब्रह्मणो ज्ञानपरिच्छेद्यत्वं च श्राव्यते । अतो यथाधिकारं यत् सम्यग् ज्ञानं तदेव युक्तम् । अन्यथा अशक्योपदेशापत्तिरित्यवधेयम् ।

रामानुजास्त्वत्र वैश्वानरविद्यां विषयत्वेनोदाहरन्ति ।

शैवस्तु दहरविद्याम् । स प्रतिशाखं, भिन्ना अभिन्ना वेति संशयः । शाखान्तराधिकरणन्यायेन पूर्वोत्तरौ पक्षावित्याह ।

भिक्षुस्तु, ब्रह्मणि निरूपितेऽर्थतस्तद्विद्यापि निरूपितैव । ज्ञानस्य विषयमात्राधीनविशेषत्वात् तत् किमर्थं विद्यायाः पृथग्विचार इत्याशङ्क्य गुणोपसंहारानुपसंहारादिभिरेकस्मिन्नपि ब्रह्मणि प्रकारतो विद्यायां संशयसंभवाद्विचार इत्युक्त्वा तत्रादौ ब्रह्मविद्याङ्गभूतानां गुणादीनां विचारार्थं तथा वेदविहितत्वं विना वक्ष्यमाणसर्वपापक्षयहेतुत्वबैधकर्माङ्गत्वादीनामनुपपत्तेश्च साक्षात्कारसाधारण्येन सकलब्रह्मविद्यासु विध्यादिकमस्तीति सर्ववेदान्तप्रत्ययसूत्रे विचार्यते । तथाच सर्वगृहमश्वा इतिवदत्र व्याप्यकर्मणि द्वितीया । अतः सर्ववेदान्तस्थं प्रत्ययं विद्यां व्याप्य चोदनादि वक्ष्यमाणविधिफलादिकं प्रत्येतव्यम् । अथवा सर्वे वेदान्तप्रत्ययाः विषयत्वेनास्य सन्तीति सर्ववेदान्तप्रत्ययम् । तथाच चोदनादिकं सर्ववेदान्तप्रत्ययविषयकमिति प्रतिज्ञा । यत्र यत्र विधिफलादिकं न श्रूयते तत्रापि कल्पनीयमिति यावत् । कुत एतत्? । अविशेषात् । चोदनादिमत्या वेदान्तान्तरोक्तविद्यायाः सकाशादवैलक्षण्यात् । सम्भवत्येकवाक्यत्वे वाक्यभेदानौचित्यादित्येवं व्याख्याय सूत्रान्तराण्यप्येतस्मिन्नेवार्थे योजयित्वा सर्वस्मिन् वेदान्ते चोदनादिसाधनार्थमिदमधिकरणमित्याह । तत्र साक्षात्कारसाधारण्येन विध्यङ्गीकारस्तु न युक्तः । नायमात्मा प्रवचनेन, श्रवणायापि बहु-

उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ॥ ५ ॥

ननु पूर्वसूत्रोक्तरीत्या गुणोपसंहारो न क्वचिदपि प्राप्तावसर इति सिद्धम्। दृश्यते चोपसंहारः। श्रीरामोपनिषत्सु, यो वै ये मत्स्यकूर्माद्यवतारा इत्यादिनोक्तावतारत्वस्य श्रीरामे, नमस्ते रघुवर्याय रावणान्तकराय चेत्यादिषु ते इति युष्मच्छब्दविषये श्रीव्रजनाथे रघुवर्यत्वादेरित्याशङ्क्य तत्प्रयोजकं रूपमाह ॥ उपसंहार

भिर्यो नलभ्य इत्यादिषु दर्शनात्मकस्य लाभस्य जीवकृतसाधनासाध्यतायां वरणैकसाध्यतायाश्च श्रावणेन तच्छाब्दज्ञानस्यापि दुर्लभत्वश्रावणेन च तत्साक्षात्कारस्य विधिविषयताया वक्तुमशक्यत्वात् । दर्शनस्य प्रमाणवस्तुपरतन्त्रत्वाच्च । नच द्रष्टव्यश्रुतिविरोधः । दर्शनानुकूलव्यापारे दृशिधातोर्लक्षणया तत्र विधेश्चारितार्थ्येनाविरोधात् सूत्रव्याख्यानमप्यत एवायुक्तम् । साक्षात्कारवाक्येपूक्तरीत्या विध्ययोगेन प्रतिज्ञाया बाधात् । विद्यासु वैलक्षण्यस्यापि तत्तद्दर्शने स्फुटतया हेतोरप्यभावाच्चेति दिक् ॥ ४ ॥

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च॥एवमुपासनानां द्विविधमैक्यमधिकारभेदेनोपसंहारं च संक्षेपेणोक्त्वा तत् प्रपञ्चयितुमुपसंहारप्रयोजनं च वक्तुं सूत्रमवतारयन्ति । * नन्वित्यादि * ॥ ननु वेद्यैक्येन प्राप्ते सर्वत्र सर्वगुणानामुपसंहारे समाचारसूत्रोक्तैर्निरूपणप्रकारभेदाधिकारभेदासाधारणसम्बन्धिभेदैस्तन्निवारणं कर्मोपासनासाधारण्येन कृतम् । परं त्वेतावान् विशेषो यत् कर्मणि निरूपणप्रकारभेदो निवारक, उपासनायां तु रूपप्रकारभेदस्तथा तत्र देहोऽधिकार, इह त्वान्तरस्तत्र सम्बन्धी बाह्य, इह तु ध्येयत्वेनेष्ट आन्तरस्तथापि तेषां गुणान्तरोपसंहारबाधकता त्वविशिष्टेति तद्रीत्या यस्य कस्यचन बाधकस्य यत्र क्वापि सम्भवाद् गुणोपसंहारो न क्वचिदपि प्राप्तावकाश इति सिद्धम् । तद्विरुद्धश्च श्रीरामतापनीयेऽवतारान्तरत्वस्य दशमस्कन्धीयाक्रूरस्तुतौ च रघुवर्यत्वादेरुपसंहारो दृश्यतेऽतो न पूर्वसूत्रोक्तं साधीय इत्याशङ्क्य तन्निवृत्त्यर्थमस्मिन् सूत्रे वेद्यैक्यनिरूपणप्रयोजनं

इत्यादिना ॥ उक्तस्थलादिषु यः उपसंहारः स त्वर्थस्य पदार्थस्य भगवल्लक्षणस्योभयत्राप्यभेदादित्यर्थः । नन्वेवं सति मत्स्ये शरचापादिकं, पुरुषे च शृङ्गादिकं भावनीयं स्यादितिचेत् तत्राह । विधिशेषवदिति । यथा विधिशेषाणामग्निहोत्रादीनामग्निहोत्रत्वादिलक्षणे धर्मे समानेऽपि सति स्वस्वशाखोक्तप्रकारकस्यैव करणं, नान्यशाखोक्तधर्मोपसंहार एवमिहापि तत्तदवतारोपासकस्य तत्तद्-

---

सूचयन्नुपसंहारप्रयोजकं रूपमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * उक्तस्थल इत्यादि * । तत्तत्तापनीये, इति रामपदेनाऽसौ, परं ब्रह्माभिधीयते, तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति श्रावणादक्रूरस्यापि भगवति परब्रह्मत्वज्ञानस्य तत्स्तुत्यारम्भे उक्तत्वात् तत्र योऽवतारान्तरत्वोपसंहारः स भगवल्लक्षणस्य वस्तुन उभयत्राप्यभेदमनुसन्धाय । अन्यथा तत्र परं ब्रह्मेति न वदेत् । प्रयोजनाभावात् । तथाच येन ब्रह्माभेदस्तत्रानुसंहितस्तेनोपसंहारः कार्य इत्येतदर्थमित्यर्थः । अत्र पूर्वसूत्रोक्तनियमभङ्गं शङ्कते * नन्वित्यादि * । * एवं सतीति * । ब्रह्मत्वेऽनुसंहिते सति । तथाचैवं मत्स्यादिषु विरुद्धधर्मभावने प्राप्ते स्वाध्यायसूत्रोक्तनियमस्य भग्नत्वादग्निहोत्रादिष्वपि सर्वशाखोक्तधर्मकरणापत्तिः स्यादित्यर्थः । एतत् समाधातुं सूत्रांशं व्याकुर्वन्ति । * यथेत्यादि * । विधिशेषाणामित्यत्र बहुव्रीहिः । आम्नायस्य क्रियार्थत्वात् । *समान इति तुल्येऽप्यर्थे । एवञ्च अर्थाभेदात् समानेऽप्युपसंहारो विधिशेषवदिति सूत्रयोजना । तथाचाऽत्र श्रीरामादिष्ववतारान्तरत्वं तेन तेन रूपेण तत्तत्कर्मकर्तृत्वमित्येवमुपसंहृतं, न तु अस्मिन् रूपे तद्रूपत्वमनेन रूपेण तत्कर्मकर्तृत्वं वा । तदप्यधिकारभेदाद् ब्रह्मत्वानुसन्धानस्यैव मुख्यत्वेन तत्र ज्ञानमार्गीयाधिकारात् । भक्तिमार्गीयाधिकारे तु मत्स्यादिरूपस्यैव प्राधान्येन सम्बन्धिप्राधान्याभोपसंहारः । अतः पूर्वसूत्रोक्तनियमस्याऽभङ्गान्न त्वदुक्तरीत्या तद्भावनप्राप्तिर्न वाऽग्निहोत्रादिषु शाखान्तरीयधर्मप्राप्तिरित्यर्थः । अस्मिन् पक्षे गुणोपसंहारप्रयोजनं न स्फुटं भवतीत्यतस्तदर्थं, तस्माद् भारत

ऽसाधारणधर्मवत्त्वेनैवोपासनं, नान्यावतारधर्मवत्त्वेनापीत्यर्थः। यद्वा मत्वर्थीयो वत्प्रत्ययोऽत्र। तथाच विधिशेषोऽर्थवादस्तद्वत्समानं च भवति यत्तत्र चोपसंहार इत्यर्थः। अत्रैवं ज्ञेयम्। एकस्यां श्रुतौ यस्य कर्मणो यत् फलमुच्यते तदितरस्यां तस्यां तस्यैव कर्मणस्तदितरत् फलमुच्यते। एवं सति द्वितीयश्रुत्युक्तफलकामनयाऽपि तदेव कर्म कर्त्तव्यं भवतीति तत्फलसाधकत्वस्योपसंहारः। यथा यद्वैश्वदेवेन यजते प्रजा एव तद्यजमानः सृजत इत्येका श्रुतिरस्य यागस्य प्रजाफलकत्वमाह। यद्वैश्वदेवेन यजते अग्निमेव तत्संवत्सरमाप्नोति तस्माद्वैश्वदेवेन यजमानः संवत्सरीणां स्वस्तिमाशास्त इत्याशासीतेति द्वितीया श्रुतिराह। तत्रोक्तरीतिरिति। यत्तु विधिशेषाणामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादिकर्म सर्वत्रेत्य-

---

सर्वोत्मेत्यस्य सुबोधिनीमनुसृत्य व्याख्यानान्तरमाहुः। * यद्वेत्यादि *। * मत्वर्थीयो वत्प्रत्ययोऽत्रेति *। वत्सदृशः प्रत्ययो वत्प्रत्ययः। सोऽत्र मत्वर्थीय इत्यर्थः। अस्मिन् पक्षे, विधिशेष इत्यत्र षष्ठीतत्पुरुषः। समानपदमेकार्थकम्। चः समुच्चये। एतमर्थं, तथाचेत्यादिना गृहीत्वा विभजन्ते। * अत्रैवमित्यादि *। * तत्फलसाधकत्वस्येति *। श्रुत्यन्तरोक्तफलान्तरसाधकत्वस्य। उदाहरणमाहुः। * यथा यदित्यादि *। एते श्रुती तु तैत्तिरीयब्राह्मणप्रथमकाण्डस्थे चातुर्मास्यप्रथमपर्वभूतवैश्वदेवयागस्य फलद्वयबोधिके। तत्र प्रथमा स्फुटार्था। द्वितीयस्यां तु वैश्वदेवाख्यपर्वणः संवत्सराभिमान्यग्निप्राप्तिहेतुत्वात् तद्यागकाले तदीयसूक्तवाक्यमध्ये, संवत्सरीणामितिमन्त्रसूक्तवाकाऽऽशीःषु होता आशासीतेत्यर्थः। * तत्रोक्तरीतिरिति *। एकस्य कर्मणो वाक्यद्वयेन फलद्वयश्रावणात् फलद्वयसाधकत्वस्योपसंहारः। तथाच यथा तत्र तथा यस्यामुपासनायां फलद्वयं श्रुतं, यथा गोपालतापनीये, यं मां स्मृत्वा निष्कामः सकामो भवति, अगाधा गाधा भवतीत्यादि, यो ध्यायति सोऽमृतो भवतीति च। तत्र, तं यथा यथोपासते तदेव भवति तद्धैतान्

र्थाभेदादुपसंहार इति । तन्न साधु । अग्निहोत्रादेस्तत्तच्छाखिनां स्वस्वशाखोक्तप्रकारस्यैव करणादतिरेके प्रायश्चित्तश्रवणान्नाऽन्यशाखोक्तधर्मोपसंहारः शक्यवचनः । प्राणाद्युपासनास्वधिकगुणस्येतरत्रोपसंहारे न किञ्चिद् बाधकं दृश्यते इति तत्र स कर्त्तुं शक्यत इति चकारेण तदादयः संगृह्यन्ते । वस्तुतस्तु पूर्वसमुच्चयार्थश्चकारः । शाखान्तरोक्तधर्मोपसंहारप्रयोजनाभावस्य, स्वाध्या-

---

भूत्वाऽवतीति वाजसनेयिश्रुतेस्तत्तत्फलदत्वस्योपसंहारस्तेन फलं वा कर्मसंनिधाविति पूर्वतन्त्रीयाधिकरणसिद्धप्रयोगभेदबाधनार्थमेतत्कथनमिति मम प्रतिभाति । एवञ्चास्मिन् पक्षे उपसंहारोऽर्थाभेदादिति भिन्नं वाक्यम् । तत्र च पूर्वोक्ताशङ्कानिरासाय अर्थयोरभेदोऽर्थाभेद इति विग्रहः । तथाच अर्थौ ब्रह्मरूपवस्तु निरूपणप्रकारभेदादिरूपबाधकचतुष्टयनिवृत्तिश्च तयोरभेदमनुसन्धायेत्यर्थः तेन वस्त्वभेदेऽप्युक्तप्रकारातिरिक्तप्रकारेण भावनं पूर्वोक्तबाधकचतुष्टयापत्तेरुक्तरीत्या भावने च तन्निवृत्तेः सुखेनोक्तशङ्कानिरास इत्यर्थः । नन्वत्र परोक्तव्याख्यानं कुतो नाद्रियत इत्याकाङ्क्षायां, यत्त्वित्यादिना तदनूद्य दूषयन्ति । * तन्न साध्वित्यादि * । तथाच शिष्टाचारविरोधादिभ्यस्तन्नाद्रियत इत्यर्थः । नन्वयं दोषस्तवापि तुल्यः । प्राणादिविद्यासु पञ्चमस्य रेतसः षष्ठस्याग्नेश्च भिन्नशाखीयत्वेनोपसंहारनिवृत्त्यापत्तेरित्यत आहुः । * प्राणादीत्यादि * । * तदादय इति * प्राणविद्यादयः । तथाच तत्र तदुपसंहारेऽधिकानुप्रवेशेन संख्याया अबाधे निरूपणप्रकारभेदस्याबाधकत्वात् कर्मवन्न्यूनातिरेके प्रायश्चित्तस्य तत्राश्रवणात् सम्बन्ध्यभेदाच्च न किञ्चिद् बाधकमिति ता विद्या अनुक्तसमुच्चायकेन चेन संगृह्यन्त इति नास्मन्मते स दोषः । वस्तुतस्त्वस्याः, शङ्कायाः समाचारसूत्रविचारादेवानुदयात् पूर्वोक्तस्यार्थाभेदस्यैव समुच्चयार्थश्चकार इत्यर्थः । ननु ब्रह्माभेदस्यातीतपादे सिद्धत्वेऽप्यत्रारम्भे पुनस्तत्साधनप्रयोजनभूतस्योपसंहारस्यार्थादेव सिद्धेः प्राणादिविद्यासंग्रहस्यापि सिद्धेरेतत्सूत्रं व्यर्थमिति शङ्कायामाहुः । * शाखेत्यादि * ।

यस्य तथात्वेनेत्यत्र निरूपितत्वात् । उपसंहारबीजमनेन सूत्रेणोक्तम् ॥ ५ ॥

अन्यथात्वं शब्दादितिचेन्नाविशेषात् ॥ ६ ॥

ननूपासनासूक्तन्यायेन गुणोपसंहारो ह्युपास्यानां ब्रह्मत्वेनैक्ये सति भवति । मिथोविरुद्धानां गुणानां शान्तत्वक्रूरत्वतपोभोगादीनामुपसंहारे क्रियमाणे स्वरूपाणामन्यथात्वम् अब्रह्मत्वं स्यादित्यर्थः । तत्र हेतुः । शब्दादिति । एकत्वैकरसत्वादिधर्मनिरूपकश्रुतेरित्यर्थः । समाधत्ते । नाविशेषादिति । एकरसत्वं यथा श्रुतिबलान्निर्णीयते तथा विरुद्धधर्मवत्त्वमपि तत एव तथेत्यर्थः । तेन वस्त्वेव तत्तादृङ्मन्तव्यमिति भावः ॥ ६ ॥

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥

---

* उपसंहारबीजमिति * । उपसंहारहेतोर्बाधकाभाववैशिष्ट्यरूपं तत्तत्फलार्थत्वरूपं च बीजम् । तथाच न वैयर्थ्यमित्यर्थः ॥ ५ ॥

अन्यथात्वं शब्दादितिचेन्नाविशेषात् ॥

ज्ञानमार्गीयोपासनायां सर्वगुणोपसंहारे बाधकमाशङ्क्य परिहरतीत्याशयेनाहुः * नन्वित्यादि * तथाच विरुद्धगुणोपसंहारे एकरसतानिवृत्त्या अपेते ब्रह्मत्वेऽर्थाभेदरूपहेतोस्ततो निवृत्तत्वादुपसंहार एव न स्यादिति भावः । समाधिं व्याचक्षते । * एकेत्यादि * । सिद्धमाहुः । तेनेत्यादि * । तथाच शब्दबलकृतनिर्णयस्योभयत्रापि तुल्यत्वात् सिद्धे ब्रह्मत्वेनाभेदे, एकोऽहं बहु स्यामिति श्रुत्या ब्रह्मैव स्वेच्छया, विज्ञानमेकमुरुधेव विभातीति न्यायेन जीवप्रज्ञापराधात् तथा भातीति ब्रह्मत्वप्राधान्येनोपासनायां नोपसंहारबाध इत्यर्थः ॥ ६ ॥

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥

पूर्वसूत्रे अन्यथात्वं शब्दादित्यंशेन यदाशङ्कितं तस्यैवास्मिन्

पूर्वसूत्रोक्ताशङ्कानिराकरणं वा विकल्पेन पूर्वोक्तात् प्रकारान्तरेण कर्त्तव्यमित्याह । न चेति । तमेवाह । प्रकरणभेदादिति । अत्रायं भावः । श्रुतिप्रामाण्याद् यावत्तदुक्तधर्मवद् ब्रह्मेति मन्तव्यम् । एवं सति यादृशोऽधिकारिणो यादृग्वेद्यं रूपं तादृशस्य तस्य तादृक् तन्निरूपयति प्रकरणभेदेन । तथाच ज्ञानप्रकरणे ज्ञानाधिकारिणो यादृग्रूपं ज्ञेयं तादृक् तस्मै निरूपयत्यदृश्यमग्राह्यमित्यादिरूपा श्रुतिः । भक्तिप्रकरणे तु भक्तेर्बहुविधत्वाद् यादृग्यादृग्भक्तानां यादृग्यादृक्तदनुभवविषयस्तादृक्तादृक् तन्निरूपयति अथर्वणोपनिषदिति । अत्र दृष्टान्तमाह । परोवरीयस्त्वादिवदिति । अस्मिन् मे लोकेऽदर्धुकं स्यादिति कामवत आराग्रावान्तरदीक्षा

सूत्रे प्रकारान्तरेण परिहारमाहेत्याशयेन व्याकुर्वन्ति * । पूर्वसूत्रेत्यादि * । विकल्पेनेत्यस्यैव विवरणं * पूर्वोक्तादित्यादि * । तथाच अन्यथात्वं प्रकरणभेदाद्वा नेति सूत्रयोजना । हेतुं विवृण्वन्ति । * अत्रायमित्यादि * । * उपनिषदितीत्यन्तम् * तथाच ब्रह्मणि सर्वत्र सर्वगुणसत्त्वेऽपि न सर्वत्र सर्वे प्रकटयतीति प्रकरणभेदेन तत्तद्रूपतत्तरीयतत्तद्गुणकथनादवगम्यते । तथा सति तत्तदधिकारिणा तत्तद्गुणा एव तत्र भावनीया इति स्वरूपाणामन्यथात्वाभावात् तस्मिंस्तस्मिन्नुपास्ये रूपे तदेकत्वतदेकरसत्वयोरनपायाच्चाद्वयत्वम् । अत एव, अपि संराधनसूत्रे ज्ञानप्रसादेनेति श्रुत्या ज्ञानाधिकारिणो निष्कलदर्शनम् । भक्त्यधिकारिणोऽर्जुनस्यानेकधाबहुदरेति स्मृत्या तद्दर्शनमुक्तमिति सङ्गच्छते । तस्मान्नात्र शङ्केत्यर्थः । * अत्र दृष्टान्तमाहेति * एवं श्रुत्याशये विनिगमकं दृष्टान्तमाहेत्यर्थः । विषयवाक्योदाहरणेन दृष्टान्तं विवृण्वन्ति । * अस्मिन्नित्यादि * इदं वाक्यं तैत्तिरीयसंहिताषष्ठकाण्डद्वितीयाध्यायस्थम् । अर्थस्तु, अहीनाख्ये सोमयागे अहीनसत्रे च उपसदहःसंख्यां पूर्वं विधाय तेषु दिनेष्ववान्तरदीक्षाङ्गव्रतपानस्तनसंख्यां विधत्ते । तत्राऽवान्तर-

पूर्वमुक्ता। तदग्रे परोवरीयसीमऽवान्तरदीक्षामुपेयाद् यः कामये-तामुष्मिन् मे लोकेऽदूर्धुकः स्यादिति चतुरोऽग्रेऽथ त्रीनथ द्वावथैक-मेषा वै परोवरीयस्यवान्तरदीक्षेति पठितम्। अस्य दीक्षाप्रकरणे पठितत्वाद् दीक्षां विनोक्तरीत्या व्रते तु न परोवरीयस्त्वमेवं भक्ति-प्रकरणीयानामथर्वणोपनिषदाद्युक्तरूपाणां न भक्तिरहितोपास्य-त्वम्। ज्ञानसाधनत्वेन विष्णुस्मरणादावपि क्रियमाणे भक्तित्वं नेति। अथवा पूर्वसूत्रेण सर्वरूपेषु मिथः सर्वधर्माणामुपसंहारः प्राप्तः। स नैकान्तिकभक्तानुभवविरुद्ध इत्यत्र व्यवस्थितविकल्प-माह। न वेत्यादिना। सर्वेष्ववतारेषु भगवदवतारत्वेन साधारणी भक्तिर्यस्य स सर्वत्रोपसंहारं करोतु नाम। यस्त्वेकान्ती तस्य

दीक्षा द्विविधा। योऽस्मिन् लोके समृद्धिशीलं फलं कामयते त-स्याराग्रावान्तरदीक्षा। सोमक्रयदिने सायमेकस्तनम्। अपरेद्युः प्रा-तर्द्वौस्तनौ सायं त्रीन् स्तनान्, परेद्युः प्रातश्चतुस्तनान्। एवं पाने आ-राग्रावान्तरदीक्षा सिद्ध्यति। सा पूर्वमुक्ता। आरं बलीवर्दप्रतोदनलो-हं, तदद्ग्रं मुखं यस्याः सा आराग्रा। तदग्रे परोवरीयसीवाक्येऽन्या। तत्र विपरीतं व्रतम्। सोमक्रयणादिने चतुरः स्तनान् दुह्युः, अपरेद्युः प्रातस्त्रीन् सायं द्वौ, परेद्युः प्रातरेकमित्येवं दिनत्रय इति। तेन सिद्धमा-हुः। * अस्येत्यादि * तथाच तत्तद्भक्तिमतां तथा तथोपासनापरि-पाके तत्र ब्रह्मत्वस्यानुभवाच्च ब्रह्मत्वशङ्कादयः। अभक्तशङ्कामात्रेण तु न तत्र तद्बाध इति तेषां ब्रह्मत्वं निर्विघ्नमित्यर्थः। ननु ज्ञानार्थम-पि विष्णुस्मरणादेः क्रियमाणत्वात् कथं न तेषां रूपाणां भक्तिरहितो-पास्यत्वमित्यत आहुः। * ज्ञानेत्यादि * इदं भक्तिहंसे प्रपञ्चितमतो नात्र व्युत्पाद्यते। अथ पूर्वसूत्रेणैवोक्ताशङ्कानिवृत्तावस्य न तथाव-श्यकत्वमित्यरुच्या प्रकारान्तरेण सूत्रं व्याचक्षते। * अथवेत्यादि * * पूर्वसूत्रेणेति * उपसंहारसूत्रेण। * इत्यत्र व्यवस्थितविकल्पमा-हेति *। इति हेतोरस्मिन् सूत्रे तथाहेत्यर्थः। व्यवस्थास्वरूपं स्फुटी-कुर्वन्ति। * सर्वेष्वित्यादि *।

स्नेहोत्कर्षेणान्तःकरणमेकस्मिन्नेव रूपे पर्यवसितमिति रूपान्तरमन्तःकरणारूढं न भवत्येवेति नोपसंहारसम्भावनापीति । तदेतदुच्यते । न वेत्यनेन । तत्र हेतुः । प्रकरणभेदादिति । श्रुत्यादिषु तत्तदधिकारिणमुद्दिश्य तत्तत्प्रकरणमुक्तम् । तेनात्र प्रकरणभेदेन अधिकार उच्यते । एवं सत्युपासकादिभ्य उत्तरीत्योत्कृष्टाधिकारादित्यर्थः सम्पद्यते ॥ परोवरीयस्त्वादिवदिति ॥ परस्मात्परश्च, वराच्च वरीयानिति परोवरीयानुद्गीथः । तथाचाक्ष्यादित्यादिगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोपासनाया अप्युद्गीथोपासनत्वेन साम्येऽपि सर्वोत्कृष्टत्वेनैवोद्गीथो भासत इति, न हिरण्यश्मश्रुत्वादिगुणोपसंहारः परोवरीयस्त्वगुणविशिष्टोद्गीथोपासनायामेवं प्रकृतेऽपीति ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥

---

* तदेतदिति * व्यवस्थितं विकल्पनम् ।

* तत्र हेतुरिति * व्यवस्थायां हेतुः । नन्वस्तु व्यवस्थायामधिकारभेदस्य हेतुत्वं तथाप्यनुपसंहार उत्कृष्टाधिकारो हेतुरिति कथं गम्यते इत्याकाङ्क्षायां दृष्टान्तेन गम्यते इति बोधनाय दृष्टान्तमुपन्यस्य व्याकुर्वन्ति । * परस्मादित्यादि * । छान्दोग्ये प्रथमप्रपाठके प्रवाहणेनोद्गीथकुशलतमेनोद्गीथविद्यासमाप्तावुक्तम् । आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं, स एष परोवरीयानुद्गीथः स एषोऽनन्त इति तद्विद्यायामेवाक्ष्यादित्यादिप्रतीकोपासनाप्युक्ता । अतस्तत्र हिरण्यश्मश्रुत्वादिगुणसत्त्वेऽपि सामगतिपरंपराविश्रान्तिस्थानभूतपरोवरीयस्त्वगुणविशिष्टोपासकस्य ते गुणा नैतस्मादुत्कृष्टत्वेन भान्तीति न तदुपसंहारस्तथा तत्तदेकान्तिन उपास्ये रूपे गुणान्तरसत्त्वेऽपि तेषामुत्कृष्टत्वेन भानाभावान्नोपसंहार इत्यर्थः ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ पूर्वसूत्रेऽधिकारभेदेनोपसंहारानुपसंहारौ व्यवस्थापितौ । तां व्यवस्थामेव द्रढयितुं किञ्चिदा-

एकान्त्यनेकान्तिनोरपि श्रीरामोपासकत्वादिसंज्ञा त्वविशिष्टेत्यने-कान्तिनोऽप्युपसंहारो युक्त इत्याशङ्कोत्तरं तु, न वा प्रकरणभेदा-दित्यनेनैवोक्तम् । संज्ञा तु लौकिकी, अधिकारस्त्वान्तरः । स एव बलीयानिति। संज्ञैकत्वस्य हेतोरन्वयव्यभिचारमाह ।अस्ति तु तद्-पीति । प्रमितभेदेष्वप्युपासनेषु परोवरीयस्त्वादिषु संज्ञैकत्वमुद्गी-थोपासनेऽप्यस्तीत्यर्थः ॥ ८ ॥

शङ्क्य परिहरतीत्याशयेन सूत्रं पठित्वा व्याकुर्वन्ति । * एकान्ती-त्यादि * रूपप्राधान्यवानेकान्ती, ब्रह्मत्वप्राधान्यवाननेकान्ती । तयो-रुक्तसंज्ञैकत्वेनोपसंहारप्रयोजनकहेतुचतुष्टयसिद्धौ रूपप्राधान्यकृता-धिकारमात्रस्याप्रयोजकत्वात्तथेत्याशङ्कोत्तरं त्वतिप्रसङ्गवारकतया-ऽऽवश्यकत्वेन अधिकारस्योपसंहारनियामकतासमर्थनादुक्तम् । * सं-ज्ञैकत्वस्येत्यादि * अधिकारस्यान्तरत्वेऽपि प्रमाणेष्वगणनाच्च संज्ञातो बलीयस्त्वमित्याशङ्क्य तस्य तथात्वमाहेत्यर्थः । * प्रमितभेदेष्वित्या-दि * छान्दोग्ये ओमित्येतदक्षरमुद्गीथमुपासीतेत्युद्गीथावयवं प्रणवं प्रस्तुत्य तस्य रसतमत्वादिगुणोपव्याख्यानपूर्वकं, देवासुराः संयतिर इत्यादिना, अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिर इ-त्युद्गीथावयवप्रणवविषयमुपासनमुच्यते । तथा आदित्यादिपुरुषप्र-तीककम् । तथा आकाशमुपक्रम्य परोवरीयस्त्वगुणकम् । वाजस-नेयके तु, हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति कृत्स्नमुद्गीथं प्रस्तुत्य, अथ हेममासन्यं प्राणमुचुस्त्वं न उद्गायेत्यादिना कृत्स्नोद्गीथविषय-मासन्योपासनमुच्यत इति प्रकरणभेदविषयभेदाभ्यां प्रमितभेदेष्व-पि तेषु सा संज्ञाऽस्ति । उपसंहारहेतुर्विद्यावेद्ययोरभेदस्तु नास्तीति न संज्ञामात्रेणोपसंहारः प्रयोक्तुं शक्यतेऽतो न पूर्वोक्तव्यवस्थाभङ्ग इ-त्यर्थः । एवमन्यथात्वसूत्रेण परोवरीयःसूत्रप्रथमवर्णकेन च वेद्यै-क्यबाधकं परिहृतम् । तद्द्वितीयवर्णकेन, संज्ञासूत्रेण च समाचार-सूत्रोक्ता अधिकारस्योपसंहारनियमहेतुता प्रपञ्चितेति चतुःसूत्र्यां परापरविद्यासाधारण्येन तौ निर्णीतौ । एवमत्र स्वाध्यायसूत्र-मारभ्य षड्भिः सूत्रैरुपसंहारप्रकारो विचारितः । तेनाऽत्र गुणो-

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

अथेदं विचार्यते । उपास्येषु रूपेषु बाल्यपौगण्डादिकमप्युच्यते । तथा सति विग्रहे न्यूनाधिकभाव आपततीति तत्रोक्तं सच्चिदानन्दत्वमनुपपन्नं स्यात् तेषां सदैकरूपत्वात् । प्राकृतत्वे च सर्वमसमञ्जसं स्यादिति प्राप्त आह । व्याप्तेरिति । सर्वतः पाणिपादान्तमित्यादिस्मृतेः साकारमेव व्यापकमिति । चकारात् सर्वरस इति श्रुत्या रसात्मकत्वेन भक्तानां यादृग्रूपेण लीलारसानुभवस्तादृग्रूपं क्रमेण योगमायापसारणेन प्रकटीकरोतीति बाल्यादिभावो

पसंहारो विषयः । स च सर्वैः सर्वेषूपास्येषु पुरुषेषु सर्वेषां गुणानां कर्तव्य, उत तैस्तैस्तेषु तेषु तेषां तेषामिति संशयः ।तत्राद्यः पूर्वः पक्षः । मार्गभेदेन यथाधिकारं कर्त्तव्य इति सिद्धान्तः फलति । एवञ्चात्र सामान्यतः स्वभावरूपा गुणास्तत्तत्कार्यकर्त्तृत्वादयश्च यथाधिकारमुपसंहार्यत्वेनानुपसंहार्यत्वेन विचारिताः । अन्ये तु, एतत्त्रिसूत्र्यां छान्दोग्यवाजसनेयकोक्तयोरुद्गीथविद्ययोरभेदो, भेदो वेतिसंशयमापद्य पूर्वसूत्रे अभेदं पूर्वपक्षीकृत्य सूत्रद्वयेन प्रक्रमभेदकृतरूपभेदात् संज्ञाया लौकिकत्वाद् व्यभिचारित्वाच्च विद्याभेदं सिद्धान्तयन्ति । तत्तु तादृशसिद्धान्तस्य प्रथमसूत्रोक्तचोदनाद्यविशेषरूपहेत्वेकदेशभूतरूपाभावे पूर्वोक्तहेत्वभावादेव सिद्धत्वान्नात्यावश्यकमिति प्रतिभाति ॥ ८ ॥ २ ॥

व्याप्तेश्च समञ्जसम् ॥ अतः परं पुनर्ब्रह्मगतानेवान्यान् धर्मान् अवस्थारूपान् विचारयतीत्याशयेन सूत्रमवतारयन्ति । * अथेत्यादि * । * तथा सतीति * । अवस्थावत्त्वे सति । * तत्रोक्तमिति * । तेषु रूपेषु श्रुत्योक्तम् । * तेषामिति * । ब्राह्मणां सच्चिदानन्दानाम् । * सर्वमिति । * उपास्यरूपेषु साधितं ब्रह्मत्वं तेषां ब्रह्मत्वेनोपासने श्रुतिविरोधपरिहारादिकं च । * इति प्राप्ते आहेति* एवमवतारेष्ववस्थाविशेषदर्शनेन पूर्वसाधितस्य वैयर्थ्ये तत्परिहारमाहेत्यर्थः । व्याकुर्वन्ति । * सर्वत इत्यादि । * क्रमेणेति * ।

पपत्तेः सर्वमुपपन्नमित्यर्थः । तेन यावदुक्तधर्मवद् ब्रह्मेति सि- द्धम् ॥ ९ ॥

कालोपाधिक्रमेण । तथाचासामञ्जस्यं तदा स्याद् यदि विग्रहस्य प्राकृतत्वं तस्मिन् विग्रहे न्यूनाधिकपरिमाणवत्त्वं च कालोपाधिजन्यं स्यात् । तत्तु नास्ति । किन्त्वावरणापसारण आकाशस्येव व्यापकत्वसच्चिदानन्दविग्रहस्यावरणभूताया योगमायायाः क्रमादपसारणेन भक्तानां तल्लीलारसानुभावनार्थमिच्छया कृपया तादृशपरिमाणकं तद्रूपं प्रकटीकरोतीति यथा व्यापकस्याकाशस्य वृद्धिह्रासभाक्त्वमुपपन्नं तथा ब्रह्मणो रूपेष्वपि सर्वं बाल्यादिभानमुपपन्नमित्यर्थः । इदमत्र भगवता व्यासेन समञ्जसपदकथनाद् वृद्धिह्राससूत्रोक्तमुभयसामञ्जस्यं स्मारयता; चकारेण, लोकवत्तु लीलाकैवल्यमिति च स्मारयता बोधितं ज्ञेयम् । भगवतो योगमायावरणं च गीतायां, नाहं प्रकाशः सर्वस्य योगमायासमावृतः मूढोऽयं नाभिजानाति लोको मामजव्ययमिति स्वयमेवोक्तमिति नात्र शङ्कालेशः । सिद्धमाहुः । * तेनेत्यादि । * एवं व्याप्त्यादिना सामञ्जस्यसाधनेन यावदुक्तधर्ममुक्तं तत्सदृशं वा श्रुतिसिद्धं केवलं ब्रह्मैवेति सिद्धम् । तथाचोपास्यरूपेषु प्रतीयमानानां नित्यानामेव बाल्यपौगण्डादिधर्माणां परिमाणानां तत्तल्लीलानां चावरणतद्भङ्गजन्यप्रतीतविषयत्वेनाविरोधमवधार्य भक्तिमार्गीयेण तेऽप्युपसंहार्या इत्यर्थः । तथाच बाल्यादिभावो विषयः । उपपद्यते, न वेति संशयः । पूर्वपक्षसिद्धान्तौ स्फुटौ ॥

रामानुजानां मते इदं पूर्वस्यैव शेषः ॥

शांकर भास्करे च मते तु ओमित्येतदक्षरमुद्गीथमित्यत्र श्रूयमाणं सामानाधिकरण्येऽध्यासापवादपर्यायविशेषणपक्षाणां मध्ये को वा युक्त इति संशये अध्यासपक्ष एकस्मिन् शब्दे लक्षणापत्त्या, द्वितीये च एकस्य निवृत्तेरदृष्टायाः कल्पनापत्त्या, तृतीयस्य चाप्रसिद्ध्या असंगतत्व, त्रयाणाम् । अतो विशेषणपक्षो युक्त इति सिद्धान्तितम् ।

तदकाण्डताण्डवं प्रतिभाति । तन्मते प्राणादीनां यथायथम्

ननु ब्रह्मधर्मत्वेन ते सर्वे नित्या वाच्याः। ते च तत्तद्भक्तविशिष्टाः । तत्र चैकस्यैव भक्तस्य पौर्वापर्येणानेकलीलासम्बन्धित्वं श्रूयते । तथाच पूर्वलीलाया नित्यत्वेन तत्सम्बन्धिभक्तस्यापि तथात्वं वाच्यम् । एवं सति तस्यैवाग्रिमलीलासम्बन्धोऽशक्यवचनः। तथा वचने तु पूर्वलीलाया नित्यत्वं भज्येत । नित्यत्वे त्वग्रिमलीलासम्बन्धिनो भिन्नत्वं स्यात् । तच्चानुभवतदावेदकमानविरुद्धमित्यत उत्तरं पठति ॥

अब्रह्मत्वेन ब्रह्मकार्यत्वेन च तत्र ब्रह्मदृष्टिवत् प्राणादिदृष्टेरप्यध्यस्तत्वेन ॐकारे उद्गीथदृष्टेरपि तथात्वे विशेषाभावादिति ॥ ९ ॥

अग्रिमसूत्रमवतारयन्ति । * नन्वित्यादि । * अनुच्छित्तिधर्मेतिश्रुत्या ब्रह्मधर्माणामनुच्छेदश्रावणाद् ब्रह्मधर्मत्वेन ते सर्वे बाल्यादयो नित्या ध्वंसाप्रतियोगिनो वाच्यास्त च लीलानां तत्तद्भक्तानुभावनार्थत्वात्तत्तत्क्रीडोपयोगिभक्तविशिष्टास्तत्र कृष्णोपनिषद्येकस्यैव भक्तस्य पौर्वापर्येणानेकलीलासम्बन्धित्वं, यो नन्दः परमानन्दो यशोदा मुक्तिगेहिनीत्यादिना श्रीनन्दादि वृन्दापर्यन्तानां स्वरूपकथनानन्तरं, सोऽवतीर्णो महीतले, वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहेति तैः सह क्रीडाकथनाच्छ्रूयते । लीलासम्बन्धित्वेचोक्तरीत्या भक्तस्यापि नित्यत्वं वाच्यम् । एवं पूर्वलीलातत्सम्बन्धिभक्तयोर्नित्यत्वेन पूर्वलीलावैशिष्ट्यस्यापि नित्यत्वे सति तस्यैवाग्रिमलीलासम्बन्धोऽशक्यवचनः । तस्यैवाग्रिमलीलासम्बन्धवचने त्वेकस्य युगपद्विरुद्धलीलाद्वयानुभवस्याशक्यवचनतयाग्रिमानुरोधे पूर्वलीलानित्यत्वं भज्येत । पूर्वनित्यत्वे चैकस्य युगपदनेकलीलासम्बन्धस्याशक्यवचनतया अग्रिमलीलासम्बन्धिनो भक्तस्य पूर्वलीलानुभवकर्त्तुः सकाशाद् भिन्नत्वं स्यात् । तच्च भिन्नत्वं लीलानुभावतृभक्तैक्यावेदकप्रमाणभूता या कृष्णोपनिषत्स्थश्रुतिस्तद्विरुद्धं चेति लीलानित्यत्वे भक्तभेदप्रसङ्गादुक्तश्रुतिविरोधो, भक्ताभेदे च लीलानित्यत्वभङ्गादनुच्छित्तिधर्मश्रुतिविरोध इत्युभयतःपाशारज्जुरित्याशङ्कायामुपसंहारदौर्घट्ये प्राप्ते तन्निवृत्त्यर्थमुत्तरं सूत्रं पठतीत्यर्थः ॥

सर्वाभेदादन्यत्रेमे ॥ १० ॥

लीलामध्यपातिनां सर्वेषां पदार्थानां ब्रह्मणा सहाभेदाद् ब्रह्मणश्चैकत्वात् पूर्वलीलातोऽन्यत्रोत्तरलीलायामपीमे पूर्वलीलासम्बन्धिन एव त इत्यर्थः । अत्रेदमाकूतम् । रसो वै स इति श्रुत्या,

---

सर्वाभेदादन्यत्रेमे ॥ व्याकुर्वन्ति । * लीलेत्यादि * । ब्रह्मणा सहाभेदादिति * । 'तस्मान्न भिन्ना एतास्तु आभिर्भिन्नो न वै प्रभुः। भूमावुत्तारितं सर्वं वैकुण्ठस्वर्गवासिनामि'ति कृष्णोपनिषच्छ्रुतौ सर्वासां ब्रह्माभेदश्रावणेन तन्न्यायेनान्येषामपि पदार्थानां तथात्वात्। नन्वस्तु भक्तानां ब्रह्माभेदस्तथापि पूर्वोक्ताशङ्कायाः कथं निवृत्तिरित्याकाङ्क्षायामभेदस्वरूपं व्याकुर्वन्ति । * अत्रेदमित्यादि * । प्रकाशाश्रयाधिकरणे स्वरूपधर्माणां ब्रह्माभेदस्तादात्म्यरूपो भेदविरुद्धसम्पन्निर्णीतस्तत्र परिच्छिन्नकार्यकर्तृत्वस्य भेदनिर्णायकत्वेन सच्चिदानन्दरूपस्य चाभेदनिर्णाकत्वेन भेदात्यन्ताभावरूपस्याभेदस्याऽभावात् । तस्यां च सम्पदि स्वाश्रयाविनाभूतत्वं प्रविष्टमिति ब्रह्माविनाभूता ब्रह्मात्मकाः सच्चिदानन्दरूपाः स्वरूपधर्मा इति सिद्धम् । असद्वा इदमग्र आसीत् ततो वै सदजायत, तदात्मानꣳ स्वयमकुरुत तस्मात् तत् सुकृतमुच्यत इति, यद्वैतत् सुकृतं, रसो वै स इति श्रुतौ च, सोऽकामयतेत्यादिना पूर्वानुवाक उक्ता या सृष्टिस्ताम्, असद्वेत्यादिना असाधुत्वेन प्रदर्श्य, ततो वै सदजायतेत्यनेन विवक्षितस्य प्रकटितस्य साधुत्वमुक्त्वा तत्र हेत्वाकाङ्क्षायां तदात्मानमित्यादिना ततो विशेषमाह । तत्र हि प्रजायेयेतिद्वितीयाऽऽकारादुच्चनीचभावः । अत्र तु स्वयमेव परिणत इत्ययं परिणामः सुकृतरूप इति । ननु तत्रापि, बहु स्यामिति पूर्वाकारात् स्वस्यैव परिणामे कथमस्यैव सुकृतत्वं, न तस्येत्याकाङ्क्षायामेतस्य सुकृतत्वहेतुमाह । यद्वैतत् सुकृतं, रसो वै स इति । वैशब्द उक्तशङ्कानिवृत्त्यर्थः । एवकाराऽर्थो वा । तथाच यदेतत्सुकृतं स वै निश्चयेन रसः सर्वसारभूत आनन्दः । तदेवाग्रे परिचाययति । रसꣳ ह्येवायमित्यारभ्यानुवाकसमाप्तिपर्यन्तम् । तथाच पूर्वसृष्टौ सच्चितांश

सर्वरस इति श्रुत्या च सर्वरसात्मकत्वं ब्रह्मणो निर्णीतम् । तथाच यस्य रसस्य ये विभावानुभावादिरूपास्तैः स रसः सम्पद्यते । आतानवितानात्मकतन्तुभिः पट इव । अतस्तत्तादात्म्यं रसस्येति सर्वाभेदो निष्प्रत्यूह इति । ननु विरुद्धदिक्कयोरेकजातीयभाववतोर्भक्त्यतिशयेन युगपदेकजातीयलीलासहितभगवत्प्रादुर्भावे भगवतो व्यापकत्वेनैवं प्रादुर्भावस्योपपन्नत्वेऽपि लीलापदार्थानामव्यापकत्वाद्युगपदाविर्भावोऽनुपपन्नः । भक्तयोः समानत्वाद्भक्तिमार्ग-

---

प्राधान्यं, नानन्दस्य । इह त्वानन्द एव तत्तद्रूप इति तस्याः सकाशादभिन्नयं विशेष इत्यर्थः । एवं सर्वरस इति श्रुतौ च सर्वरसाऽऽत्मकत्वेन । तेनैताभ्यां ब्रह्मणो रसात्मकत्वं निर्णीतम् । तेन यत् सिद्धं तदाहु । * तथाचेत्यादि * । * विभावानुभावरूपा इति * । आलम्बनविभावरूपा भक्ता, उद्दीपनविभावरूपा ऋत्वादयः । अनुभावाः कटाक्षवेणुवादनादयस्तेषां सर्वेषामेवं तादात्म्यरूपे अभेदे निर्विघ्ने लीलास्थानां भक्तानां ब्रह्मात्मकत्वेन नित्यत्वात् पूर्वोक्तरलीलासम्बन्धित्वं निर्विघ्नम् । लीलानां च ब्रह्मधर्मत्वान्नित्यत्वम् । एवं सर्वेषां नित्यत्वे युगपत्सर्वलीलानुभव आपतति । स च, अङ्गसङ्गं करिष्यामीत्यादिश्रौतप्रयोगाऽन्यथानुपपत्त्यवगतभगवदिच्छामहिम्ना, तत्सामर्थ्यमहिम्ना च निवारणीयो, न तु भक्तानुभवादेरनित्यत्व स्वयं कल्पनीयम् । ब्रह्मणो मनोवागगोचरत्वस्यानिरुक्तादिश्रुतिसिद्धत्वात् । इदमत्र बोधसौकर्यार्थमुक्तम् । उत्पत्तिपक्षस्याप्येकदेशत्वेनादरणात् । वस्तुतस्तु यथा लीला सम्पद्यते तत्प्रकारकं सर्वं ब्रह्मैव । तथैव लीलापि । यदकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तादितिश्रुतेः । 'यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य । तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वदि'त्येकादशे भगवद्वाक्याच्च । उत्पत्तिपक्षस्यैव मुख्यत्वात् । तच्च प्रागेवोपपादितमिति न किञ्चिदनुपपन्नमित्यर्थः । अत्रैव किञ्चिदाशङ्क्य परिहरन्ति । * नन्वित्यादि * सामञ्जस्यादित्यन्तम् * । * प्रादुर्भाव इति * । विचार्य-

विरोधापाताद्विनिगमकाभावाच्चैकत्र मायया प्रदर्शयतीति च न वक्तुं युक्तमिति शङ्काप्येताभ्यां निरस्तेति ज्ञेयम् । ब्रह्मणो व्यापकत्वाल्लीलायाश्च तेन सहाभेदात्तथात्वादेकस्मै भक्ताय यथा ब्रह्मणा सह लीलापदार्था आविर्भवन्ति तथैव तदेवान्यत्रापि भक्तसमानदेश आविर्भवन्तीति सर्वसामञ्जस्यात् ॥ १० ॥

ननु व्यापकत्ववत् पूर्णानन्दैश्वर्यवीर्यादयोऽपि धर्मास्तेषु प्रतीता भवेयुः । नचैवमस्ति । दुःखसम्भावनायां प्रभुमेव प्रार्थयन्ति यतः । एवं सति व्यापकत्वमपि न वक्तुं शक्यम् । तुल्यत्वादत उत्तरं पठति ॥

आनन्दादयः प्रधानस्य ॥ ११ ॥

पूर्णानन्दैश्वर्यादयः प्रधानस्य धर्मिणो ब्रह्मण एव धर्माः ।

माण इति शेषः । * इति शङ्केति * । लीलासम्बन्धिपदार्थाव्यापकत्वकृता शङ्का । * तथात्वादिति * । व्यापकत्वात् । तथाच तेऽपि व्यापका एव । परिच्छिन्नत्वप्रतीतिस्तु तेन तेन प्रकारेण ततस्ततो मायाप्रसारणाद्विरुद्धधर्माश्रयत्वस्य साधितत्वाच्चेति न किमप्यनुपपन्नमित्यर्थः । तेन स्वरूपप्रधानस्य भक्तिमार्गीयस्य तत्तल्लीलासम्बन्धिनां भक्तादयो गुणाः सर्वेऽप्युपसंहारणीया इति बोधितम् ।

अन्ये त्वत्र छान्दोग्यवाजसनेयिकौशीतकिनां ज्येष्ठत्वश्रेष्ठत्वादिगुणिका प्राणविद्यैका, भिन्ना वेति संशये भिन्नेत्याशङ्क्य छान्दोग्यवाजसनेयिनोर्गुणाधिक्येऽपि रूपाभेदाद्विद्यैक्ये कौशीतकिनामपि वशिष्ठत्वादिगुणोपसंहारं सिद्धान्तयन्ति ।

तदस्मन्मते समाचारसूत्रे निरूपणप्रकारभेदस्य प्रायश्चित्ताद्यनुज्ञापकत्वे उपसंहारानुगुण्यस्थापनादुपसंहारसूत्रेऽर्थाभेदकथनाच्च सिद्ध्यतीत्युपेक्षितं बोध्यम् ॥ १० ॥

अग्रिमसूत्रमवतारयन्ति । * नन्वित्यादि * । आनन्दादयः प्रधानस्य ॥ व्याकुर्वन्ति । * पूर्णेत्यादि * ।

लीलापदार्थास्तु ब्रह्मधर्मत्वेन व्यापका उच्यन्ते । व्यापकस्य धर्मिणोऽनागन्तुकधर्मस्य व्यापकत्वनियमात् । न हि धर्मेषु पूर्णानन्दत्वादयः सम्भवन्ति । धर्मित्वापत्त्या धर्मत्वव्याहतेः । अत एवात्र प्रधानपदमुपात्तं, धर्मगुणभावेन लीलापदार्थानामाविर्भाव इति ज्ञापयितुम् ॥ ११ ॥

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

ननूपासकस्य प्रियत्वादिप्रकारकज्ञानक्रममादाय प्रियत्वा-

---

* व्यापकत्वनियमादिति * । अयं नियम आकाशपरिमाण आत्मचेतनायां च स्फुटः । नच पूर्णानन्दैश्वर्याद्यभावे तेषु ब्रह्मत्वस्यौपचारिकत्वापत्तिरिति शङ्क्यम् । तत्र तदनाविर्भावेनैवोपपत्तेः । नच तत्र को हेतुरिति शङ्क्यम् । लीलेच्छाया एव तथात्वात् । नच तर्हि विशेषतो निर्वाच्यमिति वाच्यम् । विदितान्यत्वानिरुक्तत्वादिश्रुतिभिरेव तन्निवारणात् । ननु तथापि संशयो न निवर्त्ततेति चेद्, न निवर्त्ततां नाम तथापि, भिद्यते हृदयग्रन्थिरिति श्रुतेर्भगवद्दर्शनाऽनन्तरमेव तन्निवृत्तेरिति यथाश्रुतमिति मन्तव्यमिति दिक् । स्वव्याख्यातस्यार्थस्य व्यासाशयगोचरत्वायाहुः । * अत एवेत्यादि * । एतेन तेषु स्वरूपानन्दांशभूतजैवानन्दसत्त्वेऽपि भगवद्दानेन तद्धर्मांशभूतानां भजनानन्दैश्वर्यादीनां तेषु प्राकट्येऽपि न गुणभावनिवृत्तिरित्यपि ज्ञापितम् । अयमेवार्थः पुष्टिप्रवाहमर्यादायां, स्वरूपेणावतारेणेत्यादिकारिकासूक्त इति बोध्यम् । तेन भगवदसाधारणनिरङ्कुशजगत्कर्तृत्वादयः सर्वेशितृत्वादयश्च भक्तेषु नोपसंहर्त्तव्या इति बोधितम् । एवं त्रिसूत्र्या भक्तिप्रकरणीया भगवद्धर्मा विचारिताः॥११॥

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ आनन्दमयविद्यायामानन्दादयो धर्मा ब्रह्मासाधारणा इति सिद्धम् । तत्प्रसङ्गेन तद्विशेषणानि विचारयतीत्याशयेन सूत्रमवतारयन्ति । * ननूपासकस्येत्यादि * । उक्तत्रिसूत्र्यां साकारत्वव्यापकत्वादयो भक्तसाधारणाः, पूर्णानन्दैश्वर्यादयस्तु भगवदसाधारणा इति भगवद्धर्मरूपेषु

दिधर्माणां शिरस्त्वादिरूपत्वमानन्दमयाधिकरणे निरूपितमिति लीलास्थानामपि प्रियत्वादिज्ञानस्य सत्त्वादत्रापि स्वरूपोपासकस्य प्रियशिरस्त्वादिधर्माणामुपसंहारः कार्य इत्याशङ्क्य परिहरति। प्रियशिरस्त्वाद्यप्राप्तिरिति। चित्तशुद्धितारतम्यहेतुकप्रियत्वादिज्ञानं लीलास्थानां चित्तशुद्ध्यपेक्षाऽभावान्न सम्भवतीति न तेपामत्रोपसंहारः कार्य इत्यर्थः। अथवा नन्वानन्दमयोपासनामथर्वणा-

---

भक्तेषु न त इति स्थितम्। तथा सत्यानन्दादय इव प्रियशिरस्त्वादयोऽपि तत्र पठितत्वात् तदसाधारणा इति प्रियादीनां शिरस्त्वादिरूपत्वमानन्दमयाधिकरणे अन्नमयादिपूपासनाकथनेनोपासकस्य ज्ञानक्रममादाय निरूपितम्। तेन लीलास्थानां भगवति प्रियत्वादिज्ञानस्य सत्त्वाद् भक्तिमार्गीयोपासने तेषां पुरुषविरुद्धत्वभानेऽप्यसाधारणत्वात् प्रियत्वादिषु शिरस्त्वादिके अधिके श्रौतत्वाद्भाविते दोषाभावात् तेषामुपसंहारः कार्य इत्याशङ्क्य परिहरतीत्यर्थः। सूत्रं तात्पर्यकथनमुखेन व्याकुर्वन्ति। * चित्तशुद्धीत्यादि *। अत्र प्रधानस्येतिपदं पूर्वसूत्रादनुवर्त्तते। तथाच चित्तशुद्धितारम्येन भासमाने प्रधानस्य भेदे हि यस्माद्धेतोः, उपचयापचयौ प्रमोदमोदरूपावानन्दोपचयापचयावुपासकस्य भासेते। लीलास्थानां तु ब्रह्मतादात्म्यस्य पूर्वाधिकरणे उक्तत्वात् तादृशां चित्ते तारतम्यभानस्य कुत्राप्यनुक्तत्वात्तदभावेन भगवति तदवयवेषु च यत् प्रियत्वादिज्ञानं तन्निरुपधिस्नेहहेतुकं, न चित्तशुद्धितारम्यहेतुकम्। अत उपासकज्ञानक्रममादाय श्रुतौ निरूपितानां प्रियशिरस्त्वादीनामप्राप्तिः, प्राप्तिरेव न सम्भवतीति भक्तिमार्गे तदनुसारिणा स्वरूपोपासकेन तेषामुपसंहारो न कार्य इत्यर्थः। अस्मिन् पक्षे उपासनामार्गीयस्य तदुपसंहारपक्षोऽर्थादेवायाति, तथाप्यानन्दमयवाक्येऽथर्वणोपनिषदि च सदानन्दत्वस्योक्तत्वादुभयप्राधान्येनोपासकस्य निर्णयो न सिद्ध्यतीत्यतः सूत्रं प्रकारान्तरेण व्याख्यातुमवतारयन्ति। * अथवेत्यादि *। उक्तविधस्योपासकस्य पुरुषरूपविरुद्धपक्षाद्युपसंहारस्यायुक्तत्वादानन्दमयवाक्ये च पुरुषस्य विधामात्र-

पनिषदुक्तपञ्चरात्राद्यागमोक्तप्रकारेण कुर्वतः पुरुषरूपे पक्षाद्युपसंहारस्यायुक्तत्वादानन्दमयाधिकरणे तद्रूपस्यैवोक्तत्वात् पुरुषरूपः कथमानन्दमयः । तथात्वे वा कथं नोक्तोपसंहारः । अपरं च । मोदप्रमोदयोरुपचितानुपचितानन्दरूपयोर्युगपत्सत्त्वेन देशभेदेनापि भिन्नत्वान्नित्यानन्दैकरसे ब्रह्मणि तादृग्रूपकथनमनुपपन्नमित्याशङ्क्य परिहरति । प्रियशिरस्त्वादीति । यद्यथर्वणोपास्यात् प्रियशिरस्त्वादिविशिष्टस्य भेदः स्यात् तदा तदप्राप्तिः स्यान्न च तथेति प्रियशिरस्त्वादिकमुपासनामार्गीयस्याप्याथर्वणिकादेरुपसंहार्यमेवेत्यर्थः । चित्तशुद्धितारतम्यहेतुकं प्रियत्वादिज्ञानमिति पक्षे परो-

---

क्षमेव गृहीतम् । तच्च स्त्रीत्वव्यवच्छेदार्थत्वेनापि युज्यते इति पक्षिरूपस्यैवोक्तत्वात् पुरुषरूपः कथं सः । अतः सोपासना एतदुपनिषदुक्तरूपेण न युक्ता । अथ ब्रह्मत्वस्याविशिष्टत्वादेतदुपनिषदुक्तस्याप्यानन्दमयत्वेऽत्रापि पक्षिरूपस्य सत्त्वात् कथं न पक्षाद्युपसंहार इत्येका शङ्का । अपरञ्चेत्यादिनोक्ता मिथ्यावादिकृता द्वितीया । * देशभेदेनेति * । दक्षिणोत्तरभेदेन । * तादृशरूपकथनमिति * । भेदयुक्तरूपकथनमानन्दमयवाक्येऽनुपपन्नमित्यर्थः । सूत्रं व्याकुर्वन्ति । * यदीत्यादि * । तथाचास्य सूत्रस्य तर्कगर्भत्वेनाऽपि व्याख्यातुं शक्यत्वात् । वाक्यद्वयेऽप्युक्तस्य ब्रह्मण ऐक्येन विरुद्धधर्माश्रयत्वेन च पूर्वाशङ्कोक्तस्योभयरूपत्वस्य पक्षिरूपत्वस्य वा दुष्टत्वादुपासकस्यात्र तदुपसंहारो न दुष्ट इति भावः । ननु प्रमोदमोदयोरुक्तरूपत्वे भेदस्तु सिद्ध एवेति कथं तदभाव इत्यत आहुः । * चित्तेत्यादि * । अपिः समुच्चये । तथाच मान्त्रवर्णिकसूत्रव्याख्याने मोदप्रमोदयोः परिनिष्ठितापरिनिष्ठितानन्दपक्षे । तयोस्तादृशत्वज्ञानस्य चित्तशुद्धितारतम्यहेतुकत्वेन स्वरूपाभेदकतया ब्रह्मणि भेदाभावात्तथा । वस्तुतस्तु परोक्षवादोऽयमिति प्रतिज्ञाय तत्र निरुपधिप्रीतिरेव मुख्येत्यादिना व्युत्पादिते परोक्षवादपक्षे च रसात्मके स्वरूपे तदात्मका एव भावा भक्तानां हृदि तथा स्फुरन्तीति

क्षत्वादपक्षेऽपि तत्र भेदाभावान्मोदप्रमोदयोर्न त्वदुक्तरूपत्वमित्यर्थः । ब्रह्मधर्मा एव भिन्ना इत्युपासनार्थं तानादाय शिरःपाण्यादिनिरूप्यत इति तत्रैव निरूपितमस्माभिः । यद्यप्यानन्दमयाधिकरण एवास्यार्थस्योक्तत्वान्नेयं शङ्का सम्भवति । तथापि गुणोपसंहारप्रसङ्गे मिथ्यावादिन आपाततः शङ्का सम्भवतीत्याचार्येणोक्त्वा निरस्ता ॥ १२ ॥

ननूपास्यरूपस्याविरुद्धा एव गुणा उपसंहर्त्तव्या, न तु विरुद्धाः । तथाच पुरुषरूपे पक्षादिविरुद्धमिति न तदुपसंहार्यमित्याशङ्क्याह ॥

तादृशप्रतीतेस्तद्भावहेतुकत्वेन रसरूपे ब्रह्मणि भेदाभावान्मोदप्रमोदयोर्नोपचयापचयरूपत्वमिति । अयम् अर्थः सूत्रतात्पर्यगोचरः । तथाच भेदाभावाद्यथा संकर्षणस्वरूपोपवर्णने, किरीटसाहस्रमणिप्रवेकप्रोद्योतितोद्दामफणासहस्रमितिवदुचित उपासनामार्गीयस्य तदुपसंहारो, भक्तिमार्गीयस्य तु परोक्षवादोक्तरीत्या प्रियत्वादेरेवोपसंहार इति भावः । ननु मा भूतामानन्दोपचयापचयौ स्वरूनिष्ठौ, तथापि प्रियत्वादीनां शिरस्त्वादिभावनं तु विरुद्धमेवेति कथं तदुपसंहार्यमित्यत आहुः । * ब्रह्मेत्यादि * । * तत्रैव निरूपितमिति * तस्मिन्नेव वर्णके, पुरश्चक्रे द्विपद इति श्रुतिविचारे भक्तानामलौकिकदेहस्थित्यर्थमन्नमयादिरूपस्तत्र तत्र प्रविशति । जीवे त्वानन्दमय इति निरूपितम् । तथाच जीवे पक्षिरूपेण प्रविशतोऽवयवा भिन्ना एव, ते जीवस्य यथाधिकारं प्रियादिरूपेण भासन्त इत्युपासनायां त उपसंहार्याः । भक्तिमार्गीयस्य तु तेषु भेदभानात् ते तत्र नोपसंहार्या इति पूर्वोक्ताधिकारनियता वर्णकद्वयसिद्धा व्यवस्थेत्यर्थः । ननु यद्यानन्दमयाधिकरणे अयमर्थः सूत्रकारेण सूचितः स्यात् पुनरत्र किमिति वदेदित्याशङ्कायामाहुः । * यद्यपीत्यादि * । * इयमिति * । मोदप्रमोदविषयिणी । तथाचैतदर्थं पुनः कथनमतो न दोष इत्यर्थः ॥ १२ ॥

इतरे त्वर्थसामान्यात् ॥ १३ ॥

इतरे पुरुषरूपे विरुद्धत्वेन ये भासमाना धर्मास्तेऽप्युपसंहर्तव्याः । तत्र विरोधव्यवच्छेदज्ञापनाय तु शब्दः । तत्र हेतुरर्थसामान्यादिति । अर्थः पदार्थ आनन्दमयत्वलक्षणस्तस्य समानत्वादेकत्वादित्यर्थः ॥ १३ ॥

अथानन्दमयाधिकरण उक्तप्रकारेण ये प्रियत्वादिधर्मास्तेषामेवोपसंहारः कार्यो, न तु पुरुषरूपे पक्षादीनामपीत्यग्रिमं पठति ॥

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

आनन्दस्वरूपस्य यावन्तो धर्मा भक्तिमार्गीयाः परोक्षवादेन उच्यन्ते प्रियत्वप्राधान्यादयस्तेषां सर्वेषां ध्यानमासमन्ताद् ध्यानं,

---

इतरे त्वर्थसामान्यात् ॥ नन्वेवं पक्षद्वयस्वीकारे को हेतुरित्याकाङ्क्षायाम् इतरादिसूत्रत्रयप्रणयनमेव हेतुरिति सूचयन्तः, पूर्वमुपसंहारपक्षे हेतुं वदतीत्याशयेनावतारयन्ति । * ननूपास्येत्यादि * । व्याकुर्वन्ति । * इतर इत्यादि * । ननूपसंहारसूत्र एवायं हेतुः सिद्ध इति पुनः कथनस्य किं प्रयोजनमत आहुः । * तत्रेत्यादि * । * तत्रेति * । परस्वरूपे । * तत्रेति * । उपसंहारे । तथाच ब्रह्मत्वप्राधान्येनोपासने सम्बन्धि ब्रह्मैव । सदानन्दप्राधान्येनोपासनेऽपि, तयोरैक्यं परं ब्रह्मेति वाक्याद् भक्तेर्गौणत्वाच्च सम्बन्धि ब्रह्मैव पुरुषत्वादिकं तु न प्रधानमतस्तन्नोपसंहारनियामकमित्येतत्स्मरणाय तदुक्तिरित्यर्थः ॥ १३ ॥

आध्यानाय प्रयोजनाभावात् ॥ तर्हि भक्तिमार्गेऽपि परस्यैवोपास्यत्वात् तत्र कुतो नोपसंहार इत्याकाङ्क्षायामनुपसंहारपक्षे हेतुं वदतीत्याशयेनावतारयन्ति । * अथेत्यादि * । * उक्तप्रकारेणेति * परोक्षवादोक्तरीतिकरसात्मकतया । एतस्य पदस्य, उपसंहारः कार्य इत्यनेनान्वयः । सूत्रं व्याकुर्वन्ति । * आनन्देत्यादि * ।

तदर्थं ये धर्मा उपयुक्तास्त एवोपसंहर्तव्या, नान्ये । तत्र हेतुः । प्रयोजनाभावादिति । ध्यानपदार्थस्य तावद्भिरेव सिद्धेरधिकोपसंहारे तथात्वादित्यर्थः ॥ १४ ॥

अन्येषामनुपसंहारे हेत्वन्तरमप्याह ॥

आत्मशब्दाच्च ॥ १५ ॥

प्रियमेवेत्यादिना परोक्षवादेनोक्तानां प्रियप्राधान्यादीनामेव भावना कार्या, न तु यथाश्रुतानां शिरःपक्षादीनां तेषामविवक्षितत्वात् । तत्र हेतुरात्मशब्दादिति । आनन्द आत्मेत्यनेन पूर्वोक्तानां प्रियप्राधान्यादीनां रसात्मकानामात्मा स्वरूपमानन्द इत्युक्तम् । अग्रे रसो वै स इति वक्ष्यमाणत्वात् तस्य च स्थायिभावा-

---

* ध्यानपदार्थस्येति * भक्तिमार्गीयस्य तस्य । शेषस्तु निगदव्याख्यातः ॥ १४॥

आत्मशब्दाच्च ॥ सूत्रमवतारयन्ति । * अन्येषामित्यादि * ननु प्रयोजनाभावेऽपि ब्रह्मस्वरूपपरताया अविशिष्टत्वात् पक्षाद्युपसंहारे को दोष इत्याकाङ्क्षायां हेत्वन्तरमप्याहेत्यर्थः । व्याकुर्वन्ति । * प्रियमेवेत्यादि * । * तत्र हेतुरिति * । अविवक्षितत्वे हेतुः । * इत्युक्तमिति * तस्मादिति शेषः । तथाच यथाऽन्नमये इदमा परिदृश्यमानबोधनाल्लौकिकदृष्टौ पक्षादीनामविवक्षितत्वम् । तथात्र आनन्दपदसमभिव्याहृतेनात्मपदेन प्रियादिस्वरूपस्यानन्दत्वेन बोधनाद् भक्तिदृष्टौ पक्षादीनामविवक्षितत्वमेव दोष इत्यर्थः । नन्वाकारपूर्कावयवप्रायपाठे प्रविष्ट आत्मशब्द आकारे तात्पर्यरहित इत्यत्र किं मानमित्यत आहुः । * अग्र इत्यादि * आनन्दमयविवरणे आत्मानं स्वयमकुरुतेत्यादिना आत्मन एव प्राकट्ये रसो वै स इति रसरूपताया वक्ष्यमाणत्वाद् रसस्य च निरुपाख्यरूपस्थायिभावात्मकत्वात् तस्यैव परस्यात्मनो विवरणाय प्रपाठकप्रवृत्त्या तस्यैवानन्दमयत्वाच्चोपक्रमादिकं तात्पर्यलिङ्गमेव मानमित्यर्थः । नन्वेवं सति श्रुतौ

त्मकत्वात्तस्यैवानन्दमयत्वाच्च प्रियविषयकलीलामध्यपातिभक्तज्ञानप्रकाराणामपि रसात्मकत्वेनानन्दरूपत्वात् तेषामुपासना तूत्तमाऽधिकाराभावाच्छिरःपक्षादिरूपेण कार्येति भाववती श्रुतिस्तथा न्यरूपयत् । एतेन यत्परम्परासम्बन्धेऽप्युपास्यत्वं तदस्य महत्त्वं कियदवधि वाच्यमिति ज्ञाप्यते । एवं सत्युपासनामार्गीयोपास्यं विभुतिरूपं, न तु मूलरूपम् । यन्न योगेनेति वाक्यादिति ज्ञेयम् ॥ १५ ॥

पक्षादिरूपत्वं किमित्युक्तमत आहुः । * प्रियविषयकेत्यादि * तथा च न सर्वथा तत्र निस्तात्पर्योऽपि तु मुख्याधिकारिणः प्रति तथेत्यर्थः । ननूभयोः परस्वरूपपरत्वे तुल्ये कथमधिकारवैलक्षण्यावगतिरित्यत आहुः * एतेनेत्यादि * । आत्मपदस्यानन्दस्वरूप एव तात्पर्येण यत्परम्परासम्बन्धेऽपि पक्षादिविशिष्टानन्दमयस्योपास्यत्वं तस्य सम्बन्धिनो महत्त्वं कियदवधि वाच्यमिति तदग्रिमया, यतो वाच इति श्रुत्याऽपि ज्ञाप्यते । एवं तस्योत्कर्षे सति उपासनामार्गीयोपास्यं विभूतिरूपं, न तु मूलरूपम् । 'यन्न योगेन सांख्येन दानव्रततपोऽध्वरैः । व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद् यत्नवानपी'त्येकादशस्कन्धे भगवता केवलेन भावेन स्वप्राप्तिं प्रक्रम्येतरनिषेधकथनाग्रे च रसभाववतामेव प्रशंसाया उक्तत्वात् । तथा चैवंविध-वाक्यैरेव वैलक्षण्यावगतिरित्यर्थः । एवं चतुःसूत्र्या प्रियशिरस्त्वादिधर्माणामुपसंहारानुपसंहारावधिकारभेदेन विचारितौ । एवञ्चात्र बोधसौकर्यार्थमवान्तराधिकरणव्यवस्था कृता । वस्तुतस्तु पञ्चदशसूत्रेणानेनाधिकरणेन, विद्यैक्यवेद्यैक्ययोरुपसंहारहेतुप्रयोजनयोः परविद्यासु तद्बाधकपरिहारतद्व्यवस्थयोरानन्दादीनामसाधारणत्वेनानुपसंहारस्य प्रियशिरस्त्वादीनां व्यवस्थयोपसंहारस्य च निर्णयात्, सर्वप्रपञ्चातीतः सर्वमुपसंहृत्यैवमेकः कारणरूपश्च भवति, प्राणाख्यां च कलां सृजत इति बोधितम् ॥

शङ्कराचार्यास्तु, अन्यथात्वादित्रिसूत्रेऽधिकरण उद्गीथविद्यां, व्याप्तेश्चेत्येकसूत्रेऽधिकरणे च तदीयशेषं, सर्वाभेदेत्येकसूत्रे च

प्राणविद्याम्, आनन्दादय इति सूत्रे च ब्रह्मधर्माणामेवोपसंहारानुपसंहारौ विचार्य, आध्यानादिद्विसूत्रे इन्द्रियेभ्यः परा ह्यर्था इत्यादिके, सा काष्ठा सा परागतिरित्यन्ते काठकवाक्येऽर्थादीनां ततस्ततः परत्वप्रतिपादने प्रयोजनाभावात्, सा काष्ठा सा परागतिरित्यनेन पुरुषविषयकाऽऽदरप्रदर्शनाच्च तस्यैव परत्वं प्रतिपाद्यत इति सिद्धान्तमाहुः।

भास्कराचार्या अप्येवमेव वदन्ति।

तत्र परविद्याविचारं विहाय प्रथमत एवोद्गीथप्राणविद्याविचारे बीजं न पश्यामः। युक्तं तु परविद्यासु विचार्यमाणास्वानुषङ्गिकी तद्विचारस्यापि सिद्धिरिति। अतीतपादान्ते ब्रह्मण एव धर्माणां विचारात्। समन्वयेऽपि पूर्वमानन्दवाक्यान्येव विचार्य पश्चात् प्रतीकवाक्यविचारादिति। एवमाध्यानाधिकरणविषयवाक्येऽपि अर्थादीनामिन्द्रियादिभ्यः परत्वप्रतिपादनं न निष्प्रयोजनम्। तत्तद्बलिष्ठताप्रतिपादनस्यैव प्रयोजनत्वात्। अन्यथा विषयत्यागेन्द्रियनिग्रहयोरनास्थायामिन्द्रियैर्विषयाकृष्टैरिति स्मृत्युक्तप्रणाड्या तैः प्रबलानर्थप्रसङ्गात्। ज्ञाते तु तत्तन्नियामकतया तेषां तत्तत्परत्वे तत्त्यागनिग्रहादिभिः पुरुषनिष्ठपरत्वप्रतिपत्तिसौकर्यमिति तस्यैव मुख्यप्रयोजनत्वादिति।

रामानुजाचार्यास्तु, आध्यानादिसूत्रद्वयमग्रिमं च सूत्रद्वयमानन्दाद्यधिकरणस्यैव शेषत्वेनाहुः। तत्र प्रियशिरस्त्वादीनां ध्यानार्थत्वमेव, न तु सर्वदा आनन्दमयप्रतीतावनुवर्त्तन्त इत्याध्यानसूत्र आहुः। अग्रिमे तु, अन्योऽन्तर आत्माऽऽनन्दमय इत्यानन्दमयस्याऽऽत्मशब्देन निर्देशादात्मनश्च शिरःपक्षपुच्छाद्यसम्भवात् प्रियशिरस्त्वादयस्त्वस्य सुखप्रतिपत्त्यर्थं निरूपणमात्रमित्याहुः। इह तु विभूतिरूपे तथा वर्त्तन्त इति मुख्याधिकाररहितानाम् आनन्दमये ध्येयाः। मुख्याधिकारिणां तु विभूतौ ध्येया, न तु पुरुषांशम इति विशेषः। आत्मगृहीत्यादिसूत्रद्वये तु अन्योऽन्तर आत्माऽऽनन्दमय, इत्यत्रात्मपदेन परमात्मैव गृह्यते। इतरवत्। आत्मा वा इदमेक एवाग्र आसीत् स ऐक्षत लोकान्नु सृजा इत्यैतरेयवत्। कुतः? उत्तरात्। सोऽकामयत बहु स्यामिति वाक्यात्। अवधारणं च तस्माद्वा एतस्मादिति पूर्ववाक्यस्थमाहुः। तदस्माकमपि संमतम्॥ १५॥ १॥

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

तैत्तिरीयकेऽन्नमयादिनिरूपणे पुरुषविधत्वं तेषां निरूप्य, तस्यैष एव शारीर आत्मा यः पूर्वस्येति सर्वत्र निगद्यते । तत्राऽऽनन्दमयपर्यन्तं शारीरात्मत्वकथनाद्भवति संशयः। शरीराभिमानी जीव एव कश्चिदुत ब्रह्मैव । तत्र शारीरपदाज्जीव एव भवितुमर्हति। तथा सत्यानन्दमयस्यापि ब्रह्मत्वं नोपपद्यते। उच्यते च भार्गव्यां विद्यायामन्नं ब्रह्मेति व्यजानादित्यारभ्याऽऽनन्दमयपर्यन्तमानन्दो ब्रह्मेति व्यजानादित्यन्तया श्रुत्या ब्रह्मत्वमित्युभयतःपाशा रज्जुरिति प्राप्त आह । इतरवज्जीववदात्मगृहीतेरात्मग्रहणम् । तस्यैष एव शारीर आत्मेति यत्तदुत्तरात् । यः पूर्व-

---

आत्मगृहीतिरितरवदुत्तरात् ॥ पूर्वाधिकरणे भक्तिमार्गीयाणां प्रियशिरस्त्वाद्यनुपसंहारे, आनन्द आत्मेत्यात्मशब्दप्रयोगो हेतुत्वेनोक्त इति तत्प्रसङ्गेनानन्दमयप्रकरणस्थमात्मशब्दयुक्तवाक्यान्तरं विचारयतीत्याशयेनैतदधिकरणविषयादिकमाहुः । * तैत्तिरीयक इत्यादि * । * भवति संशय इति * अस्मिन् वाक्ये भवति संशयः। पूर्वपक्षमाहुः । * तत्रेत्यादि * इदं हि वाक्यं प्राणमयमारभ्यानन्दमयपर्यन्तं पठ्यते । तत्र तस्य प्राणमयादेः, एष एव शारीरः शरीराभिमानी आत्मा इत्युक्ते, क एष इति शङ्कायां यः पूर्वस्येत्युच्यते । तत्रापि पूर्वपूर्वविचारे सर्वेभ्यः पूर्वोऽन्नमयोऽस्तीति तस्य यः शारीर आत्मा स सर्वस्येति सिद्ध्यति । तदभिमानी च जीव एव लोके दृश्यते । तथा सति स एवानन्दमयस्याप्यभिमानित्वेनायातीति तस्यापि ब्रह्मत्वं नोपपद्यते । नचाब्रह्मत्वमेवास्त्विति वाच्यम् । उच्यते च भार्गव्यां विद्यायामन्नाद्यानन्दान्तानां ब्रह्मत्वम् । अत उभयथापि श्रुतेर्विरोधादत्र निर्णयो दुर्घट एवेति पूर्वः पक्ष इत्यर्थः । सिद्धान्तं व्याकुर्वन्ति । * इतरवदित्यादि * । * जीववदिति * शारीरपदस-

स्येति सर्वत्रोक्तत्वात् सर्वेभ्य उत्तर आनन्दमयस्तस्माद्धेतोरित्य-र्थः । अन्नमयादिषु सर्वेष्वानन्दमयस्यैवोक्तत्वात् तत्तच्छरीराभि-मानित्वात् तथा । एतद्यथा तथाऽऽनन्दमयाधिकरणे प्रपञ्चितमस्मा-भिः । अथवाऽन्योऽन्तर आत्मेत्यन्नमयादन्यत्र सर्वत्रोक्तत्वात् पू-र्वनिरूपितो यः स इतर इत्युच्यते । तथा च, यः पूर्वस्येति श्रुतेतर-वत् पूर्वनिरूपितवत् प्रकृतस्याप्यात्मग्रहणकथनं यत्तदुत्तरादिति पूर्ववत् ॥ १६ ॥

मभिव्याहाराज्जीववत् । तथाच यः पूर्वस्येति सर्वत्र कथनात् स-र्वेभ्यः पूर्वो योऽन्नमयस्तस्य पूर्वमाकाशादिसृष्टिजनकस्य परस्यैव ब्रह्मण उक्तत्वात्तत्स्वरूपबोधनार्थमेवानन्दमयस्योक्तत्वाच्छारीरपद-समभिव्याहारमात्रेण जीवशङ्का न कार्या, किन्तूपक्रमादिकं विचार्य ब्रह्मैव तत्रात्मत्वेन बोध्यमित्येतदर्थमुत्तरादित्युक्तमित्यर्थः । नचाभि-मानित्वे जीवत्वं स्यादिति शङ्क्यम् । सर्वात्मकत्वात् । अन्यस्यान्य-स्मिन्नभिमानस्यैवाध्यासरूपत्वेन जीवत्वापादकत्वात् । पुरुषविधब्रा-ह्मणे उपक्रान्तस्यात्मनो, ब्रह्म वा इदमग्र आसीदिति ब्रह्मत्वं निगम-यित्वा, तदात्मानमेवावेदहं ब्रह्मास्मीति श्रावणेन तथाऽवसायादि-ति । तदेतत् स्मारयन्ति * एतदित्यादि * । ननु तस्मिन्नेव प्रकरणे शारीर आत्मेतिवद्, अन्योऽन्तर आत्मेत्यप्यात्मग्रहणमस्तीति कमा-त्मशब्दमत्र सूत्रकारोऽनुसन्धत्त इति न विनिगमनेत्यतो व्याख्या-न्तरमाहुः * अथवेत्यादि * । * य इति * प्राणमयादिविज्ञानमयान्तः । तेन यत् सिद्धं तदाहुः । * तथाचेत्यादि * । यः पूर्वस्येति, असन्ने-वेत्यनुवाकस्थया श्रुत्या पूर्वनिरूपितानां प्राणमयादीनामिव यत् प्र-कृतस्यानन्दमयस्यापि पूर्वसम्बन्ध्यात्मकथनं तद् उत्तरात् पूर्वव्यु-त्पादितरीत्या अन्योऽन्तर आत्मेत्यनुक्त्या च आनन्दमयादित्यर्थः । एवमप्यन्तरात्ममानन्दमय एव परिसमाप्यत इति निर्व्याज आत्मा स एवेति शारीर आत्मेत्यत्रापि स एव परामृष्यत इति वाक्यवि-निगमनाभावेऽपि आनन्दमय एव सर्वत्र शारीर आत्मेत्यस्यार्थस्य न व्याहतिरित्यर्थः ॥ १६ ॥

अन्वयादितिचेत् स्यादवधारणात् ॥ १७ ॥

ननु सर्वत्रान्योऽन्तर आत्मेति श्रुत्या प्रत्येकमन्नमयादीनां भेदनिरूपणाच्छारीरपदाच्च भिन्नो भिन्नो जीव एवात्मा शरीराभिमानी सर्वत्रोच्यते । आनन्दमयेऽपि तथोक्तिर्या सा त्वानन्दमयस्य ब्रह्मत्वेन व्यापकत्वेन सर्वत्रान्वयात् । सर्वेषु शरीरेषु सम्बन्धादित्याशङ्का तन्निरासायोक्तेऽर्थे उपपत्तिमाह। स्यादित्यादिना। स्यात्।आनन्दमय एवोक्तसर्वशरीराभिमानी भवतीत्यर्थः । तत्र हेतुरवधारणादिति । एष एवेत्येवकारेणेतरनिषेधपूर्वकमानन्दमयस्यैवात्मत्वनिर्द्धारादित्यर्थः ॥ १७ ॥

कार्याख्यानादपूर्वम् ॥ १८ ॥

तैत्तिरीयके पठ्यते । तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्युपक्रम्य महाभूतसृष्टिमुक्त्वाम्नायते पृथिव्या ओषधयः,

---

अन्वयादितिचेत् स्यादवधारणात् ॥ अत्र भाष्यमतिरोहितार्थम् ॥ तथाचान्नमयादीनां चतुर्णामाध्यात्मिकानां विभूतिरूपत्वात् तच्छरीरमप्राकृतसत्त्वात्मकम् । तत्र य आनन्दमयांशः प्रविष्टः स तदभिमानी । तेन तदाधिभौतिकेष्वस्मदादिशरीरस्थेषु पञ्चकोशेष्वपि स एवाभिमानी । तेनाध्यात्मिकस्तु यः प्रोक्तः सोऽसावेवाधिदैविक इति न्यायेनैकस्यैव कार्यद्वयकर्तृत्वाज्जीवोऽपि तदभिन्नत्वेन सिद्ध्यति । एवमभेदे उपसंहृते सति, सर्वं सहेत पुरुषः सर्वेषां कृष्णभावत इति न्यायेन विचारदशायां सर्वभूतमेकमेव चिन्तयेदिति बोधितम् । श्रद्धाख्यकला च बोधिता ।

अन्येतु, ऐतरेयवाक्ये परमात्मैवोच्यते, न तु हिरण्यगर्भ इत्याहुः । तदपि युक्तम् ॥ १७ ॥ २ ॥

कार्याख्यानादपूर्वम् ॥ अन्नमयादीनां कोशातिरिक्तत्वं बोधयितुमनुप्रसङ्गेन वदतीत्याशयेनाहुः । * तैत्तिरीयके इत्यादि * ।

ओषधीभ्योऽन्नम्, अन्नात् पुरुषः स वा एष पुरुषोऽन्नरसमय इति। एतदग्रेऽन्नस्योत्पत्तिस्थितिलयहेतुत्वमुक्त्वाऽग्रे, येऽन्नं ब्रह्मोपासत इत्युच्यते। भृगुवरुणसंवादे चाऽन्नं ब्रह्मेति व्यजानादित्युच्यते। तत्र स वा एष पुरुषोऽन्नरसमय इत्यनेन पूर्वोक्त एव पुरुष उच्यते? उत तद्भिन्न? इति भवति संशयः। किमत्र युक्तम्। पूर्वोक्त एवेति। यतः पूर्वोक्तस्यैव, स वा एष इत्यनेन प्रत्यभिज्ञानं प्रतीयते। तत्र ब्रह्मत्वेनोपासना कार्येत्यभिप्रायेण ब्रह्मत्वेन स्तूयत इति प्राप्त आह। कार्याख्यानादपूर्वमिति। पूर्वस्यान्नकार्यस्य पुरुषस्याख्यानात्, स वा एष इत्यनेनाग्रिमश्रुतिभिर्ब्रह्मत्वेन प्रतिपिपा-

---

* एतदग्र इति *। अन्नाद्वै प्रजाः प्रजायन्त इत्यग्रिमानुवाके। संशयमाहुः। * तत्र स वा इत्यादि *। तथाच, अन्नात् पुरुष इति हेतुहेतुमद्भावश्रावणात् पूर्वोक्त एव अन्नजन्य एव? उत अन्नस्य ब्रह्मत्वेनोपास्यताग्रास्तपसा ब्रह्मत्वेन ज्ञानस्य चाग्रे वक्ष्यमाणतया तादृशाऽन्नरसमयत्वात् पूर्वोक्तपुरुषतो भिन्नो विभूतिरूप? इति संशय इत्यर्थः। पूर्वोक्त एवेत्यादिपूर्वपक्षस्तु स्फुटः। सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति। * पूर्वस्येत्यादि * । एतेन कार्यस्याख्यानादकथनात्। ल्यब्लोपे पञ्चमी। कार्यस्याकथनं कृत्वा अपूर्वम् अग्रे उच्यमानम् अतिरिक्तं, न तु तदिति सूत्रयोजनाऽत्र स्फुटीकृता। अत्रायमाशयः। अन्नमयश्लोके यदि कार्यभूतस्यान्नस्य ब्रह्मत्वेनोपासनाय ब्रह्मधर्माः स्तुत्यर्थमुच्येरँस्तदा. अन्नाद्वा इत्यादिना पूर्वं तानुक्त्वाऽग्रे सर्वे वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासते इति सफलमुपासनमात्रं वदेत्। ब्रह्मत्वेनोपासनस्य तावतैव सिद्धेः। न तु तदग्रे पुनरपि अन्नं हि भूतानां ज्येष्ठमित्यादिना भूतजनकत्वतदत्तृकत्वाभ्यां धर्माभ्याम्। अततिभूतानि सततं व्याप्नोतीत्यन्नमिति भूतव्याप्तिबोधकं निर्वचनं सूचयेत्। नापि अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यत इति निरुच्यात्। प्रयोजनाभावात्। एवं सत्यपि यदेवं पुनर्निरुक्ति तेन पूर्वोक्तात् कार्यरूपादन्नादेतं व्यवच्छिनत्ति।

दधिषितमन्नरूपमेवोच्यते, न तु पूर्वमित्यर्थः । स वा एष इति प्रत्यभिज्ञानमिति यदुक्तं, तन्न । अन्नात् पुरुष इत्यनेनाधिभौतिकतन्निरूपणात् । स वा एष इत्यनेनाध्यात्मिकतन्निरूपणादुभयोश्च भेदात् । अत एव संशयाभावायाह । वै निश्चयेन एष वक्ष्यमाणः पुरुषः स आध्यात्मिकत्वेन प्रसिद्धोऽन्नरसमय इति । अन्यथा ब्रह्मात्मकतपोलक्षणसाधनेनाधिकारे सम्पन्नेऽन्नं ब्रह्मेति व्यजानादिति न वदेत् । नच तदपि तथात्वेन स्तूयत इति वाच्यम् । श्रुतेः प्रतारकत्वापत्तेः । आनन्दमयान्तमेवमेव निरूपणाच्च । अत

अग्रिमप्रपाठके ब्रह्मात्मकेन तपोरूपेण साधनेन तस्मिन् ब्रह्मत्वेन ज्ञानं भृगोर्वक्ति, न तु साधनं विना। तेनास्यान्नस्य पूर्वस्माद्वैलक्षण्यमवश्यं वक्तव्यम् । मैत्रायणीये, विश्वभृद्वै नामैषा तनूर्भगवतो विष्णोरिति भगवत्तनुत्वश्रावणात् । बृहदारण्यकोपनिषदि चान्नमुपक्रम्य, स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं चेत्यादिना व्यापकत्वश्रावणाच्च एवमन्नयोर्वैलक्षण्ये सिद्धे, अन्नात् पुरुष इत्यत्र य उच्यते स भौतिक एव पूर्वं तस्यैव सिद्धत्वात् । यः पुनस्तदग्रे स एवा एष पुरुषोऽन्नरसमय इत्यनेनोच्यते स आध्यात्मिक एव । अन्नसारभूतत्वात् । अत एव मध्ये निश्चयार्थकस्य वै इत्यस्य कथनम् । नच प्रत्यभिज्ञाबोधकयोः स एष इत्यनयोर्विरोधः शङ्क्यः । स राजा तोयनीव्या भुवः, कला च सा कान्तिमती कलावत इत्यादाविव प्रसिद्धार्थकतया, एष इत्यस्य वक्ष्यमाणार्थकतया चोपपत्तेः प्रत्यभिज्ञाया निश्चेतुमशक्यत्वात्। नच तौल्यं शङ्क्यम् । तदेतत्पदाभ्यां प्रसिद्धवक्ष्यमाणपरामर्षे पूर्वोक्तनिरुक्तिलिङ्गाभ्यासानां सामञ्जस्यस्याऽन्यथा तदनुपपत्तेश्च प्रमाणत्वेन तन्निरासात् । प्रत्यभिज्ञापक्षे तज्जनकस्यान्नस्य कार्यतया अब्रह्मणो ब्रह्मत्वेन ज्ञानं तपसा वदन्त्याः श्रुतेः प्रतारकत्वापत्तिरिति दोषसम्भवात् । प्रशंसामात्रार्थतायास्तत्र वक्तुमशक्यत्वात् । आनन्दमयज्ञानपर्यन्तं तपोरूपसाधननिरूपणात्तत्रैव तथा वक्तुमशक्यत्वात् ।

एवास्याऽध्यात्माग्रे निरूपितो यः पूर्वस्येति। स त्वाधिदैविक आनन्दमयः। अथवा वाजसनेयिशाखायामात्मेत्येवोपासीतेत्युपक्रम्य तदेतत्प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मेत्येतदग्रेऽन्यस्य प्रियत्वं निराकृत्येश्वरो हि तथा स्यादात्मानमेव प्रियमुपासीतेति पठ्यते। अत्रात्मौपाधिकत्वात् सर्वत्र प्रियत्वस्यात्मपदेन जीवात्मन एव प्रियत्वेनोपासना विधीयते? उतेश्वरपदात् परमात्मन? इति भवति संशयः। किमत्र युक्तम्। जीवात्मन एवेति। कुतः। यथा पुत्रादेरात्मोपाधिकप्रियत्वोक्त्या जीवात्मन एव प्रियत्वमुच्यतेऽन्यत्र श्रुतौ

किञ्च। यदि भौतिक एवान्नमयः स्यात् तदा आनन्दमयस्य एतदात्मरूपं न वदेत्। वदति तत्। अतः कार्यरूपाद् वैलक्षण्यमस्यावगन्तव्यम्। नचैवमपि आधिदैविकाद् भेदस्तु वर्तत एवेति किमनेन प्रयासेनेति शङ्क्यम्। आध्यात्मिकस्तु यः प्रोक्तः सोऽसावेवाधिदैविक इति द्वितीयस्कन्धे आध्यात्मिकाधिदैविकयोः स्वरूपभेदनिवारणेन तदभावात्। अभिलापभेदस्य तु पाचकपाठकवत् कार्यभेदप्रयुक्तत्वेन स्वरूपाऽभेदकत्वात्। तस्मादाध्यात्मिकाधिदैविकयोरन्नमयानन्दमययोः कार्यभेदेन विभूतिविभूतिमद्भावादेव भेदो, न तु स्वरूपतः। धर्मधर्मिणोस्तादात्म्यरूपस्याभेदस्य पूर्वं साधितत्वात्। अयमेव न्यायः प्राणमयादिष्वपि द्रष्टव्यः। तेनानन्दमयविद्यायां पञ्चाप्यन्नमयादयः कोशातिरिक्तास्तेषु, चत्वारो विभूतित्वेनोपास्या आनन्दमयः पुरुषोत्तमस्तु तादृशविभूतिमत्त्वेनोपास्य इत्येतदर्थमिति बोधितम्। तेन विशेषतो वैष्णवानां समीपे आसीनत्वे द्रष्टव्यमिति ज्ञापितम् ॥१४॥

एतस्य विचारस्य पूर्वशेषत्वादर्थस्य प्रागपि व्युत्पादितत्वाच्च नात्यन्तमावश्यकतेत्यरुच्या प्रकारान्तरेणैतद् व्याकुर्वन्ति। * अथवेत्यादि *। विषयादिकमाहुः। * वाजसनेयीत्यादि *। * वाजसनेयिशाखायामिति *। तस्यां बृहदारण्यके पुरुषविधब्राह्मणे। यद्यपि मैत्रेयीब्राह्मणेऽपि ब्रह्मैव प्रतिपाद्यत इति वाक्यान्वयाधिकरणे निर्णीतं, तथाप्यापाततो निरुपधिप्रियत्वं जीवे भासते इति पूर्वपक्षे

तथेहापि, प्रेयः पुत्रादित्यादिकथनाज्जीवात्मैव भवितुमर्हतीति प्राप्त आह । कार्याख्यानादपूर्वमिति । इतः पूर्वमाम्नायते प्राणन्नेव प्राणो नाम भवति वदन् वाग् रूपं पश्यँश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येवेति । तथाच प्राणनवदनादिकार्यैः कृत्स्नप्राणवागादित्वेनैकस्यैवात्मन आख्यानात् कथनादपूर्वं पूर्वं तु पुत्रवित्ताद्यभिमानदशायां, न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यादिना यत्प्रियत्वेनोच्यते तस्माद्भिन्नमात्मशब्दवाच्यमत्रेत्यर्थः । लोके हि प्राणवायुवागिन्द्रियादीनामेव तत्तच्छब्दवाच्यता, न तु जीवस्यात एवाग्रे श्रुतिराहेश्वरो हि तथा स्यादिति । अत एव प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मेत्याह । अन्तरो जीवात्मा ततोऽप्यतिशयेनान्तरमन्तरतरं पुरुषोत्तमस्वरूपमेव भवितुमर्हतीति । एतेन विग्रहस्यैवात्मरूपत्वं सिद्ध्यति ।

तदाहुतम् । सिद्धान्तं वक्तुं सूत्रे कार्यैराख्यानं कार्याख्यानमिति तृतीयासमास इत्यभिप्रेत्य कर्मनामकथनादित्यर्थः सिद्ध्यतीति तद् व्याकुर्वन्ति । * इत इत्यादि * । * अपूर्वमिति * । पुत्राद्यभिमानदशायामभिमानित्वेन प्रतीयमानात् प्रतीचो भिन्नम् । तदेतद्विवृण्वन्ति । * पूर्वं त्वित्यादि । * यदिति * । जीवात्मरूपं वस्तु । * आत्मशब्दवाच्यमत्रेति * । आत्मानं प्रियमुपासीतेति वाक्ये आत्मशब्दवाच्यम् । ननु प्राणनादिकार्ये जीवस्यापि प्रयोजकत्वात् कार्याख्यानमात्रेण प्रत्यगात्मातिरिक्त आत्माऽत्रोच्यत इति कथं निश्चेयमित्यत आहुः । * लोके हीत्यादि * । अत एवेति * । जीवभिन्नत्वादेव । * अत एव प्रेय इत्यादि * ईश्वरत्वादेव प्रेयोऽन्यस्मादित्यादिकं श्रुतिराह । तदेव व्युत्पादयन्ति । * अन्तर इत्यादि * । तथाचेश्वरत्वान्तरत्वाभ्यां लिङ्गाभ्यामुपष्टब्धेन तेन तथेत्यर्थः । ननु भवत्वेवं, तथापीदानीं तद्विचारस्य किं प्रयोजनमत आहुः । * एतेनेत्यादि * । * एतेनेति * । प्राणनादिकार्यमुक्त्वा, ईश्वरो हि तथा

तेन अविकृतत्वपरमानन्दत्वादयोऽपि धर्मा उपसंहर्त्तव्याः ॥ १८ ॥

ननु विग्रहे चक्षुःश्रोत्रादीनां वैलक्षण्यप्रतीतेरात्मनश्चैकरसत्वादुक्तकर्मनामवत्त्वं ब्रह्मण्यनुपपन्नमित्याशङ्क्योत्तरं पठति ।

समान एवञ्चाभेदात् ॥ १९ ॥

चोऽप्यर्थे । तथाचैवमपि सति श्रोत्रचक्षुरादिवैलक्षण्यप्रतीतावपि सति समान एकरूप एव, न तु विषमः । तत्र हेतुरभेदादिति । चक्षुरादीनां ब्रह्मत्वेन परस्परमभेदादित्यर्थः । अत्रेदमाकूतम् । तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेरुपनिषद्वेद्यमेव ब्रह्मस्वरूपम् । ताश्च प्राणन्नेव प्राणो भवति वदन् वागित्यादिरूपाः प्रतिनियतेन्द्रियग्राह्यान् अर्थान् स्वरूपेणैव गृह्णद् ब्रह्म तत्तच्छब्दवाच्यं भवतीति वदन्ति । तद्वाच्यता च व्यवहार्यत्वे । स च, तदेतत्प्रेयः

स्यादिति तत्तत्सर्वरूपताख्यानेन । एवमेतत्साधनस्यापि प्रयोजनमाहुः । * तेनेत्यादि * । उपसंहर्त्तव्या इति * । अवतीर्णे स्वरूपेऽनुसन्धेयाः । तथाचैतदर्थमिदमत्र विचारितमित्यर्थः । तेन पूर्वोक्तं अनावश्यकतामात्रं, न वर्णकान्तरकथने बीजं, किन्त्वेतदपीति बोधितम् ॥

अन्ये तु इदमेकसूत्रमधिकरणमङ्गीकृत्य अत्र प्राणविद्याशेषं विचारयन्ति । भोजनारम्भसमाप्त्योराचमनीयास्वप्सु प्राणवासोदृष्टिः कर्त्तव्येति । तत्र नास्माकमादरः । तासाममुख्यविद्यात्वेन तद्विचारस्य प्रासङ्गिकत्वात् । विद्यान्तरे मध्ये विचार्य दूरस्थितस्य पुनरत्र स्मृतौ बीजानुपलम्भाच्चेति ॥ १८ ॥

समान एवञ्चाभेदात् ॥ सूत्रमवतारयन्ति । * ननु विग्रह इत्यादि * । तथाच तरुकुसुमयोरिव स्वगतद्वैतमापतत्तीति तत्परिहारायोत्तरं पठतीत्यर्थः । व्याकुर्वन्ति । * चोऽप्यर्थ इत्यादि * । ननु भिन्नप्रकारकप्रतीतौ विद्यमानायां कथमभेदसिद्धिरित्यतस्तद् व्युत्पादयन्ति । * अत्रेत्यादि * । * स चेति * । औपनिषदः पुरु-

पुत्रादित्यादिवाक्यैकवाक्यतया निरुपधिस्नेहवत्तामेव व्यवहार्य इति ज्ञाप्यते । स चाविर्भूतेऽवताररूप एव सम्भवति । एवं सति तत्र भक्तैर्भगवद्विग्रहे तत्तदवयवेषु भेदेन यथा यथा व्यवह्रियते तथा तथैव तदेकमेवाखण्डसच्चिदानन्दरूपं ब्रह्मेत्यर्थः सम्पद्यते । एवंविधो लोके न प्रसिद्ध इत्यसम्भावना स्यात्, तदभावायाग्रे श्रुतिराहेश्वरो हि तथा स्यादिति । एतेनाविर्भूतरूपे व्यापकत्वैकरसत्वसच्चिदानन्दत्वादयो धर्मा उपसंहर्त्तव्या अनाविर्भूतेऽपीति स्थितम् । एवं सत्याविर्भावे ऽनाविर्भावेऽपीश्वरः समानः । न ह्याविर्भावे काँश्चनागन्तुकान् धर्मानादायाविर्भवतीति वक्तुं शक्यमनाविर्भूतस्यापि एवमाविर्भूतप्रकारेणैवाभेदादित्यपि सूत्रार्थः सूत्रकाराभिमत इति ज्ञातव्यम् । चकारेण विरुद्धसर्वधर्माश्रयत्वं समुच्चीयते । एवं साक्षादाविर्भूते भगवद्रूपे पूर्णानन्तधर्मास्तदुपासकेनोपसंहर्त्तव्या इति

पश्च । * स चेति * । व्यवहारश्च । नच तस्य व्यवहारस्याप्रामाणिकत्वं शक्यशङ्कम् । वरणहेतुकतनुविवरणैकसाध्यत्वात् । प्रकाशवच्चावैयर्थ्यात्, आह च तन्मात्रमिति सूत्रद्वयेनातीतपादेऽपि तस्योपपादनात् । तदेतदभिसन्धायाऽऽहुः । * एवं सतीत्यादि * । अत्र लौकिकयुक्तेः कौण्ठ्यमेव श्रुत्यभिप्रेतमित्याशयेनाहुः * एवंविध इत्यादि * । सिद्धमाहुः । * एतेनेत्यादि * । * एतेनेति * । ईश्वरस्य तथात्वश्रावणेन । एतामेव श्रुतिं हृदिकृत्य प्रकारान्तरेण सूत्रं योजयन्ति । * एवं सत्याविरित्यादि * । तथाच, 'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् । प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायये'ति गीतावाक्येनास्यां श्रुतावुक्तस्येश्वरत्वस्य नैसर्गिकत्वेन तादृगाकारस्य सार्वदिकत्वात् तथेत्यर्थः । अत्र च विश्वतश्चक्षुर्यदेकमव्यक्तमनन्तरूपमित्यादिश्रुतयोऽप्यनुसन्धेयाः । पूर्वोऽप्यर्थो व्याख्यात इत्यस्मिन् पक्षेऽर्थान्तरमाहुः । * चकारेणेत्यादि * । सिद्धमाहुः । * एवं साक्षादित्यादि * । * साक्षादविर्भूत इति * ।

सिद्धम् ॥ १९ ॥

अथ यत्रकार्यचिकीर्षया जीवे स्वयमाविशति तदाऽऽवेशा-त्तद्धर्मा अपि केचित् तास्मिन्नाविर्भवन्ति । तत्रोपासकेनाखिलब्रह्म-धर्मोपसंहारः कर्त्तव्यो, न वेति शङ्कासमाधानं विकल्पेनाह सूत्रा-भ्याम् । तत्रादौ विधिपक्षमाह ॥

सम्बन्धादेवमन्यत्रापि ॥ २० ॥

सत्त्वाद्यधिष्ठानमनपेक्ष्य स्वरूपेणाविर्भूते ॥

अन्ये त्विदमेकसूत्रमधिकरणमङ्गीकृत्य वाजिशाखीयाग्निर-हस्यस्थबृहदारण्यकस्थयोः शाण्डिल्यविद्ययोरैकविद्यं परस्परगु-णोपसंहारं च विचारयन्ति । तदपि प्रथमाधिकरणीयपञ्चसूत्र्यैव सिद्ध्यतीति बोध्यम् । रूपाभेदस्यैव प्रयोजकत्वादिति ॥ १९ ॥

सम्बन्धादेवमन्यत्रापि ॥ एवमवतारोपासनादौ गुणोपसंहारं विचार्यावेशे तं विचारयतीत्याशयेनाग्रिमसूत्रमवतारयन्ति । अ-थेत्यादि । य आत्मनि तिष्ठन् य आत्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरमिति श्रुत्या आत्ममात्रस्य ब्रह्मशरीरत्वेऽपि, यो-ऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यन-क्तीत्येकादशस्कन्धे तनुभृदन्तर्बहिरशुभविधूननपूर्वकस्वगतिव्यञ्जन-रूपविशेषकार्यस्मरणात् तदादिकार्यचिकीर्षया यत्र जीवे स्वयं भगवानाविशति तदा भगवदावेशाद्भगवद्धर्मा अपि केचित्तस्मिन्ना-विर्भवन्ति । यथा इन्द्रप्रतर्दनसंवादे इन्द्रे । अत्र जीव इत्युपलक्षण-म् । तेन प्रतिमाया अपि सङ्ग्रहः । गोपालतापनीये मथुरासमीपस्थ-वनस्थिता द्वादशमूर्त्तीरुक्त्वा, ता हि ये यजन्ति ते मृत्युं तरन्ति मुक्तिं लभन्त इति फलमुक्त्वाग्रे, मथुरामण्डले यस्तु जम्बूद्वीपे स्थितोऽपि वा । योऽर्चयेत् प्रतिमां मां च स मे प्रियतरो भुवि । तस्यामधिष्ठितः कृष्णरूपः पूज्यस्त्वया सदे'त्यादिभिः प्रतिमोपासनं लक्ष्यीकृत्य सर्वेषां स्वपूजनस्योक्तत्वात् प्रतिमायामधिष्ठानोक्त्या स्वावेशस्य चोक्तत्वात् । अतस्तादृशे जीवादावुपासकेनाखिलब्रह्मधर्मोपसंहारः

अन्यत्रापि जीवेऽप्येवं ब्रह्मणीवोपासनाकार्या । तत्र हेतुः, सम्बन्धादिति ॥ अयोगोलके वह्नेरिव तस्मिन्नावेशलक्षणः सम्बन्धोऽस्तीति, तत्त्वेन व्यपदेशाच्च तथेत्यर्थः । अत्रैवं ज्ञेयम् । अयं तु जीवोऽत्राविष्टं भगवन्तमहमुपास इति जानाति चेत् तदा न सा जीवगामिन्युपासना, किन्तु ब्रह्मगामिन्येव । तत्राखिलधर्मोपसंहारे न किञ्चिद् बाधकम् । यत्र ब्रह्मत्वेनैव ज्ञात्वोपास्ते तत्रापि, तं यथा यथोपासते तथैव भवति तद्धैतान् भूत्वाऽवतीति श्रुतेर्गुर्वादौ जीवत्वबुद्धिनिषेधाच्च तथा तत्र यादृगुपासकस्तदुपासनासिद्ध्यर्थं

———

कर्त्तव्यो न वेति शङ्कायां, 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन' इति श्वेताश्वतरश्रुत्या गुरुभक्तेर्देवभक्तिवदतिदिष्टत्वाद् भक्तिपारम्यस्य चाखिलगुणोपसंहार एव सिद्धेर्गुरौ स कार्यः । अन्यत्र प्रतिमादौ तु न कार्यः । तादृशवाक्याभावादिति प्राप्ते तत्समाधानं मार्गभेदव्यवस्थितविकल्पेन सूत्राभ्यामाहेत्यर्थः * । तत्रेति * । गुरौ प्रतिमादौ च । सूत्रं व्याकुर्वन्ति । * अन्यत्रापीत्यादि * । प्रतिमासंग्रहायाहुः । * तत्त्वेन व्यपदेशादिति * । उक्तं च स्कान्दे पाण्डुरङ्गमाहात्म्ये । शिलाबुद्धिर्न कार्या च तत्र नारद कर्हिचित् । ज्ञानानन्दात्मको विष्णुर्यत्र तिष्ठत्यचिन्त्यकृदि'ति । उपासनामार्गे व्यवस्थितस्य विधिपक्षस्य बीजं स्फुटीकुर्वन्ति । * अत्रैवमित्यादि * । * एवमिति * । वक्ष्यमाणप्रकाराभ्याम् ॥ * जीवत्वबुद्धिनिषेधादिति * । आचार्यं मां विजानीयान्नावमन्येत कर्हिचिदित्यादिवाक्योक्तात् तस्मात् । नन्वोक्तश्रुत्या गुरौ भक्तिरेवोक्ता, नोपासनेति तदुपासनप्रकारकव्यवस्थाऽत्र न सङ्गतेति शङ्क्यम् । एवं गुरूपासनायाशितेनैत्यकादशस्कन्धे तस्या अप्युक्तत्वादिति । अत्रैवं प्रकारद्वयेऽप्यभिसन्धिमात्रं, न प्रयोजकं, किन्तु ब्रह्मावेश इति बोधनायाहुः । * तत्र यादृगित्यादि * । आवेशस्त्वनुभवादिनाऽवधार्यत इति, नात्र काचिच्छङ्का । एवमेव श्रीजगन्नाथादौ पूजाप्रवाहस्थलेऽप्यवगन्तव्यम् । तेन

तत्फलदानार्थं च तादृग्रूपो भगवानाविशतीति च तथा ॥ २० ॥

यस्त्वन्तरङ्गं भगवद्भक्तं हृद्याविर्भूतभगवत्कं ज्ञात्वैतद्भजनेन अहं भगवन्तं प्राप्स्यामीति ज्ञात्वा तमेव भजते स भक्तिमार्गीय इति भक्तहृद्याविर्भूते रूपे उपसंहारो धर्माणां तेन कार्य इत्यग्रिमं पठति ॥

न वाऽविशेषात् ॥ २१ ॥

अनुपसंहारे हेतुरविशेषादिति। अस्य भक्तभक्तत्वेन तद्भजनरसास्वादनेन विस्मृततदाविष्टभगवत्कत्वेन तन्निरपेक्षत्वेन वा तदाविष्टभगवति गुणोपसंहारेऽनुपसंहारे वा भक्तोपासनायां विशेषाभावादित्यर्थः। अनुपसंहारस्यात्र बाधकत्वाभावज्ञापनाय वाशब्दः। विशेषादिति वा। पूर्वं विहितत्वेन भगवदाकारादिषु भजनं कुर्वन्नप्युक्तरूपभक्तसङ्गेन तद्भजनेन च पूर्वस्माद्विशिष्टं रसमनुभूत-

---

उपासनामार्गे उभयत्राप्युपसंहारः सर्वगुणानां युक्त इत्यर्थः ॥ २० ॥

न वा विशेषात् ॥ निषेधपक्षो भक्तिमार्ग इति बोधयन्तः सूत्रमवतारयन्ति । * यस्त्वन्तरङ्गमित्यादि * । * स भक्तिमार्गीय इति * श्वेताश्वतरमन्त्रोक्तरीतिकप्रेमविश्वासयोरुत्कर्षात् स भक्तिमार्गीयः। सूत्रं व्याकुर्वन्ति । * अनुपसंहार इत्यादि * कुतो वा, कुत्र वा अविशेष इत्याकाङ्क्षायां तद् व्युत्पादयन्ति। * अस्येत्यादि * तथाच नवमस्कन्धे, 'तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्त्तिनः। अभवन् योगिनः सर्वे नारायणपरायणा' इतिवत् तादृशस्य तथात्वेन तद्भजनरसास्वादनेन तदाविष्टभगवति गुणोपसंहारे वा विस्मृतेत्यादिहेतुद्वयेनानुपसंहारे वा तत्प्रसङ्गानुभावादेव भगवत्प्राप्तिरविशिष्टेति तादृशभक्तोपासनायां ताभ्यामुत्कर्षापकर्षाभावान्नोपसंहारस्य किमपि प्रयोजनमित्यर्थः। अविशेषादिति पदच्छेदं कश्चिन्न मन्येत तदोक्तोऽर्थो न सिद्ध्येदिति तदापि तत्सिद्धये प्रकारान्तरं हेतुं व्याकुर्वन्ति। * विशेषादित्यारभ्य * * वाशब्द इत्यन्तम् * । * तद्भजनेनेति *

वानिति रसास्वादे विशेषाद् गुणोपसंहारं स न करोतीत्यनुवादः । विहितत्वेन गुणोपसंहारपूर्वकोपासनायां नीरसत्वेनाऽनादरज्ञापनाय वाशब्दः । भगवदवताररूपोऽपि बादरायणः प्रासङ्गिकेऽपि भक्तिमार्गस्मरणे तदीयरसावेशपरवशस्तद्भावस्वभावमनूक्तवान् ॥ २१ ॥

अपि च । उपसंहारो हि तत्रानुक्तानामन्यत्रोक्तानां गुणानां तत्र सत्त्वेन ज्ञानमात्रम् । उक्तरूपभक्ताय तु तद्भजनीये भक्त एवालौकिकाननुभावान् भगवान् प्रत्यक्षं दर्शयतीति न तत्रोपसंहारापेक्षागन्धोऽपीत्युत्तरं पठति ॥

दर्शयति च ॥ २२ ॥

ननु भक्तभक्तः स्वसेव्येऽत्यलौकिकं वीर्यं दृष्ट्वा तदाविष्टे भगवति तत्सम्भारकत्वस्येन्द्रादीनामपि तदाज्ञापेक्षित्वं दृष्ट्वा द्युलोक-

---

भगवदाकृतिभजनेन । ननु तर्ह्यनुवादस्य किं प्रयोजनमत आहुः । * भगवदवतारेत्यादि * । तथाच तदुत्कर्षबोधनाय तत्स्वभावबोधनमेव प्रयोजनमित्यर्थः ॥ २१ ॥

दर्शयति च ॥ सूत्रमवतारयन्ति । * अपिचेत्यादि * प्रकटार्थमत्र भाष्यम् । अन्ये तु सम्बन्धादेवेत्यादित्रिसूत्रमधिकरणमङ्गीकृत्य बृहदारण्यकोपान्ते, सत्यं ब्रह्मेत्युपक्रम्य, आदित्यमण्डलस्थस्य अक्षिस्थस्य च ये उपासने विहिते, तयोरुपनिषदौ रहस्यनामनी उपासनशेषतयाऽऽम्नायेते। तस्योपनिषदहरित्यधिदैवतं, तस्योपनिषदहमित्यध्यात्ममिति । ते किं सङ्कीर्येते ? उत व्यवतिष्ठेते ? इति सन्देहे सम्बन्धिभेदाद् व्यवतिष्ठेते इति सिद्धान्तयन्ति । सोऽपि स्वाध्यायसूत्रस्थसर्वदृष्टान्तबोधितेन सम्बन्धिभेदेनैव व्यवस्थितिं लभमानो नाऽधिकरणान्तरमपेक्षत इति चिन्त्यम् ॥ २२ ॥

संभृतिद्युव्याप्त्यपि चातः ॥ सूत्रमवतारयन्ति । * ननु भक्तेत्यादि * । * तत्सम्भारकत्वस्येति * । वीर्यसम्भारकत्वस्य । *

व्यापकत्वस्योपसंहारं करिष्यतीत्याशङ्क्याह ॥

सम्भृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

राणायनीयानां खिलेषु पठ्यते । ब्रह्मज्येष्ठा वीर्या सम्भृतानि ब्रह्माऽग्रे ज्येष्ठं दिवमाततान ब्रह्म भूतानां प्रथमं तु जज्ञे तेनार्हति ब्रह्मणा स्पर्द्धितुं क इति । अस्यार्थस्तु—अन्यैर्हि पुरुषैः सहायानपेक्ष्य विक्रमाः संभ्रियन्ते। तेन तत्पराक्रमाणां त एव नियतपूर्वभावित्वरूपकारणत्वेन ज्येष्ठाः । ब्रह्मधर्माणां तु ब्रह्मैव ज्येष्ठमनन्यापेक्षं सृष्ट्यादि करोतीत्यर्थः । एवं सति ब्रह्म ज्येष्ठं येषां तानि ब्रह्मज्येष्ठानि वीर्याणि । अत्र छन्दसि बहुवचनस्य डादेशः । किञ्चान्येषां वीर्याणां बलवद्भिर्मध्ये भङ्गोऽपि भवति । तेन ते स्ववीर्याणि न संबिभ्रति । ब्रह्मवीर्याणि तु ब्रह्मणा सम्भृतानि निष्प्रत्यूहं सम्भृतानीत्यर्थः । तच्च ज्येष्ठं ब्रह्माग्रे इन्द्रादिजन्मनः प्रागेव दिवं स्वर्गमाततान व्याप्नुवन्नित्यमेव विश्वव्यापकमित्यर्थः। देशतोऽपरिच्छेदमुक्त्वाकालतोऽपि तमाह । ब्रह्मेति । भूतानामाकाशादीनां पूर्वमेव जज्ञे । आविर्बभूवेत्यर्थः । एतेन वीर्यसम्भृतिद्युव्याप्तिभृतिमाहात्म्यमुक्तं भवति । तथाच सम्भृतिश्च द्युव्याप्तिश्च तयोः समाहारस्तथा । एतावत्यपि सति तत्र नोपसंहार इति। तत्र हेतुः—न वा विशेषादितिसूत्रोक्त एवेत्यतिदिशत्यत एवेति । एतद् यथा तथा तत्रैवोक्तम् ।

उपसंहारं करिष्यतीति *तं यथा यथोपासत इत्यत्र स्वाभिसंहितरूपेणैव स्वावनस्योक्तत्वात् स्वैहिकपारलौकिकार्थम् उपसंहारं करिष्यति । सूत्रं व्याकर्त्तुं विषयवाक्यमुपन्यस्य प्रथमं तद् व्याकुर्वन्ति । * राणायनीयत्यादि * । * उक्तं भवतीत्यन्तम् * । सूत्रं व्याकुर्वन्ति । * तथाचेत्यादि * । * तत्रैवोक्तमिति * अस्य भक्तत्वेनेत्या-

विषयवाक्योत्तरार्द्धोक्तधर्मानुद्देशेनैवं ज्ञायते भक्तस्यैहिक-पारलौकिकोपयोगिधर्मोपलक्षणार्थं द्वयोरेवोद्देशः कृत इति । चकारेण दर्शनमप्युक्तं समुच्चीयते । अन्यच्च । स्पर्द्धाकृतिसम्भावनायां हि तद्योग्यतानिषेधः सम्भवति । सा चाविर्भूत एव भगवति सम्भवतीत्यखिलशक्त्याविर्भावपूर्वकमाविर्भूतस्य तस्य

द्युक्तरीत्या उपासनायामविशेषात् पूर्वं विहितत्वेनेत्याद्युक्तरीत्या च भजनरसास्वादने एतदपेक्षया विशेषाच्च न करिष्यतीति तस्मिन्नेव सूत्र उपपादितम् । अयमेव सूत्रकाराशय इत्यत्र गमकमाहुः । * विषयवाक्येत्यादि * तथाचोपसंहारं विनाऽपि भक्तस्य लौकिकालौकिकसम्पादनादलौकिकानुभावदर्शनाच्च एतयोरपि नोपसंहारशङ्कात्रेति पूर्ववदत्रापि भक्तस्वभावस्यैवानुवादः, प्रथमाधिकारिणः शिक्षा वेति भावः । चकारेणोत्तरार्द्धोक्तधर्मसमुच्चयमाशङ्क्य तात्पर्यमाहुः । * चकारेणेत्यादि * श्रुतेरनारभ्याधीतत्वेन भक्तहृदयाविष्टभगवद्गमकत्वस्य सन्दिग्धत्वात् । पूर्वोक्तं व्यासाशयो न निश्चेतुं शक्यत इति शङ्कायां विषयवाक्यतात्पर्यकथनपूर्वकं तमुद्धारयन्ति । * अन्यच्चेत्यादि * तथाच तुरीयपादेन श्रुतेराविर्भूतब्रह्मविषयकत्वे निश्चिते यद् द्वयोरेवानुपसंहारकथनं तेन तत्र व्यासाशयो निश्चीयत इत्यर्थः । तेनानारभ्याधीतानामप्यनुपयुक्तानां नोपसंहार इति सिद्धम् ।

अन्ये तु इदमेकसूत्रमधिकरणमङ्गीकृत्य, अनारभ्याधीतेऽस्मिन् वाक्ये उक्तानां गुणानां सर्वासु विद्यासूपसंहारो, न वेति शङ्कायां नोपसंहारः । कुतः ? । विशेषात् । दहरादिविद्यासु हृदयादिरूपस्थानविशेषादिति व्याख्याय स्थानस्य तदनुपसंहारकत्वे आध्यात्मिकत्वं केचन हेतुत्वेनाहुः । केचिदल्पत्वम् । अन्ये तु विद्याविशेषं हेत्वन्तरमाहुः । किञ्च यद्यपि तासु, यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः । अतः परो दिवो ज्योतिर्दीप्यते ज्यायान् पृथिव्या ज्यायानाकाशादित्यादिभिराधिदैविक्यो विभूतयोऽप्युच्यन्ते, तथापि

एतया श्रुत्या माहात्म्यमुच्यत इति गम्यते। एवं सर्वेतद्वाक्योक्तधर्मयोरेवानुपसंहार्यत्वेन यत् कथनं तत्तु भक्तहृद्याविर्भूतं ब्रह्माऽप्येवंभूतमेवेति ज्ञापनायाऽतो युक्त एवानुपसंहारः॥ २३॥

पुरुषविद्यायामिव चेतरेषामनाम्नानात्॥ २४॥

ता माहात्म्यज्ञापनार्था इति ता एव तत्रोपसंहार्याः, प्राकरणिकत्वात्। न त्वितराः। अतो द्युव्याप्तिनिवृत्तौ तत्सहपठिताया वीर्यसम्भूतेरपि निवृत्तिरित्याहुः।

तन्न रोचिष्णु। द्युव्याप्तिरूपाया महत्या आधिदैविक्या विभूतेर्ब्रह्मस्वरूपमादायैव स्थानस्य तदाध्यात्मिकतायास्तदन्यतायाश्च बाधकतामनादृत्योपदेशेन तस्मिन् स्थानविशेषे द्युव्याप्त्युपसंहारबाधकत्वकथनस्यायुक्तत्वात्। नच सा निष्कलादीनामिव भिन्नेति युक्तम्। ब्रह्मण उभयत्राप्यैक्येन व्याप्तौ भेदस्य वक्तुमशक्यत्वात्। नच शब्दान्तरनिर्देशाद्भेद इत्यपि युक्तम्। सौत्रहेतुविरोधात्। सूत्रे पूर्वसूत्रोक्तस्थानविशेषोपबन्धस्यैवातिदेशाङ्गीकारात्। एतेनैव विद्याविशेषस्याप्यनुपसंहारहेतुत्वं दत्तोत्तरम्।

यत्तु भामत्याम्, या काचिदाधिदैविकी विभूतिः शाण्डिल्यविद्यायां श्रूयते तस्यास्तत्प्रकरणाधीतत्वात् तन्मात्रं ग्रहीष्यते। नैतावता सम्भृत्यादीननुकष्टुमर्हति। तत्रैतत्प्रत्यभिज्ञानाभावात्। ब्रह्माश्रयत्वेन प्रत्यभिज्ञानमतिप्रसक्तम्। भूयसीनामैक्यप्रसङ्गादित्युक्तम्। तदपि तथा। विद्यैक्ये प्रसङ्गरूपचोदनाख्यानां चतुर्णां हेतुनायाः पूर्वमुक्ततया केवलेन रूपैक्येन विद्यैक्यसङ्गस्य वक्तुमशक्यत्वादिति। एवमन्यत्रापि ज्ञेयम्। सिद्धान्ते तूक्तरीत्या सर्वभूतस्थ एक इत्येवं चिन्तिते स आत्मत्वेन निरुपधिप्रियत्वेन च साकारः पर्यवस्यति। सम्बन्धश्च तस्यावेशरूपो यत्राधिकस्तत्राप्यधिष्ठितं तमनुसन्धाय तद्गुणा अन्येऽप्युपसंहार्याः। यद्यधिष्ठान एव विशेषस्फूर्त्तिस्तदा तत एव फलसिद्धेरुपसंहारस्य न किञ्चित्प्रयोजनमिति सिद्धम्। एवं व्याप्त्या स्वरूपा कला च सिद्धेति॥ २३॥ ३॥

पुरुषविद्यायामिव चेतरेषामनाम्नानात्॥ एवमनारभ्याधी-

तैत्तिरीयके, सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् सभूमिं विश्वतो वृत्वा अत्यतिष्ठद् दशाङ्गुलं, पुरुष एवेदꣳ सर्वं यद् भूतं यच्च भव्यमित्यादिना पुरुषविद्या निरूप्यते । तत्रैव, ब्रह्मविदाप्नोति परमिति प्रश्ने, स वा एष पुरुषोऽन्नरसमय इत्यारभ्य प्राणमयमनोमयविज्ञानमयानन्दमयात्मकब्रह्मस्वरूपं निरूप्यते । तत्र सर्वत्र स च पुरुषविध एवेति च पठ्यते । अत्रान्नमयादिषु पुरुषसूक्ते च पुरुषपदश्रवणादन्नमयादिषु सहस्रशीर्षत्वाद्युपसंहारः कर्त्तव्यो न वेति भवति संशयः । किमत्र युक्तम् । उपसंहर्त्तव्यमेवेति । कुतः? सर्वत्र ब्रह्मण एवोपास्यत्वादत्राप्युपासनोक्तेर्ब्रह्मत्वपुरुषत्वयोरविशेषाद्विद्यैक्यादिति प्राप्त उच्यते । पुरुषविद्यायामिवेति । अन्नमयादिषु सहस्रशीर्षत्वादिकं नोपसंहर्त्तव्यम् । कुतः? । पुरुषविद्यायां यथा पुरुषस्वरूपं निरूप्यते न तथेतरेषामन्नमयादीनां विज्ञानमयान्तानां स्वरूपं तत्प्रकरणे निरूप्यते । अत्र हि पुरुषत्वमुच्यते सहस्रपदमनेकत्वोपलक्षकम् । अन्यथाऽक्ष्णां शिरोभ्यो द्वैगुण्यं वदेत् तेन साकारव्यापकत्वमुक्तं भवति । तत्र पुरुषविधत्वं,

---

तानां धर्माणां भक्तिमार्गेऽनुपसंहारमुक्त्वा उत्तमाधिकारिभिरशेषगुणपूर्णं परं ब्रह्मैवोपास्यं, न तु विभूतिरूपमिति बोधनायोपासनामार्गे तेष्वशेषानुपसंहारमवसरसङ्गत्या वदतीत्याशयेनाधिकरणाविषयादिकं दर्शयन्ति । * तैत्तिरीयक इत्यादि * । * प्रश्न इति * । प्रपाठके । * अविशेषादिति * भृगुविद्यायां ब्रह्मत्वस्यात्र च पुरुषविधत्वस्योक्त्या तदाकारत्वस्योक्तत्वेन तयोरविशेषात् । सूत्रं व्याकुर्वन्तोऽत्रापि नशब्दः पूर्वसूत्रादनुवर्त्तत इत्याशयेनाहुः । * अन्नमयादिष्वित्यादि * । * निरूप्यत इति * सहस्रशीर्षेत्यादिना निरूप्यते । * अत्र हीति * पुरुषविद्यायाम् । * नेति * सहस्रशीर्षत्वादिश्रावणेन । वैलक्षण्यबोधनायाहुः । * तत्रेत्यादि * । * तत्रेति * । अन्नम-

स चाध्यात्मिकरूपस्तच्छरीराभिमान्यात्मा चान्य आधिदैविक उच्यते, न तथात्र । किञ्च पुरुष एवेदꣳ सर्वमित्यादिना प्रपञ्चात्मकत्वं मुक्तिदातृत्वं चोक्त्वा नैतावन्मात्रमस्य माहात्म्यमितोऽपि महन्माहात्म्यमस्तीति वक्तुं प्रपञ्चरूपं तद्विभूतिरूपमित्येतावानस्य महिमेत्यनेनोक्त्वा तत आधिक्यमाह । अतो ज्यायाँश्च पूरुष इति । एवमतिवैलक्षण्यात् पुरुषपदमात्रसाधर्म्येण नैकविधत्वं वक्तुं शक्यं, नचोपसंहार इति । चकारादम्भस्यपारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयानित्यादिश्रुतयः, सर्वतःपाणिपादान्तमित्यादिस्मृतयश्च संगृह्यन्ते । एतेन यत्किञ्चिद्धर्मसाम्येऽपि न मूलभूतब्रह्मरूपत्वमत एव न तत्रोपास्यता तथात्वेनेति ज्ञापितम् । अत एव भृगूपाख्यानेऽन्नमयादिब्रह्मज्ञानेऽपि जिज्ञासैवोक्ता । भृगोरानन्दरूपपरब्रह्मज्ञाने तु नोक्ता । तेनाशेषगुणपूर्णं ब्रह्मेत्युक्तं भवत्यत उत्तमाधिकारिभिस्तदेवोपासनीयं, न विभूतिरूपमिति ज्ञापितम् ॥२४॥

याद्युपासनप्रकरणे । * स चेति * अन्नमयादिः । वैलक्षण्यान्तरमाहुः । * किञ्चेत्यादि * सिद्धमाहुः । * एवमित्यादि * तथाच पुरुषविद्यायाम् अमृतत्वस्य फलत्वेनोक्ततयाऽन्नमयादिचतुष्टयविद्यासु यथायथमन्नायुर्भयाभावसर्वकामप्राप्तीनां फलत्वेनोक्ततया संयोगभेदात् पुरुषविद्यायां पुरुषत्वस्यान्नमयादिषु पुरुषविधत्वस्य चोक्ततया रूपभेदादेतस्यास्तासां च चोदनाख्ययोर्भेदस्य स्पष्टत्वाच्च न विद्यैक्यमिति तथेत्यर्थः । वैलक्षण्यबोधनस्य तात्पर्यमाहुः । * एतेनेत्यादि * । * एतेनेति * विभूतिभ्योऽतिवैलक्षण्यबोधनेन । * न तत्रोपास्यता तथात्वेनेति * ब्रह्मत्वेनोपास्यतायां सत्यामपि न मूलभूतब्रह्मरूपत्वेन । एतदधिकरणप्रयोजनस्य पूर्वमनुक्तत्वादिदानीमाहुः । * तेनेत्यादि * । * तेनेति * एवं महिमाधिक्यादतिवैलक्षण्यबोधनेन । * उत्तमाधिकारिभिरिति * एतेन भक्ता अपि संगृहीता ज्ञेयाः । तेषामेव तथात्वादिति । अत्र समाचारसूत्रोक्तैर्हेतुभिरेवानुपसंहारप्रा-

अथ निर्दोषत्वं ज्ञात्वा भजनीयमिति ज्ञापयितुमधिकरणान्तरमारभते ॥

वेधाद्यर्थभेदात् ॥ २५ ॥

मावपि यत्पुनर्विशेषतस्तद्धेतुकथनं तद्विभूतिरूपेषु मूलरूपगुणानुपसंहारार्थम् । योऽन्यथा सन्तमात्मानमिति वाक्योक्तबाधकस्य विद्यमानत्वात् । एवञ्चात्र पूर्वं पतित्वेन चिन्तिते चित्तस्य निवेशो यदाधिकस्तदा सोऽक्षरस्यापि पतिरित्येवं पर्यवस्यति । उताऽमृतत्वस्येशान इति मोक्षेऽशनशीलत्वस्यात्र श्रावणात् । अनस्तामितत्वाद्वा युरूपाकलाप्यत्र बोधिता ॥

अन्ये तु, ताण्डिनां पैङ्गिनां च या, पुरुषो वाव यज्ञ इत्यादिनोक्ता षोडशशतवर्षजीवनफलिका पुरुषविद्या, या च तैत्तिरीयाणां, तस्यैवं विदुषो यज्ञस्यात्मा यजमान इत्यादिनोक्ता विद्या, तयोः पुरुषविद्येति समाख्यैक्यात् पुरुषावयवेषु यज्ञावयवकल्पनेन रूपैक्याच्च विद्यैक्ये तैत्तिरीयोक्ता गुणास्तत्रोपसंहर्त्तव्या इति प्राप्ते, यथा पुरुषविद्यायां ताण्ड्यादिभिर्गुणा आम्नायन्ते न तथा तैत्तिरीयक इति रूपभेदात्तैत्तिरीयके च, य एवं वेद ब्रह्मणो महिमानमाप्नोतीति फलसंयोगभेदाच्च विद्याभेदे सति न तैत्तिरीयोक्तानां गुणानां तत्रोपसंहार इत्येवमाहुः ।

तत्रेदमवधेयम् । व्यासचरणैर्हि जिज्ञासाशास्त्रं शीघ्रं मोक्षो भवतु जीवानामिति करुणया आरब्धम् । तेन याभिः शीघ्रं मुच्यन्ते ता एव विद्या आदरेण विचारणीयाः । शेषाणां तु तत्रोक्तैरेव न्यायैरानुषङ्गिको निर्णयो भविष्यति । अतः परविद्यां विहायैतद्विचारो युक्तो वा !! परविद्याविचारो वा युक्त इति !! । ताण्डिप्रभृतीनां विद्यायामायुर्वृद्ध्यादिरूपं लौकिकं फलम् । तस्यैवं विदुष इति तैत्तिरीयविद्यायामपि ब्रह्ममहिमप्राप्तिः फलम् । महिमा च विभूतिः । गोअश्वमिहमहिमेत्याचक्षत इति छान्दोग्ये सिद्धत्वात् । पुरुषसूक्तेषु, तमेवं विद्वानमृत इह भवतीति फलम् । अतो विद्यान्तरं विहायेदमत्र विचारितमिति । एवमन्यत्रापि बोध्यम् ॥ २४ ॥ ४ ॥

वेधाद्यर्थभेदात् ॥ एककार्यत्वरूपां सङ्गतिमधिकरणप्रयोजनं च वदन्तोऽवतारयन्ति । * अथेत्यादि * । सूत्रं व्याकर्त्तुं विषयादि-

वाजसनेयिशाखायां द्वया ह प्रजापत्या इत्युपक्रम्य तेषां मिथः स्पर्द्धामुक्त्वोच्यते, ते ह देवा ऊचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न मुद्गायेति तथेति तेभ्यो वागुदगायद् यो वाचि भोगस्तं देवेभ्य आगाद् यत् कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव पाप्मेति । एवमेव प्राणचक्षुःश्रोत्रप्रभृतिषु पापवेधमुक्त्वोच्यते । अथैनमासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यथाश्मानम् ऋत्वा लोष्ठो विध्वंसेतैवं ह वै विध्वंसमाना विष्वञ्चो विनेशुरिति । छान्दोग्येऽपि प्राणादिष्वेवमेव पाप्मवेधमुक्त्वाऽऽसन्येन तथेत्युच्यते । एतावान् परं विशेषो वाजसनेयिनां गानकर्तृत्वं, सामगानामुद्गीथत्वेनोपास्यत्वमुच्यते वाक्प्राणादीनामिति । अत्र देहसम्बन्धित्वगानकर्तृत्वयोरुपास्यत्वस्य चाऽविशेषेऽपि वागादिषु पाप्मवेध आसन्यप्राणे कुतो नेति भवति जिज्ञासा। नचासन्योपासनाया विधेयत्वात् तत्स्तुत्यर्थमन्येषु पाप्मवेध

कमाहुः । * वाजेत्यादि * । * वाजसनेयिशाखायामिति * । बृहदारण्यक उद्गीथब्राह्मणे । तथैव छान्दोग्येऽपि । * न तथेति * । न पाप्मवेधः । सन्देहमाहुः । * अत्रेत्यादि * । * इति भवति जिज्ञासेति * । इति हतोर्वागादीनां पाप्मवेधः सत्यः काल्पनिको वेति संशय इत्यर्थः । सिद्धवत्तदुक्तिः सन्देहबीजम् । नन्वपार्थेयं चिन्ता । अन्येषु पाप्मवेधोक्तेर्विधेयासन्योपासनास्तुत्यर्थत्वेन, अन्ये त्वपशव इतिवदासन्यप्रशंसामात्रार्थतया वस्तुतः सर्वेषु तदभावादिति पूर्वपक्षं हृदिकृत्याहुः * नचेत्यादि * । असद्वचने बाधकं व्युत्पादय-

ुच्यतेऽस्मिन्नेति वाच्यम् । न हि प्रयोजनायाऽसन्तमप्यर्थं बोधयति श्रुतिरिति वक्तुं शक्यम् । प्रमाणत्वव्याहतिप्रसङ्गात् । एकत्र प्रतारकत्वे सर्वत्रापि तच्छङ्कया तदुक्ते कोऽपि न प्रवर्त्तेतापि ।

न्ति । * न हीत्यादि * । नन्वर्थवादाधिकरणे विधेयस्तावकत्वेनार्थवादानां प्रामाण्यं पूर्वतन्त्रे व्यवस्थापितम् । विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति । अतस्तदर्थं एव प्रामाण्यं तेषां, न तु स्वार्थ इत्याकाङ्क्षायामाहुः * एकत्रेत्यादि * । तथाच विचारकस्य हृदि श्रुतेः प्रकारांशे असत्यभाषित्वे भाते विधेयाद्यंशेऽपि तादृशशङ्कोदयस्य दुर्निवारतयां तत्र प्रवृत्तिव्याघातेन विधेः प्रवर्त्तकत्वमेव कुण्ठीभवेत् । ततश्च वेदस्य वैयर्थ्यमेव स्यात् । अपशव इत्यत्रापि पशुत्वपर्युदासोऽन्येषु पशुसादृश्यं ग्राहयति, न तु पशुत्वं निषेधति । यथा, न कलञ्जमित्यत्र । तच्च गवादिसादृश्यं तु तेष्वस्त्येवेति तत्सादृश्यं तेषाममुख्यतां बोधयद् गवादिप्रशंसायां पर्यवस्यतीति नासदर्थबोधने स दृष्टान्तः । नच मध्वादिविद्यायां कल्पनोपदेशस्य व्यासपादैरप्यङ्गीकारादत्रापि तथाऽस्त्विति वाच्यम् । अविध्यन्निति भूतार्थकप्रयोगबाधापत्तेः । यदेवेदमप्रतिरूपं वदति स एव पाप्मेत्यादिभिः श्रावितस्य पाप्मस्वरूपस्येदानीमनुभूयमानस्याप्यननुभवापत्तेश्च । मध्वविद्यास्वपि कल्पनोपदेशाऽङ्गीकारः सांख्यप्रसिद्ध्या तद्बोधनार्थ इति तु तत्रैवोपपादितम् । अथ यदि स सिद्धान्तीयत्वेनाद्रियते, तदापि, तस्य द्यौरेव तिरश्चीनवंशोऽन्तरिक्षमपूप इत्याद्युद्देश्यरूपविशिष्टस्यैव रूपान्तरविधानदर्शनेन रूपान्तरविधानमात्रस्यैव काल्पनिकत्वं, न तु सर्वस्य । अन्यथा, ता एता ऋच एतमृग्वेदमभ्यतपन्नित्यादेरपि बाधापत्तेः । अतो भूतार्थवादस्य स्वार्थे प्रामाण्यमवश्यमभ्युपेयम् । नचार्थवादेषु सर्वत्र यथा श्रुतार्थग्रहणे, आदित्यो यूपः, यजमानः प्रस्तर इत्यादिषु गौण्युच्छेदः सूत्रविरोधश्च स्यादिति वाच्यम् । तत्र प्रत्यक्षविरोधेन गौणीस्वीकारात् । असति मानान्तरविरोधे तद्दृष्टान्तेन सर्वत्र प्रत्यवस्थातुमयुक्तत्वादित्यसकृदुक्तम् । तस्माद्यत्र प्रमाणान्तरविरोधस्तत्रैव कल्पनोपदेशादिर्न सर्वत्रेति निश्चयः । तदे-

साक्षात्क्रियार्थत्वाभावेऽपि नासन्निरूपकत्वमर्थवादानाम् । वस्तुतस्तु यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवतीति श्रुतेः, 'ज्ञात्वा ज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति । विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेदि'त्यादिवाक्यैर्य एवं वेदेति वाक्यैश्चार्थवादोक्तस्वरूपं ज्ञात्वा कर्मकरणे पूर्णं फलमन्यथा नेत्यर्थवादानां फलोपकार्यङ्गनिरूपकत्वान्नानर्थक्यमत उक्तेऽर्थे हेतुं न पश्याम इति प्राप्ते तमेवाह । वेधादीति । वाक्प्राणादिषु यः पाप्मवेध, आदिपदाद् दुष्टविषयसम्बन्धश्च तत्र हेतुरर्थभेदः । अर्थो भगवांस्तस्माद्भेदादित्यर्थः । आसन्यस्तु य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतेति छान्दोग्य उपास्यत्वेनोक्तः । सर्ववेदान्तप्रत्ययमिति न्यायाद्वेदान्तेषूपास्यं ब्रह्मातिरिक्तं नोच्यत इत्यासन्योऽपि ब्रह्माभिन्नोऽत एवापहतपाप्मा ह्येष इति सामगैः पठ्यते । अतस्तत्र

———

तदभिसन्धायाहुः । * साक्षादित्यादि * । एवं पूर्वतन्त्रविचारेण परम्परयाऽर्थवादानां क्रियार्थत्वमुक्त्वा उत्तरकाण्डविचारेण साक्षादेव तेषां क्रियार्थत्वमाहुः । * वस्तुत इत्यादि * । * य एवं वेदेति वाक्यैरिति * । य एवं वेद स वीर्यैरेव छान्दोभिरर्चति, य एवं वेदोपैनं यज्ञो नमतीत्यादिजातीयैर्विद्वद्वाक्यैः । तथाच सत्ययैव प्रशंसया विधेयस्तुतरुचितत्वात् सिद्धेऽन्येषां पाप्मवेधे आसन्यस्य कुतस्तदभाव इत्यत्र हेत्वनुपलम्भात् तेषां पाप्मवेधहेतोर्न निर्णयः कर्त्तुं शक्य इति पूर्वपक्षे प्राप्ते, तमेव निर्णयहेतुमाहेत्यर्थः । सौत्रंहेतुं व्याकुर्वन्ति । * वाक्प्राणेत्यादि * । * भेदादिति * । भौतिकतया प्राकृतत्वेन भेदात् । तथाचास्माद्धेतोः पाप्मवेधः शक्यनिर्णय इत्यर्थः । नन्वयमासन्येऽपि तुल्य इति कथं तत्र तदभाव इत्यत आहुः । * आसन्य इत्यादि * । * उक्त इति * । उत्कृष्टप्रणवादित्यैकत्वोद्गीथदृष्ट्यनन्तरम् उक्तः । * ब्रह्माभिन्न इति * । उत्कृष्टत-

न पाप्मवेध इति भावः । ब्रह्मणः स्वतन्त्रपुरुषार्थत्वज्ञापनायार्थपदेनोक्तिः । एतेन विभूतिरूपेऽपि यत्रैवं तत्र मूलभूतब्रह्मणि निर्दोषत्वं किं वाच्यमिति ज्ञापितम् । अथवाऽर्थः प्रयोजनं विषय इति यावत् । तद्भेदादित्यर्थः । अत्रेदमाकूतम् । देवा हि स्वस्यासुरजयाय गानार्थं वागीदीनूचुस्त्वं न उद्गायेति गानानन्तरं यो वाचि भोगस्तं देवेभ्य आगायादित्युच्यते, । एवमेव प्राणादिष्वपि स्वस्वभोगं देवेभ्य आगायदिति । एवं सति देवार्थमेवैतद्गानं, न तु भगवदर्थम् । यद्यप्यासन्येऽप्येवमुच्यते तेभ्य एष प्राण उद्गायदिति तथापि यथा वागादिषु स्वनिष्ठभोगं देवेभ्य आगायदित्युक्तं, तथा नासन्ये । तेनोक्तमानैर्ब्रह्मात्मकत्वेनासुरजयहेतुर्भगवत्सम्बन्ध

द्विभूतिरूपत्वात् तदात्मकतयोक्तः । उत्कर्षश्च पाप्मवेधाभावादेव गम्यते । एवञ्च, मनो ब्रह्मेत्युपासीतेत्यादौ यत्तेषामुपास्यत्वेन विभूतित्वेऽपि नैतत्साम्यं तद् भगवता स्वसामर्थ्यस्य तत्र तारतम्येनैव स्थापितत्वादिति । यत् पुनर्वागादीनामुपास्यत्वं छान्दोग्ये प्रतीयते तत्तु भ्रमप्राप्तानुवादरूपं, न तु वास्तवम् । श्रुत्यनभिप्रेतत्वात् । उदवसानीयपञ्चकपालवत् । तत्र निषेधेनवात्र पाप्मवेधादेव तथा निश्चयात् । अतो न चोद्यावकाशः । ननु यदि वागादीनां ब्रह्माभिन्नत्वमेवम् अभिप्रेतं तदा सूत्रे ब्रह्मभेदादित्येवोच्येतेत्यत आहुः । * ब्रह्मण इत्यादि * । ननु भवत्वेवमासन्योत्कर्षस्तथापि पूर्वप्रतिज्ञातस्याधिकरणप्रयोजनस्य कथमवगतिरित्यत आहुः । * एतेनेत्यादि * । तथाच कैमुतिकन्यायादवगतिरित्यर्थः । नन्वर्थपदस्य वस्त्वर्थकत्वे उक्तमेव सिद्ध्यति । तदनङ्गीकारे कथमेतदवगन्तव्यमित्यत आहुः । * अथवेत्यादि * । रायभिधेयनिवृत्तीनामत्र प्रसङ्गाभावात् । प्रयोजनमात्रार्थो ग्राह्यः । स चात्र वागादीनां विषयरूपः । तस्यैव देवार्थत्वेनोक्तत्वात् । अतस्तद्भेदादित्यर्थः । तदेतदुपपादयन्ति । * अत्रेदमित्यादि * । * उच्यत इति * । बृहदारण्यक उच्यते । * उक्तमानैरिति * । उपास्यत्वपाप्मवेधराहित्या-

एवेति ज्ञात्वा तथैवागायदासन्य इति ज्ञायते । अत एवान्यत्र वेध उक्तोऽत्र तत्करणेच्छायामप्यासुराणां नाश उक्तः । अग्रे च, भवत्यात्मना परास्यं द्विषन् भ्रातृव्यो भवति य एवं वेदेति पठ्यते । तेन परब्रह्म निर्दोषमिति किमु वाच्यम् । यत्र तद्विभूतिरूपासन्यस्योक्तरूपतां यो वेत्ति सोऽपि गुणयुक्तो दोषरहितश्च भवतीति कैमुतिकन्यायः सूचितो भवति । एतेन लोके दोषत्वेन ये धर्माः प्रतीयन्ते त एव धर्मा भगवति निरूप्यमाणा न दोषत्वेन ज्ञेयाः । किन्तु गुणत्वेनैव । वस्तुन एव तथात्वादिति भावो ज्ञाप्यते ॥२५॥

ऽसुरजयहेतुभूतार्थज्ञानैः । आसन्यस्यैवंप्रकारकज्ञानसत्तायां गमकमाहुः । * अत एवेत्यादि * । एवं व्याख्यानेऽपि पूर्वोक्तार्थसिद्धिमाहुः । * तेनेत्यादि * । एतेनार्थान्तरस्यापि सिद्धिमाहुः । * एतेनेत्यादि * । * य इति * । मोहव्रणपलायनादयः । * न दोषत्वेन ज्ञेया इति * । यथा सृष्टिस्थितिप्रलयकर्तृत्वस्य भगवल्लक्षणत्वान्मूलरूपे प्रलयकर्तृत्वमत्तृत्वादिकं च न दोषस्तथाऽवतीर्णेऽपि भगवति मोहादयोऽप्यसुरमोहनार्थत्वात्तथा । 'अज्ञत्वं पारवश्यं च विधिभेदादिकं तथा । तथा प्राकृतदेहत्वं देहत्यागादिकं तथा । असुराणां विमोहार्थं दोषा विष्णोर्न हि क्वचिदिति ब्रह्माण्डवाक्यात् । तथाच तेभ्यः सकाशाद्दोषत्वमुद्घाप्य भगवतो निर्दोषत्वं ज्ञात्वा भजनीयमिति सिद्धम् । तेन मुख्यविभूत्यतिरिक्तविभूतीनामपहतपाप्मत्वाभावात्तपूत्कृष्टानुपसंहारोऽपि सिद्धो बोध्यः ।

अन्ये तु, इदमप्येकसूत्रमधिकरणं स्वीकृत्य, शुक्रं प्रविध्य हृदयं प्रविध्येत्यादीन्याथर्वणिकानामुपनिषदारम्भस्थानि वाक्यानि विषयत्वेनोदाहरन्ति । तत्र केवलो वेधशब्दो नास्ति ।

माध्वास्तु, अग्ने त्वचं यातुधानस्य भिन्धीति वाक्यम् । तत्र तु वेधशब्द एव नास्तीति विषयवाक्यत्वं चिन्त्यम् । अथ वेधरूपार्थबलाद्विषयवाक्यत्वं तदापि सन्निधिना विद्याङ्गत्वपूर्वपक्षोत्थापनम् । लिङ्गस्य बलिष्ठत्वान्नाङ्गत्वमिति सिद्धान्तः । स च पूर्वतन्त्रादेव

एवं भगवत्सम्बन्धाभावे दोषसम्बन्धमुक्त्वा तथा सति गुणहानिं च वदंस्तत्र विशेषमाह ॥

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत् तदुक्तम् ॥ २६ ॥

तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैतीत्याथर्वणिकैः पठ्यते । परमपदेन ब्रह्मोच्यते । तथाच सकार्याऽविद्यारहितः परममुपैति । तदनन्तरं साम्यमुपैतीति योजना ।

सिद्ध्यन्नस्य सूत्रस्यानुवादकत्वमापादयतीत्यतोऽपि चिन्त्यम्॥ २५ ॥

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम् ॥ एवमुपास्यस्य निर्दोषत्वं व्युत्पाद्य पूर्वसूत्रस्य पुरःस्फूर्त्तिकमादाय जीवस्य ब्रह्मभावेपि ब्रह्मासाधारणगुणा नोपसंहार्या इति प्रसङ्गतो वक्तीत्याशयेन सूत्रमवतारयन्ति * एवमित्यादि *।भगवत्सम्बन्धाभावे सति गुणहानिमपि वदन् भगवत्सम्बन्धे गुणप्राप्तिरूपं विशेषमाहेत्यर्थः । सूत्रं व्याकर्त्तुं भगवत्सम्बन्धे विशेषबोधिकां श्रुतिमाहुः ॥ तदेत्यादि *। एतत्पूर्वार्द्धं तु, यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिमिति । * पठ्यते इति * । मुण्डके पठ्यते । ननु क्वात्र भगवत्सम्बन्ध उच्यत इति शङ्कायां पूर्वार्द्धस्य स्फुटार्थत्वादुत्तरार्द्धं व्याकुर्वन्ति । * परमपदेनेत्यादि * । विद्वान् भगवद्भाववान्, पुण्यपापे अविद्याकार्ये, ज्ञानेन विधूय निवार्य निरञ्जनः अविद्यारहितः सन्, परमं ब्रह्म उपैति, तदनन्तरं साम्यमुपैतीत्येवमर्थः संक्षेपेण * तथाचेत्यादिनोक्तः । एतेन यदन्यैरुक्तं परममत्युत्कृष्टं साम्यं समत्वम् अद्वैतलक्षणम् उपैति अवगच्छतीति । तन्निरस्तम् । समशब्दस्य सर्वपर्यायत्वे साम्यं सर्वत्वं, तुल्यपर्यायत्वे तौल्यं, न पुनरद्वैतं निर्विशेषत्वलक्षणम् । लक्षणाप्रसङ्गात् । उभयनिरूपितधर्मरूपसाम्याङ्गीकारेऽपि यथा नाद्वैतहानिस्तथाऽतीतपाद एवोपपादनात् । अन्यथा श्रुतिविरोधप्रसङ्गाच्च ।'अत उपैतिपदाऽऽवृत्तिरेव युक्तेति । ननु भवत्वेवं तथापि किमर्थं विचार्यमित्यत आ-

तत्रेदं विचार्यते । साम्यं हि समानजातीयधर्मवत्त्वम्। तच्च कतिपय-धर्मैरशेषतन्निष्ठधर्मैर्वा भवति । तत्रान्त्यः पक्षो ब्रह्मणा समं न सम्भवति । न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुतिविरोधादत आद्य एव पक्षोऽनुसर्त्तव्यः । तत्र कैर्द्धर्मैः साम्यमिहोच्यत इत्याकाङ्क्षायामाह । हानाविति । ब्रह्मणः सकाशाद्विभागो जीवस्य हानिशब्देन उच्यते । तथाच तस्यां सत्यां ये धर्मा जीवनिष्ठा आनन्दांशैश्वर्यादयो भगवदिच्छया तिरोहितास्ते ब्रह्मसम्बन्धे सति पुनराविर्भूता इति तैरेव तथेत्यर्थः । भगवदानन्दादीनां पूर्णत्वाज्जीवानन्दादीनामल्पत्वान्नाम्नैव समैर्द्धर्मैः कृत्वा ब्रह्मसाम्यं जीव उपचर्यते । साम्यमुपैतीति । वस्तुतस्तु नैतैरपि धर्मैः साम्यमिति भावः । अत एव, न तत्सम इति श्रुतिरविरुद्धा । अत एव सूत्रकृता साम्यमुपै-

---

हुः * तत्रेदमित्यादि * । * इदमिति * । साम्यम् । विचारमुपपादयन्ति । * साम्यं हीत्यादि * । * आहेति * । यैर्धर्मैः साम्यं तानत्राहेत्यर्थः । सूत्रं व्याकुर्वन्ति * ब्रह्मण इत्यादि * । सूत्रे तुशब्देन श्रुत्यन्तरे समाभ्यधिकनिषेधादत्र साम्यपदं लक्षणया अद्वैतपरमिति पक्षो निरस्यते । ब्रह्मणः सकाशाद्विभागो जीवस्य, ओहाक् त्याग इति धातुनिष्पन्नेन हानिशब्देनोच्यते । विभागस्य पूर्वस्थितित्यागरूपत्वात् । तथाच तस्यां सत्याम्, उपायनशब्दशेषत्वाद्, उपायनं ब्रह्मप्राप्तिस्तद्वाचकः शब्द उपैतिशब्दस्तच्छेषत्वात् साम्यस्य ये धर्मास्तिरोहितास्ते परमोपायने ब्रह्मसम्बन्धे सति पुनराविर्भूता इति तैरेव तथा * तैरेव साम्यमित्यर्थः । नन्वेवं साम्येऽपि, न तत्सम इति श्रुतौ संकोचस्तु स्यादेवेत्यत आहुः । * भगवदित्यादि * । * जीवानन्दादीनामल्पत्वादिति * । सर्वे जीवाः सर्वमयास्तथाप्यल्पा इति नृसिंहोत्तरतापनीये जीवानामल्पताया उक्तत्वेन तदानन्दादीनामपि तथात्वात् । नन्वेवमेव सूत्राशय इति कथं ज्ञातव्यमित्यत आहुः । * अत एव सूत्रकृतेत्यादि * । हेतुमवतारयन्ति ।

तीति साम्योपायनशब्दमात्रं, न तु साम्यपदार्थः स्वारसिकोऽत्रा-स्तीति भावप्रकटनाय शब्दशब्द उक्तः।ननु तैरेव धर्म्मैः साम्यं नेतरै-रित्यत्र को हेतुरित्याकाङ्क्षायामाह । उपायनशब्दशेषत्वादिति । परममुपैतीति य उपायनशब्दस्तच्छेषत्वात् साम्योपायनस्येत्यर्थः । ब्रह्मसम्बन्धहेतुकत्वादानन्दांशाद्याविर्भावस्य, तदेव साम्योपायन-कथनात्तैरेव धर्म्मैः साम्यमभिप्रेतमिति भावः । नन्वानन्दादीनां ब्रह्मधर्मत्वात् तैस्तत्साम्यकथनं तदभेदमेव गमयतीत्याशङ्क्य तद्ध-र्मवत्त्वमात्रस्य न तदभेदसाधकत्वमित्यत्र दृष्टान्तमाह । कुशेत्या-दि । कुशा औदुम्बर्य्यः समिधस्ता अग्निष्टोमादियागेषु प्रस्तोत्रा स्थाप्यन्ते। तदा तत्सम्बन्धि यच्छन्दःस्तुत्युपगानं तद्वदित्यर्थः । तत्राभित्वा शूरनोनुमो दुग्धा इव धेनव इत्यृचि ये वर्णास्तेषामच एवोपसंहृत्य भकारेणैव गानं क्रियते । न हि तदार्चिकवर्णधर्मा-णामचामुपसंहारोऽस्तीति तदात्मत्वं भकारस्य सम्भवति । एवं प्रकृतेऽपि ब्रह्मधर्मप्राकट्येन न तदात्मकत्वं जीवस्य सम्भवति । ननु तत्त्वमस्यादिवाक्यैरत्राभेदबोधनादस्तु तथेति चेत् तत्राह । तदुक्तमिति । जीवब्रह्माभेदबोधनतात्पर्य्यमुक्तमित्यर्थः । तद्गुण-सारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति सूत्रेणेति शेषः ।

---

* नन्वित्यादि । * तदेवेति * । ब्रह्मसम्बन्ध एव । तथाचोपायन-शब्दशेषत्वाद् उक्तैरेव धर्मैः साम्यमिति सूत्रयोजनेत्यर्थः । दृष्टान्त-मवतारयन्ति । * नन्वानन्देत्यादि * । व्याकुर्वन्ति । * कुशा इत्या-दि * । उपगीयतेऽनेनेत्युपगानम् । करणे ल्युट् । तथाच कुशाभिः कृत्वा छन्दःस्तुत्युपगानसाधनभूतभकारवदिति सूत्रार्थ इत्यर्थः । एतद् व्युत्पादयन्ति । * तत्रेत्यादि * । * तदात्मकत्वमिति * । तदभेदः । अत्र किञ्चिदाशङ्क्य तत्समाधिं स्मारयतीत्याहुः । * ननु तत्त्वमित्यादि * । * अत्राभेदबोधनादिति * । जीवे ब्रह्माभेदबो-धनात् । तदुक्तपदं व्याकुर्वन्ति । * जीवेत्यादि * । नच तद्गुण-

अपिच । श्रुतौ ब्रह्मोपायनस्य साम्योपायनहेतुत्वोक्त्या तदनुपायनस्य साम्यानुपायने हेतुत्वमिति ज्ञाप्यते । तथाच, पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययाविति सूत्रे जीवस्य ब्रह्मांशत्वेनानन्दैश्वर्यादिब्रह्मधर्मवत्त्वाद् ब्रह्मणः सकाशाद्विभागे सति तदिच्छया तद्धर्मतिरोधानस्य संसारित्वे हेतुत्वमुक्तं यत्तदपि तदुक्तमिसनेन स्मार्यत इति न विस्मर्त्तव्यम् । यथान्यशाखोक्तधर्मा

मारत्वसूत्रे संसारावस्थायामेव व्यपदेशपक्ष उच्यते, न तु मुक्त्यवस्थायाम् । यत्र त्वस्य सर्वमात्मैवाभूत्, सलिल एको द्रष्टाऽद्वितीयो भवतीत्यादिश्रुतिषु ब्रह्माभेदस्यैव श्रवणादिति वाच्यम् । अभेदेऽपि मुक्त्यवस्थायां जीवन्यूनताया यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति, एवं मुनेर्विजानत आत्मा भवति गौतमेति काठकश्रुतौ भेदसहिष्णोरभेदस्यैव निश्चायनात् । नच सलिल एक इत्यादिविरोधः । तत्र तादृशाभेदप्रतीत्यापि तदुपपत्तेः । लोकेऽपि मिलिताङ्गुल्यादौ विभागाभाव एव एकशब्दप्रयोगाच्च । नचावान्तरमुक्तावेवं भाव इति वाच्यम् । मानाभावात् । परमतोऽप्यविभागेन दृष्टत्वादिति सूत्रेऽविभागस्यैव व्याख्यातत्वात् । ब्रह्मसूत्रेषु मुक्तिविचारे कुत्राप्यैक्यपदादर्शनाच्च । नचैवमपि शङ्कापिशाची न निवर्त्तत इति चेत् । भिद्यते हृदयग्रन्थिरिति श्रुत्युक्तदर्शन एव निवर्त्स्यत इति किमतोऽधिकं वाच्यमिति दिक् । नच गतिसामान्यसूत्रभाष्यविरोधः । तत्रापि सामान्यपदस्य तुल्यपदेनैव व्याख्यानात् । सूत्रकारस्याप्येतदेव मतम् । अन्यथा तु गत्यैक्यादित्येव वदेत् । नच तद्विषयवाक्यविरोधः । तत्रापि विज्ञाता विज्ञातृरूपेण न तिष्ठति, किन्तु ब्रह्मरूपेणेति भेदाविरुद्धसंपदा अभेदेन स्थानस्याभिप्रेतत्वादिति न कोऽपि चोद्यावकाशः । तदुक्तपदसूचितमर्थान्तरमाहुः * अपिचेत्यादि * । एतेन गुणहानिर्व्याख्याता बोध्या । नन्वेतद् व्याख्यानमसङ्गतम् । उपसंहारप्रकरणे धर्मसाम्यविचारप्रसङ्गस्याभावादित्यत आहुः * यथेत्यादि * यथा छान्दोग्यस्थपञ्चाग्निविद्यायां काण्वाद्युक्तः षष्ठोऽग्निः प्राणविद्यायां पञ्चमं रेतश्चोपसंह्रियते, विद्यैक्यबलात् तथात्र श्रुत्या

अप्येकस्यां विद्यायामुपसंह्रियन्त एवं ब्रह्मनिष्ठा धर्मा जीवेऽप्येतया श्रुत्या बोध्यन्त इत्येतावत्साम्यमस्तीत्युपसंहारप्रकरण एतस्य निरूपणं कृतम् ॥ २६ ॥

परमसाम्यनिरूपणादैक्यभ्रमेणासाधारणा ब्रह्मनिष्ठा धर्मा अपि जीवे उपसंहार्या इति शङ्कानिरासायैतदुक्तमित्यर्थः। तस्मान्निर्दोषत्वे तिरोहितगुणप्राप्त्या साम्ये च सिद्धे ब्रह्मभूतस्य मुख्यं भजनं सिद्ध्यतीति तदर्थे यतनीयं, न तु विभूतिपरेण भवितव्यमिति बोधितम् । अत्रापहतपाप्मत्वस्य यज्ञे प्राकट्याद्यज्ञसम्बन्धे रुक्मवर्णत्वात् सौभाग्यस्य कर्तृत्वयोनित्वाभ्यां प्रपञ्चस्य च सम्बन्ध इति त्रिधा श्रीनिकेतत्वमुक्तम् ।

अन्ये तु इदमप्येकसूत्रमधिकरणमङ्गीकृत्य, अश्व इव रोमाणि विधूय पापं चन्द्र इव राहुमुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामीति ताण्डश्रुतिं, तदा विद्वानित्याथर्वणश्रुतिं, तस्य पुत्रादायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति शाट्यायनिश्रुतिं, तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतमिति कौशीतकिश्रुतिं चोदाहृत्य, यत्रोभयं श्रूयते तत्र न कश्चिद्विचारो यत्राप्युपायनमेव श्रूयते न हानन्तत्राप्यर्थादेवहानं सन्निपतति अन्यैरुपेयमानयोरात्मीयसुकृतदुष्कृतयोर्हानस्यावश्यकत्वात्। यत्र पुनः केवलं हानमेव श्रूयते तत्रोपायनं सन्निपतेन्न वेति संशये, अश्रवणाद्विद्यान्तरगोचरत्वाच्च न सन्निपततीति पूर्वपक्षे तत्रापि तत्सन्निपातं सिद्धान्तयितुं सूत्रमेवं व्याकुर्वते । हानौ केवलायामपि श्रूयमाणायामुपायनं सन्निपतति । कौशीतकिरहस्ये हानशेषत्वेन समधिगतत्वादित्यादि ।

तच्चिन्त्यम् । आद्ये उपायनशब्दस्याभावेन अर्थग्रहणेऽपि तस्य फलबोधकत्वेन द्वितीयवाक्येऽपि तस्य तथात्वेन हानशेषत्वाभावात्तद्विषयत्वायोगात् । ताण्ड्याथर्वणकौशीतकिवाक्येषु कम्पनार्थकधातुनिष्पन्ने, धूत्वेत्यादिशब्दे हान्यर्थत्वं लक्षयित्वा उपायने तच्छेषताकल्पनस्य क्लिष्टत्वात् । चतुर्ष्वपि वाक्येषूपायनस्य सत्त्वात् क उपायनशब्दः सूत्रकाराभिसंहित इत्यनिश्चयेन कौशीतकिस्थशब्द-

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ५ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड २)	५	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा। श्रीमदन्नंभट्टप्रणीता खण्डानि ९	९	०
रसमञ्जरी। व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख०	१०	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्विरचिता खण्डे २	२	०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३	३	०
श्रीमदणुभाष्यम्। श्रीश्रीवल्लभाचार्यविरचितम्। गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्यव्याख्या समेतम् खण्डानि ११	११	०
तत्त्वशेखरः। श्रीभगवल्लोकाचार्यप्रणीतः। तथा-तत्त्वत्रयचुलुकसंग्रहः। कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः।	१	०
श्रीभाष्यवार्तिकम्। श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्रतिपादनपरम्।	१	०

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 125.

श्रीमदणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितभाष्य-

प्रकाशाख्यव्याख्यासमेतम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा

रत्नगोपालभट्टेन संशोधितम् ।

ANU BHÂSHYA,

ON BRAHMASÛTRA BY ŚRÎ VALLABHÂCHÂRYA,

With the Commentary called Bhâshya Prakâśa,

By Goswâmi Śrî Purushottamjee Mahârâj.

EDITED BY RATNA GOPÂL BHATTA.

Fasciculus XII.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhambâ Sanskrit Book Depôt.

·Printed at the Vidyâ Vilâs Press,

BENARES.

1906.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

सूचीपत्रम्।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	८
क्षेत्रसंहिता	२	०	८

सम्पराये तर्त्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥

वाजसनेयि शाखायां, स एष नेति नेतीत्यात्मेत्युपक्रम्य, न व्यथत इत्यन्तेन ब्रह्मस्वरूपमुक्त्वा यत एतादृग्ब्रह्मातस्तद्विदपि वि-

---

स्यैव विषयत्वमित्यस्याप्यतिक्लिष्टत्वाच्च ।

चतुर्थस्योपायनवादस्य स्तुत्यर्थत्वादन्यदीयपुण्यपापयोः कथमन्यत्र प्राप्तिरित्यत्र नाभिनिवेशः कार्य इत्युक्तम् ।

तदपि न रोचिष्णु । राज्ञि चामात्यजा दोषाः पत्नीदोषाश्च भर्त्तरीत्यादिस्मृतावभिमानमात्रेण दोषसंक्रमकथनात् । भारतादौ माण्डव्यदत्तयमशापप्रसङ्गे बालकृतपापस्य जनकत्वोपाधिना पितृसंक्रमकथनात् । विश्वामित्रपुण्येन त्रिशङ्कोः स्वर्गप्राप्तिस्मरणाच्चापि तथा सम्भवेन स्तुतिमात्रत्वाङ्गीकारस्य अप्रयोजकत्वात् । क्षीयन्ते चाऽस्य कर्माणि तस्मिन् दृष्टे परावरे । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथेति श्रुतिस्मृतिभ्यां ज्ञानस्य कर्मनाशकत्ववद् विद्याविशेषस्यान्यत्र कर्मसंक्रामकत्वेऽपि बाधकाभावात्। नच सुकृतदुष्कृतयोः कर्त्तृसामानाधिकरण्यस्यैव सर्वत्र दर्शनान्नान्यत्र साक्षात् संक्रमोऽपि तु फलस्य तत्र सम्बन्धात् तत्र स उपचर्यत इति वाच्यम् । हेतुव्यधिकरणस्य फलस्यैवाशक्यवचनत्वात् । नच वाक्यान्यथानुपपत्त्या तत्र तथा कल्प्यत इति वाच्यम् । तस्या अत्रापि तौल्यात् ।

किञ्च । आन्यत्रिकवाक्यस्य आन्यत्रिकवाक्यशेषत्वाय कुशाच्छन्दःस्तुत्युपगानवदित्यत्र दृष्टान्तत्रयं यत् स्वीकृतं, तदपुष्टार्थम् । एकेनाऽपि तत्सिद्धेरप्रत्यूहत्वेन बहूनां कथने प्रयोजनाभावादिति ॥२६॥९॥

सम्पराये तर्त्तव्याभावात् तथा ह्यन्ये ॥ साम्पराय इति पाठे स्वार्थेऽण् बोध्यः । पूर्वाधिकरणे जीवस्य भगवत्सम्बन्धे विशेषमुक्त्वा तत्साधनयोर्ज्ञानभक्त्योर्मध्ये किं ज्याय इति विचारयितुमधिकरणमारभत इत्याशयेन सूत्रे तर्त्तव्याभावपदात्तल्लिङ्गके श्रुती विषयत्वेनोदाहरन्ति । *. वाजेत्यादि * * अथर्वणेत्यादि च * । एतयोराद्यं वाक्यं बृहदारण्यके शारीरब्राह्मणस्थम् । तत्र च पूर्वं मनसैवा-

प्रक्षितरूप इत्यभिप्रायेणाग्रे पठ्यते । अतः पापमकरवमतः कल्याणमकरवमित्युभे ह्येष एते तरत्यमृत इत्यादिनाग्रिमयैष नित्यो महिमा ब्राह्मणस्येत्यृचा च ब्रह्मविदो माहात्म्यमुक्त्वा पठ्यते । तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वाऽऽत्म-

---

नुद्रष्टव्यमित्यनेन तद्दर्शनसाधनमुक्त्वा, विरजः पर आकाशादित्यादिना विरजत्ववशित्वेशानत्वादीन् धर्मान् बोधयित्वा ततोऽनिरुक्तत्वाय, नेति नेतीत्यनेनैतावन्मात्रतां निषिद्ध्य अगृह्यो न हि गृह्यते, अशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्जते न व्यथत इत्यनेन लौकिकप्रमाणग्राह्यत्वमनाशित्वमसङ्गत्वं, षिञ् बन्धने, अबद्धत्वं निर्दुःखत्वं चोक्त्वा, तेन जडविलक्षणं ब्रह्मस्वरूपं बोधयित्वा ब्रह्मण एतादृशत्वात् तद्विदपि साध्वसाधुकर्मरहित इति बोधनायाऽग्रे पठ्यते । अतः पापमकरवमतः पुण्यमकरवमित्युभे ह्येष एते तरत्यमृतः साध्वसाधुनी इति । अत इदमभिसन्धाय पापमकरवं कृतवानस्मि अत इदमभिसन्धाय कल्याणं पुण्यं कृतवानस्मि, इति एवमभिसन्धिपूर्वकं कृते एते उभे साध्वसाधुनी हि निश्चयेन एष उक्तरीतिब्रह्मवित् तरति अतिक्रामत्यभिभवति । अमृतो जीवन्नेव, नैनं कृताकृते तपतः, एनं ब्रह्मविदं निन्दितकरणकल्याणकरणे पश्चात्तापं न नयतः, नास्य केनचन कर्मणा मीयते, अस्य प्राप्तव्यो ब्रह्मलोकः केनापि कर्मणा नाऽपयाति, प्राप्तव्यं प्राप्नोत्येवेत्यर्थः । तदेतदृचाभ्युक्तम् । ब्राह्मणोक्तोऽर्थो वक्ष्यमाणर्चाप्युक्त इत्यर्थः । ऋक् तु, एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान् तस्यैव स्यात् पदवित् तं विदित्वा न कर्मणा लिप्यते पापकेनेति । एष इति ब्राह्मणोक्तः । तं पूर्वोक्तरूपमात्मानं विदित्वा तस्यैवात्मनः पदवित् पदं चरणं स्थानं वा, तद्धाम परमं ममेति वाक्यादक्षरं तद्वित् स्यात् । ततः पापेन लिप्तो न भवतीत्येवमक्षरविदो माहात्म्यमुक्त्वा पठ्यते । तत्साधनमुच्यते । तस्मादेवंविदित्यादिना । यस्मादेवं ज्ञातुर्माहात्म्यं तस्मादेवं शास्त्रतो ज्ञः, यः स्वरूपवित्, शान्तो दान्तः निगृहीतान्तर्बहिःकरण उपरतो निवृत्तसर्वेहस्तितिक्षुः दुःखसहिष्णुः श्रद्धावित्त आस्तिक्यबुद्धिमान् आत्म-

न्येवात्मानं पश्येत् सर्वमेनं पश्यति सर्वोऽस्यात्मा भवति सर्वस्याऽऽत्मा भवति सर्वं पाप्मानं तरति, नैनं पाप्मा तरतीत्याद्युक्त्वान्ते पठ्यते, य एवं वेदेति । अत्र हि पाप्मतरणादिरूपं ब्रह्मज्ञानमाहात्म्यमुच्यते । ज्ञानस्य संसारमुक्तिहेतुत्वात् । अथर्वणोपनिषदादिषु तु भगवद्भक्तेर्मुक्तिहेतुत्वमुच्यते। परं ब्रह्मैतद् यो धारयतीत्युपक्रम्य भजति सोऽमृतो भवतीति । अग्रेऽपि मुक्तो भवति संसृतेरिति । एतद्विषयव्यवस्था तु पुरैवोक्तेति नात्रोच्यते।एतावान् परं सन्देहः—

नि स्वशरीर एवात्मानमक्षरं पश्येत् । अर्हे कृत्यतृचश्चेत्यर्हाऽर्थे लिङ् । दर्शनार्ह इत्यर्थः । एवं दर्शनार्हतामुक्त्वा स्वस्य द्रष्टृतानिश्चयार्थे द्रष्टृलिङ्गानि वदति । सर्वमेनं पश्यतीत्यादिना स्वज्ञानार्थे लिङ्गमुक्त्वा परज्ञानार्थं तदाह, विपापो विजरो विजिघत्सोऽपिपासो ब्राह्मणो भवति य एवं वेदेति । य उक्तप्रकारकब्रह्मद्रष्टा स विपापाद्यैर्लिङ्गैर्निश्चेय इत्यर्थः । अत्र विपापत्वं पापरूपकार्याकर्त्तृत्वमेव । बाह्यानां जराद्यभावानां समभिव्याहारात् । न तु पूर्वपापराहित्यम् । तस्य तर्त्तव्यत्वेनात्रोक्तत्वात् । इदं चान्यमतेऽपि तुल्यम् । सर्वैरेव, अश्व इव रोमाणि विधूय पापं स आगच्छति विरजां तत्सुकृतदुष्कृते विधूनुत इत्यादिश्रुतीरुदाहृत्य विदुषोऽपि देहवियोगसमय एव तर्त्तव्याभावव्याख्यानात् । अन्यथोक्तश्रुतिविरोधादिति सर्वमभिसन्धायास्य वाक्यस्य निष्कृष्टार्थमाहुः । * अत्र हीत्यादि * तर्त्तव्यलिङ्गां श्रुतिमुक्त्वा तदभावलिङ्गामाहुः । * अथर्वणेत्यादि * परं ब्रह्मेत्यादिवाक्यं गोपालतापनीयस्थम् । अर्थस्तु स्फुटः । आदिपदेन तदुपबृंहणभूतपुराणसङ्ग्रहः । अतः परं यदंशे संशयस्तं प्रकटयितुं पूर्वविचारितमंशं प्रथममाहुः । * एतदित्यादि * एतच्छ्रुतिद्वयविषयभूते ये ज्ञानभक्ती तयोर्या व्यवस्था अधिकारिभेदेन रूपभेदकथनात् तेन तेन ते ते धर्मास्तत्र तत्रोपसंहार्या, नोपसंहार्याश्चेति नियमरूपा, सा तु, न वा प्रकरणभेदादिति सूत्र एवोक्तेति तदंशे संदेहाभावादत्र पुनर्नोच्यत इत्यर्थः । सन्दिग्धांशमाहुः * एतावानित्यादि * ।

य एवं वेद स पाप्मानं तरतीति वचनाज्ज्ञानदशायामपि पापसत्त्वं वाच्यमन्यथा तरणासम्भवापत्तेः । एवं सति भक्तिदशायामप्येवमेव, न वेति भवति संशयः । तत्र श्रुतावविशेषेण पापनाशश्रवणान्मुक्तिपूर्वकाले पापनाशावश्यम्भावादेकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि तथेति न्यायेन भक्त्या पापनाशादत्रापि तथैवेति प्राप्त आह। सम्पराय इत्यादि । सम्परायः परलोकस्तस्मिन् प्राप्तव्ये सतीत्यर्थः । अथवा परः पुरुषोत्तमस्तस्याऽयो ज्ञानम् । तथाच सम्यग्भूतं पुरुषोत्तमज्ञानं येन स सम्परायो भक्तिमार्ग इति यावत् । अथवा परे पुरुषोत्तमे अयनमयो गमनं प्रवेश इति यावत्तथाच सम्यक्परायो येन स तथा भक्तिमार्ग इत्यर्थः ।ज्ञानमार्गेऽक्षरप्राप्त्या भक्तिमार्गे पुरुषोत्तमप्राप्त्या तस्माद्विशेषमत्र ज्ञापयितुमेवं कथनमतो भक्तेः पूर्वमेव पापनाशो युक्त इति भावः । ब्रह्मभूतस्य भक्तिलाभा-

---

* एवं सतीति * मुक्तिकारणत्वेन भक्तिज्ञानयोस्तौल्ये सति । तयोस्तौल्यं, भक्तौ पापसूचनाद्यभावश्च सन्देहबीजम् । पूर्वपक्षमाहुः * तत्र श्रुतावित्यादि * । * तथैवेति * । भक्तिदशाया पापसत्त्वमेव । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति सम्पराय इत्यादि*भक्तिदशायामेव तत्त्वस्याभाव इति भावः । संपरायशब्दस्य प्रसिद्धार्थग्रहणे भक्तिमार्गबोधकपदाध्याहारापत्तिरिति तमर्थं विहाय यौगिकार्थं गृहीत्वा व्याकुर्वन्ति । * अथवेत्यादि * । अत्र द्वेधा व्याख्यानेन पुरुषोत्तमज्ञानस्य तत्प्राप्तेश्च साधनं भक्तिमार्ग एवेति ज्ञापिते सन्देहो भवति। ननु रूढिर्योगमपहरतीति न्यायेन योगस्य निर्बलत्वादिदं न युक्तम् । व्यासचरणैर्वा कुत एवं प्रयुक्तमिति, तद्वारणायाहुः * ज्ञानमार्गेत्यादि * । * तस्मादिति * । ज्ञानमार्गात् । * एवं कथनमिति * । यौगिकपदकथनम् । तथाचैवं व्यासाशयाऽध्याहारापेक्षया यौगिकशब्दस्य लघुत्वाद्वेवमाशयकथनं युक्तमित्यर्थः ।*भक्तेरिति * मर्यादा मार्गीयप्रेमात्मिकाया भक्तेः। नन्विदं तदा युज्येत,यदा ज्ञानमार्गाद्भक्तिमार्गोत्कर्षः स्याद्, स एव तु कथमित्यत आहुः* ब्रह्मेत्यादि *

ऽनन्तरं, भक्त्या मामभिजानातीति भगवद्वाक्यात् पुरुषोत्तमस्वरूपज्ञानस्य भक्त्यैकसाध्यत्वात् तथा । एवं सति "मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने । मुक्तोपसृप्यव्यपदेशात् । जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते । जन्मान्तरसहस्रेषु समाराध्य वृषध्वजम् । वैष्णवत्वं लभेत् कश्चित् सर्वपापक्षयादिह" इत्यादिवाक्यैः पापनाशानन्तरमेव भक्तिसम्भवाद्भक्तस्य तत्तव्यपापादेरभावान्न ज्ञानमार्गीयतुल्यतेत्यर्थः ।

ननु य एवं वेदेति सामान्यवचनात् पुरुषोत्तमविदोऽप्येवमेवेति चेत्तत्राह । तथा ह्यन्ये । तथा ज्ञानानन्तरमिति पापवन्तोऽन्ये भक्तिमार्गीयेभ्योऽन्य इत्यर्थः । उक्तवचनरूपोपपत्तिर्हिशब्देन ज्ञाप्यते ॥ २७ ॥

तथेति ज्ञानमार्गाद्भक्तिमार्गस्योत्कृष्टत्वम्।ज्ञानमार्गे साक्षात्कारोत्तरं पुण्यपापनिवृत्त्या सुखप्राप्तेः। भक्तेस्तु पापनाशोत्तरमेव भवनादादित एव सुखप्राप्तेश्चेत्यपि बोध्यम् । किञ्च । ननु भवत्वेवं तथापि कथं भक्तिमार्गे तत्तव्याभाव इत्यत आहुः * एवं सतीत्यादि * मुक्तानामिति वाक्यं तु षष्ठस्कन्धचतुर्दशाध्यायस्थम् । नराणां क्षीणपापानामिति तु पाण्डवगीतास्थम्। समाराध्य वृषध्वजमिति तु वाराहपुराणीयप्रबोधिनीमाहात्म्यस्थम्। वैष्णवत्वमिति * भक्तिमार्गीयप्रेमवत्त्वम्। एतदग्रे, 'एतज्ज्ञात्वा तु विद्वद्भिः पूजनीयो जनार्दनः। वेदोक्तविधिनासम्यग् भक्तिमार्गानुसारतः' इति गारुडवाक्यात् । स्निग्धास्ते वैष्णवाश्च त इति गारुडाच्च । तथाचैतेभ्यो वाक्येभ्यो भक्तस्योत्कृष्टत्वात् तथेत्यर्थः। सूत्रशेषमवतारयन्ति। * ननु य इत्यादि * । नन्विदं सूत्रे कुतो लभ्यत इत्यत आहुः । * उक्तेत्यादि * । तथाच हिशब्दाल्लभ्यत इत्यर्थः ॥ २७ ॥

ननु भक्तिमार्गीयाणामपि गोपस्त्रीणां "दुःसहप्रेष्ठविरहतीव्रतापधुताऽशुभाः । ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गला" इति वचनेन दुष्कृतसुकृतयोरपि हानिश्रवणात् पूर्वोक्तवचनैर्विरोध इत्याशङ्कायामुत्तरं पठति ।

छन्दत उभयाविरोधात् ॥ २८ ॥

छन्द इच्छा तथाच भक्तिमार्गीयाणामपि पूर्वं पापनाशो यः स भगवदिच्छाविशेषतोऽतो भक्तेः पूर्वमेव पापनाशनिरूपकाऽतन्नाशनिरूपकवचनयोरविरोधाद्धेतोर्भक्तेः पूर्वमेव पापनाश आवश्यक इत्यर्थः । एवं सति भक्तेः पूर्वमेव तन्नाश औत्सर्गिकः । स कश्चिद्विशेषेच्छयाऽपनोद्यत इति भावो ज्ञापितो भवति । अत्रेच्छाविशेषे

छन्दत उभयाविरोधात् ॥ सूत्रमवतारयन्ति । * ननु भक्तीत्यादि * । * पूर्वोक्तवचनैरिति * । पापाभावबोधकवचनैः । तथाच विरोधादनिश्चये पापसन्निपातान्न भक्तिमार्गीयस्योत्कर्षसिद्धिरिति शङ्कायां विरोधनिवारणायोत्तरं पठतीत्यर्थः । सूत्रं व्याकुर्वन्ति * छन्द इच्छेत्यादि * । * एवं सतीति * पापनाशस्य बहुवाक्यत्वसिद्धत्वे सति । * ज्ञापितो भवतीति * । इच्छाया अविरोधकथनेन ज्ञापितो भवति । ननूपपादनमन्तरेणैवमिच्छा कथं ज्ञातुं शक्यत इत्यत आहुः * अत्रेच्छेत्यादि * । तथाच विस्तरभयान्नानुपपादनेऽपि सुबोधिनीतोऽवगन्तव्यमित्यर्थः । एवं चात्र तत्तव्यलिङ्गकश्रुतौ, तमेवं वेदानुवचनेन विविदिषन्तीति पूर्वं श्रावणात् सामान्यतो वैदिकसमधिगम्यत्वं प्रतिपादितम् । सरस्वत्यां कृतकेतमिति विशेषस्त्वत्र वाच्य इति । नन्वन्यैर्यत् सूत्राणि व्याख्यायन्ते तत्र पूर्वतन्त्रोक्तन्याया उपोद्बलकत्वेनोपन्यस्यन्ते । व्यासपादैस्तेषां तत्र तत्राऽऽदरणात् । अत्र तु पुराणेतिहासवाक्यानि । तत्र किं ज्याय इति चेत् । उच्यते । इदमेव ज्यायः । इतिहासपुराणयोर्वेदोपबृंहणत्वात् । तत्रापि वेदान्तकृद्वेदविदेव चाहमिति । मां विधत्तेऽभिधत्ते मामि-

वक्तव्यबहुत्वेऽपि किञ्चिदुच्यते । चिकीर्षितलीलामध्यपातिभक्ता न सोपधिस्नेहवत्यो न सगुणविग्रहा, न वा सुकृतादियुक्ता इति ज्ञापयितुं कतिपयगोपीस्तद्विपरीतधर्मयुक्ताः कृत्वा तस्यां दशायां स्वप्राप्तौ प्रतिबन्धं कारयित्वा स्वयमेव तां दशां नाशयित्वा स्वलीलामध्यपातिनीः कृतवानिति । न ह्येतावता सार्वदिक एवाऽयं भावो भवति । न हि मन्त्रप्रतिबद्धशक्तिरग्निरदाहक इति तत्स्वभावत्वमेव तस्य सार्वदिकमिति वक्तुं शक्यम् । एतच्च श्रीभागवतदशमस्कन्धविवृतौ प्रपञ्चितमस्माभिः ॥ २८ ॥

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ २९ ॥

ननु सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्यो-

---

ति वाक्यार्द्धीतेव ज्यायसी । स्वयं समाधावनुभूयोक्तत्वाच्छ्रीभागवतं च । पूर्वतन्त्रे तु जैमिनये यत् स्वयं गुरुमुखादवगत्य पाठितं तदेव आद्रियते, नेतरादिति जैमिनिमतदूषणादवगम्यते । किञ्चाऽस्मिन् सूत्रे छन्दःशब्देन कैश्चिद्विद्याभ्यासयमनियमजनिका विदुष इच्छा व्याख्याता । अन्यैस्तु तत्सुहृदां तदुद्धिषामिच्छा । इतरैस्तु-व्याख्यातुरिच्छा । यथाकथञ्चिच्छ्रुतिद्वयाविरोधः सम्पाद्य इति । एवमपि विचारे ईश्वरेच्छायाः सर्वत्र कारणत्वात् तत्तद्विद्यावतस्तदा तदा तथा तथेति यथाश्रुताङ्गीकारेऽपि मुक्तिप्रतिबन्धाभावाच्छ्रुतिसङ्कोचाभावाच्च किं ज्याय इत्यपि विचारय । न हि क्रमेण मुक्तिं प्राप्नुवतो वा किञ्चित्क्षणोत्तरं विरजानदीतरणे वा सुकृतादिक्षये पर्यङ्कोपासकस्य कश्चिद्विशेषो भवति । अतः काकदन्तविचारप्रायमेतत् ॥ २८ ॥

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ पूर्वाधिकरणे ज्ञानाऽपेक्षया भक्तेर्ज्ञान्यपेक्षया भक्तस्य चोत्कर्षः प्रतिपादितः । तमेव तद्धेतुबोधनेन दृढीकरोतीत्याशयेनाधिकरणमवतारयन्ति । * नन्वित्यादि *। अत्र, तमेव विद्वानिति वाक्यमुत्तरनारायणस्थम् । तत्र,

मश्नोति तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनायेत्यादिश्रुतिभिरुक्तरूपब्रह्मज्ञाने सत्येव मोक्ष इत्युच्यते । यमेवैष वृणुते तेन लभ्य इति श्रुत्या आत्मीयत्वेनाङ्गीकारात्मकवरणस्य भक्तिमार्गीयत्वात् तस्मिन् सति भक्तिमार्गे प्रवेशाद्भक्तस्यैव स इत्युच्यते । किञ्च । भक्त्या मामभिजानातीत्युक्त्वा, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमिति भगवतोक्तमिति भक्तिमार्गेऽपि पुरुषोत्तमज्ञानेनैव मोक्ष उच्यते, ज्ञानमार्गे त्वक्षरज्ञानेनेति

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तादिति पूर्वार्द्धे, परं जगत्कर्तृतया पूर्वमन्त्र उक्तं महान्तं पुरुषम् अहं वेदेतिश्रुतिः स्वस्य ज्ञातृत्वमुक्त्वा, तत्स्वरूपमाह । तमसः–अज्ञानात्मकस्य परस्तात् परम् । आदित्यवर्णम् आदित्यस्येव मण्डलान्तःश्यामावदातो वर्णो यस्य, श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामामिति छान्दोग्ये श्रुतत्वात्तादृशम् तथा चैतादृशश्रुतिभिः सत्यादिलक्षणकोक्तरूपब्रह्मज्ञानेन मोक्ष उच्यते । यमेवेति श्रुतौ तूक्तप्रकारेण भक्त्यैव स आत्मलाभात्मको मोक्ष उच्यत इति मोक्षार्थं ज्ञानभक्ती समुच्चेतव्ये ? किं वा विकल्पयितव्ये?इत्येकः संशयः। किञ्च, भक्त्या मामिति गीतायां पुरुषोत्तमज्ञानस्य, ब्रह्मविदाप्नोति परमिति श्रुतावक्षरज्ञानस्य च मोक्षहेतुत्वमुच्यते इति भक्तेन तदर्थं ते समुच्चेये ? विकल्पनीये?वेत्यपरः । नच विकल्पस्याष्टदोषदुष्टत्वात् समुच्चय एव युक्त इति वाच्यम् । तस्मान्मद्भक्तीस्येकादशस्कन्धीयभगवद्वाक्ये भक्तं प्रति ज्ञानस्यानुपयोगबोधनेन तत्समुच्चयस्य वैयर्थ्यात् । तथाचैवं प्रथमे कल्पे श्रुत्यांर्द्वितीये च स्मृत्योर्विरोधात् समुच्चयविकल्पयोरेकतरानिर्द्धाराद्वाक्यानामबोधकत्वं प्रसज्ज्यते । नच ज्ञानेनैव मोक्षस्तमेवमिति श्रुतौ, भक्त्या मामिति स्मृतौ च तस्यैव मोक्षहेतुत्वेनोक्तेः । भक्तस्य ज्ञाननैरपेक्ष्योक्तिस्तु तत्त्वतो ज्ञानं भक्त्येति साधनान्तरसाधितं ज्ञानमतात्त्विकत्वाच्छ्रेयोऽतो भक्तिरेव ज्ञानार्थं कार्येति तत्स्तुत्यभिप्रायेति न भक्तेः समुच्चयशङ्केति वाच्यम् । एवं भक्तित्यागेऽपि श्रुतौ ब्रह्मविदित्यत्र

विशेषः । 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति वचनेन भक्तिमार्गीयस्य ज्ञाननैरपेक्ष्यमप्युच्यते । तथाचैवं मिथः श्रुत्योः स्मृत्योश्च विरोधान्नैकतरनिर्द्धारः सम्भवति । नच ज्ञानेनैव मोक्ष उभयत्रापि तथोक्तेः। ज्ञाननैरपेक्ष्योक्तिस्तु भक्तिस्तुत्यभिप्रायेति वाच्यम् । विषयभेदेन ज्ञानभेदान्मुक्तिसाधनं कतमज्ज्ञानमित्यनिश्चयात् । नच श्रौतत्वाविशेषात् समुच्चय इति वाच्यम् । ज्ञानिनोऽक्षरे, भक्तस्य पुरुषोत्तमे लयात् समुच्चयाऽसम्भवात् । तर्ह्येवं विरोधाभावादुपपन्नं सर्वमितिचेत् । न । पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमा-

---

अक्षरस्य तमेवमित्यत्र पुरुषोत्तमस्य च विषयत्वेनोक्ततया विषयभेदेन ज्ञानभेदान्मोक्षसाधकज्ञानविकल्पस्य दुर्वारत्वात् । नच श्रौतत्वाविशेषाज्ज्ञानयोरेव समुच्चयोऽस्त्विति वाच्यम्। अक्षरात् परतः पर इति श्रुतेरव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्त्तन्ते तद्धाम परमं ममेति गीतावाक्याच्चाऽक्षरपुरुषोत्तमयोर्भेदादव्यक्तवाक्येऽक्षरस्य परमगतित्वकथनेन ज्ञानिनोऽक्षरे लयाद्, भक्त्या मामिति वाक्यं स्वस्य विशतिकर्मत्वबोधनेन भक्तस्य पुरुषोत्तमे लयात् स्थानभेदेन फलभेदे तयोरपि समुच्चयस्यासम्भवात् । ननु यद्येवं फलभेदस्तर्हि तस्य तस्य साधनस्य तत्र तत्र व्यवस्थित्या वाक्यानामितरेतरविरोधाभावात् सन्देहे निवृत्ते सर्वं श्रुत्युक्तं स्मृत्युक्तं चोपपन्नमिति व्यर्थमेवाधिकरणमितिचेन्न । पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञानवतः, अन्ते या मतिः सा गतिरित्यङ्गीकारे पूर्वज्ञानवैयर्थ्यप्रसक्तेर्दुर्वारतया तस्य न्यायस्याशक्यवचनत्वेन तादृशस्य लयस्थाननिर्द्धारासम्भवात्सन्देहेऽधिकरणप्रणयनस्यावश्यकत्वात् । अपरञ्च । यदि भक्तेरिवाक्षरज्ञानादपि परज्ञानमेव कयाचिद्विधया आद्यस्याधिकरणावश्यकत्वमुच्यते तदा तु, ततो मामित्याद्युक्तरीत्या भगवज्ज्ञानस्यैव प्रवेशसाधनत्वमधिकरणे मन्तव्यम् । तथाच तमेवेति

र्गीयज्ञानवतो लयस्थाननिर्द्धारासम्भवात् । अपरञ्च । ततो मां तत्त्वतो ज्ञात्वेति वचनाद् भक्तिमार्गे तत्त्वतो भगवज्ज्ञानमेव प्रवेशसाधनमिति मन्तव्यम् । तथाच 'मत्कामा रमणं जारं मत्स्वरूपाविदोऽबलाः । ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रश' इति वाक्याज्ज्ञानमार्गीयभक्तिमार्गीयज्ञानरहितानामपि भगवत्प्राप्तेस्तत्साधनत्वनिरूपकश्रुतिविरोधः । तथाच क्वचिज्ज्ञानं मुक्तिसाधनत्वेनोच्यते, क्वचिद्भक्तिः, क्वचिन्नोभयमपीत्येकतरसाधनानिश्चयान्मुक्तिसाधने मुमुक्षोः प्रवृत्त्यसम्भव इति प्राप्ते आह । गतेरर्थवत्त्वमित्यादि । गतेर्ज्ञानस्यार्थवत्त्वं फलजनकत्वमुभयथा मर्यादापुष्टिभेदनेत्यर्थः । अत्रायमाशयः । एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषतीत्यादिश्रुतिभ्यो भगवान् सृष्टिपूर्वकाल एवैतस्मै जीवायैतत्कर्म कारयित्वैतत्फलं दास्य इति विचारितवानि-

---

श्रुतेः सावधारणत्ववद्, मत्कामा इति स्मृतौ, सङ्गाच्छतसहस्रश इति कथनेन तदुपबृंहिताया वरणश्रुतेरपि सावधारणतुल्यत्वेन मार्गद्वयसिद्धज्ञानरहितानामपि भगवत्प्राप्तेर्ज्ञानसाधनत्वनिरूपकश्रुतिविरोध इति तत्कृतसंशयादप्यधिकरणमावश्यकम् । अतः पूर्वोक्तौ विषयौ संशयौ च निर्बाधौ । तथा सति, तथाच क्वचिदित्याद्युक्तरीत्या मुमुक्षुप्रवृत्त्यसम्भवान्मोक्षेच्छां परित्यज्य स्वर्गसाधन एव प्रयतनीयम् । किञ्चैवं मुमुक्षुप्रवृत्त्यसम्भवे प्राप्ते पूर्वोक्तं ज्ञानभक्त्योस्तातरम्यं भक्त्युत्कर्षो दोषस्य कादाचित्कत्वं च न निर्द्धारयितुं शक्यमिति च । पूर्वपक्षे प्राप्ते श्रुतेर्बोधकताप्रकारं वदन् सिद्धान्तेन पूर्वोक्तं द्रढयितुं ज्ञानोत्कर्षबाधनतात्पर्यमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * गतेरित्यादि * नन्वेवं कथं बुद्धावारोहतीत्याकाङ्क्षायां व्युत्पादयन्ति । * अत्रायमित्यादि * कार्यमात्रं प्रतीश्वरेच्छायाः कारणत्वेन तस्याश्च नित्यत्वेन, एष तु एवेत्यादिश्रुत्युक्ताऽपीच्छा तथेति भगवान् सृष्टिपूर्वकाल एव यद्यथा विचारितवांस्तत्तथैवेति। तत्र भगवद्विचारशरीर-

ति तथैव भवति । तत्रोक्तरीत्या मुक्तिसाधनानुगमे हेतुरवश्यं वाच्यः । एवं सति कृतिसाध्यं साधनं ज्ञानभक्तिरूपं शास्त्रेण बोध्यते । ताभ्यां विहिताभ्यां मुक्तिर्मर्यादा । तद्रहितानामपि स्वरूपबलेन स्वप्रापणं पुष्टिरुच्यते । तथा च यं जीवं यस्मिन्मार्गेऽङ्गीकृतवांस्तं जीवं तत्र प्रवर्तयित्वा तत्फलं ददातीति सर्वं सुस्थम् । अत एव पुष्टिमार्गेऽङ्गीकृतस्य ज्ञानादिनैरपेक्ष्यं मर्यादायामङ्गीकृतस्य तदपेक्षित्वं च युक्तमेवेति भावः । अत्र साधकत्वेन, विपक्षे बाधकमाह । अन्यथा हि विरोध इति । अन्यथा मर्यादापुष्टिभेदेन व्यव-

---

प्रविष्टोभयनकारणविमर्षे पूर्वोदाहृतवाक्योक्तरीत्या ज्ञानभक्तिवरणभगवद्विषयककामरमणजारादिबुद्धीनां शास्त्रे कथनेन मुक्तिसाधनानुगमे सति शास्त्रद्वारा मुमुक्षुप्रवृत्तिसिद्धये तत्साधनानुगमहेतुरवश्यं वक्तव्यः । एवं तद्वचनावश्यकत्वे सति उक्तमार्गभेद एव हेतुः । तत्र कृतिसाध्यमित्याद्युक्तरूपा मर्यादा । सर्वसाधारणहेतुना साध्यसिद्धौ मर्यादापदप्रयोगस्य लोके दर्शनात् । यथैतावति कृत एतावद्दीयत इति राज्यमर्यादेति । शास्त्रेऽपि स्वकृतसेतुपरिप्सयेति सेतुर्मर्यादा। तद्रहितानामित्याद्युक्ता तु पुष्टिः । अनुग्रह इति द्वितीयस्कन्धात् । अनुग्रहश्च धर्मान्तरमेव, न तु फलादित्सा । यस्यानुग्रहमिच्छामीति वाक्यात् । कृपानुकम्पादिशब्दानां स वाच्यः । एवं सति, लोकवत्तु लीलाकैवल्यमितिन्यायेन * तथाच यं जीवमित्याद्युक्तरीत्या ददातीत्युदिताऽनुदितहोमवदधिकारिभेदाद् व्यवस्थितमिति सर्वं पूर्वोक्तं सुस्थम् । केवलमर्यादायां वृतस्य जीवस्याक्षरे पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञानवतः क्रमेण मर्यादायां पुष्टौ चाङ्गीकारात्तस्य पूर्वमक्षरे ततः पुरुषोत्तमे लयस्य' ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता इतिवत् सुखेन सम्भवाच्छ्रुतिद्वयोक्तमुपपन्नमित्यर्थः । एतेनैव स्मृत्योरपि विरोधः परिहृत इति बोधयन्ति । * अत एवेत्यादि * अत एवेति * मार्गभेदादेव । सूत्रशेषमवतार्य व्याकुर्वन्ति । * अत्रेत्यादि * । * तथेति *

स्याया अकथने विरोधाद्धेतोस्तथेत्यर्थः । विरोधस्तु पूर्वपक्षग्रन्थ उपपादितः । एतेनैव, ननु श्रवणादिरूपा प्रेमरूपा च भक्तिरविशेषेण पापक्षय एवोदेत्युत कश्चिद्विशेषोऽस्ति । तत्राधुनिकानामपि

मुक्तिसाधने मुमुक्षुप्रवृत्तिप्रतिरोधः । ननु सूत्रे को वा विरोधोऽभिप्रेतो योऽत्र साधकत्वेनाद्रियत इत्यत आहुः । * विरोध इत्यादि * । अत्रेदं बोध्यम् । ब्रह्मनिरूपकेषु वेदान्तवाक्येषु क्वचित्सृष्टिकर्तृत्वप्रशासितृत्वादिरूपं ब्रह्ममाहात्म्यं जीवात्मनः परमात्माभेदस्तादृशज्ञानस्य मोक्षसाधनत्वं चोच्यते। क्वचिच्च वरणेन स्वतनुविवरणम्।क्वचित्तस्यैव मोक्ष इत्युच्यते । तत्र प्रकरणभेदान्माहात्म्यज्ञानवतात्माभेदज्ञानेनाक्षरप्राप्तिः । वरणेन स्वतनुविवरणश्रावणात्तेन भगवत्स्वरूपे दर्शनगोचरे सति हृदयग्रन्थिभेदात् सुदृढस्नेहरूपायां भक्तौ जातायां पूर्वजातमुक्तविधज्ञानमपि तत्रैवोपकरोतीति पुरुषोत्तमप्राप्तिः । नच केवले ज्ञाने वरणमुपसंहर्त्तुं शक्यम् । विद्याधर्मत्वाभावात्, वरणश्रुतौ जीवकृतसर्वसाधनालभ्यत्वश्रावणेन परमात्मनः श्रावणादिविध्युक्तसाधनालभ्यतया तन्मात्रसाधनिकायां विद्यायां वरणस्योपसंहर्त्तुमशक्यत्वाच्च । एवं साधनभेदेन फलभेदसिद्धौ पूर्वोक्तोभिमीषाश्रुतिसिद्धभगवद्विचारशरीरे श्रौतसाधनानां तदभावस्य तद्विरुद्धानां कामादीनामपि प्रवेशेन वरणे प्रकारभेदः सिद्ध्यति । स च पुराणोक्तैरुपबृंहणैर्विशेषतोऽवगम्यत इति हृदिकृत्य सूत्रकृता इदमधिकरणं प्रणीतमित्याशयेन पुराणस्य विरोधपरिहारचिन्तनमत्र कृतं, न तु मुख्यतया तेषां विषयवाक्यत्वमिति वैदिकम्मन्यबहिर्मुखबोधनाय वर्त्म । वस्तुतस्तु, सर्ववेदेतिहासानां सारं सारं समुद्धृतमितिवाक्याद्वेदत्वमेव श्रीभागवतस्य । इतिहासपुराणं वेदानां पञ्चमो वेद इति बृहदारण्यकश्रुतेश्च । अतस्तद्वाक्यत्वेनापि विषयवाक्यत्वं युक्तमिति न शङ्कालेशः । प्रकृतमनुसरामः । एतस्याधिकरणस्य पूर्वाधिकरणोत्थशङ्कानिरासरूपं प्रयोजनान्तरमाहुः । *एतेनेत्यादि * । एतेनेत्यस्य इत्यपि शङ्कानिरस्ता "वेदितव्यमित्यनेनान्व-

भक्तानां दुःखदर्शनाच्छ्रवणादेः पापनाशकत्वश्रवणाच्चाविशेषपक्षस्त्वसङ्गतः । अथ श्रवणादिरूपा, पापे सत्यपि भवति। प्रेमरूपा तु तन्नाश एवेति विशेषो वाच्यः । सोऽपि प्रेमवतामपि अक्रूरादीनां मणिप्रसङ्गे भगवता समं कापट्यकृतिश्रवणान्न साधीयानित्यपि शङ्का निरस्ता वेदितव्या । तथाहि मर्यादापुष्टिभेदेनाङ्गीकारे वैलक्षण्यादाद्यायामङ्गीकृतानां मुमुक्षयैव श्रवणादौ प्रवृत्तिस्तद्दातृत्वेनैव भगवति प्रेमापि, न तु निरुपधिः । कदाचिद् वस्तुस्वभावेन मुक्तीच्छानिवृत्तावपि तद्भक्तेः साधनमार्गीयत्वाद्, अनिच्छतो मे गतिमण्वीं प्रयुङ्क्त इति वाक्यादन्ते मुक्तिरेव भवित्री । अस्मिन्मार्गे श्रवणादिभिः पापक्षये प्रेमोत्पत्तिस्ततो मुक्तिः । पुष्टिमार्गेऽङ्गीकृतेस्त्वत्यनुग्रहसाध्यत्वात् तत्र च पापादेरप्रतिबन्धकत्वाच्छ्रवणादिरूपा प्रेमरूपा च युगपत् पौर्वापर्येण वा, वैपरीत्येन वा भवत्येव । अत्र श्रवणादिकमपि फलरूपमेव । स्नेहेनैव क्रियमाणत्वान्न विधिविषयः । न ह्यविद्यादिमुक्त्यन्तरूपभजनानन्दान्तरायरूपाभ्रङ्कषाविरलविविधमहातरुगहनानां दहने लोलुपस्याऽनुग्रहानलस्य

यः । * न साधीयानिति * । पापं विना भगवति प्राकट्यकृत्यसम्भवान्न साधीयान् । तथाच सम्परायसूत्रसिद्धः सिद्धान्तो न युक्त इत्याशङ्काऽप्येतेन मार्गभेदेन समाधानान्निरस्ता वेदितव्येत्यर्थः । कथं निरस्तेत्याकाङ्क्षायां व्युत्पादयन्ति । * तथा हीत्यादि * । * चकर्तुं शक्येत्यन्तम् । तथाच सम्परायसूत्रसिद्धः सिद्धान्तो मर्यादामार्गविषयः । सत्यपि पापे भक्तयुदयपक्षस्तु पुष्टिमार्गे । तत्र वरणप्रकारभेदे नियामिका या इच्छा, सा, छन्दत उभयाविरोधादिति सूत्रे सूचिता, सैवात्रोभयथेति पदव्याख्याने व्युत्पादिता । तेन न कोऽपि बाधः । नापि तत्कृतश्रवणादीनां पापनाशार्थत्वं शङ्क्यम् । तेषां प्रेम्णा क्रियमाणत्वेन फलमध्यपातित्वात् । पापस्य त्वनुग्रहेणैव नाशसम्भवादित्यर्थः । नन्वेतादृश्येवेच्छेत्यत्र किं मानमत आहुः ।

तदान्तरालिकपापतूलं प्रतिबन्धकमिति वक्तुं शक्यम् । तदुक्तं श्रीभागवते—'स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः । विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्वं हृदि संनिविष्ट' इति । विकर्म प्राक्तनं तद् दुःखदमिति, स्वयं च हरित्वेन दुःखहर्तेति धुनोति उक्तविशेषणविशिष्टस्य स्वतो विकर्मकृत्यसम्भवात् सांसर्गिकं मत्तो भूतं, न तु मया कृतमितिवद् वा यत् कृतं विकर्म तत्कथञ्चिदुत्पतितमित्युच्यते । त्यक्तान्यभावत्वेन भगवत्सेवाव्यासङ्गेनेन्द्रद्युम्नाख्यपाण्ड्यराजवन्महदागमनाद्यज्ञानं वा वक्ता उक्तरूपे भक्ते विकर्मोक्तावरुचिज्ञापनाय वा कथञ्चिदित्युक्तवान् । तेन तर्कितं विकर्मात्राभिप्रेतमिति ज्ञायते । एतादृशस्यापि यदि विकर्म भवेत् तदा तन्निवृत्त्यर्थं न तेनान्यत् कर्त्तव्यम् । भगवानेव हृदि निविष्ट-

---

* तदुक्तमित्यादि * । अत्र यद्विकर्म यच्च कथं चिदुत्पतितं तत्सर्वं धुनोतीत्यन्वयः । तत्र पूर्वं विवृण्वन्ति । * विकर्मेत्यादि * । तद् दुःखदमित्यत्र तदिति भिन्नं पदम् । * हरित्वेन दुःखहर्त्तेति * । 'हराम्यघं यत्स्मर्तृणां हविर्भागं क्रतुष्वहम् । वर्णश्च मे हरिश्चेष्टस्तस्माद्धरिरहं स्मृत'इति महाभारतवाक्यात्तथा । मध्ये निविष्टस्य कथञ्चित्पदस्य धुनोतिना सम्बन्धे धूननप्रकार इच्छाविषय एव वाच्यः । स चेच्छाविवरणादेव लभ्यत इति वैयर्थ्यात् पूर्वपदेनैव सम्बन्धो युक्त इत्याशयेन द्वितीयं विवृण्वन्ति । * उक्तेत्यादि * । मत्तो भूतं, न तु मया कृतमितिवाद् इति । अकामतः, अबुद्धिपूर्वकं च कृतम् । एवञ्च सांसर्गिकेन सह त्रिविधं विकर्मोक्तम् । त्यक्तान्यभावस्यैतदपि न सम्भवतीत्यरुच्या ततोऽतिरिक्तमन्यदाहुः । * त्यक्तेत्यादि * अज्ञानं वेतिकथञ्चिदुत्पतितविकर्मस्थानीयमिति शेषः । गौण्यङ्गीकारे बीजं वक्तुमाहुः । * वक्तेत्यादि * । तथाच तादृशस्य पापमेव नास्ति, किन्तु भगवदिच्छैव तादृशी सन्मार्गस्थापनार्थेत्याशयेनैतद्वाक्यवक्ता करभाजनो योगीश्वर एकादशस्कन्धे निमिं प्रति तथोक्तवानित्यर्थः । एवं कथनस्य तात्पर्यमाहुः । * तेनेत्यादि * ।

स्तत्तुनोति यत इति। कदाचित्स्वभक्तिबलस्फूर्त्या सदोषमपि जनं कृतार्थीकरिष्यामीत्यङ्गीकुर्याच्चेद्भक्तस्तदैव हृदिस्थ एव तत्संसर्गजं दोषमस्यैतदङ्गीकारेण तद्दोषमपि धुनोतीति सर्वपदेनोच्यते । चिरकालभोग्यमपि तत्क्षणेनैव नाशयति । तन्नाशने कालादेरप्रतिबन्धकत्वामत्यपि ज्ञापयितुं परस्य कालादेरीशत्वमुक्तम् । अत्र भजनादिहृद्भिवेशान्तानां स्पष्ट एव विकर्मणि सत्यपि सम्भव इति ॥ २९ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥

ननुं मुक्तेरेव सर्वत्र फलत्वमुच्यते । युक्तं चैतत् । संसृतेर्दुःखात्मकत्वात्, तन्निवृत्तेः सर्वेषामिष्टत्वात् । पुष्टिमार्गीयभक्तानां

सर्वपदतात्पर्यमाहुः । * कदाचिदित्यादि * । इदमपि नवमस्कन्धे रन्तिदेवोपाख्याने सिद्धम् । 'तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्त्तिनः । अभवन् योगिनः सर्वे नारायणपरायणा' इति, द्वितीयस्कन्धे शुकोक्तौ च—'किरातहूणान्ध्रपुलिन्दपुष्कसा आभीरकङ्का यवनाः खसादयः । येऽन्येऽपि पापा यदुपाश्रयाश्रयाः शुद्ध्यन्ति तस्मै प्रभविष्णवे नम' इति । चिरकालभोग्यस्य यत्र क्षणमात्रेण नाशनं तदुदाहरणं त्वन्तर्गृहगताः प्रागेवोक्ताः । सिद्धमाहुः । * अत्रेत्यादि * । तथाच मर्यादाभक्तिमार्गे तत्कर्त्तव्याभावाज्ज्ञानमार्गेत उत्कर्षः, पुष्टिभक्तिमार्गे तु कचित्पापसत्त्वेऽपि भगवतैव तन्नाशनेन कृपातिशयादुत्कर्ष इति सिद्धमित्यर्थः । तेन पूर्वाधिकरणोक्तो भक्त्युत्कर्षो हेतुबोधनेन दृढीकृतः । किञ्चैतेन भगवतः फलत्वबोधनात् स्वरूपावस्थितस्यैव तथात्वादेकेतनत्वरूपो धर्मोऽपि प्रतिपादितः ॥ २९ ॥ ७ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ पूर्वाधिकरणे भक्तिहेतुबोधनेन ज्ञानमार्गापेक्षया भक्तिमार्गस्योत्कर्षो दृढीकृतः । अत्र त्वनुग्रहजन्ययोर्मर्यादापुष्टिभक्त्योर्मध्ये मर्यादाभक्तेः पापनाशोत्तरमेव जायमानत्वात्पुष्टिभक्तौ च तादृशनियमाभावात् तत आधि-

तु तदनपेक्षित्वमुच्यते । तदुक्तमथर्वणोपनिषत्स्वष्टादशार्णमन्त्रस्व-रूपमुक्त्वा पठ्यते ।परब्रह्मैतद्यो धारयतीत्यादेरन्ते सोऽमृतो भवतीत्यादि । एतदग्रे किं तद्रूपं किं रसनं कथं हैतद्भजनमित्यादिप्रश्नोत्तरं पठ्यते, भक्तिरहस्यभजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्यात्मनः कल्पनमेतदेव नैष्कर्म्यमिति । एतदत्र विचार्यते।मन्त्राद्युक्तिततदधिष्ठातृरूपध्यानादेरमृतत्वं फलमुच्यते । भजनस्वरूपं च यावत्फलनैराश्येन भगवत्यात्मनः कल्पनमित्युच्यते। नच फलनैराश्येन भजनेऽप्यन्ते मुक्तिरेव भवित्रीति वाच्यम् । तं यथा यथोपासते तथैव भवति तद्धैतान् भूत्वावतीति श्रुतेर्मुक्तिसाधनत्वेन ज्ञात्वा भजतः सैव फलम्।स्वरूपस्यैव स्वतन्त्रपुरुषार्थत्वमनुभवन् यो भजते तस्य तदेव फलमिति यतो निर्णयः सम्पद्यते । ये यथा मां प्रपद्य-

---

कथं न स्यादतस्तारतम्यं विचार्यते। चरणश्रुतिप्रपञ्चभूतमिति पूर्ववदेव विषयसंशयौ पूर्वपक्षं निक्षिप्य सूत्रमवतारयन्ति । * ननु मुक्तेरित्यादि * पुष्टिमार्गीयभक्तानां मुक्त्यनपेक्षत्वं कुत्राऽथर्वोपनिषत्सूच्यत इत्याकाङ्क्षायां, गोपालपूर्वतापनीय इत्याह । * अष्टादशार्णेत्यादि * । * भक्तिरहस्यभजनमिति * अत्र भक्तिशब्दाच्छान्दसः सोर्लुक् । रहस्यभजनमित्यस्य विवरणं, * तदिहेत्यादि * अर्थस्तु तद् भजनम् अमुष्यात्मनो वस्तुत एतदीयस्य जीवस्य इहामुत्रोपाधिनैराश्येनैव ऐहिकामुष्मिकयावत्फलेप्साराहित्येन कल्पनं तदीयत्वसमर्थनम् । अन्तर्बहिः सेवया तद्दृढीकरणम् । कृपू सामर्थ्य इति धात्वर्थात् । एतदेव = स्वस्य तदीयत्वसमर्थनमेव, नैष्कर्म्यं संन्यास इति । अन्ये तु, भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन् मनः कल्पनमिति पठन्ति। एवं पाठद्वयेऽपि यावत्फलनैराश्यस्य प्रविष्टत्वादामुष्मिकमध्ये मुक्तेरपि प्रवेशात् तदनपेक्षत्वं समानम् । * एतदत्र विचार्यत इति * उक्तं तापनीयवाक्यद्वयमस्मिन् सूत्रे विचार्यते। सन्देहं वक्तुं विचारप्रकारमाह । * मन्त्रेत्यादि * । अमु

न्ते तांस्तथैव भजाम्यहमिति भगवद्वाक्याच्च । अत एव रहस्य-भजनं लक्ष्यमुक्तम् । तथाच श्रौतत्वभगवत्सम्बन्धित्वयोरविशेषात् कतमो गरीयानिति संशये गूढाभिसन्धिः पठति । मुमुक्षोः सकाशाद्रहस्यभजनकर्त्तैवोपपन्नः । उपपत्तियुक्तः । तमेवोद्घाटयति तल्लक्षणार्थोपलब्धेरिति ।तल्लक्षणो भगवत्स्वरूपात्मको योऽर्थः । स्वतन्त्रपुरुषार्थरूपस्तदुपलब्धेः । स्वाधीनत्वेन तत्प्राप्तेरित्यर्थः । यद्यपि पुरुषोत्तमे प्रवेशे तदानन्दानुभवो भवति तथापि न प्रभोस्तदधीनत्वम् । भक्तितिरोभावात् । प्रत्युत वैपरीत्यम् । भजनानन्दस्य

पञ्चपदं मन्त्रमावर्त्तयेद्यः स यात्यनायासतः केवलं तद् इति मन्त्रोक्ता या पञ्चपदस्याष्टादशार्णमन्त्रस्यावृत्तिः पुनः पुनः कथनम् । तस्मात् कृष्ण एव परो देवस्तं ध्यायेत्तं रसेत्तं भजेदिति ब्रह्मणोक्तं यत्तदधिष्ठातृध्यानादि तस्य सर्वस्य अमृतत्वं फलम्, उपक्रम एव, यो ध्यायति रसति भजति सोऽमृतो भवतीत्यनेनोच्यते । * भजनस्वरूपमित्यारभ्य, भगवद्वाक्याच्चेत्यन्तग्रन्थस्तु स्फुटार्थः। एतन्निगमनायाह । * अत एवेत्यादि * । * अत एवेति * । स्वरूपस्य फलत्वादेव । अस्य भजनमिति पाठे तु निरुपधिभजनमेव लक्ष्यम् । उभयथापि, तद्धैतानित्यादिभिः सिद्धो निर्णयस्तुल्यः । अतो निरपेक्षभजनेऽपि मुक्तिरेव फलमिति निर्णयस्य कर्त्तुमशक्यत्वाद् यत् सिद्धं तदाह । * तथाचेत्यादि * । उक्तहेतुभ्यामुभयोर्भक्तयोः साम्यमेव युक्तमिति पूर्वपक्षरूपे संशये श्रुतिस्थगूढाभिप्रायं प्रकटयन् सूत्रं पठतीत्यर्थः । सूत्रं व्याकुर्वन्ति । * मुमुक्षोरित्यादि * । * रहस्यभजनकर्त्तेति * । पाठान्तरे तु निरूपधिभजनकर्त्ता । * तमेवेति *। तादृशं भक्तम् । गूढाभिसन्धिं वा । अग्रे उपपत्तेरेव कथनादिति । ननु पुरुषोत्तमे सायुज्येऽपि सूत्रोक्तस्य हेतोरुपपद्यमानत्वात् कथं रहस्यभजनकर्त्तुरेवाधिक्यस्य सिद्धिरित्यत आहुः । *यद्यपीत्यादि* । ननु माऽस्तु प्रभोस्तदधीनत्वं सायुज्ये, तथापि स्वरूपानन्दापेक्षया भजनानन्दस्याधिक्ये किं मानमत आहुः । * भजनानन्दस्येत्या-

तत आधिक्यं तु, मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगं, दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः, नारायणपरा इत्युपक्रम्य स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन इत्यादिवाक्यैरध्यवसीयते । अत एव सामीप्यवाच्युपसर्ग उक्तः । तेन दासीत्वेन दासत्वेन लीलायां सुहृत्त्वेन प्रभुनिकटे स्थितिरुक्ता भवति । नच महत्पदार्थस्वरूपाज्ञानादल्प एवानन्दे यथा सर्वाधिक्यं मन्वानः पूर्वोक्तं न वाञ्छति तथाऽत्रापीति वाच्यम् । दीयमानानामर्थानां स्वरूपाज्ञानासम्भवात् । अनुभवविषयीक्रियमाणत्वस्यैवात्र दीयमानपदार्थत्वात् । तदज्ञाने स्वर्गादित्रये तुल्यदर्शित्वासम्भवश्च । मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगमिति वाक्ये भक्तेराधिक्यं स्पष्टमेवोच्यते । तस्मान्न्यूनार्थजिघृक्षोः सकाशात् पूर्णार्थवान् महानिति युक्तमेवास्योपपन्नत्वम् । इममेवार्थं दृष्टान्तेनाह ।

दि * । अत्र प्रथमवाक्यं पञ्चमस्कन्धषष्ठाध्याये श्रीशुकैः परीक्षितं प्रत्युक्तम् । 'राजन् पतिर्गुरुरयं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किङ्करो वः । अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति । अत्र मुक्तिदातुरप्यदेयत्वेन भक्तेराधिक्यं सिद्धं तदानन्दस्याधिक्यम् । द्वितीयं तृतीयस्कन्धे कापिलवाक्यम् । तृतीयं षष्ठस्कन्धे सप्तदशाध्याये उमां प्रति शिववाक्यम् । नन्वयमर्थः सूत्राशयगोचरत्वेन कथं ज्ञेय इत्यत आहुः । * अत एवेत्यादि * । तथाच यद्येवमर्थोऽभिप्रेतो न स्यात्तदा तल्लक्षणार्थलब्धेरित्येव सूत्रं वदेत् । भगवत्स्वरूपलाभस्योभयत्रापि तुल्यत्वेनोपोपसर्गप्रयोजनाभावात् । अत उपलब्धिपदाज्ज्ञेय इत्यर्थः । चतुर्विधमुक्त्यन्तर्गतत्वव्यावृत्त्यर्थं तादृशस्य सिद्धं स्वरूपमाहुः । * तेनेत्यादि * । एतदेव भक्तेराधिक्यमूहापोहेन द्रढयन्ति । * नचेत्यादि * । स्पष्टम् । इतोऽप्युत्कटभक्तसूचना-

लोकवदिति । यथा स्वाधीनभर्तृका नायिका तदवस्थाऽननुगुणगृहवित्तादिकं दीयमानमपि नोरीकरोति तथेत्यर्थः ।

अथवा स भगवानेव लक्षणमसाधारणो धर्मो यस्य स तल्लक्षण उद्भटभक्तिभावः स एवार्थः स्वतन्त्रपुरुषार्थरूप इत्यग्रे पूर्ववत् । भगवत्साकट्यवानेव हि भक्तो भक्तत्वेन ज्ञायत इति तथा ।

य पक्षान्तरमाहुः । * अथवेत्यादि * । स्पष्टम् । एवमत्र भक्तेः परमा काष्ठा सूचिता । तेन फलभक्तौ मुक्तिर्न सन्निपततीति मर्यादाभक्तिफलभूतमुक्तिभाजोऽपि सकाशात् पुष्टिभक्तोऽधिक इति सिद्धम् । अत्र गोपालतापनीयोक्ते विषयवाक्ये भक्तिविषयतया पुरुषोत्तमस्वरूपस्य सिद्धत्वेन श्यामावदातत्वं प्रतिपादितम् ।

शंकराचार्यास्तु, गतेरर्थवत्त्वमिति द्विसूत्रमधिकरणमङ्गीकृत्य, क्वचित् पुण्यपापहानसन्निधौ देवयानः पन्थाः श्रूयते, क्वचिन्न । स किं सर्वत्र संनिपतेन्न वेति संशये उपायनवत् सर्वत्रेति प्राप्तम् । तत्राह । गतं देवयानस्य पथः, अर्थवत्त्वमुभयथा विभागेनेत्युक्त्वा क्वचिदर्थवती गतिः क्वचिन्नेति विभागस्वरूपं व्याचक्रुः । तन्मन्दम् । एकस्य प्रकारस्य गतिसार्थक्यं प्रत्यहेतुतया सौत्रस्योभयथापदस्य विरोधात् ।

भास्कराचार्यास्तु, उभयथेत्यस्य सुकृतनिवृत्त्या दुष्कृतनिवृत्त्या चेत्यर्थमाहुः । पूर्वव्याख्यानादिदमेव समीचीनम् । सूत्रस्थपदसङ्गतेः ।

वाचस्पतिमिश्रास्तु । यदि पुण्यमपि निवर्त्तेत किमर्था तर्हि गतिरिति भास्कराचार्योक्तमवतारणं सूत्रव्याख्यानं चानूद्याहुः । तैरनाशङ्कनीयमेवाशङ्कितम् । विद्याक्षिप्तायां हि गतौ केयमाशङ्का । यदि क्षीणसुकृतः किमर्थमयं यातीति । न हीयं सुकृतनिबन्धना गतिरपि विद्यानिबन्धनेति । तस्माद् वृद्धोक्तमेवोपवर्णनं साध्विति । तन्मन्दम् । विद्याक्षिप्ताया एव गतेरर्थवत्त्वस्य सूत्रे प्रकारद्वयेन समर्थितत्वात् । तत्र प्रकाराकाङ्क्षायामर्थशब्दस्य पञ्चस्वर्थेषु

एतेन ज्ञाप्यं हि ज्ञापकादधिकं भवति । एवं सति यज्ज्ञापकं परमकाष्ठापन्नं वस्तु पुरुषोत्तमस्वरूपं सर्वफलरूपं तन्महत्त्वं कथं वक्तुं शक्यमिति सूच्यते ॥ ३० ॥

निवृत्तेरप्युक्तत्वात् तदभिप्रेत्य द्वेधा निवृत्त्यार्थवत्त्वव्याख्याने दोषाभावात् । तद्व्याख्येयवृद्धोक्तौ त्वर्थशब्दस्य प्रयोजनार्थताया निवृत्त्यर्थताया वा उपगमेऽप्युभयथेति पदासामञ्जस्यं दुर्वारमेवाऽतो वृथाऽयमाडम्बरः । किञ्च । मतद्वयेऽपि देहवियोगकाल एव द्विविधकर्मक्षयस्याङ्गीकृतत्वाद् ब्रह्मणश्च व्यापकत्वाद्गतिवैयर्थ्यं तु मतद्वयेऽपि नापैति ।

यत्पुनर्भास्कराचार्यैः पर्यङ्कस्थस्य ब्रह्मणः कार्यब्रह्मत्वमुपगतम् । तदपि मन्दम् । हेत्वदर्शनात् । नच साकारत्वमेव हेतुरिति वाच्यम् । तस्य कार्यासाधारणतायाः प्रागेव बहुधाऽस्माभिर्निरस्तत्वेनाभिमानमात्रत्वात् । नच यजूदरः सामशिरा इति श्लोकरूपया तत्स्वरूपसंग्राहकश्रुत्योक्तं वेदरूपत्वमेव हेतुरिति युक्तम् । तदा मनोमयत्वेन भगवद्धर्मरूपतयाऽपि नित्यत्वानपायात् । नच द्वैतापत्तिः । तस्या अपि प्रागेवाभेदस्वरूपविचारे एव निरस्तत्वात् । उपासकस्य लिङ्गशरीरवत्त्वं वेदात्मकस्थूलशरीरवत्त्वं च युक्तमिति बोध्यम् ।

रामानुजाचार्यास्तु संपरायाधिकरणं पञ्चसूत्रमङ्गीकृत्य तत्र देहपातसमय एव यावत्कर्मक्षयं सूत्रद्वयेन व्याख्याय गतिसूत्रं पूर्वपक्षत्वेन व्याकुर्वन्ति । गतेर्देवयानगतिश्रुतेः । उभयथा अर्थवत्त्वं सुकृतदुष्कृतयोरेकदेशस्य देहवियोगकाले हानिः शेषस्य पश्चादित्युभयथा कर्मक्षये सत्येवार्थवत्त्वम् । अन्यथा हि विरोधः । देहत्यागसमय एव सर्वकर्मक्षये सूक्ष्मदेहस्यापि नाशात् केवलस्य गमनं तु विरुध्येतेति । एतस्योत्तरमुपपन्नसूत्रे । उपपन्न एवोत्क्रान्तिकाले सर्वकर्मक्षयः । कथम् । तल्लक्षणार्थोपलब्धेः । परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, स तत्र पर्येति जक्षन् क्रीडन् रममाण स्त्र्यादिषु क्षीणकर्मणा आविर्भूतस्वरूपस्यापि देहसम्बन्धाख्यस्यार्थस्योपलब्धेः । विद्या हि स्वयं सूक्ष्मशरीरस्थानारम्भिकापि सर्व-

अनियमः सर्वासामविरोधः शब्दानुमाना-
भ्याम् ॥ ३१ ॥

अथर्वणोपनिषत्सु पठ्यते । परब्रह्मैतद् यो धारयति रसति भजति ध्यायते प्रेमति शृणोति श्रावयत्युपदिशत्याचरति सोऽमृतो-

---

कर्मणां निरवशेषक्षयेऽपि स्वफलभूतब्रह्मप्राप्तिप्रदानाय देवयानेन पथा गमयितुं सूक्ष्मशरीरं स्थापयति । यथा लोके केनचित् तडागादिके कृते, तस्य पुंसो नाशोत्तरमप्यन्ये तडागादिकमशिथिलं कृत्वा स्थापयन्ति तद्वदित्येवं व्याकुर्वन्ति । अन्यापेक्षया इदमेवातिसुन्दरम् । अस्मन्मते तु यदेतन्न विचारितं तच्छन्दत इति सूत्रे भगवदिच्छायाः कारणत्वोक्त्या यादृश्येच्छया यो यादृगधिकारी तस्य तस्य तदा तदा कर्मक्षयस्तया तया विद्यर्यति न कुत्रापि कल्पना, न वा श्रुतिविरोध इत्यस्य निर्णयस्यार्थादेव सिद्धिरिति बोध्यम् ॥ ३० ॥ ८ ॥

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥ एवं पुष्टिभक्तेः फलरूपत्वं तादृशभक्तस्य स्वरूपं च निरूप्य ततो न्यूनाया अपि मर्यादाभक्तेर्ज्ञानमार्गादुत्कर्षं विषयोत्कर्षाद् बोधयितुं मर्यादाभक्तिसाध्यायां मुक्तौ सर्वा भक्तयः सन्निपतन्ति, किं वा प्रत्येकमेवेतरनिरपेक्षाः मुक्तिं साधयन्तीति विचारयितुमधिकरणमारभत इत्याशयेन विषयादिकमाहुः * अथर्वणेत्यादि * अत्र सर्वाङ्गे मनोधारणं करोतीति धारयतिपदार्थः । रसति कीर्त्तयति जपतीत्यर्थः । भजति शारीरादिना सेवते । ध्यायते एकाङ्गं लीलां वा चिन्तयति। प्रेमति युधिष्ठिरादिवत् स्निह्यति । शृणोति श्रावयतीति प्रकटार्थम् । उपदिशति मन्त्रद्वारा बोधयति । आचरति भगवद्धर्मानिति शेषः । एवमत्र नवोक्ताः । अयं च शाखान्तरीयः पाठः । प्रसिद्धपाठे तु ध्यायति रसति भजतीति त्रयमेवोच्यते । तदाप्युपलक्षणविधया अन्या अन्यत्रोक्ता अपि समायान्ति । संशयपूर्वपक्षौ स्पष्टौ । सि-

भवति सोऽमृतोभवतीति । तत्र धारणादीनां समुदितानामेवाऽमृतसाधकत्वमुत प्रत्येकमपीति भवति संशयः । अत्र धारणादिसाधनकलापमुक्त्वा फलमुच्यत इति समुदितानामेव मुक्तिसाधकत्वमुपलक्षणं चैतच्छ्रवणादिनवविधभक्तीनामप्येवमेव तथात्वमिति पूर्वपक्षे सिद्धान्तमाह । अनियम इति । समुदितानामेव तेषां फलसाधकत्वमिति नियमो नास्तीत्यर्थः । अत्रोपपत्तिमाह । सर्वासामविरोध इति । चिन्तयँश्चेतसा कृष्णं मुक्तो भवति संसृतेरिति श्रुत्या चिन्तनमात्रस्य तथात्वमुच्यते। पञ्चपदीं जपन्नित्याद्युक्त्वा ब्रह्म सम्पद्यते ब्रह्म सम्पद्यत इति श्रुत्या कीर्त्तनमात्रस्य तथात्वमुच्यते। तथाच प्रत्येकपक्ष एव सर्वासां श्रुतीनामविरोधः स्यात् । एवं सति परब्रह्मैतद् यो धारयतीत्यादिषु सोऽमृतो भवतीति पदं प्रत्येकं सम्बध्यत इति ज्ञेयम् । ननु यथा दण्डादीनां प्रत्येकं घटहेतुत्वोक्तावपि नैकस्यैव तज्जनकत्वमेवमत्राप्येकैकस्य चिन्तनादेस्तथात्वोक्तावपि फलसाधकत्वं समुदितानामेव तेषामिति चेन्नैवम् । योऽर्थो यत्प्रमाणैकसमधिगम्यः स तेन प्रमाणेन यथा सिद्ध्यति तथा मन्तव्यः । दण्डादेस्तथात्वं प्रत्यक्षेण गृह्यत इति तत्र तथाऽस्तु प्रकृते तु तेषां तथात्वमलौकिकशब्दैकसमधिगम्यम्। श्रुतिस्तूक्तैव। नचोक्तन्यायः श्रुतिष्वपि तात्पर्यनिर्णायको भवतीति वाच्यम् । अलौकिकेऽर्थे लौकिकन्यायासामर्थ्यात् । अन्यथा ब्रह्मणा मनसैव प्रजाजनने निषेकादिकमपि कल्प्येत । स्मृतिरपि “केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येऽन्ये मूढधियो नागाः सि-

---

द्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति। * समुदितानामित्यादि * । * अत्रेति * अनियमे ।किञ्चिदाशङ्क्य परिहरन्ति ।* नन्वित्यादि * एवमे-

द्धामामीयुरञ्जसा । एतावान् सांख्ययोगाभ्यामि”त्युपक्रम्य, अन्ते नारायणस्मृतिरित्यादिरूपैवमेवाह । इममेवार्थं हृदि कृत्वाऽऽह सूत्रकारः । शब्दानुमानाभ्यामिति । श्रुतिस्मृतिभ्यामित्यर्थः । तेचोक्ते । एतेन सूत्रकारस्यान्योऽप्यनुशयोऽस्तीति भाति । यत्रोक्तसाधनस्तोमसम्पत्तिरेकस्मिन् भक्तेऽस्ति तत्रैकेनैव मुक्तावितरसाधनत्वबोधकश्रुतिविरोधाच्छ्रवणकीर्त्तनस्मरणानां मुक्त्यऽव्यवहितपूर्वक्षणे युगपदपि सम्भवादन्यथासिद्धिसम्भवे विनिगमकाभावादेकेनैव मुक्तिरिति न नियमोऽतः प्रत्येकसाधकत्वबोधिकानां सर्वासां श्रुतीनां मिथोविरोधः। तर्ह्येकत्र तथात्वे सर्वत्रैव तथाऽस्त्वित्याशङ्क्य तत्र बाधकमाह । शब्दानुमानाभ्यामिति। पूर्ववत् । तत्र प्रत्येकमपि मुक्तिहेतुत्वमुच्यत इति न तथेत्यर्थः । यत्र प्रत्येकमपि तथात्वं तत्र

बाहेत्यन्तम् * । * एवमेवाहेति * प्रत्येकपक्षमेवाह । एवं प्रत्येकपक्षं निर्णीय यत्रासां समुदायस्तत्र कस्य कारणतेत्याकाङ्क्षायां तामप्येतेन पूरयन्तीत्याहुः । * एतेनेत्यादि * । * एतेनेति * अनियम इत्यादिकथनेन । तमेवानुशयं व्युत्पादयन्ति । * यत्रोक्तेत्यादि * युगपदपि सम्भवादित्ययम् अन्यथासिद्धिसम्भवे हेतुः । * विनिगमकाभावादिति * त्रयाणां मध्ये कस्यान्यथासिद्धिरित्यत्र विनिगमकाभावात् । * अत इति * अनियमात्।ननु प्रत्येकपक्षे भक्तिकारणत्वश्रुतीनां मिथोविरोधाद्भक्तीनां न प्रत्येकं कारणत्वं तथा समुदितानामपि कारणत्वं माऽस्तु । ज्ञान एव तदुपक्षयस्य वक्तुं शक्यत्वात् । श्रुतीनां चोपचारेण नेतुं शक्यत्वादित्येवं तर्ह्येकेत्यादिना आशङ्क्य तत्र भक्तीनां मुक्त्यकारणत्वे बाधकमाहेत्यर्थः । * तत्रेति * श्रुतौ स्मृतौ च । तथाच श्रुतेरुपचारसहिष्णुत्वेऽपि स्मृतौ, केवलेन हि भावेनेति केवलपदान्नोपचारसहिष्णुत्वमतस्तदुपबृंहितश्रुतावपि यथाश्रुतमेवादरणीयमित्यर्थः । ननु तर्हि पूर्वं विकल्पितस्य दोषस्य कथं परिहार इत्यत आहुः । * यत्र प्रत्येकमित्यादि * तथाच ताह-

किमु वक्तव्यं समुदितानां तथात्व इति भावः । तेन श्लिष्टः प्रयोगोऽयमिति ज्ञेयम् ॥ ३१ ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥

पूर्वं मुमुक्षुभिर्मुक्तिसाधनत्वेन क्रियमाणानां भगवद्धर्माणां मुक्तिसाधनप्रकारो विचारितः । अधुना तु भगवान् स्वविचारितकार्यं लौकिकैश्वर्याद्यशक्यं ज्ञात्वा स्वैश्वर्यादिकं दत्वा येन जीवेन तत्कारयति स जीवस्तैर्द्धर्मैर्मुक्तो भवति न वेति विचार्यते । तत्र जीवकृतभगवद्विषयकधर्माणां यत्र तत्साधकत्वं तत्र भगवदी-

---

शस्थले सर्वासां भक्तीनां सन्निपातात् फलशैघ्र्यं बोध्यमित्यर्थः । * श्लिष्ट इति * अनियम इत्यनेन एकमेव कर्त्तव्यं, न द्वयं त्रयमित्यस्याप्यनियमस्य संग्रहाज्ञानार्थसंश्रय इत्यर्थः । अत्र ज्ञानद्वारा मुक्तिजनिकानां भक्तीनां विचारेण ताभिर्ज्ञेयस्य भगवतो निर्मलत्वबोधकं विरजमिति विशेषणं प्रतिपादितं बोध्यम् ।

अन्ये तु, अर्चिरादिगतिः सर्वासु विद्यासु?उत यत्र श्रूयते तत्रेति संशये, सर्वत्रेति सिद्धान्तयन्ति । अस्मिन् सिद्धान्ते तु यत्रातिकृपा तत्र सद्योमुक्तिः । इतरत्र त्वर्चिरादिगतिरिति विशेषो गतिसूत्रादेव सिद्ध्यतीति बोध्यम् ॥ ३१ ॥ ९ ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ पूर्वाधिकरणसङ्गतिं वदन्तोऽधिकरणप्रयोजनमाहुः* पूर्वमित्यादि * । * मुक्तो भवति न वेति * । सायुज्यं प्राप्नोति, न वा । तथाच यदि तैः प्राप्नोति तदा भक्तित्वं, न मुक्तिजनकतावच्छेदकम् । तेषु भक्तित्वाभावात् । यदि न प्राप्नोति तदा भगवद्धर्मत्वमपि न तथा । अत्राद्ये पूर्वोक्तश्रुतिस्मृतिविरोधः । द्वितीये भगवद्धर्माणां मुक्तिप्रतिबन्धकत्वप्रसङ्ग इत्यतो विचार्यत इत्यर्थः । एवञ्च ते भगवद्धर्मा विषयाः । मुक्तिहेतवो न वेति संशयः । ते च, यदादित्यगतं तेज इत्यादिवाक्योक्ताः प्रतर्दनसंवाद इन्द्रेण स्वस्मिन्नुक्तास्तादृशा अन्यत्रापि ज्ञेयाः । पूर्वपक्षमाहुः * तत्रेत्यादि * अत्र द्वौ पूर्वपक्षौ । तत्र भगवान्

षानां धर्माणां तत्साधकत्वं सुतरामेव । तेषां स्वकृत्यऽसाध्यत्वेनाविधेयत्वात्तत्साधनेष्वप्रवेशोऽपीति सन्देहे निर्णयमाह । यावदित्यादि । यस्मिञ्जीवे यत्कार्यसाधनार्थमधिकारो भगवता दत्तस्तत्कार्यसाधनक्षमास्तस्मिन् ये स्वधर्मा भगवता स्थापितास्त आधिकारिका इत्युच्यन्ते । तत्कार्यसम्पत्तिरेव तदधिकारप्रयोजनमिति तावदेव तेषां तस्मिन् स्थितिरित्यर्थः । एवं सति तत्सम्पत्तौ सोऽपि निवर्त्तेत इति तत्सम्बन्धिनो धर्मा अपि निवर्त्तन्त इति मुक्तिपर्यन्तं न तेषां व्यापारसम्भवो भगवता तथैव विचारितत्वा-

---

यदा स्वकार्यकर्तृत्वेन अङ्गीकरोति तदा तान् धर्मान् ददातीति वरणहेतुकत्वात्तैरपि मुक्तिरित्येकः सुतरामित्यन्तेनोक्तः । तादर्थ्येन विहितत्वाभावान्नेत्यपरः, अप्रवेशोऽपीत्यन्तेनोक्तः। एवं सत्युभयत्राऽपि युक्तिसद्भावात् सन्देह एव पर्यवस्यतीत्यतः सन्देहे निर्णयमाहेत्युक्तम् । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति ।* यस्मिन्नित्यादि * । भवत्वेवं तथाप्युक्तसन्देहस्य कथं निवृत्तिरित्यतस्तदर्थं सूत्रतात्पर्यं स्फुटीकुर्वन्ति * एवं सतीत्यादि * कार्यसम्पादनाय भगवता दत्तानां धर्माणां यावत्कार्यमवस्थाने सति कार्यसम्पत्तावधिकारोऽपि निवर्त्तेत इति तन्निवृत्तौ ते धर्मा अपि निवर्त्तन्ते । लोकवत्तुलीलेति न्यायात् । अतो निवृत्तत्वादेव न मुक्तिपर्यन्तं तेषां व्यापारसम्भवः । नच तन्निवृत्तौ न्यायमात्रमेव मानमपि तु, स्थानं पुरन्दराद् हृत्वा बलये दास्यतीश्वर इत्यादीनि वाक्यान्यपि । अतो भगवता तेषां कार्यार्थतायां एव विचारितत्वाद्वरणहेतुकत्वेऽपि न तेषां मुक्तिहेतुत्वम् । अतो भक्त्यभावे तेषां प्रकृतौ लयः । यदितोऽधिकारिणो भक्तास्तदाधिकारसमाप्त्यनन्तरं भक्तिः फलोन्मुखीभवतीति न भक्तित्वस्य मुक्तिजनकतावच्छेदकत्वहानिरिति मुक्तिस्तु भक्त्यैवेति भाव इत्यर्थः । ननु यद्याधिकारिकाणां न मुक्तिपर्यन्तो व्यापारस्तर्हि, ब्रह्मणा सह ते सर्वे इति वाक्ये अधिकारान्ते मुक्तिकथनं विरुद्धं

न्मुक्तिस्तु भवत्येवेति भावः । यच्च "ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" इति वाक्यं, तत्त्राकल्पान्तं येषामधिकारः सप्तर्षिप्रभृतीनां तद्विषयकमिति ज्ञेयम् । अन्यथा भगवद्दत्ताधिकारसामर्थ्यस्य भरतस्य स्वाधिकारसमाप्तौ मुक्तिं न वदेत् । कृतात्मान इति पदात्तेषामपि भगवति कृतान्तःकरणानामेव परस्य भगवतः परपदे व्यापिवैकुण्ठे प्रवेश उच्यते, न त्वाधिकारिकगुणैः ॥ ३२ ॥

स्यादित्यत आहुः । * यच्चेत्यादि * । तथाच तद्भक्तेस्तदानीमेव फलौन्मुख्यस्य भगवता विचारितत्वात्तदापि तथैव तन्मुक्तिर्न त्वाधिकारिकैर्गुणैरित्यर्थः । अत्र गमकमाहुः । * अन्यथेत्यादि * । तथाच यद्याधिकारिकैरेव गुणैर्मुक्तिः स्यात्तदा, 'स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिम् । उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभि'रिति तादृशोपासनया तथा मुक्तिं न वदेत् । अत एतदनुरोधेन पूर्वोक्तवाक्येऽपि साधनान्तरेणैव मुक्तिर्बोध्येत्यर्थः । तत्रापि गमकमाहुः । * कृतेत्यादि * । तथाचात्रापि तथेत्यर्थः । एतेन प्रशान्तारुणलोचनत्वं विचारितम् । प्रशान्तं ज्ञानम् । अरुणं क्रिया, रजोरूपत्वात् । तदुभयविचारात्मकं लोचनम् । तेषु तेष्वधिकारिषु ज्ञानक्रिययोः कार्यार्थे प्रदानादिति बोध्यम् ।

अन्ये त्वत्र, अपान्तरतम-वशिष्ठप्रभृतीनां पूर्णज्ञानवतां दृष्टपरतत्वानामपि व्यासमैत्रावरुणादिरूपजन्मान्तरदर्शनाद्विद्याया न मुक्तिहेतुत्वमित्याशङ्क्य तन्निरासायाधिकारस्य प्रतिबन्धकत्वात्तत्समाप्तौ पूर्वया विद्ययैव मुक्तिमाहुः ।

सिद्धान्ते तु तादृशाधिकारस्य भगवद्दत्तत्वात्तादृशाज्ञापरिपालनस्याप्रमत्तत्वेन प्रकरणं तुष्टाद्भगवत एव कृतात्मत्वं, ततो मुक्तिर्न तु तया विद्ययेति शेषः । उचितं चैतत् । मोक्षमिच्छेज्जनार्दनादिति वाक्याद् भगवतो मोक्षदातृत्वादिति । नच विद्ययेति युक्तम् । तस्याः सात्त्विकीत्वेन स्वप्नप्रबाधन्यायादाविद्ययैश्चिमर्द्दस्यापि सम्भ-

अक्षरधियां त्ववरोधः सामान्यतस्तद्भावाभावा-
भ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥

ननूक्ताऽथर्वणोपनिषद्वाक्यैर्भगवद्धर्माणां मुक्तिसाधनत्वमुच्यते। श्रुत्यन्तरेषु, तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय, ज्ञानादेव तु कैवल्यं, तरति शोकमात्मविद्, ब्रह्म वेद ब्रह्मैव भवतीत्यादिषु ज्ञानस्यैव मुक्तिसाधनत्वमुच्यते। श्रुतित्वाविशेषादुभयोस्तथात्वे कारणवैजात्ये कार्यवैजात्यस्यावश्यकत्वान्मुक्तौ च तदसम्भवाद्भक्त्या मामभिजानातीति वाक्याद्भक्तौ ज्ञानस्यापि सम्भवाज्ज्ञानेनैव मुक्तिरिति पूर्वपक्षे ज्ञानसाधनत्वनिरूपकश्रुतितात्पर्यं निरूपयन् पुरुषोत्तमप्राप्तेरेव मुक्तिपदवाच्यत्वात्तद्भजनस्यैव

त्वादिति । एवमेव ज्ञानपक्षेऽपि ज्ञेयम् । तेनात्र भक्ताधिकारिणां मुक्तिरन्यथा प्रकृतौ लयः । पुनः सृष्टौ तथैश्वर्यम् । कर्मिणां पुनरागतिरिति सर्वोऽपि विषयः सूचितो ज्ञेयः ॥ ३२ ॥ १० ॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ पूर्वाधिकरणे प्रासङ्गिकविचारेणापि भक्तेरेव मुक्तिकारणत्वे दृढीकृते तदर्थं भगवद्भक्तिरेवावश्यं कार्येति सिद्ध्यति । तथा सति श्रुत्यन्तरे अक्षरज्ञानस्यापि मुक्तिकारणत्वश्रावणे तस्य का गतिरित्याकाङ्क्षायां तत्प्रकारं विचारयितुमधिकरणमारभत इत्याशयेन विषयसंशयौ पूर्वपक्षकुक्षावेव निक्षिप्य सूत्रमवतारयन्ति ।

* नन्वित्यादि * । * भगवद्धर्माणामिति * । भगवद्विषयाणां श्रावणादीनाम्। अत्र उच्यते इत्यन्तेन विषयसंशयतद्बीजान्युक्तानि । श्रुतित्वेत्यादिना पूर्वः पक्ष उच्यते । तथाचैवं वैजात्यस्यावश्यकत्वाद्, भूयश्चान्ते विश्वमायानिवृत्तिरिति श्वेताश्वतरश्रुत्या मुक्तेः सर्वमायानिवृत्त्यात्मकत्वेन तस्यां वैजात्याऽसम्भवाज्ज्ञानकारणत्वबोधकश्रुतेः सावधारणत्वेन भक्तिकारणत्वबोधिकायां च तदभावेन भक्त्या मामभीति गीतावाक्याद्भक्तौ ज्ञानस्य सम्भवाद् गतेरर्थवत्त्वमित्यतीताधिकरणे मर्यादामार्गे ज्ञानस्य मुक्तिसाधनताप्रतिपादना-

तत्प्रापकत्वमिति हृदि कृत्वाऽऽह । अक्षरधियामित्यादि । तुशब्दः पूर्वपक्षनिरासे । वाजसनेयके श्रूयते । एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमित्यादि । तथाथर्वणे च, अथ परा यया तदक्षरमधिगम्यत इति तेन ज्ञानमार्गेऽक्षरविषयकाण्येव ज्ञानानि निरूप्यन्ते, पुरुषोत्तमविषयकाणि नेति निश्चीयते । ब्रह्मविदाप्नोति परमिति श्रुतावक्षरब्रह्मविदोऽक्षरात् परस्य प्राप्तिरुच्यते । अक्षरादपि चोत्तम इति भगवद्वाक्याच्चाक्षरातीतः पुरुषोत्तमः । भक्त्या मामभिजानातीति वाक्ये मामिति पदात् पुरुषोत्तमविषयकं ज्ञानमुच्यते, न त्वक्षरविषयकम् । किञ्च । ब्रह्मभूतस्य भक्तिलाभोक्तेस्त-

---

स्य भक्तेः परम्परया कारणतामादाय भक्तिकारणतावाक्यानां समर्थनीयतया ज्ञानेनैव मुक्तिरिति पूर्वपक्षे ज्ञानसाधनत्वनिरूपकश्रुतितात्पर्यं निरूपयन्नुक्तं हृदि कृत्वा अक्षरज्ञानस्य तां प्रति स्वरूपयोग्यतासम्पादकत्वेन कारणत्वमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * तुशब्दः पूर्वेत्यादि * । * पूर्वपक्षनिरास इति * । पूर्वोक्तरीत्या सावधारणवाक्यसिद्धत्वाज्ज्ञानेनैव मुक्तिरिति पूर्वपक्षनिरासे । तं ज्ञानकरणत्वनिरूपकश्रुतितात्पर्यनिरूपणमुखेनोपपादयन्ति । *वाजेत्यादि * । अयमर्थः । अस्थूलादिवाक्यस्योपसंहारे य एतद्विदित्वा प्रैति स ब्राह्मण इत्यक्षरवेत्तुर्ब्रह्मज्ञत्वमुक्तम् । अथ परेति वाक्ये च परविद्याया अक्षरज्ञानजनकत्वमेवोक्तम् । तेन ज्ञानरूपे मार्गे इष्टप्राप्त्युपाये अस्थूलत्वाद्दृश्यत्वादिगुणकं यदक्षरं तद्विषयकाण्येव ज्ञानानीष्टप्रापकतया निरूप्यन्ते, न तु पुरुषोत्तमविषयकाणीति ज्ञानविषयविशेषणबलान्निश्चीयते । तत्फलविचारे च ब्रह्मविदाप्नोति परमिति श्रुतावक्षरब्रह्मविदोऽक्षरात् परस्य प्राप्तिः फलत्वेनोच्यते । नचाक्षरमेव पुरुषोत्तम इति वाच्यम् । परपदप्रयोगवैयर्थ्यापत्तेः । दिव्यो ह्यमूर्त इति मन्त्रे, अक्षरात् परतः पर इत्येतस्यापि विरोधापत्तेः । नच तत्राक्षरपदेन प्रकृतिर्वा, जीवात्मा वा ग्राह्य इति युक्तम् । प्रकृताविरोधात् । जगत्कारणभूतस्य चेतनस्यैव तत्राक्षरत्वेन

स्य चानन्दांशाविर्भावात्मकत्वात्तस्य चाविद्यानाशजन्यत्वात्तस्य चाक्षरज्ञानजन्यत्वात् पूर्वकक्षाविश्रान्तमेवाक्षरज्ञानम्। एवं सत्यक्षरविषयिणीनां धियां श्रुतौ मुक्तिसाधनेषु योऽवरोधः प्रवेशनं गणनेति यावत् स सामान्यतद्भावाभ्यां हेतुभ्यां पुरुषोत्तमसम्बन्धिसम्बन्धे मुक्तिरिति सामान्यम्। मर्यादामार्गेऽङ्गीकृतानां 'ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं ल-

---

प्रकृतत्वात्। अतस्तत्र, अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्, यं प्राप्य न निवर्त्तन्ते तद्धाम परमं ममेति, कूटस्थोऽक्षर उच्यत इति गीतास्मृत्युपबृंहित एव ग्राह्यः। तस्माच्चाक्षरात् परः पुरुषोत्तम एवेति गीतास्थादक्षरादपि चोत्तम इति भगवद्वाक्यतोऽक्षरातीततया निश्चितोऽतस्तत्प्राप्तिरेव फलत्वेन निश्चीयते। तत्कारणविचारे तु श्रुतौ ब्रह्मविदित्यनेन तद्विवरणर्चि ब्रह्म यो वेदेत्यनेन च ज्ञानं प्राप्तृविशेषणत्वेनोच्यत इति स्वरूपयोग्यतासम्पादकमेवाक्षरविषयकं ज्ञानम्। भक्त्या मामभीति गीतावाक्ये तृतीयया भक्तेः करणत्वं, मामिति पदात् तद्व्यापारभूतं पुरुषोत्तमज्ञानं चोच्यते, न त्वक्षराविषयकम्। किञ्च। यद्यधिगम्यत इत्यस्य प्राप्त्यर्थकत्वमङ्गीक्रियते तदा तेनाक्षरप्राप्तिर्भवति, स य एव ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्यन्तरेणोच्यते। तदापि, भक्त्या मामित्यस्मात् पूर्वं यद् 'ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते परामि'ति वाक्यं तस्मिन् ब्रह्मभूतस्य भक्तिलाभोक्तेर्ब्रह्मभावस्य च स्वरूपलाभरूपत्वेनानन्दाविर्भावात्मकत्वादानन्दाविर्भावस्य चाविद्यानाशजन्यत्वादविद्यानाशस्य चाक्षरज्ञानजन्यत्वात् परप्राप्तिपूर्वकक्षारूपो यो ब्रह्मभावस्तद्विश्रान्तमेवाक्षरज्ञानम्। तेनाक्षरप्राप्तेर्मुक्तित्वं यदुच्यते तदक्षरस्य परमधामत्वेन पुरुषोत्तमाविनाभावादुच्यते। तेनावधारणमपि जीवस्य पुनरावृत्त्यभावेन मृत्युव्यतिक्रमेण कैवल्याक्षरप्राप्तेर्ब्रह्मभावात्मकत्वेन चोपपद्यमानं न विरुध्यत इति ज्ञानकारणत्वनिरूपकश्रुतिभिरुच्यत इत्यर्थः। तेन सिद्धमाहुः। * एवमित्यादि *। एवं तदविरोधे सति अक्षरविषयि-

भते परामि'ति वाक्याद् ब्रह्मभावानन्तरमेव भगवद्भावसम्भवात्तेन पुरुषोत्तमे प्रवेशात्तत्र परम्परोपयोगो ब्रह्मभावस्येत्युभाभ्यां हेतुभ्यां तथेत्यर्थः । वस्तुतस्तु पुरुषोत्तमप्राप्तिरेव मुक्तिरिति भावः । नन्वक्षरस्याविशिष्टत्वेन तदुपासकानामपि तथात्वात् केषाञ्चित् तत्रैव लयः । केषाञ्चिद्भक्तिलाभ इति कथमुपपद्यत इत्याशङ्क्य तत्र हेतुं दृष्टान्तेनाह । औपसदवादिति । उपसदाख्ये कर्मणि तानूनप्त्रस्पर्शाख्यमौपसदं कर्मास्ति । तत्रातिथ्यायां ध्रौवात् स्रुचि चमसे वा यदाज्यं चतुरवत्तं वा समवद्यति तत्तानूनप्त्रमित्युच्यते ।

———

णीनां धियां तैत्तिरीयादिश्रुतौ योऽवरोधो मुक्तिसाधनेषु गणना स सामान्यतद्भावाभ्यां हेतुभ्याम् ।

तत्र किं सामान्यमित्यपेक्षायां पुरुषोत्तमसम्बन्धिसम्बन्धे मुक्तिरिति भक्तसङ्गे सिद्धम् । 'सत्सङ्गलब्धया भक्त्या मयि मां य उपासिता । स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम्' इत्येकादशस्कन्धे । स च पुरुषोत्तमसम्बन्धिसम्बन्धस्तद्धामरूपाक्षरज्ञानेऽप्यस्तीति तदेव सामान्यम् । तथा * मर्यादामार्ग इत्याद्युक्तरीत्या तद्भावो ब्रह्मभावस्ताभ्यां हेतुभ्याम् । अक्षरज्ञानां मुक्तिसाधनेषु प्रवेशः । मर्यादामार्गीयाणां पुरुषोत्तमप्राप्तौ स्वरूपयोग्यतासम्पादकत्वेन प्रवेश इत्यर्थः । अत्र सामान्यादित्युक्तकरणताऽपि सम्भाव्येतेति तद्वारणाय द्वितीयो हेतुरिति बोध्यम् । अक्षरज्ञानस्य मुक्तिसाधनतावच्छेदकं यद्रूपं तज्ज्ञापनाय प्रथमः । यदि ह्यक्षरप्राप्तेः परममुक्तित्वं स्यात् तदाऽऽथर्वणिकायाम् अक्षरविद्यायां पुरुषस्याऽक्षरात् परत्वं न श्राव्येत । तत्तु श्राव्यते, अतोऽक्षरज्ञानानाम् अक्षरप्रापकत्वेन वा न परममुक्तिकारणता, किन्तूक्तरीत्या भगवद्धामताज्ञापकत्वेनेत्याशयेनाहुः । * वस्तुत इत्यादि * दृष्टान्तमवतारयन्ति । * नन्वक्षरस्येत्यादि * । * तत्रैव लय इति * ब्रह्मैव भवतीत्यवधारणादक्षर एव लयः । * भक्तिलाभ इति * ब्रह्मविदाप्नोति परमिति श्रुत्युक्तपरप्राप्तिसाधनीभूतभक्तिलाभः । * हेतुमिति * भगवदिच्छारूपम् । व्या-

अनाधृष्टमसीति मन्त्रेण षोडशाप्यृत्विजो यजमानेन सह तानूनप्त्रं समवमृशन्त्यनु मे दीक्षामिति मन्त्रेण यजमानस्ततसमवमृशन् यम् ऋत्विजं कामयेताऽयं यज्ञं यशसमृच्छेदिति तं प्रथममवमर्शयेदिति श्रूयते श्रुतौ कल्पे च । अत्र सर्वेषामृत्विजां तानूनप्त्रत्वाविशेषेऽपि यस्मिन् स्नेहातिशयेन यथेच्छा तत्रैव तथा कृतिर्नेतरेषु । न हि तत्राविशिष्टेषु कथमेवं कृतिरिति पर्यनुयोगः सम्भवत्येवमिहापीत्यर्थः । ननु श्रवणादेर्यथा पुरुषोत्तमसम्बन्धित्वेन तत्प्राप्तिहेतुत्वमेवमक्षरस्याप्यस्त्वित्याशङ्का तु निखिलासुरजीवतमःपुञ्जनिरासकेन यदुवंशोदयाचलचूडामणिनैव निरस्तेति न स्वतो वक्तुमुचितेत्याशयेन आह । तदुक्तमिति । भगवद्गीतास्विति शेषः । तत्र, यदक्षरं वेदविदो वदन्तीत्युपक्रम्य, स याति परमां गतिमित्यन्तेनाक्षरप्राप्त्युपायमुक्त्वाऽनन्यचेताः सतत मित्यादिना स्वप्राप्त्युपायं वैलक्षण्यं चोक्त्वा भक्त्येकलभ्यत्वं स्वस्य वक्तुं पूर्वं क्षराक्षरयोः स्वरूपमाह । सहस्रयुगपर्यन्तमित्युपक्रम्य प्रभवत्यहरागम इत्यन्तेन क्षरस्वरूपमुक्त्वा, परस्तस्मात्तु भावोऽन्य इत्युपक्रम्य, तद्धाम परमं ममेत्यन्तेनाक्षरस्वरूपमुक्तम् । अत्र पूर्वं क्षरस्वरूपमुक्तमिति परस्तस्मात्त्वित्यत्र क्षरादेव परत्वमुच्यते। तच्छब्दस्य पूर्वपरामर्शित्वात्तस्यैव पूर्वमुक्तत्वादत

ख्यानं तूत्तानार्थम् । तथाच भगवदिच्छयैव विशेष इत्यर्थः । सूत्रोक्तां सम्मतिं व्याकर्त्तुमवतारयन्ति । * ननु श्रवणादेरित्यादि * व्याकुर्वन्ति । * तत्रेत्यादि * । * तत्रेति * गीताया अष्टमाध्याये । * वैलक्षण्यमिति * साधनसौकर्यं स्वप्राप्तिरूपस्य फलस्योत्कर्षं च । * स्वस्य वक्तुमिति * अत्राक्षरस्वरूपकथने अक्षरस्य परमगतित्वं स्वधामत्वं चोक्त्वा, पुरुषः स परः पार्थेत्यादिना परस्य यद्भक्त्येकलभ्यत्वं वक्ष्यति तदक्षरादुत्तमत्वेन वाक्यान्तरे सिद्धे स्वस्मिन्नेव परत्वविश्रान्तेः स्वस्यैव वक्ष्यति बाधकाभावे स इति तच्छब्देन संनिहितपरामर्शोच्च स्वस्य वक्तुम् । * अत्रेति * सहस्रयुगेत्यादिग्र-

एत्राक्षरव्यावर्त्तकस्तुशब्द उक्तः । एतेन निसत्वेन क्षरणाभावाद् अक्षरशब्देन जीव एवोच्यते, न तु पुरुषोत्तमाधिष्ठानभूतो जीवाऽतीत इति निरस्तम् । यंप्राप्य न निवर्त्तन्त इति वाक्याज्जीवे तथात्वासम्भवात् । नित्यमुक्तत्वापत्त्या शास्त्रवैफल्यापत्तेश्च । इत एव ज्ञानमार्गिणां तत्प्राप्तिरेव मुक्तिरिति ज्ञेयम् । ततोऽनिवृत्तेः, पुरुषः स परः पार्थेत्यनेनाक्षरात् परस्य स्वस्य भक्त्यैकलभ्यत्वमुक्तम् । तेन ज्ञानमार्गीयाणां न पुरुषोत्तमप्राप्तिरिति सिद्धम् । यस्यान्तःस्थानीत्यनेन परस्य लक्षणमुक्तम् । तच्च मत्स्यादिप्रसङ्गे श्रीगोकुलेश्वरे स्पष्टमुच्यते । तेनाक्षरोपासकानां न पुरुषोत्तमोपासकत्वम् । तद्विषयकश्रवणादेरभावादिति भावः । अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिमिति वाक्यात् स याति परमां गतिमित्यत्राक्षरमेव यातीत्यर्थो ज्ञेयः । किञ्च । तैत्तिरीयोपनिषत्सु पठ्यते ।

न्थे । अत्र मतान्तरमुद्भाव्य परिहरन्ति । * एतेनेत्यादि * । * एतेनेति * क्षरः सर्वाणि भूतानीति वाक्यन्तरसिद्धं भूतग्रामं व्यक्तकोटौ निवेश्य ततः परत्वकथनेन । हेत्वन्तरमाहुः । * यमित्यादि * तथाच भूतग्रामपदेन जडान् गृहीत्वा अक्षरपदेन जीवग्रहणे एतौ दोषौ प्रसज्जेयातामतस्तन्मतमयुक्तमित्यर्थः । अस्मादेव सन्दर्भादर्थचतुष्टयं यदन्यत् सिद्धं तदाहुः । * इत एवेत्यादि * * ज्ञेय इत्यन्तम् * । * इत एवेति * अक्षरस्य भगवद्धामत्वादेव । * इत्यर्थो ज्ञेय इति * ऐकशब्द्याज्ज्ञेयः । तथाचाक्षरस्य पुरुषोत्तमसम्बन्धित्वे सत्यपि पुरुषोत्तमप्राप्तिं प्रति न हेतुत्वम् । तद्धेतुतावच्छेदकस्यानन्यभक्तित्वस्य तत्राभावादित्येवमेतेन सन्दर्भेण सा शङ्का निवारितेत्यतो न कार्येत्यर्थः । ननु श्रुतावक्षरात् परत्वमेव पुरुषस्योक्तं, न तु तत्र स्थितत्वम् । तथोक्तौ परस्य स्वप्रतिष्ठत्वं च हीयेतेति गीतास्मृतिवाक्यमन्यथा नेतव्यमित्याशङ्क्याहुः । * किञ्चेत्यादि * । अस्यां श्रुतौ सर्वाधारत्वं सर्वदेवनिषद्नस्थानत्वं सर्वात्म-

यस्मिन्निदं सञ्च विचैति सर्वं यस्मिन् देवा अधि विश्वे निषेदुः । तदेवभूतं तदुभव्यमा इदं तदक्षरे परमे व्योमन् । येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च । यमन्तःसमुद्रे कवयो वयन्ति यदक्षरे परमे प्रजा इति । अत्राक्षरात्मकत्वेन क्षरात्मकादाकाशात् परमे व्योम्नि भक्तानां हृदयाकाश इति यावत् । तत्र प्रकाशमानमित्यर्थात् । अत एव ब्रह्मविदाप्नोति परमित्युपक्रम्य, सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्नित्येतदुपनिषत्स्वेव पठ्यते । यदक्षरे परमे प्रजा इति पदमवयन्तीत्यनेन सम्बध्यते । अत्र प्रजापदाद् व्यापिवैकुण्ठात्मको लोकोऽक्षरपदेनोच्यते इत्यवगम्यते । अत एव, न यत्र मायेत्यादिना श्रीभागवते तत्स्वरूपमुच्यते । एतेनाक्षरस्य पुरुषोत्तमाधिष्ठानत्वं निश्चीयते । इतोऽप्यक्षरातीतः पुरुषोत्तम इत्यवगम्यते । एवं सति

कत्वं च पादत्रयेणोच्यते । तुरीये तदाधार उच्यते, तस्यार्थमाहुः * अत्रेत्यादि * । भक्तहृदयाकाशमेवात्र परमव्योमपदे परामृश्यत इत्यत्र मानमाहुः * । अत एवेत्यादि * । ननु भवतु भक्तहृदयाकाशे प्रकाशमानत्वमक्षरस्य, तथापि कथं लोकात्मकत्वमत आहुः । * य इत्यादि * । तथाच प्रजालिङ्गादक्षरस्य लोकात्मकत्वमित्यर्थः । एतमर्थं पुराणेनोपबृंहयन्ति । * अत एवेत्यादि * । * इतोऽपीति * शुकवाक्यादपि । तथाच श्रुतौ पुराणे च तथा सिद्धत्वाद् गीतावाक्यं नान्यथा नेतुं शक्यमित्यर्थः । स्वप्रतिष्ठताहानिं परिहरन्ति । * एवं सतीत्यादि * । तथाच छान्दोग्ये स्वे महिम्नि प्रतिष्ठित इति श्रावणात्, तैत्तिरीये, ब्रह्मपुच्छं प्रतिष्ठेति श्रावणाच्चाक्षरब्रह्मणो भगवद्विभूतिरूपत्वेन चरणरूपतया स्वाभिन्नत्वेन च भक्तिसामान्याद्भगवतस्तत्र स्थितावपि न स्वप्रतिष्ठत्वहानिरित्यर्थः । एवमत्र मुक्तिस्वरूपमस्थूलत्वादयो धर्माश्च सफला विचारिताः । एतान् धर्मांश्चरणीयत्वेन बोधयन्तीत्यादिर्बोधकताप्रकारश्च । तेन भगव-

सामान्यं भगवद्विभूतिरूपत्वं तद्भावस्तस्य पुरुषोत्तमस्य भावः सत्ता उत्करीसा तत्र स्थितिरिति यावत्, ताभ्यां हेतुभ्यां तथेत्यर्थो ज्ञेयः ॥ ३३ ॥

त्प्राप्तिप्रेप्सुना भक्तिरेव कार्या, न तु पूर्वकक्षायामेव विश्रान्तव्यम् । द्वितीयस्कन्धे, भगवान् ब्रह्मकार्त्स्न्येनेत्यत्र भगवता भक्तावेव श्रुतितात्पर्यस्य निर्द्धारितत्वात् । गीतायां द्वादशाध्यायेऽपि, मय्यावेश्य मनो ये मामित्यादिना स्वोपासनयैव शीघ्रसुखेन स्वप्राप्तिबोधनात् । अक्षरोपासनेन दुःखतः स्वप्राप्तेरुक्तत्वाच्च भक्तिरेवावश्यकीति सिद्धम् । अत्राक्षरस्य गणितानन्दत्वाद्, ब्रह्मविदाप्नोति परमित्यत्र पुरुषोत्तमज्ञानस्य भक्त्या मामभिजानातीति गीतावाक्ये तद्धरीरोपसदवदिति दृष्टान्त इच्छाया एव प्राधान्यबोधनेन परम्परया कर्मणोऽपि क्वचित् प्रापकत्वसूचनात् क्रियया, भक्त्या, ज्ञानेन च सायुज्यप्राप्तिबोधकं दोर्भिश्चतुर्भिर्विदितमिति विशेषणं च प्रतिपादितं ज्ञेयम् ॥

अत्र भट्टभास्करशाङ्करारामानुजभाष्येषु पूर्वोक्तवाजसनेयकाथर्वणोक्तवाक्यद्वयमेव विषयवाक्यत्वेनोपन्यस्य किमासां विशेषप्रतिषेधबुद्धीनां सर्वत्र प्राप्तिरुत व्यवस्थेति संशये प्रकरणावरोधाच्छ्रुतिविभागाद् विद्यान्तररूपस्य विद्यान्तररूपत्वे प्रमाणाभावान्निषेधरूपाणां गुणानामानन्दादिवत् स्वरूपावगमोपायत्वाभावाच्चेति हेतुभिर्नान्यत्र प्राप्तिरिति पूर्वः पक्षः । सिद्धान्तस्तु प्रपञ्चपर्युदासस्य विशेषनिराकरणरूपस्य ब्रह्मबोधनप्रकारस्य सामान्यात् तस्य प्रतिपाद्यस्य ब्रह्मणः सर्वत्र भावादैक्यात् सर्वत्रावरोधस्तासां निषेधबुद्धीनां परिग्रहः । तेनानन्दादयः प्रधानस्येत्यत्र विधिमुखो विचार, इह तु निषेधमुख इति तस्यैवायं प्रपञ्च इति भास्करं शाङ्करं च मतम् ।

रामानुजभाष्ये तु सर्वेषूपासनेषु ब्रह्मणः समानत्वाद् अस्थूलत्वादीनां तत्प्रतीतौ भावादन्तर्भावात् । अयमर्थः । केवलानन्दादेः प्रत्यगात्मनि विद्यमानत्वेन तेषामसाधारणाकारेण ब्रह्मोपस्थापकत्वाभावादसाधारणाकारनिश्चयार्थं हेयप्रत्यनीकताज्ञानस्यावश्यक-

त्वेन चिदचिदात्मकप्रपञ्चवैलक्षण्यबोधनमावश्यकम् । तत्रास्थूलत्वादिना अचिद्वैलक्षण्यं, प्रशासनेन चिद्वैलक्षण्यं च वाजसनेयके उच्यते । एवमाथर्वणेऽप्यदृश्यत्वादिकथनान्निरङ्कुशकर्तृत्वसर्वज्ञत्वादिना ज्ञेयम् । तथाचास्थूलत्वादिविशेषितज्ञानानन्दाद्याकारस्य ब्रह्मणोऽनुसन्धेयत्वादस्थूलत्वादीनामानन्दादिवदस्ति ब्रह्मप्रतीतावन्तर्भाव इति तासामस्थूलत्वादिबुद्धीनां सर्वत्रावरोध इति सिद्धान्तः । तेनेदमधिकरणं तत्सहकारित्वादत्यन्तावश्यकमिति तन्मतापेक्षयेदं मतं युक्तम् । ननु तर्हि पूर्वपक्षोक्तहेतूनां का गतिरित्याकाङ्क्षायां गुणानां प्रधानानुवर्त्तित्वे दृष्टान्तमत्र प्रमाणं चाहोपसद्वत्तदुक्तमिति । यथा चतूरात्रे जामदग्न्याहीने पुरोडाशिनीषूपसत्सूपसद्गुणभूतः सामवेदं पठतोऽप्यग्निर्वै होत्रं वेत्वित्यादिकः पुरोडाशप्रदानमन्त्रो विनियोगविधेर्याजुषत्वेन यजुर्वेदिनाध्वर्युणा याजुर्वेदिकेनोपांशुस्वरेण पठ्यते, न तूद्गात्रा सामगेन सामस्वरेणोच्चैस्त्वेन तद्वत् । तदुक्तं पूर्वकाण्डे शेषलक्षणे, गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इति । अर्थस्तु, गुणमुख्ययोर्व्यतिक्रमे विरोधे सति तदर्थत्वाद् गुणस्योत्पत्तिविधेः प्रधानार्थत्वान्मुख्येन याजुर्वेदिकेन विनियोगविधिना वेदसंयोगो ग्राह्य इति । एतद्दृष्टान्तव्याख्यानं पूर्वोक्तभाष्यत्रयेऽपि समानम् ।

शाबरभाष्ये त्वत्रान्यदुदाहृतम् । तथाहि । अस्त्याधानं यजुर्वेदविहितम् । य एवं विद्वानग्निमाधत्त इति । तदङ्गत्वेन यजुर्वेद एव गानं च विहितम् । य एवं विद्वान् वारवन्तीयं गायतीयंज्ञायज्ञीयं गायति वामदेव्यं गायतीति । एतानि च सामानि सामवेदे उत्पन्नानि । अतः केन स्वरेण पठनीयमिति सन्देहे उत्पत्तिविधेर्विनियोगविध्यधीनतया यजुर्वेदस्वरो ग्राह्य इति ॥

एवञ्चात्र विचार्यमाणे पूर्वोक्तं मतद्वयं न रुचिरम् । अक्षरधियामित्यत्राक्षरस्य धीरिति षष्ठीसमासे अक्षरस्य विशेषनिषेधसम्बन्धितया निवेशेन गौरवात् प्रशासनादेरसंग्रहात् पूर्वोक्तानावश्यकत्वदोषापत्तेश्च । तृतीये त्वक्षरस्याक्षरत्वेन निवेशादुक्तदोषत्रयाभावात्तन्मतमुत्तमम् । तथाऽप्याथर्वणोदितस्य परस्मादपरत्वस्य तैत्तिरीयोक्तस्य लोकरूपत्वस्य या धीस्तदसंग्रहान्न पूर्णमित्यवधेयम् ॥ ३३ ॥

इयदामननात् ॥ ३४ ॥

ननु संसारनिवृत्त्यानन्दाविर्भावयोरविशेषादक्षरे ब्रह्मणि लये पुरुषोत्तमे प्रवेशान्न्यूनतोक्तौ को हेतुरित्याकाङ्क्षायामाह । इयदिति । परिमाणवचनम् । तस्य श्रुतौ कथनादित्यर्थः । अत्रेदं ज्ञेयम् । तैत्तिरीयोपनिषत्सु, सैषाऽऽनन्दस्य मीमांसा भवतीत्युपक्रम्य मानुषमानन्दमेकं गणयित्वा तस्मादुत्तरोत्तरं शतगुणमानन्दं गन्धर्वानारभ्य प्रजापतिपर्यन्तस्योक्त्वोच्यते । ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द इति । एवं सति इयत एतावदित्यक्षरानन्दस्य सावधिकत्वेन श्रुतौ कथनादानन्दमयत्वेन निरवध्यानन्दात्मकत्वस्य पुरुषोत्तमे कथनात्तथोक्तिरिति ॥ ३४ ॥

इयदामननात् ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । व्याकुर्वन्तः परिमाणवचनं व्युत्पादयन्ति । * अत्रेत्यादि * । * आनन्दमयत्वेनेत्यादि * । पूर्वानुवाकसमाप्तावानन्दमये जीवस्योपसंक्रमणमुक्त्वा अग्रिमारम्भे, तदप्येष श्लोको भवतीति तच्छब्देनानन्दमेव लक्ष्यीकृत्य, यतो वाचो निवर्त्तन्त इति श्लोकेन वाङ्मनसागोचरत्वस्य ब्रह्मानन्दे कथनेन पुरुषोत्तमे तथा कथनादक्षरे सावधिकत्वोक्तिरित्यर्थः । ननु, यतो वाच इति श्लोकः कदाचनेति पाठभेदेन मनोमयेऽपि पठ्यते । ब्रह्मोपनिषदि च आनन्दमेतज्जीवस्य यज्ज्ञात्वा मुच्यते बुध इति श्लोकोत्तरार्द्धे पठ्यते । अतः कथमेतेन पुरुषोत्तमानन्दस्य तथात्वसिद्धिरितिचेत् । उच्यते । मनोमयस्य वेदात्मकताया यजुःशिरस्त्वादिना बोधितत्वाद्वेदस्य च शब्दब्रह्मात्मकत्वात्, सर्वे वेदा इति श्रुतेर्ब्रह्मबोधकत्वान्मनोमयश्लोके ब्रह्मण इति पञ्चम्या शब्दब्रह्मणो वेदान्मनोमयादवाङ्मनसगोचरमानन्दं विद्वान् कदाचन न बिभेतीति पुरुषोत्तमानन्दज्ञानसाधनतया मनोमयस्योक्ततया ब्रह्मोपनिषदि च, यज्ज्ञात्वा मुच्यते बुध इति तुरीयपादे कथनेन जीवाभिन्नमानन्दमेतदित्यर्थायोगात् । यस्मिन् पर-

अन्तरा भूतग्रामवत् स्वात्मनः ॥ ३५ ॥

अथ ज्ञानमार्गे यथा स्वात्मत्वेन ब्रह्मणो ज्ञानं तथा भक्तिमार्गेऽपि भक्त्या पुरुषोत्तमज्ञाने स्वात्मत्वेन पुरुषोत्तमज्ञानं भवति ?

मात्मनि जीवात्मा संधेयत्वेन पूर्वमन्त्रे उक्त एतत्परमात्मस्वरूपम् आनन्दम् आनन्दोऽस्यास्तीत्यानन्दं जीवस्य सन्धेयत्वेन सम्बन्धि यज्ज्ञात्वा बुधः सन् मुच्यत इत्यर्थकतया तस्य भगवदीयत्वेन तथात्वसिद्धिरिति जानीहि । अतो न चोद्यावकाश इति दिक् ॥

अन्ये तु इदमेकसूत्रमधिकरणान्तरमङ्गीकृत्य, द्वासुपर्णेति मन्त्रो मुण्डके श्वेताश्वतरे च ब्रह्मप्रकरणे पठ्यते । काठके तु, ऋतं पिबन्ताविति । तयोराद्ये भोक्त्रभोक्त्रोर्वेद्यता । द्वितीये तु भोक्त्रोरेवेति वेद्यभेदाद्विद्याभेदे प्राप्ते । विद्यैक्यं युक्तम् । इयत एतावन्मात्रस्य द्वित्वपरिच्छिन्नस्योभयत्रामननात् । पिबन्तावित्यस्य प्रयोगस्य छत्रिन्यायेन पिबदपिबत्समुदायेऽपि सम्भवात् । उपक्रमोपसंहाराभ्यामेतयोर्वाक्ययोः परविद्यात्वनिश्चयेन उभयत्रापि जीवसहितस्य ब्रह्मण एव प्रतिपाद्यत्वादित्याहुः । तन्मतेऽधिकरणवैयर्थ्यमेव । काठकवाक्यस्य जीवद्वयपरत्वं निवार्य, जीवसहितब्रह्मपरत्वस्य, गुहां प्रविष्टावित्यधिकरण एव प्रतिपादितत्वात्तदपेक्षयाऽऽधिक्यस्याऽऽत्रादर्शनाच्चेति ।

रामानुजाचार्यास्तु, इयद् अस्थूलत्वादिति विशेषितमानन्दादिकमेव गुणजातं सर्वत्रानुसन्धेयत्वेन प्राप्तम् । कुतः ? । आमननात् । आभिमुख्येन मननं चिन्तनमामननं तस्माद्धेतोरित्येवमर्थमाहुः । तत्राप्युदासीना वयम् ॥ ३४ ॥ ११ ॥

अन्तरा भूतग्रामवत् स्वात्मनः ॥ अधिकरणमवतारयन्ति । * अथेत्यादि * । यथा ज्ञानमार्गेऽक्षरधियः स्तूयन्ते तथाऽभेदोपासनापीति भक्तिमार्गेऽक्षरधीविनियोगविचारोत्तरमभेदधीस्मरणाज्ज्ञानमार्गे पूर्णज्ञानसंपत्तौ, यथा स्वात्मब्रह्माभेदानुभवात्मिका वृत्तिर्भवति तथा भक्तिमार्गे सिद्धायां भक्तौ, भक्त्या मामभिजानातीति वाक्यावेदिते ज्ञाने स्वात्मपुरुषोत्तमाभेदानुभवात्मिका वृत्तिर्भव-

न वेति विचार्यते। सर्वान्तरत्वेन श्रुतौ कथनात्तद्भवतीति पूर्वः पक्षः। तथात्वेऽपि सर्वस्य वशी, सर्वस्येशान इत्यादिश्रुतिभिरेवमेव ज्ञानं, न तु तथेति सिद्धान्तः । अत्र तथा ज्ञानाभावस्यावश्यकत्वार्थं विपरीते बाधकमाह । पूर्वस्मिन् सूत्रे ब्रह्मानन्दाद्भजनानन्दस्याधिक्यं निरूपितम् । स तु भगवद्दत्तस्तद्व्यवधायकोऽर्थश्च प्रभुणा न

ति, न वेति संशये विचार्यत इत्यर्थः। पूर्वपक्षमाहुः * सर्वान्तरत्वेनेत्यादि * । बृहदारण्यके कहोडप्रश्ने उषस्तप्रश्ने च यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति । तदुत्तरवाक्ये च एष त आत्मा सर्वान्तर इति याज्ञवल्क्येन सर्वान्तरत्वेन कथनात् । अन्तर्यामिब्राह्मणे च, यः पृथिव्यां तिष्ठन् यः पृथिवीमन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीत्यारभ्य, य आत्मनि तिष्ठन्नित्यन्तैर्वाक्यैः परमात्मा सर्वान्तरत्वेन श्रावितः । स च यदन्तास्तिष्ठति तं स्वान्तः स्थापयति वह्निरिवायोगोलकमित्यन्तर्यामिब्राह्मणे सिद्धम् । तथा सति श्रौतेन येन केनापि साधनेन तस्मिन्नभिज्ञायमाने स्वात्मनस्तद्व्याप्तत्वेन भेदास्फुरणात् स्वात्मत्वेन ज्ञानमदण्डवारितमतस्तद्भवतीति पूर्वः पक्ष इत्यर्थः । सिद्धान्तमाहुः । * तथात्वेऽपीत्यादि * । ब्रह्मणः सर्वान्तरतया एतदात्मनस्तद्विभक्तत्वेऽपि सर्वस्य वशीत्यादिश्रुतिभिः सर्वेशितृत्वादिरूपेणैव ज्ञानम् । उत्कटया भक्त्या तेषामेव स्फुरणाद्, न तु स्वात्मत्वप्रकारकमित्येष सिद्धान्त इत्यर्थः । नन्वभिज्ञाने सर्वांशज्ञानदर्शनात्तदंशाज्ञाने को हेतुरित्याकाङ्क्षायां हेतुं गृह्णन्ति । * अत्र तथेत्यादि * । * विपरीत इति * स्वात्मत्वेन ज्ञाने । एतदेव विभजन्ते । * पूर्वस्मिन्नित्यादि * । इयदामननादिति सूत्रे अक्षरस्य गणितानन्दत्वबोधनेन ब्रह्मानन्दाद्भजनानन्दस्याधिक्यं निरूपितम् । स भजनानन्दस्तु कृपाधिक्येन भगवता दत्त इति तद्व्यवधायकोऽर्थो भगवता न संपाद्यते । स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छदित्यादिश्रुतिभ्यो मुख्यभक्तिमार्गस्य क्रीडार्थत्वावगमाद्भे-

सम्पाद्यते । स्वात्मत्वेन ज्ञानं च भजनानन्दान्तरायरूपम् । यद्येतत्-सम्पादयेत्तं न दद्यादग्रेऽन्यथाभावादतः स्वात्मत्वेन ज्ञानं भक्तिमार्गीयस्य न सम्भवतीत्याशयेनाह । अन्तरा स्वात्मन इति । भगवता भक्तिमार्गे स्वीयत्वेनाङ्गीकृतो य आत्मा जीवस्तस्य यदात्मत्वेन ज्ञानं तद्भजनानन्दानुभवे अन्तरा व्यवधानरूपमिति भगवता तादृशे जीवे तन्न सम्पाद्यत इत्यर्थः । तत्सम्पादनस्य सर्वथैवासम्भावितत्वं हीनत्वं च ज्ञापयितुं दृष्टान्तमाह । भूतग्रामवदिति । उक्तभक्तस्य विग्रहोऽप्यलौकिक इति तत्र लौकिको भूतग्रामो न सम्भवति, हीनत्वात्तथेत्यर्थः । अथवा लौकिको भूतग्रामः स्त्रीपुत्रपश्वादिर्ब्रह्मानन्दानुभवे बाधकस्तथा भजनानन्दानुभवे स्वात्मत्वेन भगवज्ज्ञानमित्यर्थः ॥ ३५ ॥

दे च क्रीडाया असम्भवात् । स्वात्मत्वेन ज्ञानं हि, यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदिति श्रुतेर्भेदविलायकत्वेन भजनानन्दान्तरायरूपं यदि स्वात्मत्वेन ज्ञानं संपादयेद्भजनानन्दं न दद्यादग्र विलयेन तस्यान्यथाभावादतः स्वात्मत्वेन ज्ञानं भक्तिमार्गीयस्य पूर्णदशायां न सम्भवतीत्याशयेन स्वात्मत्वेन ज्ञाने बाधकमनेन सूत्रेणाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * भगवतेत्यादि * । अन्तरेति-मध्यवाचकमव्ययम् । तथाच व्यवधायकमित्यर्थः । नन्वस्तु तस्यान्तरायत्वं तथापि तन्न सम्पादयतीति कथमवगन्तव्यमित्यत आहुः । * तत्सम्पादनस्येत्यादि * । * अलौकिक इति * । साक्षात्सम्बन्धस्य हेय लौकिकविग्रहे असम्भवादलौकिकः । * हीनत्वात्तथेत्यर्थ इति * । तथाच चिकीर्षितलीलाप्रतिबन्धकत्वेन हीनत्वाद्भूतग्रामवदन्तरायत्वं दृष्टान्तेनावगन्तव्यमित्यर्थः । लौकिकशरीरस्य प्रतिबन्धकत्वं सन्दिग्धत्वादुपपादनसापेक्षमित्यरुच्या प्रकारान्तरेण दृष्टान्तं व्याकुर्वन्ति । * अथवेत्यादि * । यत्तदोर्नित्यसम्बन्धाद्यथेति पदमर्थादेवायातीत्यतो नोक्तः ॥ ३५ ॥

अन्यथाऽभेदानुपपत्तिरितिचेन्नोपदेशान्तरवत् ॥ ३६ ॥

ननु भक्तेष्वप्युद्धवादिषु ज्ञानोपदेशः श्रूयते । स चात्मब्रह्माऽभेदज्ञानफलक इत्यात्मत्वेन ज्ञानाभावे तदभेदोपदेशानुपपत्तिः स्यादिति तन्मन्तव्यमेव । एवं सति भक्तिमार्गाज्ज्ञानमार्गस्योत्कर्षश्च सिद्ध्यतीत्याशङ्क्य परिहरति । उपदेशान्तरवदिति । न ह्यत्राभेदज्ञानायोपदेशः, किन्तु यथाग्रिमस्वर्गापवर्गाख्यपारलौकिकानन्दफलकालौकिके कर्मण्यधिकाररूपसंस्कारार्थं गायत्र्युपदेशः क्रियते तत्संस्कारसंस्कृतं तच्छरीरादिकमपि भूतादिभिरपि नोपहतं भवति

अन्यथाऽभेदानुपपत्तिरितिचेन्नोपदेशान्तरवत् ॥ स्वात्मत्वेन भगवज्ज्ञानस्य बाधकत्वे भक्तेषु तदुपदेशो नोपपद्येतेत्याशङ्क्य परिहरतीत्याशयेन व्याकुर्वन्ति । * नन्वित्यादि * । * श्रूयत इति * । एकादशस्कन्धे उच्यते ।

आत्मत्वेन ज्ञानाभावे इत्यन्तोऽन्यथापदस्यार्थः । तदभेदोपदेशानुपपत्तिरित्यभेदानुपपत्तिरित्यस्यार्थः । इतीत्यारभ्य, परिहरतीत्यन्त, इतिचेन्नेत्यस्यार्थो व्याख्यातः । तत्रैवमभिसन्धिः । पूर्वम्, उपपन्नसूत्रे दासीदाससुहृद्भेदेन त्रिविधा लीलामध्यपातिनो भक्ता उक्तास्तत्र, नोद्धवोऽण्वपि मन्न्यून इति वाक्यादुद्धवोऽत्यन्तरङ्गः । आदिपदेन व्रजस्थास्तेपि, रामेण सार्द्धं मथुरां प्रणीत इत्यादिना विगाढभावा उक्तास्तत्रोद्धवे साक्षादुपदेशो व्रजस्थेषु सन्देशेन साक्षाच्च । तथा सतीतरेषु तदावश्यकत्वं किं वाच्यम् । किञ्च तेषु चेदुपदेशो विफलः स्यात् तदा अपार्थकार्यकर्तृत्वाज्जीवतुल्यत्वं चोपद्येतेति तस्य तेषु फलमवश्यमभ्युपेयम् । एवं सति पूर्वोक्तं सर्वमयुक्तमिति सूत्रांशेनाशङ्क्य दृष्टान्तेन परिहरतीति बोध्यः । दृष्टान्तं व्याकुर्वन्ति । * न हीत्यादि * । अत्र प्रथमार्थे वतिः । तथाच फलान्तरार्थं यथा गायत्र्युपदेशस्तथा भजनानन्दार्थमयमुपदेश इत्यर्थः । तस्यावान्तरफलं * तत्संस्कारेत्यादिनोच्यते । तत्तथा न प्रासङ्गमतः प्रकारान्तर-

यथा वा योगोपदेशसंस्कृतस्य वपुरग्न्यादिभिर्नोपहन्यते तथा प्रकृते भक्तिभावस्य रसात्मकत्वेन संयोगविप्रयोगभावात्मकत्वाद् द्वितीयस्य मलयानलादतिकरालत्वेन कदाचित्तद्भावोदये तेन भक्तवपुरादेस्तिरोधानेऽग्रिमभजनानन्दानुभवप्रतिबन्धः स्यादिति तन्निवृत्त्यर्थं ज्ञानोपदेशसंस्कारसंस्कृतं तद्वपुरादिकं भगवता क्रियते, न त्वात्माभेदज्ञानं भगवतोऽभिप्रेतमित्यर्थः।अन्यथोपदेशानन्तरं बदरीं गच्छन् विदुरं प्रति, इहागतोऽहं विरहातुरात्मेति न वदेत्।एवमेवान्येष्वपि भक्तेषु ज्ञेयम्। अत्रोपदेशान्तरपदं प्रस्तुतोपदेशभिन्नमुपदेशान्तरमाहेति प्रस्तुतस्य तस्यान्यस्याभावादभेदपदेनाभेदोपदेश एवोच्यते। एतेन भगवान् स्वीयानां भक्तिभावप्रतिबन्धनिरासायैव

माहुः। * यथा वेत्यादि * । एतच्चोक्तमेकादशे । अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुरिति । * अभिप्रेतमिति * मुख्यत्वेन अभिप्रेतम् । तथाचोक्तरीत्या उपदेशस्य फलान्तरसत्त्वेनात्मनि तदभेदज्ञानस्य साफल्ये सति न भगवतो जीवतुल्यत्वापत्तिर्नापि ज्ञानमार्गोत्कर्ष इत्यर्थः। नन्वत्रोक्तरीत्या भजनानन्दप्रतिबन्धाभाव एवोपदेशफलं, न ब्रह्माभेदानुभव इत्यत्र किं गमकमित्याकाङ्क्षायामाहुः। * अन्यथेत्यादि *। * एवमन्येष्वपि भक्तेषु ज्ञेयमिति *। कुरुक्षेत्रप्रसङ्गस्थोत्कण्ठावाक्यैः, आहुश्च ते नलिननाभेति वाक्याच्च ज्ञेयम्। ननु भवत्वेवं तथापि सूत्रे भेदानुपपत्तिरित्युक्तं, न त्वभेदोपदेशानुपपत्तिरिति। अतोऽत्रायमेव सूत्रकाराशय इति कथं ज्ञातव्यमित्यत आहुः। * अत्रेत्यादि *। दृष्टान्तकोटिप्रविष्टमुपदेशान्तरपदं प्रस्तुतोपदेशभिन्नमुपदेशान्तरमाहेति प्रस्तुतस्य तस्योपदेशस्याभावादभेदानुपपत्तिपदमलग्नकं स्यादतोऽत्राभेदपदेनाभेदोपदेश एव लक्षणयोच्यत इत्यभेदपदान्वयानुपपत्त्या ज्ञातव्यमित्यर्थः। तेन सिद्धमाहुः। * एतेनेत्यादि *। *एतेनेति* । उक्ताशङ्कानिरासेन। भक्तदेहस्थितेर्योगादेशादपि सम्भवेन तदर्थमात्मब्रह्माभेदोपदेशकथनं न युक्तमित्यरुच्या उपदेशान्तरपदस्यार्थान्तरमाहुः।

सर्वं करोतीति ज्ञापितं भवति । अथवोपदेशान्तरवदिसस्यायमर्थः। शरीराद्यध्यासवतस्तद्भिन्न आत्मा तत्त्वं, न तु शरीरादिरित्युपदेशो ज्ञानमार्गे यथा क्रियते, तेन शरीरादावात्मबुद्धया यः स्नेहादिः सोऽपगच्छति । तथात्र सर्वेषामात्मनो ह्यात्मा, य आत्मानि तिष्ठन्नित्यादिश्रुतिसिद्धो जीवात्मनोऽप्यात्मा पुरुषोत्तम इति बोध्यते । तेन पुरुषोत्तमे निरुपधिः स्नेहस्तत्सम्बन्धित्वेनात्मनि स सिद्धयति । यद्यप्येवं भावः पूर्वमप्यासीदेव, तथापि सहजस्य शास्त्रार्थत्वेन ज्ञानेऽतिप्रमोदो दार्ढ्यं च भवतीति तथा । नैतावता जीवाभेद आयाति । अग्रे जीवनसम्पत्तिरेवोपदेशकार्यं, न तु तेन पूर्वभावोपमर्दः सम्भवतीति सारम्। तेन ज्ञाने सर्वाधिक्यं मन्वानाय भक्तिबलप्रदर्शनं च सिद्धयति ॥ ३६ ॥

---

* अथवेत्यादि * । तथाच स ज्ञानोपदेश एतदर्थो, न त्वात्मब्रह्माभेदज्ञानफलक इति न तेन ज्ञानोत्कर्षसिद्धिरित्यर्थः । नन्वेवं सति ज्ञानोपदेशवैयर्थ्यं नापैतीत्याशङ्क्य परिहरन्ति * यद्यपीत्यादि * । * तथेति * । अवैयर्थ्यम् । * नैतावतेत्यादि * । तथाचैवं ज्ञानोपदेशस्य सार्थक्यादेतावता आत्मत्वोपदेशमात्रेण न जीवस्य ब्रह्माऽभेद आयातीत्यर्थः । तेन सिद्धमाहुः । * अग्र इत्यादि * । तथाच यत्र किञ्चित्कार्यार्थं विप्रयोगसहनमावश्यकं तत्रैवैवं प्रभुः करोति, न तु सर्वत्र । अतः पूर्वोक्तं सर्वं सारमुपपन्नमित्यर्थः । एवं करणस्य प्रासङ्गिकं फलमाहुः । * तेनेत्यादि * । ननूद्धवादिषु ज्ञानोपदेशः पौराणः, स किमर्थमिह विचार्यत इतिचेत् । उच्यते । विधिश्च प्रतिषधश्च निगमो हीत्यादिनोद्धवकृतप्रश्नेन, मां विधत्तेऽभिधत्ते मामित्यादिना भगवदुक्तोत्तरेण च तस्य श्रौतत्वस्फुटीकरणात्, सन्देशेऽपि, एतदन्तः समाम्नाय इति वाक्येन तथात्वाद्विचार्यत इति जानीहि ।

अत्र शांकरा द्विसूत्रमेतदधिकरणमङ्गीकृत्य बृहदारण्यकस्थोषस्तकहोडब्राह्मणयोर्भिन्नविद्यात्वमभ्यासादाशङ्क्य रूपाभेदादेकविद्यं साधयन्ति ॥

व्यतिहारो विशिषन्ति हीतरवत् ॥ ३७ ॥

ननु तद्योऽहं सोऽसौ योऽसौ सोऽहमित्यैतरेयके तैत्तिरीयके चाऽहमस्मि ब्रह्माहमस्मीति पठ्यते । अत्र मध्यस्थं ब्रह्मपदमुभयत्र सम्बध्यते । तेनावृत्त्या व्यतिहारोऽतो ब्रह्माभेदः सिद्ध्यति । तथा लीलामध्यपातिभक्तानामपि कृष्णोऽहमहं कृष्ण इति भाव उल्लेखश्च श्रूयते । अतस्तदभेदज्ञानं भक्तिफलमिति पम्फुल्ल्यमानं प्रतिवादिनं तत्स्वरूपं बोधयति । रसात्मकत्वाद्भक्तेः संयोगविप्रयोगात्मकत्वाद् द्वितीयभावोद्रेके यथेतरेऽश्रुप्रलापादयो व्यभिचारिभावास्तथैतिविगाढभावेन तदभेदस्फूर्त्तिरप्येकः, स च न सार्वदिक-

---

भास्कराश्च सूत्रमेकीकृत्य उपदेशवदित्येवं पठित्वा पूर्ववदेव सिद्धान्तयन्ति ॥

रामानुजास्तु व्यतिहारादिसूत्रद्वयमत्र निक्षिप्यैनदेव सिद्धान्तयन्ति । तदिदमुपसंहारस्वाध्यायसूत्राभ्यामेव सिद्ध्यतीति तेनैव गतार्थमतो न पृथक् चिन्तनीयम् ॥ ३६ ॥

व्यतिहारो विशिषन्ति हीतरवत् ॥ सूत्रमवतारयन्ति । *नन्वित्यादि * । ऐतरेयके इदं वाक्यमादित्यपुरुषं प्रकृत्योक्तम् । तैत्तिरीयके तु जलस्थं ब्रह्म प्रकृत्य । * अत्रेति * । तैत्तिरीयके । * तेनावृत्त्या व्यतिहार इत्यादि * । ब्रह्मपदस्योभयत्र सम्बन्धेन तदावृत्त्या व्यतिहारः स्वात्मनो ब्रह्मत्वविधानेन ब्रह्मणः स्वात्मत्वविधानेन व्यत्ययः । अत उक्तरूपाद् व्यत्ययाज्जीवस्य ब्रह्माभेदः सिद्ध्यति, तथा भक्तवाक्येऽपीति शङ्कायां व्यतिहारस्वरूपं सूत्रेण बोधयति । तथाच यद्यभेददर्शनस्य भक्तिफलत्वं न स्यात्तदा लीलास्थानां ब्रह्माभेदो न स्फुरेत् । स तु स्फुरतीति दृश्यत इति पूर्वोक्तः सिद्धान्तो न युक्त इत्याशङ्कायां व्यतिहारस्वरूपमनेन बोधयतीत्यर्थः । सूत्रं व्याकुर्वन्ति * रसात्मकत्वादिति * । * एकः स इति * एको व्यभिचारिभावः । तथाच विरहदशायां काश्चनात्मानं तत्त्वेन वि-

स्तदा स्वात्मानं तत्त्वेन विशिंषन्ति तं च स्वात्मत्वेन । सोऽत्र व्यतिहारपदार्थ इत्यर्थः । अपरञ्च । उद्देश्यविधेयभावस्फूर्त्तौ न ह्यद्वैतज्ञानमस्ति किन्तु भावनामात्रं भक्तानां तु विरहभावे तदात्मकत्वमेवाखण्डं स्फुरति येन तल्लीलां स्वतः कुर्वन्त्येतद्यथा तथा श्रीभागवतदशमस्कन्धविवृतौ प्रपञ्चितमस्माभिः । एवं सति मुख्यं यदद्वैतज्ञानं तद्भक्तिभावैकदेशव्यभिचारिभावेष्वेकतरदिति सर्षपस्वर्णाचलयोरिव ज्ञानभक्त्योस्तारतम्यं कथं वर्णनीयमितिभावः॥३७

शिषन्ति । अन्याश्च तं स्वात्मत्वेनाऽतो भिन्नवक्तृको व्यतिहारपदार्थो, न तु त्वदुक्तरीतिकोऽतः कादाचित्कत्वान्न तस्य भक्तिफलत्वमित्यर्थः । सूत्रयोजना तु, इतरवद् अश्रुप्रलापादिवद्, भक्तानाम्, अहं कृष्णः कृष्णोऽहमिति व्यतिहारो विशेषणबुद्धिव्यत्ययो व्यभिचारिभावः । हि यतो हेतोः विशिषन्ति । भगवद्द्रष्टृत्वेनाऽश्वत्थादीनिव । अनेन प्रकारेणानात्मानं कदाचिदेव विशिषन्ति, न सर्वदा अतस्तथेति । एतेनोदाहरणेन भक्त्युत्कर्षसिद्धिं स्फुटीकुर्वन्ति । * अपरं चेत्यादि * तथाचात्र, लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिका इति पूर्वं कथनाद्, रिङ्गयामास काप्यङ्घ्री कर्षतीत्यादावनुकरणे स्वात्मविस्तरणेन केवलभगवत्त्वस्फूर्त्तेरेव बोधनात्तथेत्यर्थः । एवञ्च मय्येव सकलं जातमित्यत्रापि भावनामात्रं, चतुर्थपादे तद्ब्रह्मास्म्यहमेव य इत्यत्र ब्रह्माहमिति पदाभ्यामद्वयभावनामात्रस्यैव बोधनात् । एतद्यथा तथाऽस्माभिः कैवल्योपनिषदर्थसंग्रहे स्फुटीकृतमिति ततोऽवधेयम् । अत्राभेदानुभावस्य विगाढभावदशास्थव्यभिचारिभावतया भक्तिमार्गे विनियोगविचारेण साधनदशायां सर्वभावेन भजने भेदोपासनवदभेदोपासनस्याप्येकदेशत्वं बोधितम् । सर्वभावेनैवाकृत्स्नत्वपरिहारे तत्र विशेषाभावादिति ॥

यत्तु शंकरभास्कराचार्यौ पूर्वोक्तमैतरेयवाक्यं, त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसीति जाबालवाक्यं चोदाहृत्य किमिह व्यतिहारेणोभयरूपा मतिः कार्योतैकरूपेति संशये । उभ-

सैव हि सत्यादयः ॥ ३८ ॥

यरूपमतिकरणे ईश्वरस्य निष्कर्षः, संसारिणश्चोत्कर्ष आपद्येतेत्येकरूपैव कार्येति पूर्वपक्षमुक्त्वा उभयरूपैव कार्या। अन्यथा उभयाम्नानमनर्थकं स्यात्। नचोक्तदोषापत्तिः। अनेन प्रकारेणाप्यात्मैक्यस्यैवानुचिन्तनीयत्वात्। वचनप्रामाण्यात्त्वत्र द्विरूपा मतिः कर्त्तव्येत्युच्यते। फलतस्त्वेकमेव दृढीभवति। यथाऽऽध्यानार्थेऽपि सत्यकामादिगुणोपदेशो तद्गुण ईश्वरः प्रसिद्ध्यति तद्वदित्याहतुः। तदसङ्गतम्। तस्या मतेर्वचनमात्रजन्यत्वे विशेष्यविशेषणभावस्फुरणेन तादृशभावनामात्रं कार्यमिति सिद्ध्यति, न तु तेन भेदोऽपैति। आहार्यज्ञानत्वात्। नचानेन फलत ऐकात्म्यसिद्धिरित्यपि युक्तम्। पूर्वोक्तैर्न्यायैस्तद्विषयश्रुतिभिश्च सिद्धेंऽशांशिभावे तदपनोदेनैकात्म्यस्य वक्तुमशक्यत्वात्। यथाऽऽध्यानार्थेऽपीति भवदुक्तन्यायेनापि वाक्यप्रामाण्यात्तद्गुणकेश्वरप्रसिद्धिवद्विशेषणविशेष्यभावबोधनबलात् तादात्म्यस्यैव सिद्धेश्च। लक्षणाग्रस्तं वाक्यैकदेशं, तत्त्वमसीत्यादाय सकलशास्त्रव्याकुलीकरणानौचित्यस्य प्रागेवोक्तत्वाच्चेति ॥

रामानुजाचार्यास्तु। सर्वं खल्विदं ब्रह्म, ऐतदात्म्यमिदं सर्वं तत्त्वमसीत्यवगतसर्वात्मभावाविषयत्वादस्य वाक्यस्य नात्र प्रतिपादनार्थमपूर्वं किञ्चिदस्ति। तत्तु वक्ष्यत्यात्मेति तूपगच्छन्ति ग्राहयन्तीति। नच सर्वात्मत्वानुसन्धानातिरेकेण परस्मिन् ब्रह्मणि जीवत्वानुसन्धानं जीवे च ब्रह्मत्वानुसन्धानं तथ्यं सम्भवति। तस्मादनादरणीयं तन्मतमित्याहुः। तदपि युक्तमेव।

एतस्मिन्नधिकरणे वैराग्यतपःसमाधिपरिपाकसिद्धस्य ब्रह्मात्माभेदज्ञानस्य भक्तिमार्गीयव्यभिचारिभावतानिरूपणेन ब्रह्मभावप्राप्यत्वबोधकं, पीतकौशाम्बरेण च विदितमिति विशेषणं प्रतिपादितं ज्ञेयम्। ज्ञानमार्गिणां तावतैव ब्रह्मभावात्मकफलसिद्धेरिति ॥ ३७ ॥ १२ ॥

सैव हि सत्यादयः ॥ फलभक्त्युत्कर्षं साधयित्वा साधनतोऽपि तत् साधयतीत्याशयेनाधिकरणं वदन्तोऽवतारयन्ति।

अथेदं विचार्यते । प्राप्तभक्तेः पुरुषस्य सत्यशमदमादयो विधीयन्ते, न वेति । फलोपकार्यन्तरङ्गसाधनत्वाच्छुद्धौ सत्यामेव चित्ते भगवत्प्रादुर्भावसम्भवाद्विधीयन्त इति पूर्वः पक्षः । तादृशस्य ते न विधीयन्त इति सिद्धान्तः । तत्र हेतुमाह । हि यस्माद्धेतोः, सैव भक्तिरेव सत्यादिसर्वसाधनरूपा । तस्यां सत्यां सत्यादयो ये ज्ञानमार्गे विहितत्वात् कष्टेन क्रियन्ते मुमुक्षुभिस्ते भक्तहृदि भगवत्प्रादुर्भावात् स्वत एव भवन्तीति न विधिमपेक्षन्त इत्यर्थः ॥ ३८ ॥

अथेत्यादि यथा सत्यं परं परं सत्यमित्यादौ ज्ञानार्थं, यथा च शान्तो दान्त इत्यादौ ज्ञानोत्तरं सत्यशमदमादयो विधीयन्ते तथा प्राप्तभक्तेः पुरुषस्य भक्त्युत्तरं ते विधीयन्ते, न वेति संशयः । फलोपकार्यान्तरङ्गसाधनत्वात् फलस्य भगवत्प्राप्तेरुपकारी मुख्यं साधनं भगवदाविर्भावः । तस्यान्तरङ्गा चित्तशुद्धिस्तस्याः साधनानि सत्यादीनि तस्मात् । एतदेव विवृणोति । शुद्धौ सत्यामेव चित्ते भगवदाविर्भावसम्भवादिति । अतो यथा सम्परायाधिकरण उपन्यस्तैर्वाक्यैर्भक्तेः पूर्वं ते विधीयन्त इत्युन्नीयन्ते, तथा भक्त्युत्तरमपि ते विधीयन्ते इति पूर्वपक्षः । तादृशस्य प्राप्तभक्तेस्ते सत्यादयो न विधीयन्ते । भक्त्या त्वनन्ययेति वाक्ये अन्यसाधननिरपेक्षयैव भक्त्या ज्ञानदर्शनप्राप्तीनामुक्तत्वात् तयैव संसिद्धेरिति सिद्धान्तः । तत्र सिद्धान्ते युक्तिमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * हीत्यादि * । यत् कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । योगेन दानधर्मेण श्रेयोभिरितरैरपि । सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसेति । धर्मः सत्यदयोपेतो विद्या वा तपसान्विता । मद्भक्त्याऽपेतमात्मानं न सम्यक्प्रपुनाति ही'ति च एकादशे भगवद्वाक्यात् सैव भक्तिरेव सर्वसाधनरूपा । अतस्तथेत्यर्थः ॥

अत्र शङ्करभास्कराचार्यौ, इदमेकसूत्रमधिकरणमङ्गीकृत्य, बृहदारण्यकोपान्ते, स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेत्युपक्रम्य, जयतीमान् लोकानिति फलमुक्तम् । अग्रे च आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्तेति प्रकृत्यानन्तरमुच्यते, तद्यत्तत्सत्यमसौ

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥

पूर्वसूत्रे शास्त्रोक्ताखिलसाधनरूपत्वं भक्तेरुक्तम् । तदाढर्यार्थमधुना मुक्तिप्रतिबन्धकत्वेन हेयत्वेनोक्तानां कामादीनामपि

स आदित्यो य एष एतस्मिन्मण्डले पुरुषः, यश्चायं दक्षिणेऽक्षन् पुरुष इत्यादि । ततो, हन्ति पाप्मानं जहाति चेति फलमुच्यते । तत्र फलभेदाद्विद्याभेद इति प्राप्ते सैव पूर्वोक्तैवेयं विद्या । हिर्हेतौ । सत्यादयः पूर्वप्रकृता एवात्र तद्यत्तत्सत्यमित्यनेन परामृश्यन्ते । स्थानविशेषसम्बन्धाच्चैकविद्यम् । फलं तूपनिषदोरहरित्यहमिति चोक्तयोर्न तु विद्यायास्तदस्माददोष इत्याहतुः । तदयुक्तम् । सौत्रस्यादिपदस्यासङ्गतेः । उत्तरस्मिन् वाक्ये हि तद्यत्तत्सत्यमिति तत्पदेन सत्यमात्रमाकृष्यते, न त्वन्यत्किञ्चिदादिपदबोधितं तस्मात् । नच पूर्ववाक्ये स्थानविशेषोक्तिर्येन तदैक्यादैक्यं सम्भाव्यम् । किञ्च सर्ववेदान्तप्रत्ययाधिकरणे शाखान्तराधिकरणोक्तास्त्रयो हेतव एकविद्यार्थमादृतास्तत्कथं तत्रानुक्तात् स्थानविशेषात् तत्सिद्धिः । नापि केवलाद्रूपैक्यात् चोदनाद्यविशेषादित्यस्य व्यभिचारित्वापत्तेः । किञ्चेयं सत्यविद्या पूर्वमुपनिषदोः प्रसङ्गे विचार्यमाणा पूर्ववाक्योक्तया स्वैक्यमस्मारयन्ती कथमकस्मादत्र स्मारयेत् । अतः काल्पनिक एवायं विचार इत्युपेक्ष्यः ॥

रामानुजाचार्यास्तु, न वा विशेषादित्यत्राक्ष्यादित्यस्थानभेदेन विद्याभेदस्योत्तरवाक्ये साधितत्वादत्र च वाक्यद्वये फलभेदस्य दृश्यमानत्वादवस्थाभेदेन रूपभेदस्यापि सत्त्वादुत्तरवाक्य उपासनभेदे सति कथं पूर्ववाक्योक्तेनास्याभेदः सम्भवति । किञ्चैकविद्यात्वे फलभेदस्योपानिषद्गुणनिबन्धनत्वम् । तस्य तन्निबन्धनत्वेन बोधकानिवृत्तौ चैकविद्यात्वमित्यन्योन्याश्रय इति दूषणमाहुः ॥ ३८ ॥

कामादीतरत्र तत्र चायतनादिभ्यः ॥ सूत्रप्रयोजनमाहुः । * पूर्वेत्यादि * । * तद्दाढर्यार्थमिति * कैमुतिकन्यायेन तदर्थम् । तेनास्य प्रासङ्गिकत्वं बोधितम् । सूत्रं व्याकर्त्तुं पूर्वोक्तं विभजन्ति ।

भगवत्सम्बन्धान्मुक्तिसाधकत्वमुच्यते । भक्तिस्तु विहिताऽविहिता चेति द्विविधा । माहात्म्यज्ञानयुतेश्वरत्वेन प्रभौ निरुपाधिस्नेहात्मिका विहिता । अन्यतोऽप्राप्तत्वात् कामाद्युपाधिजा सा त्वविहिता । एवमुभयविधाया अपि तस्या मुक्तिसाधकत्वमित्याह । इतरत्र विहितभक्तेरिति शेषः । कामाद्युपाधिजस्नेहरूपायां कामाद्येव मुक्तिसाधनमित्यर्थः । भगवति चित्तप्रवेशहेतुत्वात् । आदिपदात् पुत्रत्वसम्बन्धित्वादयः । स्नेहत्वाभावेऽप्यविहितत्वभगवद्विषयकत्वयोरविशेषाद् द्वेषादिरपि संगृह्यते । तेन भगवत्सम्बन्धमात्रस्य मोक्षसाधकत्वमुक्तं भवति तत्र विहितभक्ताविसर्थः । शास्त्रे सर्वथा हेयत्वेनोक्ता गृहाः । सर्वनिवेदनपूर्वकं गृहेषु भगवत्सेवां कुर्वतां तदुपयोगित्वेन तेभ्य एव मुक्तिर्भवतीत्यर्थः । एतादृशानां गृहा भगवद्गृहा एवेति ज्ञापनायायतनपदम् । तेषु तथा प्रयोगप्राचुर्यात् । आदिपदेन स्त्रीपुत्रपश्वादयः संगृह्यन्ते । एतेन ज्ञानादिमार्गादुत्कर्ष

---

* भक्तिरित्यादि * । * अन्यतोऽप्राप्तत्वादिति * शास्त्रव्यतिरिक्तहेत्वन्तरादप्राप्तत्वात् । व्याकुर्वन्ति । * इतरत्रेत्यादि * कामादेः कथं मुक्तिसाधनत्वमित्यपेक्षायां, 'कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा । नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते' इति दशमस्कन्धवाक्यानुसारेण हेतुमादिपदस्यार्थं तत्कथनतात्पर्यं चाहुः । * भगवतीत्यादि * सूत्रशेषं व्याकुर्वन्ति । * तत्रेत्यादि * एतदग्रे, चकारार्थबोधिका माहात्म्यज्ञानेत्यादिका फक्किका युक्ता, सा लेखकप्रमादात् पश्चात्पतितास्तीति ज्ञेयम् । ननु कामादीनां कथं तथात्वमित्याकाङ्क्षायां सौत्रं हेतुं व्याकुर्वन्ति * शास्त्र इत्यादि * । इदं चाग्रे, गृहिणोपसंहारसूत्रे सेत्स्यतीति ज्ञेयम् । अत्रायमेवाशय इत्यत्र गमकमाहुः । * एतादृशानामित्यादि * । * प्रयोगप्राचुर्यादिति * अण्डमुत्पादयामासुर्ममायतनमुत्तमम् । पञ्चायतनपूजेत्यादौ तथात्वात् । पूर्वोक्तं प्रयोजनं निगमयन्ति । * एतेनेत्यादि * । * एतेनेति * ।

उक्तो भवति। बाधकानामपि साधकत्वात् । माहात्म्यज्ञानपूर्वकस्नेहे सत्येव भर्तृत्वेन ज्ञाने कामोऽपि सम्भवतीति ज्ञापनाय चकारः ॥ ३९॥

पूर्वसूत्रे भगवद्भक्तिबलस्यात्र च, गोप्यः कामादित्यादिसप्तमस्कन्धवाक्यात् । कामादीनामविहितभक्तिहेतूनां, भक्तिरस्य भजनमित्युक्त्वा, एतदेव च नैष्कर्म्यमिति विहितभक्तेः संन्यासरूपतायास्तापनीये श्रावणाद्, मद्वार्त्तायातयामानां न बन्धाय गृहा मता इति वाक्याद् गृहादीनां च मुक्तिसाधनत्वस्य कथनेन । चकारसूचितमर्थमाहुः । * माहात्म्येत्यादि * । * इतिज्ञापनायेति * इति हेतोर्विहितभक्तौ कामादपीति ज्ञापनाय । अत्रोभयोर्भक्त्योः स्वरूपबलसाधनयोर्विचारेण पुष्टिभक्त्याश्रितमर्यादाभक्तिबोधकं, वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहं स्थितमिति विशेषणं प्रतिपादितं ज्ञातव्यम् ॥

अन्ये तु, अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाश इत्युपक्रम्य, एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इति छान्दोग्य आम्नायते । स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु । य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशान इति वाजसनेयके । तयोरेकविद्यं परस्परगुणोपसंहारो भवेन्नवेति सन्देह कामादिसूत्रेणैकविद्यमुपसंहारं च सिद्धान्तीकुर्वन्ति । कामादीत्यत्र कामपदं देवदत्तो दत्तः सत्यभामा भामेतिवन्नामैकदेशरूपम् । तेन सत्यकामाद्या वाजसनेयके वशित्वाद्याश्छान्दोग्ये उपसंहार्याः । हृदयायतनस्य वेद्यस्येश्वरस्य लोकासम्भेदप्रयोजनकसेतुत्वरूपेश्वरधर्मस्य च समानत्वादिति चाहुः ।

तच्चिन्त्यम् । श्रुतौ सत्यकामपदस्य यौगिकत्वेन नामत्वाभावात् तदेकदेशस्य कामादिपदस्य नामैकदेशताया वक्तुमशक्यत्वात् । अथ रूढत्वं तदापि तदेकदेशेन कामादिपदेन ब्रह्मैव समर्पणीयं, न तु तद्गुणा अपि । दृष्टान्ते तथैव दर्शनात् । अथ योगरूढत्वं, तदापि कामपदस्य सर्वकामादिपदैकदेशतायास्तुल्यत्वान्मनोमयादिवाक्योक्ता अपि धर्मा वाजसनेयके कुतो नोपसंह्रियेरन् । कुतो वा

आदरादलोपः ॥ ४० ॥

ननु नित्यानां वर्णाश्रमधर्माणां भगवद्धर्माणां चैककाले प्राप्तौ युगपदुभयोः करणासम्भवादन्यतरबाधे प्राप्ते कस्य स्यान्न कस्येति स्यात् संशयः । तत्र कर्मणां स्वस्वकाले विहितानामकरणे प्रत्यवायश्रवणादितरत्राऽतथाश्रवणाद् अन्यदापि तत्कृतिसम्भवात्

तस्यानेनैकविद्यात्वाभावः । हृदयस्यायतनस्य वेद्यस्येश्वरस्य सत्यसंकल्पत्वाकाशात्मत्वस्य समानधर्मस्य सत्त्वात् । किञ्च । यद्यायतनादिकमेतदैकविद्यत्वादिसम्पादकत्वेन व्यासचरणानामभिप्रेतं स्यात्तदा कामादीतरत्र वशित्वादि तत्रेति ब्रूयुर्न त्वेवं सन्दिग्धं वदेयुः । किञ्च । सर्ववेदान्तप्रत्ययाधिकरणे चोदनाद्यविशेषादित्यनेन शाखान्तराधिकरणोक्ताश्चत्वारस्त्रयो वा हेतवो विद्यैकार्थे संगृहीताः । तद् यद्यायतनादिभिरङ्गीक्रियेत तदा तस्य हेतोर्व्यतिरेकव्यभिचारः प्रसज्ज्येत । कतिपयैरङ्गीकारे यत्किञ्चिद्धेतुसत्त्वस्य यत्रक्वापि सौलभ्याद्विद्याभेदश्चोच्छिद्येत । प्रकृते च चोदना भिद्यते । एकत्रान्वेष्टव्यं विजिज्ञासितव्यमिति वाक्याद् । अन्यत्र च, एवं वेदेति वाक्यात् । आख्या च भिद्यते । वाजसनेयके दहरविद्येत्याख्याया अप्रसिद्धत्वात् । तत्तद्गुणकस्येश्वरस्य वेद्यत्वे तु रूपमपि भिद्यते इति कथं विद्यैक्यम् । अथ यथाकथञ्चित् ते चत्वारस्त्रयो वा हेतव आनेयास्तदा तत एव एकविद्यसिद्धेरेतत्सूत्रसार्थक्यं दुरुपपादमित्यगतिकगतिकं तत्प्रपञ्चरूपत्वमस्येत्यवधेयम् ॥ ३९ ॥ १३ ॥

आदरादलोपः ॥ पूर्वाधिकरणेषु सात्त्विकानां वृतानां ज्ञानासक्तिवारणाय ज्ञानमार्गाद्भक्तिमार्गस्य फलतः साधनतः स्वरूपतः सम्बन्धतश्चोत्कर्षः प्रतिपादितः । अतः परं ये वृता राजसास्तेषां ज्ञाने रुच्यभावेऽपि कर्मणि रुचेर्विद्यमानत्वात्तन्निरासार्थं कर्मकरणनिर्णयायाधिकरणमारभत इत्याशयेन सूत्रमवतारयन्ति । * नन्वित्यादि * । * कस्य स्यादिति * । कस्य बाधः स्यात् । * इतरत्रेति * । भगवद्धर्मेषु । सिद्धान्तं विशदयितुं सूत्रं विवृण्वन्ति ।

सावकाशत्वेन तेषामेव बाधो युक्तो, न तु निरवकाशानामिति पूर्वः पक्षः। तत्र सिद्धान्तमाह। आदरादिति। ब्रह्मयज्ञप्रकरणे तैत्तिरीये पठ्यते—ॐमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरं तदेतदृचाऽभ्युक्तमृचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुर्यस्तन्न वेद किमृचा करिष्यति य

———

* ब्रह्मयज्ञेत्यादि *। * ब्रह्मयज्ञप्रकरण इति *। तैत्तिरीयाणामारण्यके स्वाध्यायब्राह्मणे। श्रुत्यर्थस्तु, ब्रह्मयज्ञेन यक्ष्यमाण ॐमिति प्रतिपद्यते, प्रणवाक्षरं प्रथममुच्चारयेत्। प्रतिपाद्यत इति पञ्चमो लकारः। पूर्वोच्चारणे हेतुः। एतद्वै यजुस्त्रयीं विद्यां प्रति। अयं यजूरूपः प्रणवमन्त्रस्त्रयीं विद्यां लक्ष्यीकृत्य प्रतिनिधिरूपो यतोऽस्ति। तच्चाथर्वणे स्फुटम्। तस्य वै प्रणवस्य पूर्वा मात्रा पृथिव्यऽकारः स ऋग्भिरृग्वेदोऽथ द्वितीयान्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदस्तृतीया द्यौः स मकारः स सामभिः सामवेद इति सायणभाष्ये। वस्तुतस्तु, आथर्वणानां गोपथब्राह्मणे इन्द्रप्रजापतिसंवादे प्रजापतिना वेदत्रये एकाक्षरोऽर्थवादे मात्राभिर्युक्त इति व्यवस्थापनात्, तैत्तिरीये बृहन्नारायणे, ॐमित्येकाक्षरं ब्रह्मेतिश्रावणादत्राऽमात्र एव। नच त्रयीप्रतिनिधित्वविरोधः। द्वादशस्कन्धे, सर्वमन्त्रोपनिषद्वेदबीजं सनातनमिति बीजत्वेन बोधनाद् यथा पुस्तकलिखितोत्तरं तन्मूलपुस्तके प्रतिव्यवहारस्तथा त्रयीमूलत्वात् प्रतित्वम्। एकादशस्कन्धे वेदः प्रणव एवाग्रे इति प्रथमकृतयुगे तन्मात्रबोधनात्तदा सर्वं कार्यं प्रणवेनैवेति वा तस्य त्रयीप्रतिनिधित्वमित्यदोषात्। एषा वागिति। सर्ववाग्बीजत्वात् सर्ववाग्रूपम्। तथाच छन्दोगा आमनन्ति। तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृणात्येवमोङ्कारेण सर्वा वाक् सन्तृणत्ति। अश्वत्थादिपदेषु दृश्यमानास्तन्तुसदृशा अवयवाः शङ्कवस्तैर्यथा कृत्स्नानि पर्णानि व्याप्तानि तद्वदोङ्कारेण सर्वा वाग्व्याप्तेति सायणभाष्ये। एतत्परममक्षरमिति। एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परमिति काठकश्रुतेः। तदेतदृचाभ्युक्तमिति। तदेतत्परमं ब्रह्मरूपमक्षरं वक्ष्यमाणयर्चा स्पष्टमुक्तमित्येवं ज्ञेयः। ऋचं

इत्तद्विदुस्त इमे समासत इति । अत्र ऋक्संबन्धित्वेन वर्णात्मके, वस्तुतस्तु परमव्योमात्मके अक्षरे ब्रह्मण्योङ्कारे वर्त्तमानं तल्लोक-वेदप्रसिद्धं परं ब्रह्म यो न वेद स किम् ऋचा करिष्यतीत्यनेन तदज्ञाने वेदाध्ययनस्य निष्फलत्वमुच्यते । एवं सति तदुक्तकर्म-णोऽपि तथात्वमायाति । एतेन भक्त्या मामभिजानातीति वाक्या-त् परब्रह्मस्वरूपज्ञानं भक्त्यैवेति भक्ताः सन्तः पुरुषोत्तमविदो ये तेषामेव वेदाध्ययनादिकं फलप्रदं नान्येषामित्युक्तं भवति । अत एव श्रीभागवतेऽप्युक्तम्, ऋषयोऽपि देव युष्मत्प्रसङ्गविमुखा इह सञ्चरन्ति, संसरन्तीति वा । अन्वये निदर्शनम् । ये इत् ईश्वरत्वेन तत्पूर्वोक्तं परं ब्रह्म विदुस्त इमे भक्ताः सर्वापेक्षया सम्यक्प्रकारेण

पठित्वा व्याकुर्वन्ति । * अत्रेत्यादि * । ऋक्सम्बन्धित्वेन वर्णात्म-के, वस्तुतस्तु, एतद्ध्येवेति काठकश्रुत्या, यो वेद निहितं गुहायां परमे व्योमन्निति तैत्तिरीयश्रुतेश्च परमव्योमात्मके ॐकारे, यस्मिन् देवा अधिविश्वे निषेदुरिति देवनिषदनस्थानत्वाल्लोकात्मके अक्षरे ब्रह्मणि, उक्तश्रुतौ निहितत्वेन श्रावणाद्गीतायां, तद्धामपरमं ममेति वाक्याच्च तत्र प्रतिपाद्यत्वेन स्वरूपेण च वर्त्तमानं, तम्, अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति गीतावाक्याल्लोकवेदप्रसिद्धं परं ब्रह्म यो न वेद, स किम् ऋचा, ऋगिति वेदमात्रोपलक्षकं, वेदेन किं करिष्यतीति । शेषं स्फुटम् । ऋषय इति वाक्यं तु तृतीयस्क-न्धे नवमाध्याये । * अन्वये निदर्शनमिति * । तदज्ञातुर्वेदाध्ययन-सद्भावेऽपि तन्मुख्यफलाभावादन्वयव्यभिचारे निदर्शनं श्रुतिः श्री-भागवतवाक्यं चाहेत्यर्थः ।

अथवा, इदमग्रिमेण सम्बध्यते । तथाच वक्ष्यमाणेन वाक्य-शेषेण श्रुतिर्ज्ञानवतां भगवत्प्राप्तिलक्षणं निदर्शनमाहेत्यर्थः । तदेव श्रुतिशेषं व्याकुर्वन्ति । * ये इत्यादि * इदित्यवधारणे । तथाच प्रणवार्थभूतस्य भगवतो यज्ज्ञानं तस्यावश्यकत्वं तदज्ञानेऽध्ययनादि-नैष्फल्यं च बोधयन्त्यानयर्चा भगवज्ज्ञानसाधनीभूतायां वरणसाध्या-यां भक्तावादरो दर्शितः । एवं श्रुत्यन्तरे साधनभक्तावप्यादरः श्रा-

भगवन्निकटे श्रीगोकुलवैकुण्ठादिष्वासत इति । तेनाऽन्येषां स-
म्यगऽसत्त्वमर्थाक्षिप्तं भवति । पुरःस्थितार्थवाचीदंशब्दप्रयोगेण
चान्येषामसत्तुल्यत्वं श्रुतेरभिमतमिति ज्ञायते। ऋक्शाखायामपि, तमु
स्तोतारः पूर्व्यं यथाविद ऋतस्य गर्भं जनुषा पिपर्त्तन, आस्य जा-
नन्तो नाम चिद्विविक्तन महस्ते विष्णो सुमतिं भजामह इत्याद्यृग्भि-
रन्येभ्यो धर्मेभ्यः सकाशाद् भगवद्धर्मेष्वादरः श्रूयते इति तेषाम्

व्यते इत्याशयेनाहुः * ऋगित्यादि * । अर्थस्तु, हे स्तोतारो मदुत्क-
र्षवर्णनपराः । इयं वेदानामुक्तिः । तं लोकवेदप्रसिद्धं, पूर्व्यं पूर्वस्य
कारणस्य सम्बन्धि सर्वकारणकारणरूपं यथाविदः यथावत्तत्स्वरू-
पवेत्तारो भवन्तः । ऋतस्य सूनृतवाणीरूपस्य वेदस्य गर्भम् अन्तर्नि-
हितं जनुषा स्वस्य सम्पूर्णजन्मना यावज्जीवमिति यावत् । पिपर्त्तन
पूर्त्तियुक्तं सन्तुष्टं कुरुत, सन्तोषयत । अत्र यथाविस्त्वोक्त्या पूर्णज्ञा-
नानां देहेन्द्रियप्राणान्तःकरणजीवविनियोगं भगवत्तोषार्थं दर्शयति
श्रुतिरिति भगवद्धर्मेषु श्रुतेरादरः स्फुटति । अथ भगवत्तोषाभावे
किमपि न सिध्यतीत्याशयेन पूर्वोक्तकरणाशक्तावनुकल्पमाहोत्तरा-
र्द्धेन । आसमन्ताद् अस्य परमपुरुषस्य नाम अखण्डशब्दब्रह्मरूपत्वेन
जानन्तो, विवक्तन विशेषेण वदत । नाम्नः स्वरूपं विस्वा तदेव की-
र्त्तयत । अनुकल्पेन कथं सन्तोष इत्यतो नामस्वरूपमाह । चिदिति।
उपलक्षणमेतत् । सच्चिदानन्दात्मकम् । तथाच नाम्नो ज्ञानरूप-
त्वात्तद्द्वारा भगवतोऽपि ज्ञानं भविष्यति, तेन तोषोऽपि भविष्यती-
त्यर्थः। नामस्वरूपस्याप्यज्ञाने तदुपायं गुरूपसत्तिरूपमाह। हे विष्णो
ते त्वत्सम्बन्धिनं महः तेजोरूपं समभिव्याहारात् त्वत्तेजोरूपं,
सुमतिं निर्दोषपूर्णगुणत्वेन भगवन्तं जानन्तः।सुबुद्धिं भक्तमिति या-
वत्, तं भजामहे । तथाचान्यो भजतु, मा वा, वयं तु भजामह इति
श्रुतयः स्वकृतिं दर्शयन्ति। अनेन तदुपायेऽप्यादरो दर्शितः। तेन भ-
गवद्धर्माणामत्यादृतत्वं बोधितमिति ज्ञेयः। इत्याद्यृग्भिरित्यादिपदेन,
प्रतन्ते अद्य शिपिविष्टनामेत्यादीनां संग्रहः । एवं श्रुतिद्वयेन भगवद्ध-
र्मेष्वादरे श्रुतेः सिद्धे तेषामेव मुख्यकाले करणं सिद्धमिति तेन पू-

अलोप एवेत्यर्थः । एतेनाकरणे प्रत्यवायश्रवणादित्यादि यदुक्तं तदपि प्रत्युक्तं वेदितव्यम् । करणेऽपि वैयर्थ्यात्तदपरिहारात् । एवं सति यदकरणे प्रत्यवायकथनं, तेन तस्मादवकाशं प्राप्य गौणकालेऽप्यकरणे तथेति तस्याशय इति ज्ञायते ॥ ४० ॥

नन्वेवन्तात्पर्यकत्वे श्रुतेरुपनयनादिवत् कर्मोपयोगित्वं भक्तितज्जज्ञानयोः स्यादिति कर्मण एव प्राधान्यं, न तु भक्तेः सिद्ध्यतीत्याशङ्क्य भक्तितज्जज्ञानावश्यकत्वप्रबोधकश्रुतितात्पर्यमाह ॥

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥

तयोर्युगपत्करणेऽनुपस्थितेऽपि यदि पूर्वं भगवद्धर्मकरणमुच्येत तदा त्वदुक्तं स्यान्नत्वेवं किन्तूभयोर्युगपत्करण उपस्थिते बलाबलविचारे क्रियमाणेऽत आदराद्धेतोस्तद्वचनाद्भगवद्धर्माणां बलवत्त्वेनालोपवचनान्न कर्माङ्गत्वमेतेषां सिद्ध्यतीत्यर्थः ॥ ४१ ॥

वैपक्ष्ययुक्त्युत्तरसिद्धिं स्मारयन्ति । * एतेनेत्यादि * तर्हि प्रत्यवायश्रवणस्य का गतिरित्याकाङ्क्षायां तामाहुः । * एवं सतीत्यादि * । * तेनेति * । कथनेन । * तस्मादिति * । भगवद्धर्मात् । * तथेति * प्रत्यवायः ॥ ४० ॥

उपस्थितेऽतस्तद्वचनात् ॥ सूत्रमवतारयन्ति । * नन्वेवमित्यादि * उक्तश्रुतिभ्यां भगवद्धर्मादरे बोधिते भगवद्धर्मकरणे श्रुत्युक्तानां कर्मणां सार्थक्यं नान्यथेत्येवं श्रुतेस्तात्पर्येण उपनयनादिवद्भक्त्यादेस्तदङ्गत्वं कर्मणश्च प्राधान्यं सिद्ध्यतीत्याशङ्क्य भक्त्याद्यावश्यकत्वबोधनतात्पर्यमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * तयोर्युगपदित्यादि * यजुर्ब्राह्मणश्रुतौ भगवज्ज्ञानस्यावश्यकत्वं बोध्यते । तेन स्वाध्यायावर्त्तनदशायामपि तदावश्यकता आयाति । ऋक्संहिताश्रुतावपि, यथाविद इति, जानन्त इति च स्तोतृविशेषणाद्विधेयस्य भगवद्धर्मस्य करणे ज्ञानस्याधिकारप्रयोजकत्वं लभ्यते । मन्त्राणां विधा-

तन्निर्द्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥

यकत्वं तु, वसन्ताय कपिञ्जलानालभेतेत्यत्र परैराहतम् । वसन्तायेत्यादीनां न मन्त्रत्वमिति स्वपक्षेऽपि मन्त्राणां स्वार्थे प्रामाण्यस्याङ्गीकाराद्विधिशक्तिकौण्ठ्याभावे विधायकत्वं न हीयते । अतो मुमुक्षूणां भगवद्धर्मा अवश्यकाः । कर्माणि तु, तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण यज्ञेन तपसा श्रद्धया अनाशकेनेति श्रुतेर्विविदिषायामेवोपक्षीणानि । ज्ञानपर्यन्तत्वपक्षेऽप्यारादुपकारकाणीति विविदिषोक्त्यैव लभ्यत इति दूरापास्तं तत्प्राधान्यम् । एवं ज्ञानोत्तरं यत्र कथञ्चिद्वर्णाश्रमधर्मा भगवद्धर्माश्च युगपत्प्राप्तास्तत्र प्रत्यवायादिबोधकवाक्यैः प्रबलदुर्बलभावे वैपरीत्येन भाते तदपवादायादरः प्रकाश्यते । ततश्च भगवद्धर्माणां बाधाभावः सिद्ध्यति । तथा सतीतरेषामादराभावेऽपि प्रत्यवायश्रवणवैयर्थ्यपरिहाराय तेषां गौणकाले करणमर्द्धाधानवद् व्यवस्थाप्यतेऽतो न भक्त्यादीनां कर्माङ्गत्वमित्यर्थः । अत्र कर्मणामनादरव्युत्पादनेन भगवद्धर्माऽविरुद्धरीत्या तत्करणस्य व्युत्पादनेन च निष्कामनित्यकर्मकृतिबोधकम्, अपाश्रिताभेकाश्वत्थमिति विशेषणं प्रतिपादितं ज्ञेयम् ॥

शङ्करभास्कराचार्यौ तु वैश्वानरविद्योक्तस्य प्राणाग्निहोत्रस्य भोजनलोपे लोपो न वेति शङ्कायां लोपं सिद्धान्तयतः । तत्रोदासीना वयम् ।

रामानुजाचार्यास्तु, इदं सूत्रद्वयं कामादिसूत्रशेषत्वेनाङ्गीकृत्य तत्र मोक्षार्थिनां निर्विशेषोपासकानां सत्यकामत्वादिवद्वशित्वादिकमपि लुप्यते इति शङ्कानिवृत्तये आद्यं छान्दोग्योक्तं सर्वेषु लोकेषु कामचार इति फलं सांसारिकमिति शङ्कानिरासाय द्वितीयमिति मन्यन्ते । अयं च परविषयो विचार इति पूर्वोक्तमतद्वयापेक्षयाऽयमेव युक्तः ॥ ४१ ॥

तन्निर्द्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥

ननु यद्येवं तर्हि गौणमुख्यन्यायेन कर्मणामप्रयोजकत्वात् परम-

अथेदं विचार्यते । पुरुषोत्तमविदः कर्म कर्त्तव्यं, न वेति । तत्र मार्गत्रयफलात्मके तस्मिन् सम्पन्ने पुनस्तस्य स्वतोऽपुरुषार्थस्य करणमप्रयोजकमिति न कर्त्तव्यमेवेति पूर्वपक्षः । तत्र सिद्धान्तमाह । तन्निर्द्धारणेत्यादिना । अत्रेदमाकूतम् । भक्तिमार्गे हि मर्यादापुष्टिभेदेनास्ति द्वैविध्यम् । तत्र मर्यादायां पुष्टौ चैतादृशस्य न कर्मकरणं सम्भवति । अत एव तैत्तिरीयकोपनिषत्सु पठ्यते । आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति । एतꣳ ह वा व न तपति किमहꣳ साधु नाकरवं किमहं पापमकरवमितीति श्रूयते चोभयविधानामपि कर्मकरणमम्बरीषोद्धवपाण्डवादीनाम् । एवं सत्युभयविधानां मध्ये, मम कर्मकरणे प्रभोरिच्छास्तीति यो निर्द्धारयति स करोति । य एतद्विपरीतं स न करोति । यथा शुकजडादिः । एतन्निर्द्धारश्च भगवदधीनोऽतो भक्तेष्वपि तन्निर्द्धारणानियमोऽतः कर्म कर्त्तव्यमेवातन्निर्द्धारणे त्वाधुनिकानाम्। एवं सतीच्छाज्ञानवता तत्सन्देहवता च कर्म कर्तव्यमिति सिद्धम् । तत्रोभयोः फलं वदन्नादावाद्यस्याह । तद्दृष्टेः । तस्या भगवदिच्छाया दृष्टिर्ज्ञानं यस्य स तथा । तस्य जीवकृतकर्मफलात्

हंसेष्विव भक्तेष्वपि तत्प्राप्तिरेव न सम्भवतीति व्यर्थः पूर्वोक्तो विचार इत्याकाङ्क्षायां पाक्षिकप्राप्तिं हृदिकृत्य तत्प्रयोजनबोधनायेदमधिकरणमित्याशयेन संशयपूर्वपक्षौ वदन्तस्तदवतारयन्ति । * अथेत्यादि * । * तस्मिन्निति * पुरुषोत्तमज्ञाने । सिद्धान्तं वदन्तः सूत्रं व्याकुर्वन्ति । * अत्रेदमित्यादि * । * एतादृशस्येति * पुरुषोत्तमविदः सर्वदा भगवदानन्दमनुभवतो वा । * श्रूयते चेति * गोपालोत्तरतापनीयेऽतिथिपूजारूपो गृहस्थधर्मो गान्धर्वीप्रभृतीनाम । चकारात् स्मृतौ । * उभयविधानामिति * मर्यादायां पुष्टौ चाङ्गीकृतानां भक्तानाम् । एतद्विपरीतमित्यत्रापि निर्द्धारयतीति सम्बध्यते । तथाच निर्द्धारणानियमपदस्य हेतुगर्भतया एवं कर्मप्रसक्ते-

पृथग् भिन्नमीश्वरकृतकर्मणो यत्फलं वेदमर्यादारक्षा लोकसंग्रहश्च तत्फलमित्यर्थः। हिशब्देन "सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत। कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहमि"ति भगवद्वाक्यरूपोपपत्तिः सूचिता। द्वितीयस्य मध्यमाधिकारात् कामसङ्गादिजनितचित्तमालिन्येन भगवत्सांनिध्ये प्रतिबन्धः स्यात् तन्निवृत्तिस्तत्कृतकर्मणः फलमित्यर्थः। अथवा पूर्वसूत्राभ्यां भगवद्धर्मकृतेरावश्यकत्वमुक्तम्। सर्वात्मभाववतो, न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहेति भगवद्वचनाद्विधेयाभावादसम्भवाच्च कर्मज्ञानयोर्विहितभक्तेश्च करणं न सम्भवतीति तस्य किं फलमित्याका-

---

र्विद्यमानत्वान्न पूर्वाधिकरणोक्तविचारवैयर्थ्यमित्यर्थः। ननु भवत्वेवं पुरुषोत्तमविदः कर्मकरणं, तथापि किं तस्य फलमिति विचारणीयम्। न तावल्लौकिकं तदनभीष्टत्वात्। नापि प्रत्यवायपरिहारादिः, स्वपादमूलं भजत इति वाक्याद्भगवतैव तत्सिद्धेरित्याकाङ्क्षायां सूत्रशेषमवतारयन्ति। * तत्रेत्यादि * एवं सिद्धे कर्मकरणे ज्ञातेच्छतत्सन्देहवतोः फलं यदभिप्रेतं तच्छस्य फलं तददृष्टेः पृथगित्यनेन पूर्वमाहेत्यर्थः। द्वितीयस्य विवृण्वन्ति। * द्वितीयस्येत्यादि * तथा च तादृशोरपि कर्मणः साफल्यस्य सत्त्वान्न पूर्वोक्तविचारवैयर्थ्यमित्यर्थः। अत्र भगवत्स्वरूपविषयकपूर्णज्ञानवतामेव तदिच्छया वर्णाश्रमधर्मकरणतदकरणयोर्विभजनात् पूर्णज्ञानप्राप्यत्वबोधकम्, अकृशमिति विशेषणं प्रतिपादितं ज्ञेयम्। न कृशं यस्येति तदर्थादिति। एवमेतत्सूत्रव्याख्याने प्रत्यवायश्रवणादिना गौणकालेऽप्यवश्यकर्त्तव्यतया पूर्वाधिकरणे साधितानां कर्मणां वैयर्थ्यपरिजिहीर्षया फलस्य वक्तव्यत्वेन, पृथग्ध्यप्रतिबन्धः फलमिति सूत्रभागसार्थक्यमायाति, न सम्पूर्णस्य सूत्रस्येत्यरुच्या व्याख्यानान्तरार्थं सूत्रमवतारयन्ति। * अथवेत्यादि * पूर्वसूत्राभ्यां भगवद्धर्माणां मोक्षफलानां श्रवणादीनां कृतेः करणस्यावश्यकत्वमुक्तम्। यः पुनः सर्वात्मभाववान् तस्य तूक्तभगवद्वचनात् तं प्रति मोक्षसाधनानामविधानस्य सर्वाद्यधिकरण उपपादितत्वेन विधेयानां तेषामभावात्

ङ्क्षापूरणाय तदनुवदति । तन्निर्द्धारणेत्यादिना । तस्मिन् धर्मिण्येव, न तु धर्मेष्वपि दृष्टिर्यस्य स तथा । दृष्टिपदेन ज्ञानमात्रमुच्यते । तेन अन्यविषयकदर्शनश्रवणादिज्ञानाभाव उक्तो भवति । एतादृशस्य प्रभुसङ्गममात्रमपेक्षितम् । तत्र भगवदुक्तस्वसङ्गमावधिकस्य भक्तस्य सङ्गमसमयनिर्द्धारो भवति । अतादृशस्य तस्य स नेति तन्निर्द्धारणानियमः । एतेन फलप्राप्तेः प्रागवस्थोक्ता भवति । फलस्वरूपमाह । पृथक्फलमिति । अस्यानिर्वचनीयत्वादनुभवैकवेद्यत्वान्मोक्षान्तं यत्फलं शास्त्र उक्तं तस्माद्भिन्नमित्युक्तम् । अन्यत्र हि धर्माणां साधनत्वं, यत्र फलमेव साधनं तत्फलस्यानिर्वाच्यता युक्तैवेति हिशब्देनाह । ज्ञानमोक्षादिना तद्भावाऽप्रतिबन्धश्च फलमित्यर्थः । प्रासङ्गिकमेतत्सूत्रम् ॥ ४२ ॥

तद्भावस्वभावेन तेषां कर्त्तुमशक्यतया असम्भवाच्च कर्मज्ञानविहितभक्तीनां करणं सर्वात्मभाववतो न सम्भवति । तदभावे च न मोक्षोऽपीति तस्य किं फलमित्याकाङ्क्षायां तस्य यत्फलं तदनेन सूत्रेणानुवदतीत्यर्थः । व्याकुर्वन्ति । * तस्मिन्नित्यादि * । * एतेनेति* तन्निर्द्धारणानियमपदेन । * अन्यत्रेति * मोक्षपर्यन्ते फलान्तरे । तथाच भगवत्सङ्गमाभिलाषोत्कट्येन तदेकतानस्य भगवताऽनुक्तस्वसङ्गमावधिकस्य, यतो वाचो निवर्त्तन्त इति श्रुत्युक्तमगणितानन्दरूपं फलं, तत्प्राप्तिपूर्वदशायां तद्भावप्रतिबन्धाभावश्च फलमिति भक्तिविचारे मुख्यभक्तेरपि स्मृत्या प्रसङ्गत उक्तमित्यर्थः । अस्मिन् इदं केवलं सूत्रमेव, न त्वधिकरणमिति ज्ञापनायोक्तमेतत्सूत्रमिति ।

अत्रान्ये तु, ओमित्येतदक्षरमुद्गीथमुपासीतेत्यादीनि कर्माङ्गान्युपासनानि तत्तत्कर्मसु जुहूपर्णतादिवन्नित्यं क्रतुसम्बन्धीनि न वेति शङ्कायां न नित्यानीति सिद्धान्तयन्ति । अङ्गेषु यथाश्रयभाव इत्यन्तिमाधिकरणं चैतस्यैव प्रपञ्च इत्याहुः । तत्तेनैवास्य गतार्थत्वाद्वैयर्थ्यमस्य सूत्रस्य तन्मते दुर्वारमिति ज्ञेयम् ॥ ४२ ॥ १५ ॥

प्रदानवदेव तदुक्तम् ॥ ४३ ॥

अथेदं विचार्यते। सर्वात्मभावो विहितकर्मज्ञानभक्तिसाध्यो न वेति। तत्र पुराणे, तस्मात् त्वमुद्धवोत्सृज्येत्युपक्रम्य "मामेकमेव शरणमात्मानं सर्वदेहिनाम्। याहि सर्वात्मभावेन यास्यसे ह्यकुतोभयमि"ति वाक्ये मुक्त्यात्मकाऽकुतोभयसाधनरूपशरणगमने प्रकारत्वेन सर्वात्मभावस्य कथनेन स्वप्रयत्नसाध्यत्वं गम्यते। अतः साधनसाध्य इति पूर्वः पक्षः। तत्र सिद्धान्तं वक्तुन्तदुपदेशस्वरूपमाह। प्रदानवदिति। यद्ययं साधनोपदेशः स्यात्, स्यात्तदा साधनत्वेन सर्वात्मभावेन शरणप्राप्तिः स्वकृतिसाध्यत्वं, न त्वेवं किन्तु,तदुक्तं भगवदुक्तम्। प्रदानवत्। प्रकृष्टं दानं वरदानमिति यावत् तद्वदेवेत्यर्थः। वरेण हि स्वकृत्यसाध्यमपि सिद्ध्यतीति। तथा शत्रुसंहारभयादिनाऽपि शरणाप्तिर्भवति। तत्र न तस्याः पुरुषार्थत्वं, किन्तु तन्निवृत्तेरेव। प्रकृतेऽपि सर्वात्मभावे स्वरूपप्राप्तिविलम्बासहिष्णुत्वेनात्यार्त्या स्वरूपातिरिक्तास्फूर्त्त्या तद्भावस्वाभाव्येन गुणगानादिसाधनेषु कृतेष्वप्यप्राप्तौ स्वाशक्यत्वं ज्ञात्वा प्रभुमेव शरणं गच्छेदेतच्च न स्वकृतिसाध्यमिति सुष्ठूक्तं प्रदानवदिति।

प्रदानवदेव तदुक्तम् ॥ एवं राजसानां कर्मासक्तिवारणायाधिकरणद्वयं प्रणीय मुख्यभक्त्युत्कर्षज्ञापनेन तदभिलाषोपजननाय तत्कृतकर्मफलं च प्रदर्शितम्। अतः परं मुख्यभक्तिः केन भवतीत्याकाङ्क्षायामिदमधिकरणमारभत इत्याशयेनावतारयन्ति। * अथेत्यादि * व्याकुर्वन्ति। * यदीत्यादि *। * स्यात्तदा साधनत्वेनेत्यादि *। सर्वात्मभावकरणकशरणप्राप्तिसाधनत्वेन रूपेण सर्वात्मभावस्य स्वकृतिसाध्यत्वं स्यात्। * तन्निवृत्तेरिति *। शत्र्वादिभयनिवृत्तेः। नन्वेतद्वाक्योक्तस्यार्थस्य कथं प्रदानतुल्यत्वमित्याकाङ्क्षायां तदुपपादयन्ति। * प्रकृतेऽपीत्यादि *। * एतच्चेति *। एता-

भक्तस्येप्सितोऽर्थो हि वरो भवति । सर्वात्मभावस्यानुभवैकवेद्यत्वेन पूर्वमज्ञानेनेप्सितत्वासम्भवेऽपि स्वत एव कृपया दानमिति न वदित्युक्तम् । अथवा सर्वात्मभावेन, मां याहीति सम्बन्धः । यद्वा प्रदानवदित्यस्य पूर्ववदेव व्याकृतिः । तत्र साधनासाध्यत्वे प्रमाणमाह । तदुक्तमिति । नायमात्मा प्रवचनेन लभ्यो, न मेधया, न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्य इति श्रुत्या वरणातिरिक्तसाधनाप्राप्यत्वमुच्यत इति तत्तथैवेत्यर्थः ।

इत्थं शरणगमनम् । नन्वेवं स्वकृत्यसाध्यत्वेऽस्य भावस्य प्रदानत्वमेव सिद्ध्यति, न तु तत्तुल्यत्वमित्याकाङ्क्षायामाहुः । * भक्तस्येत्यादि * । स्पष्टम् । नन्वेवमपि शरणगतेरेव स्वकृत्यसाध्यत्वं सिद्ध्यति, न तु सर्वात्मभावस्येत्यतो वाक्यस्य योजनान्तरमाहुः ॥ * अथवेत्यादि * । शरणपदं मामित्यस्य विशेषणम् । तथाच सर्वात्मभावस्यैव प्रदानतुल्यत्वं निराबाधमित्यर्थः । यद्यपि गतेरर्थवत्त्वमित्यारभ्य सर्वोऽपि वरणश्रुतेरेव प्रपञ्चस्तथाप्यत्र पुराणवाक्यमात्रस्य विषयत्वेनोपन्यासेनापततः पौराणत्वशङ्काऽस्य विचारस्य स्यादिति तन्निरासाय सूत्रांशं प्रकारान्तरेण व्याकुर्वन्ति । * यद्वेत्यादि । * तत्तथैवेत्यर्थ इति * । परमात्मनो लभ्यत्वं वरणजन्यसर्वात्मभावसाध्यमेवेति सर्वात्मभावो वरणैकलभ्यो, न त्वितरसाधनसाध्य इत्यर्थः । तथाच सर्वात्मभावसाधनकस्वप्राप्तिबोधकमेकादशस्कन्धीयं भगवद्वाक्यं वरणलभ्यत्वबोधकश्रुत्यर्थनिर्णायकत्वादुपन्यस्तमतो न विचारस्याश्रौतत्वमित्यर्थः । एवञ्चात्र सर्वात्मभावोक्तिसन्दर्भे, रामेण सार्द्धमित्यत्र, मय्यनुरक्तचित्ता इति भक्तविशेषणादिभ्योऽनुरागात्मा भगवद्दर्शने तीव्रवियोगाधिप्रभृतिजनको विगाढभावः परमासक्तिरूपो य उक्तः स सर्वात्मभावः शरणागतिकारणत्वेनोपदिष्ट इति सिद्ध्यति । तत्र परमासक्तिश्चानन्दजन्यैव । लोके आनन्दजनक एवासक्तिदर्शनात् । एवञ्च यद् यज्जनकं तत्तद्गुणकं तत्तदात्मकं चेति व्याप्तेः पूर्वं सिद्धत्वात् सर्वोऽपि आत्मनो भाव इति सु-

भगवदुक्ताऽकुतोभयपदस्य न मुक्तिरर्थः, किन्तु, यतो वाच इत्यादिनानन्दस्य स्वरूपमुक्त्वाऽऽनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति श्रुत्युक्तं यत्पूर्वोक्तं रसात्मकपुरुषोत्तमभजनानन्दानुभवोत्तरकालीनमकुतोभयं तदर्थः ॥ ४३ ॥

बोधिन्यां व्याख्यानाच्च श्रुतौ निरवध्यानन्दरूपत्वेन पुत्रादिभ्योऽपि प्रेयस्त्वेन च सिद्धस्यात्मनो यो भावो धर्मः प्रियत्वाख्य आनन्दात्मा, यन्मात्रां सर्वे उपजीवन्ति । सर्वस्तदंशिभूतो भगवद्धर्म ऐश्वर्यादिवदतिरिक्त एव ज्ञेयः । तस्य दानं चानुभावनम् । युक्तश्चैतत् । अन्यथा सर्वेषामेव तथा स्फुरेदिति। अतो विगाढभावेन सर्वत्र तथानुभवरूपं यत्कार्यं तादृशः प्रियत्वानुभवः सर्वात्मभाव इति फलति। तेन भगवद्धर्मविगाढभावतथास्फूर्तिषु सर्वात्मभावप्रयोग आधिदैविकादिभावो ज्ञेयः । ननु पूर्वोक्तवाक्ये अकुतोभयसाधनत्वेन शरणागतेर्वा सर्वात्मभावपूर्वकस्वप्राप्तेर्वोपदेशः । अकुतोभयं चाक्षरप्राप्तिरूपा मुक्तिरेव । अभयं वै जनकप्राप्तोऽसीत्यादिश्रुत्या निश्चीयते । एवं सति सर्वात्मभावस्यापि मुक्तिसाधनत्वमेव पर्यवस्यति वामदेवादिसार्वात्म्ये तथा दर्शनात् पुरुषोत्तमप्राप्तेरपि साधनकोटिनिवेशेन तदपेक्षया मुक्तेरेवोत्कर्षश्च सिद्ध्यतीति पूर्वोक्तं सर्वं द्राविडमण्डकन्यायमनुसरतीत्याशङ्कायामकुतोभयपदार्थमाहुः * भगवदुक्तेत्यादि * तथाचास्याः श्रुतेरानन्दमीमांसायां ब्रह्मानन्दस्य गणितानन्दत्वकथनोत्तरमानन्दमयश्लोकेप्रूक्तत्वादानन्दमीमांसातः पूर्वानुवाके परस्परसरूपतायाः प्रतिपादितत्वादस्याः श्रुतेरुक्तविध एवार्थ इति निश्चीयते। ततश्च तत्र योऽर्थो, न बिभेति कुतश्चनेति वाक्येनोक्तः सोऽत्राऽकुतोभयपदेनोच्यत इति नात्र त्वदुक्तमुक्तिगन्धोऽपि । किञ्च भगवद्वाक्येऽपि, 'अथैतत्परमं गुह्यं शृण्वतो यदुनन्दन । सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत् सखेति' तादृशेऽधिकारिणि परमगोप्यकथनं स्वत एव प्रतिज्ञाय, केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसेति श्लोके भावेन बहूनां स्वप्राप्तिमुक्त्वा, ततः को भाव इत्याकाङ्क्षायां, रामेण

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥

ननु प्रतिबन्धककालादृष्टादिसद्भावेऽपि वरणकार्यं स्यादुत तन्निवृत्ताविति संशये प्रतिबन्धकाभावस्य सर्वत्र हेतुत्वात् तन्नि-

---

सार्द्धं मधुरां प्रणीत इत्यादिश्लोकचतुष्टयेन भावस्य भक्तिरूपं स्वरूपं ज्ञापयितुं विगाढभावात्मिकां तत्काष्ठां, तया काष्ठया परब्रह्मरूपस्वप्राप्तिं स्वरूपज्ञानाद्यभाववतां बहूनामुक्त्वा तदनन्तरं तस्मादित्यादिवाक्यद्वयेन स्वप्राप्त्यकुतोभयाप्ती अवदत् । तेनोक्तश्रुत्युक्तरसात्मकब्रह्मानुभवोत्तरकालीनत्वेवाऽकुतोभयस्य स्फुरतीति न पूर्वोक्तार्थे द्रविडमण्डकमित्यर्थः । अत्र सर्वात्मभावस्य वरणातिरिक्तसाधनासाध्यत्वनिरूपणेन इतरत्र वैराग्यबोधकस्य, त्यक्तपिपलमित्यस्य विशेषणस्यार्थो बोधितो ज्ञेयः ॥

अन्ये तु । वाजसनेयकादौ व्रतमीमांसादावध्यात्माधिदैवतयोः श्राविती प्राणवायू पृथगुपगन्तव्यावपृथग्वेति सन्देहे तत्त्वाभेदादपृथगिति प्राप्तौ आध्यानार्थादुपदेशभेदात्पृथगिति सिद्धान्तयन्ति । स च निरूपणप्रकारभेदेन नानाशब्दादिति सूत्रेण च सिद्ध्यतीति नेदं सूत्रमाकाङ्क्षतीति दिक् ॥ ४३ ॥ १६ ॥

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ पूर्वाधिकरणे सर्वात्मभावरूपाया मुख्यभक्तेर्वरणैकलभ्यत्वं स्थापितम् । वरणश्रुतौ तु परमात्मनो वरणैकभ्यत्वमुच्यते, न तु सर्वात्मभावस्येति कथमस्य तत्प्रपञ्चत्वमिति शङ्कायां तस्य वरणैकलभ्यत्वं पुनर्दृढीकर्त्तुं तत्स्वरूपं च श्रुत्या विवेक्तुमधिकरणान्तरं प्रणयतीत्याशयेन तदवतारयन्ति * नन्वित्यादि * । प्रतिबन्धका ये कालादृष्टस्वभावास्तेषां विद्यमानत्वे वरणकार्यभूतः सर्वात्मभावो जीवस्य भवेन्नवेति संशये वरदानस्यापि तपआदिभिः साधनैस्तोषे सत्येव प्रसिद्धेः पूर्वाधिकरणोक्तरीत्या सर्वात्मभावस्य भगवता वरवद्दानेऽपि तत्कारणस्यावश्यवक्तव्यतया प्रतिबन्धकाभावस्य सर्वत्र कारणत्वदर्शनात् प्रतिबन्धकसत्तायां च कार्यादर्शनात्तन्निवृत्तिरवश्यं मृग्येति प्रतिबन्धकानां निवृत्तावेव वरणात् सर्वात्मभावो भवतीति तस्य वरणैकलभ्यत्वं न साधीय इति

वृत्तावेव तथेति पूर्वपक्षे सिद्धान्तमाह। लिङ्गेत्यादिना। सामोपनिषत्सु नवमे प्रपाठके सनत्कुमारनारदसंवादे प्रथमत एव मुख्या-ब्रह्मविद्योपदेशार्हो न भवतीति ज्ञात्वा सनत्कुमारो नारदाधिकारं च ज्ञातुं यद्वेत्थ तेन मोपसीदेत्युक्तो नारदः स्वयं विदितमृग्वेदादिसर्पदेवजनविद्यान्तमुक्त्वा, सोऽहं भगवो मन्त्रविदेवास्मीति

पूर्वपक्षे सिद्धान्तमाहेत्यर्थः। सूत्रं व्याकर्त्तुं लिङ्गभूयस्त्वबोधिकां श्रुतिं प्रदर्शयन्तस्तदर्थं प्रकटयन्ति। * सामोपनिषत्स्वित्यादि *। प्रसिद्धस्थलनिर्देशो विप्रतिपत्तिनिरासाय। स च संवादो, अधीहि भगव इति होपससाद सनत्कुमारं नारद इत्यारभ्यान्तं ज्ञेयः। तत्र अधीहीत्यन्तर्भावितण्यर्थः। अध्यापय। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेरिति ण्यन्तादिङः परस्मैपदम्। णिजर्थेऽप्यत्र पदव्यत्ययः। अत्र सर्वात्मभावस्य वरणैकलभ्यत्वमुपपादयन्तस्तं होवेति सनत्कुमारवाक्यस्य तात्पर्यमाहुः। * प्रथमत इत्यादि *। उपसीदेति श्रौतस्य पदस्य तं होवाचेति श्रौतेनैव पदेनान्वयः। यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति होवाच। यत्त्वं जानासि तत्कथनेन मदुपसन्नो भव, स्वाधीतं वद, ततोऽतिरिक्तं तुभ्यं कथयिष्यामीत्युक्तवान्। तदा इत्युक्तः सनत्कुमारेण नारदः स्वविदितम् ऋग्वेदादिसर्पदेवजनविद्यान्तम् आह। अत्र ऋग्वेदादिपुराणान्तं प्रसिद्धम्। अग्रे तु वेदानां वेदो व्याकरणम्। पित्र्यं श्राद्धकल्पः। राशिर्गणितम्। दैवम् उत्पातज्ञानम्। निधिर्महाकालादिनिधिशास्त्रम्। वाकोवाक्यं तर्कशास्त्रम्। एकायनं नीतिशास्त्रम्। देवविद्या निरुक्तम्। ब्रह्मविद्या शिक्षाकल्पछन्दश्चितयः। भूतविद्या भूततन्त्रम्। क्षत्रविद्या धनुर्वेदः। नक्षत्रविद्या ज्योतिषम्। सर्पविद्या गारुडम्। देवजनविद्या गन्धर्वोक्तयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि ज्ञातव्यानि। एतद्भगवोऽध्येमि। एतत्पूर्वोक्तं हे भगवन् अध्येमि स्मरामीत्युक्त्वा, सोऽहं भगवो मन्त्रविदेवास्मि, शब्दार्थमात्रवित्त्वादापाततः परोक्षज्ञानवानेवास्मीति स्वाधिकारमुक्त्वाऽनात्मविदित्यादि, तारयत्वित्यन्तमाह। तथाचाप्तवाक्यप्रामाण्याच्छोकेन स्वस्यानात्मवित्त्वमनुमायात्मज्ञापनेन शोकतारणायोपसन्नोऽस्मीत्याशयवता नारदेनोक्तः

सनत्कुमारस्तदधिकारमवगत्य मुख्यब्रह्मविद्योपदेशयोग्यत्वसम्पादनाय, यद्वै किञ्चाध्यगीष्ठा नामैवैतदित्यादिना नारदोक्तानां सर्वेषां नामत्वबोधनपूर्वकं नाम्नो ब्रह्मत्वेनोपासनमुपादिश्य यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवतीति तत्फलं शोकतरणायोक्तवान् । तदा नारदः केवलं नामोपासनं उक्तफलाभावं तस्य ब्रह्मत्वेनोपासने तूक्तं फलं, तदपि नामगतिपरिच्छिन्नमिति विमृश्य तेन शोकातरणं च निश्चित्य ततोऽधिकं जिज्ञासमानोऽस्ति भगवो नाम्नो भूय इति पप्रच्छ । तत्र नाम्नो वा व भूयोऽस्तीत्युत्तरिते, तन्मे भगवान् ब्रवीत्वित्येवं नारदेन पूर्वस्मात् पूर्वस्माद्भूयो भूयो वदेति पृष्टः सनत्कुमारो वाग्वा नाम्नो भूयसीत्यादिना नामरूपविज्ञापकत्वं वाङ्माहात्म्यमुक्त्वा वाचो ब्रह्मत्वेनोपासनं तत्फलं च पूर्ववदुवाच । तत्र भूयःपदं न बाहुल्यार्थकं, नापि पुनरर्थकं, किन्त्वाधिक्यार्थकम् । आधिक्यमुत्कर्षस्तदर्थकमिति तत्तन्माहात्म्यकथनादवगम्यते । एवं नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानबलाऽन्नापस्तेजआकाशस्मराशा उक्ताः । तत्र नामवाचौ प्रसिद्धौ । मनो मननव्यापारविशिष्टमन्तःकरणम् । मननव्यापारश्च विवक्षाद्यात्मकः । सङ्कल्पोऽपि कर्त्तव्याकर्त्तव्ययोर्विषयसमर्थनरूपस्तादृशान्तःकरणस्यैव वृत्तिविशेषः । चित्तं चेतयितृत्वं प्राप्तकालानुसन्धानवत्त्वम्, अतीतानागतविषयप्रयोजननिरूपणसामर्थ्यञ्च । ध्यानं शास्त्रोक्तदेवतालम्बनो विजातीयानन्तरितः प्रत्ययसन्तान एकाग्रतापरपर्यायः । चिरकालस्थायिज्ञानवादे तु तादृश एक एव प्रत्ययो बोध्यः । विज्ञानं शास्त्रार्थविषयकं विशिष्टज्ञानम् । बलम् । अन्नभक्षणजनितं मनसो विज्ञेयविभावनसामर्थ्यम् । अन्नमापस्तेज आकाशश्च प्रसिद्धाः । स्मरः स्मरणम् । अप्रयत्नश्चित्तव्यापारः । आशा अप्राप्तवस्त्वाकाङ्क्षा । तृष्णाकामाद्यपरपर्याया । एवमेतेषां स्वरूपमुपनिषद्व्याख्यानादवगन्तव्यम् । एतेषामत्र ब्रह्मत्वेनोपासनमुक्तम् । प्राणस्य त्वाशातो भूयस्त्वं माहात्म्यं चोक्त्वा, स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादीत्यनेन तद्दर्शनादिमतोऽतिवादित्वं यद्यप्युक्तं, तथापि तत्र विद्यायाः अपर्यवसानादग्रे जन्यप्रायपाठे, आत्मतः प्राण इति श्रावणाच्च श्रोत्रपरत्वेन नाभिप्रेतः, किन्त्वासन्यत्वेन । स चोक्तमाहात्म्यवत्त्वादपहतपाप्मत्वाच्चान्येभ्य उक्तेभ्य उत्कृष्ट इति तेभ्योऽस्योत्कृष्टत्वादित्वमेवातिवादित्वं,

न तु परमकाष्ठापन्नोत्कृष्टवादित्वरूपं तदिति सोऽपि ब्रह्मत्वेनोपास्यतयैवाभिप्रेतः । तदेतदभिसन्धाय भाष्ये प्राणोऽपि तथोपास्यमध्ये गणितः । प्राणान् ब्रह्मत्वेनोपासनाविषयत्वेनोक्तेति । श्रुतौ तथाऽनुक्तिस्तु नारदस्य मुख्यविद्याग्रहणयोग्यता जाता न वेति परीक्षार्थम् । अत एवाग्रे, तं चेद् ब्रूयुरतिवाद्यसीति अतिवाद्यसीति अतिवाद्यस्मीति ब्रूयान्नापह्नुवीतेत्युक्त्वा, एष तु वा अतिवदति, यः सत्येनातिवदतीति प्राणोपासकस्यातिवादित्वं सत्यवादित्वेनोक्तम् । यद्येवं श्लिष्टप्रयोगेऽस्याधिकजिज्ञासोत्पत्स्यते तदा योग्यो, नो चेदयोग्य इत्येतदर्थमेवमुक्त्वा ततो नारदेन प्राणस्य तत्त्वं न प्राणः किं त्वन्यदिति बुद्ध्वा सोऽहं भगवः सत्येनातिवदानीति स्वाभिप्राय उक्तस्तत्रातिवदानीत्यन्तर्भावितसनर्थः । सत्येनातिविवक्षामीत्याशयात् ।

तदा सनत्कुमारः,सत्यं त्वेव विजिज्ञासितव्यमित्यादिना तस्य सत्यादिजिज्ञासामुत्पाद्य विजिज्ञासितव्यत्वेन सत्यविज्ञानमतिनिष्ठाकृतिसुखानि पूर्वपूर्वकारणत्वेनोत्तरोत्तराण्युक्तवान् । तत्र सत्यम् । अर्थमनतिक्रम्य स्थितं वस्तुस्वरूपम् । विज्ञानं तद्विषयकं विशिष्टज्ञानम् । मतिस्तर्केण तदर्थस्वरूपविचारः । श्रद्धा आस्तिक्यबुद्धिः । निष्ठा तद्विषयक आदरस्तत्परत्वरूपः । कृतिस्तद्विषयसाधनाकुल इन्द्रियव्यापारः । सुखम् अनुकूलबुद्धिवेद्य आन्तरो धर्म इत्येवं लौकिकसमानाकारं तत्स्वरूपं ज्ञातव्यमिति सत्यादिषु कृत्यन्तेषु विशेषाकथनादायातीति तथोक्त्वा ततः सुखे विशेषं वक्तुं सुखस्वरूपजिज्ञासायामाह । यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूम्नो विचार्यत्वमुक्तम् । तेन प्राणस्य सत्यवदनादीनां च स एव कारणम् । तत्त्वं चातस्तमेव कृत्यादिप्रणाड्या ज्ञात्वा सत्यवदनेऽतिवादित्वं नान्यथेत्यवगत्य किंस्वरूपो विचार्य इत्याकाङ्क्षायां पप्रच्छ, भूमानं भगवो विजिज्ञास इति एवं नारदस्य भूमस्वरूपजिज्ञासायामाह,यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति । इह यच्छब्दगतसप्तम्या अधिकरणार्थत्वे ब्रह्मणो व्यापकत्वेन सर्वेषां तदुपश्लिष्टतया तद्व्याप्यतया च सर्वेषां सर्वदान्यज्ञानाभावापत्तेः सप्तम्याः सत्यर्थत्वेऽपि ब्रह्मणः सर्वत्र सत्त्वेन सर्वस्य तथात्वापत्तेश्चात्र कश्चिद्विशेषो वाच्यः । तथाच यस्मिन् दृष्टे श्रुते विज्ञाते सति द्रष्टुः श्रोतुर्विज्ञातुरन्यविषय-

न्यद्दर्शनश्रवणविज्ञानाभावो भवति स भूमेति लक्षणकथनेन नित्यनिरवधिसुखरूपं तत्स्वरूपं स्वेतरस्मिन् सुखत्वसुखसाधनत्वज्ञानाभावजननं तत्कार्यं चेति सिद्ध्यति । तेनैव स्वरूपकार्यलक्षणयुक्तं विचार्यमिति फलति ।

तत्र भूम्नि दृष्टे श्रुते विज्ञातेऽन्यदर्शनादिकं कुतो न भवति । किं विशेषदर्शने रजतादिकमिवान्यन्न पश्यत्युत कारणे कार्यमिव भूम्न्यन्यल्लीयतेऽथवा सूर्यतेजोनक्षत्रादिकमिव भूमा अन्यत्तिरस्करोतीति शङ्कायामाह । अथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतम् । अथ यदल्पं तन्मर्त्यमित्यन्तेन अनित्यत्वे सति सावधिसुखरूपत्वे सत्यन्यत्र सुखत्वसुखसाधनत्वज्ञानजनकत्वमल्पसुखत्वमिति सिद्ध्यति । तथाच न पूर्वविकल्पितं किञ्चिद्भवत्यपि तु भूम्नि दृष्टे श्रुते विज्ञाते तदानन्दैकतानतयाऽन्यद्रूपं न सुखत्वेन सुखसाधनत्वेन च पश्यति, न शृणोति न विजानातीत्यर्थः सम्पद्यते । तत्र ननु यदि भूम्नो दर्शनश्रवणविज्ञानेष्वन्यसमेनैवं भावस्तदेकतानतारूपस्तर्हि शृण्वतो मम कुतो नास्ति । अथ समुदितैस्तैस्तदा यत्र भूमा स्वरूपं स्वकार्यं च प्रकाशयँस्तिष्ठति तस्यैव भावो नान्यस्येत्याशयस्तदा स आधारो वक्तव्य, इत्याशयेन पृच्छति स भगवः कस्मिन् प्रतिष्ठित इति, उक्तरीत्या कमभिव्याप्य स्थित इत्यर्थः । तत्रोत्तरमाह । स्वे महिम्नीति । स्वविभूतौ । अत्रापि को महिमेत्याशङ्का भविष्यतीति तद्वारणाय स्वयमेवाह । यदि वा न महिम्नीति गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति । तथाचैतेषु तत्प्रतिष्ठाया अदर्शनात्कथमेतदिति शङ्कां मा कृथाः । तत्र हेतुमाह । नाहमेवं ब्रवीमीति । एतादृशे महिम्नि प्रतिष्ठित इत्यहं न ब्रवीमि । तर्हि कस्मिन् प्रतिष्ठित इत्यत आह । ब्रवीमीति ह होवाच अन्यो ह्यन्यस्मिन् प्रतिष्ठित इति । अत्र इति ह होवाचेति श्रुतिवाक्यम् । शेषं सनत्कुमारस्य । तथाच गोअश्वादिभ्योऽन्यो महिमा तस्मिन् प्रतिष्ठित इति तथाच लौकिकमहिमाभिन्नः स्वे आत्मीये भृत भक्ते योऽथवा स्वाभिन्नो यो महिमा तस्मिन्नुक्तरीत्या स्थित इत्यर्थः । अतस्तेनापि प्रकारेण विचार्य इत्यर्थतः सिद्ध्यति ।

तर्हि स कीदृग् येन तत्रैव प्रतिष्ठित इत्याकाङ्क्षायां तं विवृणोति । स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स

स्वाधिकारमुक्त्वाह नात्मविच्छ्रुतं ह्येवमेव भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मां भगवाञ्छोकस्य पारं तारयत्विति नारदेनोक्तः सनत्कुमारः पूर्वस्मात्पूर्वस्माद् भूयो वदेति पृष्टो, भूयः पदमधिकार्थकं, नामवाङ्मनःसङ्कल्पचित्तध्यान-विज्ञानबलान्नापस्तेजआकाशस्मराऽऽशाप्राणान् ब्रह्मत्वेनोपासना-विषयत्वेनोक्त्वा प्राणोपासकस्यातिवादित्वं सत्यवादित्वेनोक्त्वा विजिज्ञासितव्यत्वेन सत्यविज्ञानमतिश्रद्धानिष्ठाकृतिसुखानि पूर्वपूर्व-कारणत्वेनोत्तरोत्तराण्युक्त्वा सुखस्वरूपजिज्ञासायामाह, यो वै भूमा तत्सुखमिति। भूम्नः स्वरूपजिज्ञासायामाह। यत्र नान्यत्

दक्षिणतः स उत्तरतः स एवेदं सर्वमित्यारभ्याग्रेऽहंकारादेश ततः आत्मादेशं च पूर्ववद् आत्मैवेदं सर्वमितीत्यन्तम्। तथाच यस्य पूर्वं स एवाधस्तादित्याद्युक्तरीत्या सर्वदिक्षु भूमभानं सर्वं परिदृश्यमानं भूमेति च भानम्। अथ तदनन्तरम्, अत एतस्माद्भानाद्धेतोरहङ्कारा-देश एव पूर्ववद्भूमा भिन्नस्वभानम्। अथ तदनन्तरम्। अतस्तादृ-शभानाद्धेतोरात्मादेश एव पूर्ववद्भूमा भिन्नात्मभानमिति। एवं प्रकारकभानवान् यः स पुरुषस्तत्र योमहिमा तस्मिन् भूमा प्रतिष्ठित इत्यर्थः सिध्यति। तस्य तत्र प्रतिष्ठितत्वे गमकमाह। स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवतीति। तथाचोक्त-प्रकारकदर्शनमननविज्ञानवानुक्तप्रकारकरत्यादिमान् भवतीत्येते ध-र्मास्तत्र भूमप्रतिष्ठागमका इत्येतैर्लक्षणैर्भूममहिमाधारः पुमान् ज्ञात-व्य इत्यर्थः। एतच्च महिमस्वरूपमग्रे अनुबन्धादिसूत्रभाष्ये स्फुटी-भविष्यति। एवं तत्स्वरूपं निष्कृष्य तादृशस्य शोकतीर्णत्वं पूर्वपृ-ष्टोत्तरत्वेनाह। स स्वराडित्यादिना। सः भूमात्मरत्यादिमान् स्व-स्मिन्नेव राजते स्वस्मिन् भूमानं रञ्जयति वा तस्य नामाद्याशाप्रा-णपर्यन्तलोकेषु कामचारः स्वातन्त्र्यं भवतीति सर्वप्राप्त्या शोकपा-रतीर्णो भवतीत्यर्थः। एवमेतं परिचाययित्वा तेनैव शोकतरणाद् इत-रोपायवतो निन्दति। अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलो-

पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति । एतेन सर्वात्मभावस्वरूपमेवोक्तं भवति । तत्र विरहभावेऽतिविगाढभावेन सर्वत्र तदेव स्फुरतीति, स एवाधस्तादित्यादिनोक्त्वा कदाचित् स्वस्मिन्नेव भगवत्त्वस्फूर्त्तिरपि भवतीत्यथाहङ्कारादेश इत्यादिना तामुक्त्वैतेषां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं पुनः सर्वत्र भ-

---

का भवन्ति तेषां सर्वेषु लोकेष्वकामचारो भवतीति । रञ्जयतीति राजा । अन्यो रञ्जयिता येषां तेऽन्यराजानः । तथाच ये इतोऽन्यथा विदुरन्यासक्तास्ते तथेति सन्दर्भार्थः । एतस्य तात्पर्यं स्फुटीकर्त्तुं गृह्णन्ति । * एतेनेत्यादि * । एतेन भूम्नः कार्यलक्षणवाक्येन यदुद्धवं प्रति सर्वात्मभावस्वरूपं स्वस्मिन् विगाढभावात्मकं भगवतोक्तं तदेवोक्तमित्यर्थः । कथमित्याकाङ्क्षायामेतदग्रिमोक्तकार्यान्यथानुपपत्त्याऽर्थादुक्तं भवतीति वक्तुमेतद्विभजन्ते । * तत्रेत्यादि * । अयमर्थः । अत्र व्याख्यातरीत्या यो भूममहिमाधाररूपः पुमान् परिचायितस्तस्य या स्फूर्त्तिः सा नाखण्डब्रह्मज्ञानरूपा,तत् केन कं पश्येदित्यादिवत्तदाकाराभावात् । किन्तु सखण्डतद्रूपा । षण्णां दिशां परिदृश्यमानस्य सर्वस्य चानुवादपूर्वकं तत्स्फूर्त्तिकथनात् । सापि न वामदेवादिस्फूर्त्तिवन्मनुरभवमहं सूर्यश्चेत्यादिसर्वत्राहंग्रहरूपा । अहंकारादेशोत्तरं पुनरात्मादेशकथनेन तस्या व्यभिचारबोधनात् । अतः सा द्विविधाया अपि ज्ञानिस्फूर्त्तेर्विलक्षणेति तद्वानपि तेभ्यो विलक्षणः । स यदि पितृलोककामो भवतीत्यादिवदस्य कामानामनुक्तत्वाद्दहराद्युपासकेभ्योऽपि विलक्षणः । मर्त्यसुखानभीप्सुत्वाल्लोकतोऽपि विलक्षणः । किन्तु सत्यवदनादिकारणभूतकृत्यादिजनकसुखलाभवत्त्वस्य भूमप्रतिष्ठाप्रश्नोत्तराभ्यां तन्महिमाधारत्वेनोक्तत्वात् । पूर्वं भूमलाभवानुक्तस्तेन दृष्टश्रुतविज्ञातभगवत्कः परमभक्तस्तत्र ततोऽन्यदर्शनादिराहित्यस्योक्तत्वाद्विरहभावे प्रपञ्चविस्मारकपरमासक्तिरूपो योऽतिविगाढभावस्तेन सर्वत्र तदेव आसक्तिविषयं भगवत्स्वरूपमेव सर्वत्र स्फुरतीति स एवाधस्तादित्यादिनोक्ता, एतेषां विरहभावकृततत्तत्स्फूर्त्तिरूपाणां ज्ञानानां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं पुनरहङ्कारादेशात् पूर्वं निरूपित-

गवत्स्फूर्त्तिमाहाथात आत्मादेश इत्यादिना । ततः संयोगभावे सति पूर्वभावेन सर्वोपमर्दिना स्वप्राणादिसर्वतिरोधानेनाऽग्रिमलीलाऽनुपयोगित्वं न शङ्कनीयम् । यतो भगवत एव सर्वसम्पत्तिरित्याशयेन तस्य ह वा एतस्यैवं पश्यत इत्युपक्रम्यात्मन एवेदꣳ सर्वमित्युक्तवान् । ततः श्लोकैस्तद्भावस्वरूपमुक्त्वैतस्यमूलकारणमाह, आहार-

---

स्याबृत्त्या सर्वत्र भगवत्स्फूर्त्तिमाहाथात आत्मादेश इत्यादिना ।

विधात्रयसमाप्तौ च, स वा एष एवं पश्यन्नित्यादिकथयति । तत्र, स इत्यनेन पूर्वोक्तं परामृश्य, एष इत्यनेन सहिमानं निगमयति। तत्रायमर्थः । पूर्वं विधात्रयस्योक्तत्वात्तासां प्रत्येकमहिमरूपत्वे, स वा एष इत्यत्र बहुवचनापत्तिः । समुदितस्य तथात्वे पूर्वविधापरामृष्टस्य भूम्नोऽपि महिमत्वापत्तिरतस्तदुभयमत्र नाभिप्रेतम् । किन्त्वेवं पश्यन्नित्यादिनोक्तासु दर्शनादिक्रियासु पूर्वोक्तविधात्रयं कर्मत्वेनैवाभिप्रेत्यैवं पदेन परामृशति ततश्चाग्रे फलं वदति । तेन कर्मफलार्थत्वादिति न्यायात्तादृशफलजनकं यद्विधात्रयकर्मकं ज्ञानं तदत्र महिमत्वेन फलति । तथाचात्राग्रे आत्मरत्यादिपदै रतिक्रीडामिथुनानन्दानां रसरूपं भगवन्तं भजत एव धर्माणामुक्तत्वाद् दृष्टश्रुतविज्ञातभगवत्को, रसस्य संयोगविप्रयोगाभ्यां द्विधानुभवविषयत्वाद्विरहभावेऽतिविगाढभावेनोक्तरीत्या सर्वत्र तत्स्फूर्त्तिमान् भक्तो भूममहिमाधारत्वेन सिद्ध इति तस्य या स्फूर्त्ति सोक्तरीतिकसर्वात्मभावव्यभिचारिभावरूपैव, नान्यविधेति तेन भगवति विगाढभावरूपं तत्स्वरूपमेवात्रोक्तं भवतीत्यर्थः ।

एतदेव फलतोऽपि निगमयितुं, तस्य ह वा एतस्येत्यादेर्ग्रन्थस्य तात्पर्यमाहुः । * तत इत्यादि * तथाच विरहभावानन्तरं संयोगभावे असति पूर्वभावेन विरहात्मकेन तथेति वृथैवेदं सर्वमिति शङ्कानिरासाय तस्य वा एतस्येत्यादिना भगवत एव सकाशात् सर्वस्थितिमुक्तवानतो विरहेण सर्वोपमर्दाभावाल्लीलोपयोगसिद्धिरिति साऽपि तादृशभक्ततद्भावयोगमिकेत्यर्थः । एतदेव संग्रहग्रन्थतात्पर्यकथनेन दृढीकुर्वन्ति । ततः श्लोकैरित्यादि । श्लोकास्तु—न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् । सर्वꣳ हि पश्यः पश्यति सर्व-

शुद्धाविद्यादिना। प्राणपोषको ह्याहारस्तस्य सदोषत्वे तु न किञ्चित्

माप्नोति सर्वश इति । स एकधा भवति त्रिधा भवति पञ्चधा । सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः । शतं च दश चैकश्च सहस्राणि च विंशतिः। आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिप्रतिलम्भे सर्वग्रन्थीनां प्रविमोक्ष इति । अर्थस्तु-पश्यः उक्तविधया भूमदर्शनवान् मृत्युरोगौ न, दुःखभावं च न पश्यति । उतेति पादपूरणे । अथवा पक्षान्तरे । दुःखसत्तामेव न पश्यति, का वार्त्ता मृत्युरोगयोः । तत्र हेतुमाह । हि यतो हेतोः सर्वं भूमात्मकं पश्यो भूमद्रष्टा पश्यति । तेन दुःखादिकं न पश्यतीति तस्य फलमाह । सर्वशः सर्वेण सर्वमाप्नोतीति न तस्य पुनः शोकः । प्राप्तौ प्रकारमाह । स एकधेत्यादि । अनेन आत्मत आविर्भावतिरोभावाविति यत्पूर्वमुक्तं तस्य प्रकार आविर्भावप्रकारोक्तिद्वारा विवृतः । स भूमैव उक्तप्रकारैः प्रकटो भवन् पश्यस्य सर्वं प्रापयतीति । अथवा पश्य एव भगवतः सकाशात्तदनुभवार्थं तथा तथा प्रकटीभवतीति बोध्यः । मध्ये, द्विधा चतुर्द्धा षोढा अष्टधा दशधेत्यादिप्रकारत्यागस्तु तिरोभावप्रकारबोधनार्थः । विशेषतस्तु तादृशाधिकाराभावान्न विवेचितुं शक्य इति नोच्यते । तेन विरहसामयिकदशैव बोध्यत इति हृदयम् । एवमग्रेऽपि भगवत्कृपया बोद्धव्यम्। एतस्य सर्वस्य मूलकारणमाहारशुद्धिः । सा च, 'त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासास्तव मायां जयेमही'तिप्रकारेण भगवद्भुक्तप्रसादेन भवन्ती सत्त्वं शोधयति । तच्छुद्धौ सत्यां ध्रुवा पूर्वावस्थास्मृतिः । तस्याः प्रतिलम्भे अविद्याकामकृतानां सर्वासां ग्रन्थीनां प्रकृष्टो ज्ञानितोऽप्यधिको विमोक्ष इति श्रयः । अतः परं श्रुतिरेतस्य ज्ञानस्य यस्मैकस्मैचिददेयत्वायाह । तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमार इति । तथा सोऽपि दर्शयति, न तु दातुं शक्नोति एतस्य भगवत्परमकृपाप्राप्यत्वात् । तर्हि कथनमपि कुत इत्याकाङ्क्षायां सनत्कुमारस्य कृपालुत्वमाह । तं स्कन्द इत्याचक्षत इति । योऽसौ वरदानेन शिवस्य पुत्रोऽपि जातस्तेन तथेत्यर्थः । द्विरुक्तिः समाप्त्यर्था । तदेतत् सर्वं हृदिकृत्य आहुः ।

सिद्ध्यति । एवं सति भगवदतिरिक्तस्य स्वतो निर्दोषत्वाभा-
वाद्भगवानेव चेत्प्राणपोषको भवेत्तदा सर्वं सम्पद्यते । स च स-
र्वात्मभावे सत्येव भवति । स च तथा तद्वरणं विना न भवति ।
तच्चोक्तकार्यानुमेयमिति वरणलिङ्गं सर्वात्मभावस्तस्यैव भूयस्त्वात्
सर्वतोऽधिकत्वात्तद्वरणमेव सर्वतः कालादेर्बलीय इत्यर्थः । य-
ल्लिङ्गमेव सर्वतोऽधिकं तस्य तथात्वे किं वाच्यमिति कैमुतिक-
न्यायोऽपि सूचितः । ज्ञानमार्गीयज्ञानेन प्रतिबन्धशङ्कायामाह ।
तदपीति । उक्तमिति शेषः । अन्तरा भूतग्रामवत्स्वात्मन इति सूत्रे-
ण । तच्चोपपादितमस्माभिः ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥४५॥

---

* एवं सतीत्यादि * एवं श्रुतितात्पर्यमुक्त्वा सूत्रं व्याकर्त्तुमाहुः ।
* स चेत्यादि * स भगवांश्च प्राणपोषकः सर्वात्मभावे सत्येव भ-
वति । स सर्वात्मभावश्च तथा अत्यनुग्रहेण तस्य जीवस्य वरणं
विना न भवति । तद् वरणं च भगवत्कृतप्राणपोषणानुमितसर्वात्म-
भावरूपकार्यानुमेयमिति वरणलिङ्गं सर्वात्मभावः सर्वतोऽधिक इति
तस्य वरणमेव कालादिभ्यो बलिष्ठम् । अतः कालादिरूपप्रतिबन्ध-
कसद्भावेऽपि तत्कार्यं भवत्येवेत्यर्थः । एवमत्र प्रदानवत्सूत्रोक्तसर्वा-
त्मभावस्वरूपं सफलं श्रुत्या विवेचितं बोध्यम् । हिशब्दसूचितमर्थ-
माहुः । * यल्लिङ्गेत्यादि * । * सूचित इति * निश्चयार्थकहिशब्द-
प्रयोगेण सूचितः । सूत्रशेषमवतारयन्ति । * ज्ञानमार्गीयेत्यादि *
आत्मादेशे आत्मैवेदं सर्वमिति सर्वस्यात्मत्वेन भानं श्रावितम् । त-
था सति स्वात्मन्यपि तदभेदो भास्यत्येव । भाते च तस्मिन् विरह-
भावप्रतिबन्धादुक्तरूपः सर्वात्मभावो ज्ञानमार्गीयज्ञानप्रतिबद्धो नो-
देष्यतीति शङ्कायामाहेत्यर्थः । समाधिं व्याकुर्वन्ति * अन्तरेत्यादि *
पूर्वं भजनानन्दरूपफलदित्सायां सत्यां हि भगवता विरहभावः स-
म्पाद्यत इति तत्प्रतिबन्धकं न क्रियत इति तस्मिन्नधिकरण एवोप-
पादितमिति सा शङ्का तदनुसन्धानेनैव निवार्येत्यर्थः ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ पूर्वोक्तमर्थं

तत्राह । नात्र वरणलिङ्गभूयस्त्वं निरूप्यते, किन्त्वात्मज्ञान-प्रकारविशेष एव । तथाहि । पूर्वप्रपाठक आत्मना सहाभेदः सर्वस्य निरूपितः श्वेतकेतूपाख्यानेन । अग्रिमे च, सोऽहं भगवो मन्त्र-विदेवास्मि नाऽऽत्मविदित्यादिना नारदस्यात्मजिज्ञासैवोक्ता । एवं सत्युत्तरमपि तद्विषयकमेव भवितुमर्हत्यत आत्मप्रकरणत्वादुभयोः प्रपाठकयोः पूर्वस्मिन् यदभेद उक्तस्तस्यैव स्वरूपमात्मन एवेदं सर्वमित्यन्तेनोक्तमिति पूर्वोक्तप्रकारादन्येन प्रकारेणात्माभेद एव सर्वस्योक्तः। तदेवाह। पूर्वस्य पूर्वप्रपाठकोक्तात्माभेदज्ञानस्य विकल्पः प्रकारभेद एवाऽग्रेऽपि निरूप्यते । तत्रोपपत्तिमाह । प्रकरणादि-ति । एतत्तूपपादितम् । अत्र सिद्धान्तिसम्मतं दृष्टान्तमाह । तद्-हृदयसंवादार्थम् । क्रियामानसवदिति। यथा पूजनप्रकरणे बाह्यं तत्क्रियारूपमुच्यते, आन्तरं तु मनोव्यापाररूपमुच्यते। न ह्येताव-ताऽन्यतरस्य तद्भिन्नत्वं वक्तुं शक्यम् । प्रकरणभेदात्तथेहापी-त्यर्थः ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥

नामरूपात्मकं हि जगत्, तत् पूर्वं सर्वशब्देनानूद्य तस्मिन्

दृढीकर्त्तुं सूत्रद्वयेनाशङ्कते इत्याशयेनावतारयन्ति । *तत्राहेत्यादि* *उक्त इत्यन्तम् * । * तत्राहेति * उक्तेऽर्थे पूर्वपक्षी चोदयति । * निरूपित इति * ऐतदात्म्यमिदं सर्वमिति महावाक्ये निरूपितः । * उत्तरमिति * सनत्कुमारोक्तं प्रत्युत्तरम् । व्याकुर्वन्ति । * तदे-वाहेत्यादि * अग्रेऽपीति । नवमेऽस्मिन् प्रपाठके । * उपपादितमि-ति * अवतारणग्रन्थ उपपादितम् । * बाह्यं तदिति * बाह्यं पूजन-म् । * तद्भिन्नत्वमिति * पूजनाभिन्नत्वम् ॥ ४५ ॥

अतिदेशाच्च ॥ व्याकुर्वन्ति । * नामेत्यादि * नामरूपात्मकं हि जगत्, तत्, पूर्वं पूर्वस्मिन् प्रपाठके, ऐतदात्म्यमिदं सर्वमिति

ब्रह्माभेदो निरूपितोऽग्रे तु ऋगादिविद्या अनूद्य नामात्मकब्रह्मत्वं तत्रातिदिश्यते । नामैवैतन्नामोपास्वेति । इतोऽपि हेतोर्ज्ञानप्रकारभेद एवाग्रे निरूप्यत इत्यर्थः ॥ ४६ ॥

विद्यैव तु निर्द्धारणात् ॥ ४७ ॥

तुशब्दः पूर्वपक्षं व्यावर्त्तयति । यदुक्तं सनत्कुमारनारदसंवाद आत्मज्ञानप्रकारविशेष एव निरूप्यत इति तन्न, किन्तु विद्यैव निरूप्यत इति । अत्रेदमाकूतम् । नायमात्मेति श्रुतिरितरसाधननिषेधपूर्वकं वरणस्य साधनत्वमुक्त्वा वृतलभ्यत्वे हेतुत्वं वदन् वरण-

---

सर्वपदेनानूद्य तस्मिन् ब्रह्माभेद ऐतदात्म्यपदेन निरूपितः । अग्रे अस्मिन् प्रपाठके तु, यद्वै किञ्चाध्यगीष्ठा इत्यादिना नारदोक्ता ऋगादिविद्या अनूद्य नामात्मकब्रह्मत्वं तत्रातिदिश्यते । तथैव मनःप्रभृतिरूपात्मकं जगत्तत्तच्छब्देनानूद्य तत्तदात्मकब्रह्मत्वं तत्रादिश्यते । अतो यथा कौण्डपायिनां सत्रे मासमग्निहोत्रं जुहोतीत्यग्निहोत्रनाम्ना प्रकृताग्निहोत्रधर्मास्तत्रादिश्यन्ते तथात्र, नामोपास्वेति स यो नाम ब्रह्मेत्युपास्त इत्यादिवाक्यैर्नामादीञ्जगद्रूपाननूद्य नामादिशब्दैस्तत्तदात्मकब्रह्मत्वं तेष्वतिदिश्यत इत्यतिदेशादपि हेतोर्ज्ञानप्रकारविशेष एवाग्रेऽस्मिन् प्रपाठके निरूप्यत इत्यर्थः ॥ ४६ ॥

विद्यैव तु निर्द्धारणात् ॥ उक्तं पूर्वपक्षं सूत्रव्याख्यानेन निरस्यन्ति । * तुशब्द इत्यादि * ननु विद्याशब्दो ज्ञानसामान्ये प्रसिद्धः । सर्वात्मभावस्वरूपे ज्ञानविशेषे कथं नियम्यत इत्याकाङ्क्षायां तदुपपादनाय वरणादिश्रुत्येकवाक्यतया प्रकृतश्रुतितात्पर्यं वक्तुं पूर्वं वरणश्रुतिं व्याकुर्वन्ति । * अत्रेत्यादि * अस्याम् उक्तायां श्रुतौ वरणश्रुत्यविरुद्धं तात्पर्यं तस्माद्वरणश्रुत्यर्थ उच्यत इत्यर्थः । वरणश्रुतिस्तु—नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वामिति मुण्डके कठवल्ल्यां चास्ति । विवृणुत इति पाठान्तरं चास्ति । * उक्त्वेति *

विषयमप्याह । तस्यैष आत्मा वृणुते तनुं स्वामिति । तस्य वृतस्यात्मन एष भगवानात्माऽत एव तत्तनूरूपः स जीवात्मा । तद्वरणस्यावश्यकत्वज्ञापनाय स्वामिति । सर्वो हि स्वकीयां तनुमात्मीयत्वेनात्मत्वेन च वृणुते । तद्विशिष्ट एव भोगान् भुङ्क्ते ।

पादत्रयेणोक्त्वा । * अत एवेति * भगवतो वृतात्मत्वादेव । तथाच तस्यैष आत्मा सन्नर्थात्तं स्वां तनुं वृणुत इत्यन्वयः । ननु माध्यन्दिनानामन्तर्यामिब्राह्मणे यस्यात्मा शरीरमिति सामान्यत आत्ममात्रस्य ब्रह्मशरीरत्वश्रावणात् कथं वृतस्यैव तत्तनूरूपत्वमित्याकाङ्क्षायामाहुः । * तद्वरणस्येत्यादि * तथाच यद्यपि तत्र सामान्यत आत्ममात्रस्य शरीरत्वं श्रावितं, तथापि य आत्मानमन्तरो यमयतीति नियन्तव्यत्वायैव साधारण्येनैव श्रावितं, न तु स्वकीयत्वकथनपूर्वकम् । अतः सर्वेषु शरीरत्वे साधारणेऽपि यं स्वीयत्वेनालोचितवाँस्तमेव वृणुत इत्यर्थः । विवृणुते इति पाठेऽपि विशेषेण वृणुत इत्यर्थः । ननु विवरणपदस्य प्रकाशनार्थकत्वाद्विवृणुत इति पाठेऽयमर्थो न लभ्यते, किन्तु यं वृणुते तस्य स्वां तनुं प्रकाशयतीत्येवार्थो लभ्यत इतिचेन्मैवम् । तस्मिन्नपि पक्षे तनुविवरणलिङ्गेनोक्तस्यार्थस्य लाभात् । तथाहि । सर्वेषां जीवानां नोक्तत्वेऽप्यत्र यं वृणुत इति विशेषकथनाद्वरणीये कश्चिद्विशेषो विवक्षितः । सोऽपि न जीवे साधारणशास्त्रीयसाधनजन्मा । पूर्वोक्तदोषप्रसक्त्यापत्तेः । नापि साधनाभावजन्मा । पामरपशुकीटमात्रेषु तदापत्तेः । साधनशास्त्रवैयर्थ्यापत्तेश्च । अतोऽन्यथानुपपत्त्या भगवदालोचनजन्मैव वाच्यः । सोऽपि, न ज्ञानिभक्तसाधारणः । भावभेदानुपपत्तेः । स्वं विवृणुत इत्येतावतैव चारितार्थ्येन तनुपदवैयर्थ्यापत्तेश्च । अतस्तनुपदानुरोधात् साकारस्यैव प्रकाशो वक्तव्यः । स तु प्रायो भक्तानामेवेति वरणविषयतया सुखेनैव भक्तो लभ्यते । यत्तु केचिदस्मिन् मन्त्रे, यमेव परमात्मानमेव विद्वान् वृणुते प्राप्तुमिच्छति तेन वरणेन एष परमात्मा लभ्यो, नान्येन साधनान्तरेण । नित्योपलब्धस्वभावत्वात् । कीदृशोऽसावात्मलाभ इति, उच्यते । तस्य एष आत्माऽविद्यासंछन्नः स्वां परां

अत एव तैत्तिरीयकोपनिषत्स्वपि ब्रह्मविदाप्नोति परमिति सामान्यतो ब्रह्मविदः परब्रह्मप्राप्तिमुक्त्वाग्रिमर्चा विशेषतोऽवदत्। सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मस्वरूपमुक्त्वा यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्युक्तम् । एतद् यथा तथाऽऽनन्दमयाधिकरणे प्रपञ्चितमस्माभिः ।

तनुमात्मा तत्त्वस्वरूपं प्रकाशयति । प्रकाशे घटादिरिव विद्यायां सत्यामाविर्भवतीति मुण्डके व्याचक्रुः । यदपि काठके, यमेव स्वमात्मानमेष साधको वृणुते प्रार्थयते तेनैवात्मना वरित्रा स्वयमात्मा लभ्यः ज्ञायते इत्येतत्। निष्कामश्चात्मानमेव प्रार्थयते । आत्मनैवात्मलाभ इत्यर्थः । कथं लभ्यत इति । उच्यते । तस्यात्मकामस्यैष आत्मा विवृणुते प्रकाशयति पारमार्थिकीं तनुं स्वां स्वकीयाम् । स्वं याथार्थ्यमित्यर्थ इति । तत्रापि तनुपदवैयर्थ्यस्य दुर्वारत्वाद् वरणीयवरित्रोरभेदाङ्गीकाराच्च व्याख्येयविरोधः स्फुट एव । किञ्च । गीतायाम् । एवं सततयुक्ता य इत्यर्जुनप्रश्ने भगवता, मय्यावेश्य मनो ये मामित्युत्तरेण, चतुर्विधा भजन्ते मामिति भजनमुपक्रम्यैव, ज्ञानी त्वात्मैव मे मतमिति ज्ञानिभक्तस्यैवात्मकत्वकथनेन, तपस्विभ्योऽधिको योगीति सन्दर्भे शुष्कज्ञान्यपेक्षया योगिन उत्कर्षमुक्त्वा, श्रद्धावान् भजते यो मां स मे युक्ततमो मत इति भक्तोत्कर्षकथने चास्मदुक्तार्थस्यैवोपोद्बलनाच्च तदसङ्गतम् । अतो विवरणपदस्य प्रकाशनार्थकत्वपक्षेऽपि तनुप्रकाशलिङ्गेन भक्तस्यैव वरणविषयत्वं निश्चीयत इति तेष्वेव स्वीयत्वं सिद्ध्यतीति पूर्वोक्तप्रकारे न कश्चिद्दोष इति हृदिकृत्योक्तार्थदार्ढ्याय श्रुत्यन्तरमाहुः । * अत एवेत्यादि * । तथाच यदि लाभपदार्थः प्रकाशनरूपः श्रुत्यभिप्रेतः स्यात्तदाऽस्यामृचि प्राप्तिपदार्थः कामभोगरूपो नोच्येत । अतो न पूर्वोक्तेऽर्थे विप्रतिपत्त्यमित्यर्थः । एतच्छ्रुतावपि विप्रतिपत्तिश्चेत्तदा पूर्वग्रन्थमवलोक्य स निरसनीयेत्याशयेन आहुः । * एतदित्यादि * । आनन्दमयाधिकरणे अक्षरादुत्तमस्य रसरूपस्यैव परशब्दार्थत्वेन निर्णीतत्वात् परमव्योमत्वेन चाक्षरस्य तद्धाम्नो निर्णीतत्वाद्वरणेने-

च तत्प्राप्तेरपि विचारितत्वात्तथेत्यर्थः । ननु वरणश्रुतिः काठके अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वदेति प्रश्ने, सर्वे वेदा यत्पदमामनन्तीत्यादिना, एतद्ध्येवाक्षरं ब्रह्मेति प्रकृत्य पठिता । मुण्डकेऽपि, अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमित्यक्षरमेवोपक्रम्य पठिता । एवं सति पुरुषोत्तमप्रसङ्गस्य कुत्राप्यदर्शनात् । कथमत्रैवं भगवत्परत्वेन व्याख्यायत इतिचेत् । अनवधाय वदसि । काठके सर्ववेदवेद्यत्वं परस्यैवोच्यते । तच्च वाच्यवाचकाभेदविवक्षया प्रणवे वक्तुमक्षरपदेन प्रणवं परामृष्य तत्र ब्रह्मत्वमुपासनासाधनत्वाय विधीयते मन्त्रद्वयेन । ततो, न जायते, न म्रियते वेति मन्त्रद्वयेनोपासकस्वरूपमुक्त्वा, अणोरणीयान् महतो महीयानित्यादिमन्त्रत्रयेण तस्य परस्यात्मनो विरुद्धधर्माश्रयत्वादिकमुक्त्वा, तस्य ज्ञानं कथमित्याकाङ्क्षायां, नायमात्मेति पठ्यते।अतो न तद्गन्धः । मुण्डकेऽपि प्रथमे मुण्डके यत्तदद्रेश्यमग्राह्यमित्यादिना सर्वस्वरूपत्वेनाक्षरं प्रस्तुतं, द्वितीयेऽपि, यथा सुदीप्तात् पावकाद्विस्फुलिङ्गा इति मन्त्रेण तस्मात् सजातीयसृष्टिमुक्त्वा, दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः।अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर इति मन्त्रे पूर्वोक्तादक्षरात् परतः परोऽतिरिक्त उक्तः । तृतीयेऽपि, द्वा सुपर्णेत्यनेनान्तर्यामितया तमेव परामृष्य ततो जुष्टं यदा पश्यत्यन्यमीशमित्यादिना तद्दर्शनफलमुक्त्वा, ततो ज्ञानप्रसादेनेत्यनेन निष्कलध्यानात्तद्दर्शनमुक्त्वा ततो ज्ञानप्रसादेऽपि न स्वसामर्थ्येन पश्यति किन्तु तत्समार्थ्येनैवेत्याशयेन नायमात्मेत्यादिकं पठ्यते । तेनोभयत्रापि पुरुषोत्तम एव प्रकृत इत्यनवद्यम् । एतदेव गीतायामुपबृंहितम् । द्वाविमौ पुरुषौ लोक इत्यारभ्य, प्रथितः पुरुषोत्तम इत्यन्तेन । ननु तथापि शाखान्तरस्थस्य वाक्यस्य कथमेतच्छेषत्वमितिचेत् । ऐकार्थ्यादिति ब्रूमः हानौ तूपायनेति सूत्रे, कुशाच्छन्दःस्तुत्युपगानदृष्टान्तेषु भाल्लविनां कुशा वानस्पत्या स्थिता मापातेति निगमस्थवाक्यशेषत्वमौदुम्बर्यः कुशा इति शाट्यायनिवाक्ये सर्वैर्भाष्यकारैराद्दतम् । जैमिनिना च बाधलक्षणे । अपि तु वाक्यशेषः स्यादन्याय्यत्वाद् विकल्पस्य विधीनामेकदेशः स्यादिति सूत्रे । नानुयाजेष्विति वाक्यस्य, आश्रावयाऽस्तु श्रौषड् यज ये यजामहे वषडितिदूरस्थवाक्यशेषत्वमाद्दतम्।

किञ्च पुरुषोत्तमलाभे हेतुभूतं तु भक्तिमार्गे यद्वरणं स्वीयत्वेनाङ्गीकाररूपं तदेव, न त्वन्यादृशमपीति ज्ञापनायाग्रे वदति, नायमात्मा बलहीनेन लभ्य इति। बलकार्यं हि प्रभुवशीकरणम्। तच्च, अहं भक्तपराधीनः, वशे कुर्वन्ति मां भक्त्येत्यादिवाक्यैर्भक्त्यैवेति बलशब्देन भक्तिरुच्यते। अन्यथा पूर्ववाक्य एवेतरनिषेधस्य कृ-

---

तस्मान्नात्र शङ्कालेशः॥ ननु तथापि तेषु तेषु भक्तेषु वरणमपि तत्तदनुरूपमनेकविधमिति रसमार्गीयमेवात्र कथं ग्रहीतुं शक्यत इत्याकाङ्क्षयामाहुः* किञ्चेत्यादि* तथाग्रिमश्रुत्या तथाश्रयणीयमित्यर्थः। श्रुतिस्तु मुण्डके, नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गादिति। ननु श्रुतौ बलशब्दो वर्त्तते, न तु भक्तिशब्द इति कथं तेन तन्निश्चय इत्याकाङ्क्षायां बलशब्देन तत्प्राप्तिमुपपादयन्ति। * बलकार्यमित्यादि *। नच बलशब्दस्य शरीरसामर्थ्ये प्रयोगदर्शनाद्भक्तौ तस्य लाक्षणिकत्वं स्यादिति शङ्क्यम्। वशीकारके यस्य कस्यापि सामर्थ्ये तत्प्रयोगदर्शनात्। तृतीयस्कन्धे कपिलवाक्यं 'बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम्। या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवलमि' ति भ्रूविजृम्भसामर्थ्येऽपि तत्प्रयोगात्। अतः कार्यादिशब्दवत्सापेक्षवृत्तिकत्वात् सामर्थ्यरूपत्वमादाय तथा प्रयोग इति न लाक्षणिकत्वगन्धोऽपि। नचैते वाक्ये गुणावतारस्य विष्णोर्न तु भगवत इति कथमेताभ्यां भक्तौ पुरुषोत्तमवशीकारकत्वसिद्धिरिति शङ्क्यम्। एकादशस्कन्धीयचतुर्दशाध्याये 'न साधयति मां योगो न सांख्यं धर्म उद्धव। न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जितेति' भगवद्वाक्येऽपि साधयतिना स्ववशीकारस्यैव बोधनादस्यैवार्थस्य सिद्धेः। तद्वाक्योपन्यासस्तु स्फुटार्थत्वाद् गुणावतारेऽपि मूलधर्मसमानधर्मताबोधनार्थत्वाज्ज्ञेयः। ननु तथाप्यत्र भक्तिरूपमेव बलं विवक्षितं, न इतरद् आत्मनिष्ठाजनितवीर्यादिरूपमित्यत्र किं गमकमित्यत आहुः। अन्यथेत्यादि * तथाच पूर्ववाक्योक्तनिषेधेनैव साधनजनितबलस्याभावे प्राप्तेऽपि, यः पुनर्बलाभावनिषेधस्तदन्यथानुपपत्तिरेवात्र भक्ते-

तत्वात् पुनर्बलाभावनिषेधं न कुर्यात् । वरणमात्रस्य हेतुत्वमुक्त्वा बलस्य तथात्वं च न वदेत् । एतादृशस्य हृदि भगवत्प्राकट्यं भवतीत्याह । एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्म धामेति । अस्यार्थस्त्वेष आत्माऽऽत्मनोऽप्यात्मा पुरुषोत्तमो, ब्रह्म अक्षरब्रह्मात्मकं धाम विशते इति धामपदं पुरुषोत्तमस्याक्षरं ब्रह्म सहजं स्थानमिति ज्ञापनार्थमुक्तमन्यथा न वदेत् । तेन तद्धृदये स्वस्थानमाविर्भावयित्वा स्वयं तत्र प्रकटीभवतीति ज्ञाप्यते । प्रकृते श्वेतकेतूपाख्याने परोक्षवादेन ब्रह्माभेदबोधनेन पुरुषोत्तमाधिष्ठानत्वयोग्यता ज्ञाप्यते । अग्रे तु न ह्येतावतैवाधिष्ठाना-

---

र्विवक्षितत्वगमिकेत्यर्थः । ननु पूर्ववाक्ये प्रवचनादीनां त्रयाणामेव निषेधो, नेतरेषामिति तत्प्राप्त्यर्थमत्र बलाभावनिषेधान्न तदनुपपत्तिरित्याकाङ्क्षायां तन्निवारणाय हेत्वन्तरमाहुः । * वरणेत्यादि * तथाच तत्रोत्तरार्द्धे एवकारेण वरणस्यैवात्मलाभहेतुतानिश्चायनात् पूर्वार्द्धोक्तानां प्रवचनादीनां जीवकृतयावत्साधनोपलक्षकत्वे सिद्धे बलाभावानुपपत्तितादवस्थ्येऽस्मिन् बलाभावनिषेधमुखेन बलहेतुताबोधनात्तद्बलं लौकिकमायादिकबलाभ्यामतिरिक्तं भगवदनुग्रहजन्यं पुष्टिमार्गीयमेव ग्राह्यम् । तच्चोक्तरीत्या भक्तिरूपमेवेत्यतः सैवात्र गृह्यते। बलपदस्य सामर्थ्यसामान्ये शक्तत्वेऽप्युक्तयुक्त्या तद्विशेष एवपर्यवसानादित्यर्थः । एवञ्चैतदग्रे प्रमादस्यालिङ्गतपसश्च यो निषेधस्तेनाप्रमादस्य सलिङ्गतपसश्च सहकारिता बोध्यते । तत्राप्रमादो भगवदिच्छानुरूपसेवाकरणादिरूपः । सलिङ्गतपश्च सर्वात्मभावसहितविरहभावरूपं ज्ञेयम् । एतदुत्तरार्द्धमवतार्य व्याकुर्वन्ति । * एतादृशस्येत्यादि * । * तद्धृदय इति * तस्यैवं यतमानस्य हृदये । ननु भवत्त्वेवं श्रुतिद्वयार्थस्तथापि पूर्वसूत्राभ्यां यदूस्यात्मप्रकरणादिना जीवब्रह्माभेदपरत्वमाशङ्कितं तस्य कथं परिहार इत्याकाङ्क्षायां पूर्वस्यास्य च तात्पर्यमाहुः । * प्रकृत इत्यादि * प्रकृते छान्दोग्यस्थ आत्मवाक्ये श्वेतकेतूपाख्याने । अन्यार्थमन्यकथनरूपो यः

त्मकाऽक्षराविर्भावो भवति, पुरुषोत्तमस्य वा । तथा सति ज्ञानिनां सर्वेषां परप्राप्तिः स्यान्नत्वेवं, भक्त्याहमेकया ग्राह्य इत्यादिवाक्यैः, किन्तु भगवदनुग्रहेण भक्तसङ्गेन च भक्तौ सत्यामिति ज्ञापनाय भक्त एव तद्बोधाधिकारीत्यपि ज्ञापयितुं भक्तस्य नारदस्य भगवदावेशयुक्तस्य सनत्कुमारस्य च संवाद उक्तः । तत्रात्मशब्देन पुरुषोत्तम उच्यते । भक्तिमार्गे तु निरुपधिस्नेहविषयः स एव यतः । स तु सर्वात्मभावैकसमधिगम्य इति सर्वात्मभाव एव विद्याशब्देनोच्यते । परमकाष्ठापन्नं यद्वस्तु तदेव हि वेदान्तेषु मुख्यत्वेन प्रतिपाद्यम् । अक्षरब्रह्मादिकं तु तद्विभूतिरूपत्वेन तदुपयोगित्वेन मध्यमाधिकारिफलत्वेन च प्रतिपाद्यते । तेन तत्र विद्याशब्दप्रयोग औपचारिकः, सर्वात्मभाव एव मुख्यः । युक्तं चैतत् । अक्षरविषयिण्या विद्यायाः सकाशात्तत उत्तमविषयिण्यास्तस्या उत्तमत्वम् । एवं सति पूर्वप्रपाठकस्याक्षरप्रकरणत्वा-

---

परोक्षवादस्तेन जीवस्याक्षरब्रह्माभेदबोधनेन पुरुषोत्तमाधिष्ठानत्वयोग्यता ज्ञाप्यते । अग्रे तदग्रिमप्रपाठके तु, न ह्येतावतैत्युक्तरीत्या योग्यतामात्रेण न सः, किन्तु भगवदनुग्रहभक्तसङ्गाभ्यां जातायां भक्तौ स इति ज्ञापयितुं तयोः संवाद उक्तस्तस्य च संवादस्य भक्तिमार्गीयलिङ्गवत्तया तथात्वात् तत्रत्यात्मशब्देन तन्मार्गे निरुपधिप्रीतिविषयः पुरुषोत्तम एवोच्यते, न जीवात्मा, नाप्यक्षरब्रह्म । पुरुषोत्तमस्तु सर्वात्मभावैकप्राप्य इति स एव सर्वात्मभावो विद्याशब्देनोच्यते । किञ्च परमकाष्ठापन्नामित्याद्युक्तरीत्या वेदान्तस्यापि पुरुषोत्तम एव तात्पर्यम् । यद्यपि मुण्डके, अथ परा यया तदक्षरमधिगम्यत इत्यक्षरविद्यायाः परविद्यात्वमुक्तम् । तथाऽप्यग्रे, अक्षरात् परतः पर इति पुरुषस्य ततः परत्वश्रावणात्तद्विद्यायामेव परविद्यात्वं विश्राम्यतीत्यक्षरविद्यायां नान्तरीयकतया विद्याशब्दप्रयोगः परत्वोपचाराद्वेति सर्वात्मभाव एव विद्यापदप्रयोगो मुख्यः । तस्या एव च विद्याया

दुत्तरस्य पुरुषोत्तमप्रकरणत्वात्स्वद्वैत्वसिद्धिश्चात उक्तन्यायेन विद्यैवाग्रिमप्रपाठके निरूप्यते, न तु पूर्वोक्तात्मज्ञानप्रकारविशेषः । अत्र हेतुमाह । निर्द्धारणादिति । सुखं त्वेव विजिज्ञासितव्यमित्युक्त्वा सुखस्वरूपमाह । यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति । अक्षरपर्यन्तं गणितानन्दत्वात् पुरुषोत्तमस्यैवानन्दमयत्वेन निरवधिसुखात्मकत्वात् स एव भूमा तस्यैव विजिज्ञासितव्यत्वेन निर्द्धारणादित्यर्थः । भूम्नो लक्षणमग्रे उच्यते । यत्र नान्यत् पश्यतीत्यादिना । यस्मिन् सति नान्यत् पश्यतीत्यर्थः । तथा सति सर्वात्मभाववतः प्रभु-

---

उत्तमत्वम् । एवं सत्युभयत्र प्रतिपाद्यभेदेन प्रकरणभेदात्त्वदुक्तस्य प्रकरणैक्यस्वरूपस्य भवदभिमतात्मविद्याप्रकारविशेषतासाधकस्य हेतोरसिद्धिरित्यस्मदभिप्रेतमेवात्रोच्यते, न तु त्वदुक्तमित्यर्थः । एवं प्रकरणभेदे सत्यतिदेशोऽप्यकिञ्चित्कर एव ।अतिदेशमात्रेण तद्वान्तरभेदत्वस्य क्वाप्यसिद्धत्वादिति । हेतुं व्याकुर्वन्ति । * सुखं त्वेवेत्यादि * तथाच पूर्वत्र सदेव सोम्येति सद्रूपमात्मानं प्रकृत्य तदभेदज्ञानमुपदिष्टम् । इह तु निरवध्यानन्दरूपं जिज्ञास्यत्वेन निर्द्धारयति । यद्यत्र पूर्वप्रकृत आत्मा बोधनीयः स्यात्तदात्रापूर्वं भूमशब्दं न वदेत् । वदति तु भूमपदम् । अतः शब्दान्तरेण पूर्वस्मादात्मनः सकाशाद् भूमपदोक्तस्य भेदे सिद्धे विषयभेदान्नात्र पूर्वोक्तं ज्ञानमुच्यते । किन्तु मुख्या सर्वात्मभावरूपैव विद्योच्यते । यद्यपि, सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रवणात्त्रयाणामविनाभावस्तथापि सावधिनिरवधित्वाभ्यामानन्दस्य भेदात् पूर्वत्र गणनापरिच्छिन्नस्यैव तस्य सिद्धिर्न तु निरवधेः । अतो भूमपदेनात्र तस्यैव निर्द्धारणात् तथेत्यर्थः । ननु भूमाऽत्र जिज्ञास्यत्वेनोच्यते, तावता सर्वात्मभावः कथं लभ्यत इत्याकाङ्क्षायामाहुः । भूम्न इत्यादि । तथाच भूमलक्षणत्वेन यत्रेति पदेन पूर्वोक्तरीत्या भूमज्ञानसत्तासूचनात्तज्ज्ञानरूपस्य सर्वात्मभावस्य लाभ इत्यर्थः । ननु भूमलक्षणे तदितरदर्शनं निषिद्ध्यते । सर्वात्मभाववतां तु तद् दृश्यते इति कथं तेन तल्लाभ इत्यत आहुः । * तथा सतीत्या-

दर्शने सत्यपि लीलोपयोगिवस्तुदर्शनादिकमनुपपन्नमिति शङ्का तु, तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मनः प्राणा इत्यादिना निरस्ता वेदितव्या । तैः सह लीलां चिकीर्षतः प्रभुत एव सर्वं सम्पद्यते, न तु भक्तसामर्थ्येनेति भावेन तदुक्तेः ॥ ४७ ॥

दर्शनाच्च ॥ ४८ ॥

दृश्यते च सर्वात्मभाववतां भक्तानां व्रजसीमन्तिनीप्रभृतीनां पूर्वमितरविस्मृतिर्भगवत्स्पर्शादिनाग्रे सर्वसामर्थ्यमिति व्यासः स्वानुभवं प्रमाणत्वेनाह । उक्तञ्च श्रीभागवते, ताभिरेव, चित्तं सुखेन भवताऽपहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये, पादौ पदं न चलत इत्यादिना । तेन ज्ञानशक्तिक्रियाशक्तितिरोधानमुक्तं भवति । अग्रे तदाविर्भावादिकं स्फुटमेव ॥ ४८ ॥

ननु सनत्कुमारनारदसंवादात्मकमेकं वाक्यम् । तत्रोपक्रमे मन्त्रविदेवास्मि नात्मविच्छ्रुतꣳ ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति, सोऽहं भगवः शोचामीत्यादिना स्वात्मज्ञानस्यैवोपक्रमादुपसंहारोऽपि तमादायैवोचितः । अग्रे चेद् आत्मपदानामीश्वर-

---

दि * । * तथा सतीति * सर्वत्र भूमदर्शने सति । * तैः सहेति * प्राणादिभिर्धर्मैः सह । तथाच तादृशलीलोपयोगिपदार्थदर्शनं प्रभुसामर्थ्यकारितम् । भगवदिच्छाया एव तथात्वात् । न तु स्वकृतमतस्तेषां भगवदेकद्रष्टृत्वं निर्बाधमतः सुखेन तल्लक्षणात्सर्वात्मभावलाभ इत्यर्थः ॥ ४७ ॥

दर्शनाच्च ॥ शब्देनान्यादर्शनं साधयित्वा प्रत्यक्षेणापि साधयतीत्याशयेन व्याकुर्वन्ति । * दृश्यते इत्यादि * । * स्वानुभवमिति * स्वयं समाधावनुभूतम् । शेषं निगदव्याख्यातम् ॥ ४८ ॥

परत्वं स्याद्वाक्यभेद उपक्रमविरोधश्च स्यात् तस्माद्वाक्यानुरोधात् पूर्वज्ञानप्रकारविशेष एवायमिति मन्तव्यमित्यत उत्तरं पठति ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥

नैवं वाक्यानुरोधाद्वरणेन सर्वात्मभावलिङ्गभूयस्त्वं बाधितव्यम् । वाक्यापेक्षया श्रुतिलिङ्गयोर्बलीयस्त्वात् । एतद्बलीयस्त्वं तु, श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमिति जैमिनीयसूत्रे सिद्धम् । प्रकृत इतरसाधननिषेधपूर्वकं, यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वामिति श्रुति-

---

श्रुत्यादिबलीयस्त्वाच्च न बाधः । सूत्रमवतारयन्ति । * नन्वित्यादि * । ननु मास्त्वस्य पूर्वप्रकरणशेषत्वम्, तथाप्यस्य प्रपाठकस्यान्तमेकवाक्यत्वं तु निःसन्दिग्धम् । विषयभेदाभावात् । तत्र चोपक्रमे सोऽहं भगव इत्यादिनात्मैव पृष्टः । उपक्रमश्चासञ्जातविरोधित्वादुपसंहारात् प्रबल इति पूर्वमन्त्रे स्थितम् । अत उपसंहारोऽप्युपक्रममादायैव नेतुमुचित इति तत्रत्या आत्मशब्दास्तत्परा एव युक्ताः । अत्र चेद्, अथात आत्मादेश इत्यादीनामात्मपदानामीश्वरपरत्वं स्यात् तदा ऐकार्थ्याभावादथात आत्मादेश इत्यादिकं भिन्नं वाक्यं स्यादुपक्रमविरोधश्च स्यादत उपक्रमगतात्मवाक्यानुरोधात् पूर्वप्रकरणोक्तो ज्ञानस्य प्रकारकविशेष एवायमिति मन्तव्यम् । किञ्च अत्र हि वरणलिङ्गं सर्वात्मभावो न भूमलक्षणवाक्यमात्रेण सिद्ध्यति, येन प्रकरणमनादृत्य स गृह्यते । किन्तु तदारभ्य, आत्मन एवेदं सर्वमित्यन्तेन । अतः सन्दर्भो यथा सर्वात्मभावबोधकमवान्तरप्रकरणं, तथा प्रपाठकः सर्व आत्मबोधकं महाप्रकरणमतो भूमलक्षणवाक्यस्य सन्दिग्धत्वात् प्रपाठकरूपं महाप्रकरणमेवानुसर्तव्यमित्यत उत्तरं सूत्रं पठतीत्यर्थः । सूत्रं व्याकुर्वन्ति । * नैवमित्यादि * । * भूयस्त्वमिति । परमोत्कर्षः । तत्र किं श्रुत्यादिकमित्यपेक्षायां पूर्वं श्रुतेरुक्तत्वात्तां स्मारयन्तो लिङ्गं स्फुटीकुर्वन्ति । * प्रकृते इत्यादि * । अयमर्थः । सत्यमिदमात्मबोधकमान्तमेकं वाक्यम् । उपक्रमश्च बली-

वरणमात्रलभ्यत्वमाह। एतदग्रे च नायमात्मा बलहीनेन लभ्य इत्युपक्रम्यैतैरुपायैर्यतते यस्तु विद्वाँस्तस्यैष आत्मा विशते ब्रह्मधामेति श्रुतिः पठ्यते। एतच्च, विद्यैव तु निर्द्धारणादित्यत्र निरूपितम्। अपरञ्च, नात्मवित् तरति शोकमात्मविदितिनारदवाक्यानुवादयोरात्मपदमुत्तमप्रश्नात्मकेन लिङ्गेन पुरुषोत्तमपरमिति

यात्, तथापि स नाश्वप्रतिग्रहेष्टिवाक्य इव निःसन्दिग्धः। तत्रत्यात्मपदस्य जीवाक्षरपुरुषोत्तमसाधारण्यात्। तथा सति तत्र को वा ग्राह्य इति विमर्शे नारदस्य शोकतारकात्मज्ञानार्थे प्रष्टुं प्रवृत्तत्वेन तादृश एवात्मा ग्राह्यः। स च निरवधिसुखरूपत्वात् पुरुषोत्तम एव। न जीवो, नाप्यक्षरम्। आद्यस्य दुःखित्वादन्यस्य गणितानन्दत्वात्। अतो निरवधिसुखरूपात्माभिधायिका या भूमश्रुतिः सा वाक्याद् बलीयसी। बुभुत्सितात्मस्वरूपनिर्णायकत्वात्। किञ्च। आत्मलाभान्न परं विद्यत इतिश्रुत्यन्तरे आत्मलाभस्य परमलाभत्वश्रावणाच्छोकतारकोऽप्यात्मा लभ्यमान एव शोकं तारयति, न त्वलभ्यमानः। लाभश्च न ज्ञानमात्रम्। किन्तु स्वाधीनतापुरस्कृतम्। प्रकृते च यदा वै सुखं लभत इत्यादिकथनाल्लभ्यमानस्यैव निरवधिसुखरूपस्य भूम्नः शोकतारकत्वमभिसंहितम्। तस्य च, इतरनिषेधेत्याद्युक्तरीत्या वरणश्रुतिस्तन्मात्रलभ्यत्वमाह। एतदग्रे च नायमात्मेति भक्तिलभ्यत्वबोधिका श्रुतिः पठ्यते। अत आत्मज्ञानस्य ज्ञायमानस्यात्मनो वा शोकतारकत्वस्वरूपादिका, लभत इति लाभश्रुतीश्च तादृशी। तथा, यमेवैष इति श्रुतिर्वरणमात्रलभ्यत्वमात्मन आह। तदग्रिमा च भक्त्यादिलभ्यत्वम्। तानि च वरणस्यैव व्यापारभूतानि एतदग्रे पुरुषोत्तमस्य लिङ्गम्। पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्ययेतिगीतावाक्यात्। एतल्लिङ्गं, चकाराद् भूमादिश्रुतिः। उभयमपि, विद्यैवेति सूत्रे निरूपितम्। अत्र श्रुतिबोधको ग्रन्थः प्रायस्त्रुटित इति प्रतिभाति। पूर्वोक्तस्य लिङ्गस्य श्रुत्यन्तरस्थत्वात् प्रकृतसन्दर्भस्थं लिङ्गं दर्शयन्ति * अपरञ्चेति *। * नारदवाक्यानुवादयोरिति *। नारदवाक्ये तदनुवादे च। * उत्तमप्रश्नात्मकेनेति * अस्ति भगवो

ज्ञायते । स हि सर्वेभ्य उत्तमोऽतो ब्रह्मेत्युपास्यत्वेन सनत्कुमारो-क्तप्रतिरूपं ततस्ततो भूयोऽस्तीत्यपृच्छत् । अन्ते सर्वाधिकत्वेन सुखात्मकत्वेन भूमानं श्रुत्वा तथा नापृच्छत् किन्तु तत्प्राप्त्यर्थम् । अतस्तं कस्मिन् प्रतिष्ठित इत्यपृच्छत् । तदा सर्वात्मभाववत्स्वेव प्रतिष्ठित इत्याशयेन सर्वात्मभावलिङ्गात्मकं भावं, स एवाधस्ताद् इत्यादिनोक्तवान् ॥ ४९ ॥

नन्वेतया श्रुत्या न सर्वात्मभावलिङ्गात्मको भाव उच्यते, किन्तु व्यापकत्वेन सर्वरूपत्वेन स्वभिन्नाधिकरणाभावरूपस्व-प्रतिष्ठितत्वमेवोच्यत इत्यत उत्तरं पठति ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ॥ ५० ॥

नाम्नो भूय इत्यादिरूपाधिक्यप्रश्नात्मकेन । एतदेव विभजन्ते । * स हीत्यादि * । स पुरुषोत्तमो हि निश्चयेन । स उत्तमः पुरुष इति श्रुतेरतोऽस्मि लोके वेदे चेति स्मृतेः सर्वेभ्यो नामादिप्राणपर्य-न्तेभ्योऽक्षराच्चोत्तमः । अतो नामाद्याऽऽशान्तेषु ब्रह्मेत्युपास्यत्वेन क-थनात् । सनत्कुमारोक्तप्रतिरूपं = सनत्कुमारेण, नाम्नो वा व भूयो-ऽस्तीत्याद्युक्ते तन्मे भवितु भगवानित्येवं तल्लक्षितरूपम् । ततस्ततो भूयोऽस्तीति ज्ञात्वा अपृच्छत् । अन्ते पश्चात् सर्वाधिकं भूमानं श्रुत्वा, तथा, अस्ति ततोऽपि भूय ? इत्येवं नापृच्छत्, किन्तु तदधिष्ठानम-पृच्छत् । तथाचैतत्प्रश्नद्वयसामर्थ्येनाप्युपक्रमगतमात्मपदं पुरुषोत्तम-परमिति निश्चीयते । वाक्याल्लिङ्गस्यापि बलीयस्त्वादित्यर्थः । नन्वस्त्वात्मपदं पुरुषोत्तमपरं, तथापि विवक्षितसर्वात्मभावबोधक-स्याग्रादर्शनात् कथं न तद्भूयस्त्वबाध इत्यत आहुः * तदेत्यादि * तथाच द्वितीयप्रश्नोत्तरे सर्वात्मभावलिङ्गस्य दर्शनान्न तद्बाध इ-त्यर्थः । एतेनावश्यकोपपत्तिरत्र वाक्यतात्पर्यनिर्णायिकेत्युक्तम् ॥ ४९ ॥

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ॥ सूत्र-मवतारयन्ति । * नन्वित्यादि * । तथाच पूर्वमुपक्रमगतवाक्य-

भूमस्वरूपं श्रुत्वा स भगवः कस्मिन् प्रतिष्ठित इति प्रश्ने स्वे महिम्नीत्युत्तरम् । तदर्थस्तु स्वीयत्वेन वृते भक्ते यो महिमरूपः सर्वात्मभावस्तस्मिन्निति स्वरूपात्मके महिम्नीति वा । भगवदात्मकत्वात् सर्वात्मभावस्य । तदितरस्य साक्षात्पुरुषोत्तमाप्रापकत्वादस्यैव तत्प्रापकत्वात् परमकाष्ठापन्नमहित्वरूपोऽयमेव भाव इति महिमशब्देनोच्यते । स तु विप्रयोगभावोदये सत्येव सम्यग् ज्ञातो भवति व्यभिचारिभावैः । ते त्वनियतस्वभावा इति ज्ञाप-

---

बलेन प्रत्यवस्थाने तस्य वाक्यस्य सन्दिग्धार्थत्वादुपसंहारगतत्वेप्यसन्दिग्धाभ्यां ततः प्रबलाभ्यां श्रुतिलिङ्गाभ्यामेतद्वाक्यार्थनिर्णयेनात्र ताभ्यामात्मपदस्य पुरुषोत्तमपरत्वेप्येतया द्वितीयप्रश्नश्रुत्या यत् सर्वात्मभावसमर्थनं तन्न युक्तम् । तदुत्तरश्रुतौ पुरुषोत्तमस्य स्वप्रतिष्ठताया एव सिद्ध्या भवदुक्तसर्वात्मभाववद्भक्तस्याधिकरणताया असिद्धौ सर्वात्मभावस्यात्र प्रतिपत्तुमशक्यत्वादित्याशङ्कायामिदं सूत्रं पठतीत्यर्थः । उक्ताशङ्कानिवारकं सौत्रं हेतुमुक्तश्रुतिविचारमुखेन व्याकुर्वन्ति । * भूमेत्यादि । * यदुक्तमत्र सर्वात्मभावलिङ्गात्मको भावो नोच्यत इति । तन्न । यतोऽत्र भूमस्वरूपश्रवणानन्तरं तदाधारप्रश्ने सनत्कुमारेण स्वे महिम्नीत्युत्तरमुक्तम् ।

तत्र स्वपदस्यात्मीयवाचकत्वे स्वीयत्वेन वृतो यो भक्तस्तन्निष्ठो यो महिमा सर्वात्मभावरूप उत्कर्षस्तस्मिन्नित्यर्थो भवति । यदि च स्वपदमात्मवाचकं, तदा स्वरूपात्मके महिम्नीत्यर्थो भवति । स च महिमा सर्वात्मभाव एवेत्युभयथापि तस्य महिम्नो भगवत्स्वरूपात्मकत्वात्स्वपदेन विरुद्ध्यते । नच तस्य स्वरूपात्मकत्वे कथं महिमरूपत्वमिति शङ्कनीयम् । सेतुत्ववदुपपत्तेः तदितरस्य पुरुषोत्तमभिन्नस्य तत्प्रापकत्वाभावादस्य तदात्मकभावस्यैव तत्प्रापकत्वादयमेव सर्वोत्कृष्ट इत्ययमेव महिमपदेनोच्यते । स तु विप्रयोगभावोदये सत्येव सम्यक् परमत्वेन रूपेण व्यभिचारिभावैर्ज्ञातो भवति । ते त्वनियतस्वभावा इति ज्ञापयितुं, त्रिविधाः, तदादेशाऽहङ्कारादेशात्मादेशरूपास्तिस्रो विधास्तस्य भावस्य ज्ञापकाः प्रकारास्तां-

यितुं त्रिविधाः । स एवाधस्तादित्यादिना, आत्मैवेदᳫं सर्वमित्य-न्तेन निरूप्य भूमप्रतिष्ठाधिकरणप्रश्ने यदुत्तरितं स्वे महिम्नीति तमेवानुबध्नाति, स वा एष इत्यनेन तच्छब्दस्य पूर्वपरामर्शित्वा-त् । एवं सति त्वदुक्तमन्यत्राप्रतिष्ठितत्वं चेदिह प्रतिपाद्यं स्यात् तदोक्तरीत्याऽनुबन्धं न कुर्यादहङ्कारादेशादिकं च न कुर्याद्युक्तप्र-श्नोत्तरं स्वाऽन्यवस्त्वभावाच्च क्वापीत्येव वदेत् । तस्मादस्मदुक्त

त्रीन् प्रकारान् स एवाधस्तादित्यारभ्यात्मैवेदं सर्वमित्यन्तेन निरूप्य भूमप्रतिष्ठाप्रश्ने यदुत्तरितं महिम्नीति तं महिमपदोक्तं भावमेवानुब-ध्नाति, स एव एष इति तच्छब्दस्योक्तमहिमपरामर्शित्वात् तस्मिन् भक्ते एवं पश्यन्नित्यादिना तत्कर्मकदर्शनादिकर्तृताबोधनेन तद्भाव-वैशिष्ट्यं बोधयँस्तमेव भावं महिमपदेऽनुषञ्जयति । तथाच, अनुब-ध्नातीत्यनुबन्धः पचाद्यच् । पूर्वं स्वपदेनार्थबलेन वा उक्तं भावम-नुलक्षीकृत्य बध्नाति नियमयतीत्यनुबन्धः, स एष एवं पश्यन्निति-वाक्यस्थः। स इति पूर्वपरामर्शः । आदिपदेन त्रिविधभावबोधकाः प-श्यदादयो धर्माः। स च तदादयश्चेत्यनुबन्धादयः । द्वन्द्वः । तेभ्यो-ऽनुबन्धादिभ्यश्चतुर्भ्यो हेतुभ्यः सर्वात्मभात्र एव दृढीक्रियत इति तस्य न बाध इति सूत्रे योजना । न बाध इति पूर्वसूत्रस्थमत्राप्यनु-षज्जते, वस्तुतस्त्वत्र, प्रज्ञान्तरपृथक्त्ववदिति दृष्टान्तबोधितं भावपृथ-क्त्वमेव साध्यम् । तथाच प्रज्ञान्तरस्य यथा पृथक्त्वमस्ति तथा-ऽस्य भावस्यापि पृथक्त्वम् । यदि हि स्वे महिम्नीत्यत्रान्यत्राप्रतिष्ठि-तत्वादिकमभिप्रेतं स्यात्, न भावपृथक्त्वं तदानुबन्धादिकं न कुर्या-त् । करोति च तदतस्तथेत्यर्थः । पृथक्त्वप्रकारश्चाग्रे भाष्य एव मु-मुक्षुभक्तस्येत्यादिरूपे तद्विवरणं स्फुटः । एवं स्वोक्तं व्यवस्थाप्य प-रोक्तं दूषयन्ति । * एवं सतीत्यादि * । * एवं सतीति * अनुब-न्धादिस्वरूपविचारेणोक्तरीत्या श्रुतेः सामञ्जस्ये सति । एवं सती-त्यस्य तस्मादित्यनेन सम्बन्धः । तथाचैवं श्रुतिसामञ्जस्ये सति त-स्मात् । अनुबन्धकरणाहङ्कारादेशादिकरण-नक्वापीत्यवदनरूपाद्धे-तुत्रयात् तथेत्यर्थः । ननूक्तहेतुत्रयाद् यद्यपि पूर्वपक्ष्यभिमतं बाध्य-ते, तथापि त्रिविधभावैः सिद्धान्त्यभिमतं कथं सिध्यतीत्याकाङ्क्षा-

एव मार्गोऽनुसर्त्तव्यः। आदिपदात् त्रिविधा ये भावा उक्तास्तेषामपि स्वरूपमेवं पश्यन्नेवं मन्वान एवं विजानन्निति क्रमेण यन्निरूपितं तदुच्यते। पूर्वं हृतिविगाढभावेन तदितरास्फूर्त्या तमेव सर्वत्र पश्यति। एतदेवोक्तमेवं पश्यन्नित्यनेन। ततः किञ्चिद्बाह्यानुसन्धानेऽहङ्कारादेशो भवति। स त्वहमेव सर्वतः स्वकृतिसामर्थ्येन तं प्रकटीकरिष्य इति मनुते। करोति च तथा। अत एवान्वेषणगुणगाने कृते ताभिः। एतदेवोक्तमेवं मन्वान इत्यनेन। ततो निरुपधिस्नेहविषयः पुरुषोत्तम आत्मशब्देनोच्यते इति तदादेशो भवति। तदा पूर्वकृतस्वसाधनवैफल्यज्ञानेनातिदैन्ययुक्तसहजस्नेहजविविधभाववान् भवति। तदेतदुक्तमेवं विजानन्नित्यनेन। अत एवोपसर्ग उक्तः। ततोऽतिदैन्येनाविर्भावे सति या अवस्थास्ता निरूपिता आत्मरतिरित्यादिना। अत्रात्मशब्दाः पुरुषोत्तमवाचका ज्ञेयाः। अन्यथौपचारिकत्वं स्यात्। मुख्ये सम्भवति तस्यायुक्तत्वात्। ननु सर्वात्मभावस्यापि मुक्तौ पर्यवसानमुत नेति

यामादिपदोक्तानां स्वरूपं व्याख्यातुं प्रतिजानते। * आदीत्यादि * * तदुच्यत इति * तद् व्याख्यायते। व्याकुर्वन्ति। * पूर्वमित्यादि * * एतदेवेति * एतादृशं दर्शनमेव। * स त्विति * अहङ्कारादेशवांस्तु। तथाचाहङ्कारादेशोक्तरीत्या स्वभाने स्वस्मिन् सामर्थ्यविशेषभानादहमेव सर्वैः प्रकारैः स्वसामर्थ्येन तं प्रकटीकरिष्य इति मनुत इत्यादिकयाऽनया फक्किकयाऽहङ्कारादेशफलमुक्तं प्रामाणिकत्वाय परिचायितं च। ततो निरुपधीत्यादिना चात्मादेशभानफलमुक्तम्। एवं विधात्रयोक्तानां स्वरूपं व्याख्यायाग्रिमग्रन्थं योजयन्ति। * ततोऽतिदैन्य इत्यादि * सूत्रांशमवतारयन्ति। * नन्वित्यादि * नन्वुक्तयुक्तिभिरत्र भवतु सर्वात्मभावस्तथाप्यत्र फलत्वेन सर्वग्रन्थिप्रविमोक्षस्यैवोक्तत्वात्तस्य च, भिद्यते हृदयग्रन्थिरिति श्रु-

संशयनिरासाय दृष्टान्तमाह, प्रज्ञान्तरपृथक्त्ववदिति। मुमुक्षुभक्तस्य स्वेष्टदातृत्वेन भगवद्विषयिणी या प्रज्ञा सा सर्वात्मभाववद्भक्तप्रज्ञातः प्रज्ञान्तरमित्युच्यते । तच्च कर्मज्ञानं तदितरभक्तप्रज्ञाभ्यः पार्थक्येन तदिष्टमेव साधयति । तथा सर्वात्मभाववतो भक्तस्य यत्प्रकारिका भगवद्विषयिणी प्रज्ञा तमेव प्रकारं स भावः साधयति नान्यमिति न मुक्तौ पर्यवसानमित्यर्थः । अत्र व्यासः स्वानुभवं प्रमाणत्वेनाह । दृष्टश्चेति। उक्तभाववतो भक्तस्य प्रभुस्वरूपदर्शनाघ्यतिरिक्तफलाभावोऽस्माभिरेव दृष्ट इत्यर्थः । एतादृशा अनेके दृष्टा इति नैकस्य नाम गृहीतम् । अत्र शब्दमपि प्रमाणमाह । तदुक्तमिति । भगवतेति शेषः। श्रीभागवते दुर्वाससं प्रति, अहं भक्तपराधीन इत्युपक्रम्य, वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथेति । यो हि यद्वशीकृतः स तदिच्छानुरूपमेव करोत्यतो न

———

त्यन्तरस्वारस्येन परावरदर्शनस्य यत्फलं तस्यैवात्र ग्राह्यत्वात्तस्य च, तमेवं विद्वानमृत इह भवतीत्यादिश्रुत्यन्तरेषु मुक्तिरूपस्यैव सिद्धत्वादस्य भावस्यापि मुक्तावेव पर्यवसानमिति फलतो न कश्चिद्विशेषः । अथ, न, तदोक्तस्य फलवाक्यस्य विरोध इत्यस्यापि फलबलेन पूर्वज्ञानविशेषत्वमेवादर्त्तव्यमितिशङ्कानिरासाय दृष्टान्तमाहेत्यर्थः । दृष्टान्तं व्याकुर्वन्ति । * मुमुक्षुभक्तस्येत्यादि * तथाच अन्या प्रज्ञा प्रज्ञान्तरं, तत्कृतं पृथक्त्वं प्राज्ञान्तरपृथक्त्वम् । षष्ठ्यर्थे वतिः । अतः प्राज्ञान्तरफलस्येवैतत्फलस्यापि पृथक्त्वमेवेति नैतस्य बाध इत्यर्थः । नच फलोक्तिविरोधः । दर्शनस्य प्रागेव जातत्वेन अविद्याकामकर्मजन्यहृदयग्रन्थिभेदस्य प्रागेव जातत्वादत्र ततोऽतिरिक्तस्यैव फलस्य सर्वेषाम् एकत्वपर्यन्ताशास्यत्वरूपाणां ग्रन्थीनां प्रकृष्टो विलक्षणो यो मोक्षः पुनस्तदनुद्भवरूपस्तस्याभिप्रेतत्वेनाविरोधात् । अग्रिमशेषद्वयमवतारयन्ति । * अत्र व्यास इत्यादि * । * अत्र शब्दमित्यादि च * । तादृशां मुक्तिपर्यन्तानिच्छां

सायुज्यादिदानं, किन्तु भजनानन्ददानमेव। तेषां मुक्त्यनिच्छा तु, "मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम्। नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम्। स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः। सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जना'इत्यादिवाक्यसहस्रैर्निर्णीयते ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१॥

ननु नान्यत् पश्यतीत्यारभ्य सर्वस्य प्रपाठकस्य सर्वात्मभावनिरूपकत्वोक्तिरनुपपन्ना। अत एवात्मपदानां पुरुषोत्तमपरत्वोक्तिश्च। यतस्तस्य मुक्तावपि कामाभावः प्रतिपाद्यते। अत्र तु तस्य सर्वेषु लोकेषु कामचारो भवतीति श्रुतिः पठ्यते। एवं सति न तन्निरूपणमत्रेति वा वाच्यं, तद्भाववतोऽप्यन्यकामवत्त्वमिति वा। द्वितीयस्योक्तप्रमाणपराहतत्वेनाद्यपक्ष एवाश्रयणीय इति पूर्वपक्षं निरस्यति। नेति। तत्र हेतुमाह। सामान्यादप्युपलब्धेरिति। त-

---

निगमयितुमाहुः। * तेषां मुक्त्यनिच्छेत्यादि *। तथाच ज्ञानमार्गीयभगवद्दर्शने हृदयग्रन्थिभेदनं नानाविधवृत्त्यनुदयरूपम्। अत्र तु सर्वग्रन्थीनां प्रविमोक्षो भगवद्विषयकनानावृत्त्युदयेऽपि एकत्वपर्यन्तानिच्छारूप इति दर्शनभेदात् फलभेदस्तत्क्रतुन्यायादप्युपपन्न इत्यर्थः ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ सूत्रमवतारयन्ति। * नन्वित्यादि *। * प्रतिपाद्यत इति *। श्रीभागवते कपिलादिवाक्यैः प्रतिपाद्यते। * अत्र त्विति * श्रौते सनत्कुमारवाक्ये तु। * एवं सतीति * स्मृतिश्रुत्योर्विरोधे सति। * उक्तप्रमाणपराहतत्वेनेति *। उक्तस्मृतिवाक्यपराहतत्वेन। व्याकुर्वन्ति। * नेतीत्यादि *। * नेति *। यदुक्तमत्र सर्वात्मभावो नोच्यत

त्समानधर्मयोगादपि तत्प्रयोगः श्रुतावुपलभ्यतेऽनेकशो यतः । प्रकृतेऽपि विविधानां लोकानां विविधसुखप्रधानत्वाद्भगवत्सम्बन्धिषु सर्वेषु सुखेषु कामचारो भवतीति श्रुतेरर्थो ज्ञेयः । ननु यथाश्रुत एवार्थोऽस्तु तत्राह । न हि लोकापत्तिरिति । सर्वात्मभाववत इति प्रकरणाद्, नान्यत् पश्यतीत्यादिधर्मविशिष्टस्यात्मनः प्राणादिसर्ववतो लोकसम्बन्धो युक्तिसहोऽपि नेति ज्ञापनाय हिशब्दः । किञ्च । एतदग्रे, न पश्यो मृत्युं पश्यतीति श्रुत्या यथा मृत्युनिषेधः क्रियते तथात्मन एवेदꣳ सर्वमितिश्रुत्यैवकारेणात्मातिरिक्तव्यवच्छेदः क्रियत इति मृत्युवल्लोकोऽपि न सम्बध्यत इत्याह । मृत्युवदिति । तत्र रोगादीनामपि दर्शननिषेधे सत्यपि मृत्योरेव यन्निदर्शनमुक्तं तेन भक्तानां लोकान्तरसम्बन्धस्तत्तुल्य इति ज्ञाप्यतेऽत एव, नोत दुःखमिति दुःखसामान्यनिषेधोऽग्रे कृतः॥५१॥

इति, तन्न युक्तमित्यर्थः । हेतुं विवृण्वन्ति । * तदित्यादि * । *अनेकश इति * । यथा, अजामेकामित्यत्र, सृष्टीरुपदधातीत्यादौ च । तथाच यत एवम् अतः प्रकृते कामचारवाक्येऽपि विविधानां विविधसुखप्रधानत्वात्तेन साधर्म्येण भगवत्सम्बन्धिषु पूर्वोक्तेषु रतिक्रीडादिषु सुखरूपेषु पदार्थेषु लोकपदप्रयोग इति तेषु कामचारो भवतीति श्रुतेरर्थो ज्ञेयो न नामादिलोकपरः । भगवत्सम्बन्धिनस्तु सर्वात्मभाववत इष्टा, एतद्भिन्नास्तु मुक्तिपर्यन्त नेष्टा इति नैतेनात्र सर्वात्मभावाभावः शक्यशङ्क इत्यर्थः । यथाश्रुतार्थस्याग्रहणे युक्तिबोधनाय दृष्टान्तं व्याकुर्वन्ति । * किञ्चेत्यादि * । * अतिरिक्तव्यवच्छेद इति * । प्रापञ्चिकसर्वव्यवच्छेदः । सूत्रे मृत्युवदिति षष्ठ्यर्थे वतिः । तथाच मृत्योरिव लोकानामप्यापत्तिर्नेत्यर्थः । अन्यद्विहायैतस्यैव कथनेन यत् सूच्यते तत्, तत्र गमकं चाहुः । * तत्रेत्यादि * ॥ ५१ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्व-
ऽनुबन्धः ५२ ॥

अत्र हेत्वन्तरमाहाऽस्मिन्नेव श्लोके, सर्वमाप्नोति सर्वश इति परेण पदेन शब्दस्य श्रुतिवाक्यस्यात्मन एवेदꣳ सर्वमिति यत् पूर्वोक्तं श्रुतिवाक्यं तद्विधतैव प्रतीयत इति न लोकसम्बन्धो वक्तुं शक्य इत्यर्थः। नन्वात्मन एवेदꣳ सर्वमिति यत् पूर्वं श्रुतिवाक्यं तेनैवैतदर्थलाभे पुनस्तदुक्तिर्नोचितेत्याशङ्कायां तत्र हेतुमाह। तु-शब्दः शङ्कानिरासे। भूयस्त्वाद्धेतोः। उक्तेऽर्थे हेतूनां बाहुल्ये तद्दाढर्यं भवतीत्याशयेनोक्तार्थस्यैव श्लोकेनानुबन्धः कृत इत्यर्थः। अथवा भूयःपदमाधिक्यार्थकम्। तथाच स्वकृतसाधनसाधित-फलापेक्षया स्वयमुद्यम्य भगवता साधितफले निरवधिरुत्कर्ष इति

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः॥ एतत्सूत्रप्रयोजनमाहुः। * अत्रेत्यादि *। लोकापत्यभावरूपस्यार्थस्य ग्राह्यत्वे, न पश्य इति श्लोकस्थं हेत्वन्तरमाहेत्यर्थः। तमेव हेतुं सूत्रव्याख्यानेन व्याकुर्वन्ति। * सर्वमित्यादि *। एतच्छ्लोकस्येति परेण तुरीयेण सर्वमाप्नोति सर्वश इत्यनेन पादेन, शब्दस्य सर्वेषु लोकेषु कामचारो भवतीत्यस्य, श्रुतिवाक्यस्य ताद्विध्यम्, आत्मन एवेदꣳ सर्वमित्येवं रूपं यत् श्लोकात् पूर्वं श्रुतिवाक्यं तद्विधता तत्समानार्थकत्वमेव प्रतीयते।एतस्य पश्यश्लोकस्य तदेष श्लोक इत्यनेन पूर्वोक्तसर्वार्थसंग्राहकतयोक्तत्वात् पूर्वं चात्मन एव सर्वस्य निगमितत्वात् सर्वैः प्रकारैरात्मन एव पूर्वोक्तं सर्वमाप्नोतीत्यर्थस्य सिद्धेर्न प्रापञ्चिकश्लोकसम्बन्धो वक्तुं शक्य इत्यर्थः। सूत्रशेषमवतार्य व्याकुर्वन्ति। शब्द इत्यादि *। * अनुबन्धः कृत इति *। अनु पूर्वोक्तं लक्ष्यीकृत्य बध्यते सम्बन्ध्यत इत्यनुबन्धः स कृतः।सामासव्याससाधारणस्य लोके विदुषामिष्टत्वादनेन श्लोकेन कृत इत्यर्थः। उक्तरीत्या व्याख्याने अपुष्टार्थत्वमित्यरुच्यार्थान्तरमस्याहुः। * अथवेत्यादि *।

ज्ञापनाय पुनः श्लोकेन तथेत्यर्थः ॥ ५२ ॥

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

उक्तेऽर्थे श्रुत्यन्तरसम्मतिमप्याह । एके शाखिनस्तैत्तिरीयाः शरीरे भक्तशरीरे हृदयाकाश इति यावत् तत्रात्मनो भगवतो भावादाविर्भावात् तेन सह सर्वकामोपभोगं वदन्तीं श्रुतिं पठन्ति । सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति । अत्रोपक्रमे ब्रह्मविद् आप्नोति परमिति श्रुतिरक्षरब्रह्मविदः परब्रह्मप्राप्तिं सामान्यत उक्त्वा विशेषतः कथनार्थं, तदेषाऽभ्युक्तेति वाक्यं तद् ब्रह्म

---

* तथेति * । अनुबन्धः ॥ ५२ ॥

एक आत्मनः शरीरे भावात्॥सूत्रप्रयोजनमुक्त्वा व्याकुर्वन्ति । * एके इत्यादि * । भाष्यमत्र निगदव्याख्यातम् । एवमनेनाधिकरणेनाविहितभक्तिरूपस्य सर्वात्मभावस्य स्वरूपं तस्य सर्वेभ्यः साधनेभ्य उत्कृष्टत्वं तत्फलं च निर्द्धारितम् ॥

शाङ्करे भास्करीये च भाष्ये इदं नवसूत्रमेकमधिकरणम् । तत्र चाग्निरहस्ये, नैव वा इदमग्रे सदासीदित्यस्मिन् ब्राह्मणे मनोऽधिकृत्य, षड्विंशतं सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चित इति यद्वाक्यं तद्विचार्य तेषामग्नीनां न क्रियामयत्वं किन्तु विद्यामयत्वमेवेति सिद्धान्तितम् ॥ ५३ ॥

रामानुजाचार्यमते त्विदमेकसूत्रम्। तत्र, तैत्तिरीयमहानारायणोपनिषत्स्थः, सहस्रशीर्षं देवमिति सर्वोऽनुवाको विषयवाक्यम् । तत्र किं पूर्वानुवाके, दहरं विपापमिति यद्दहरोपासनं विहितं तद्विषयो निर्द्धार्यत उत सर्ववेदान्तोदितपरविद्योपासनानां विषय इति संशये, दहरोपास्यविशेष एव निर्द्धार्यते प्रकरणात् । पूर्वस्मिन्ननुवाके दहरं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्। तत्रापि दहरं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यमिति दहरविद्या प्रकृता । अस्मिंश्चानुवाके, पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखमि-

प्रतिपाद्यत्वेनाभिमुखीकृत्यैषा वक्ष्यमाणा ऋक् परब्रह्मविद्भिरुक्तेत्यु- क्त्वैव मुक्तवती सत्यं ज्ञानमिति । परब्रह्मस्वरूपमनुभवैकवेद्यं न शब्दादिभिर्वेद्यमिति ज्ञापनाय स्वयं तत्तत्त्वप्रतिपादिकाप्यन्यमुखेन उक्तवती । अत्र ब्रह्मणा सह सर्वकामोपभोग उक्त इत्येतदेकवा- क्यतायै सर्वेषु लोकेषु कामचारो भवतीति श्रुतेरप्युक्त एवार्थो मन्तव्यः ॥ ५३ ॥

त्यादिना हृदयपुण्डरीकाभिधानम् । एतस्य नारायणनुवाकस्य दहर- विद्योपास्यनिर्द्धारणार्थत्वमुपोद्बलयतीत्येवं प्राप्ते । उच्यते । लिङ्गभूयस्त्वादिति । अस्यानुवाकस्य निखिलपरविद्योपास्यविशे- षनिर्द्धारणार्थत्वे बहूनि लिङ्गानि दृश्यन्ते । तथाहि । परविद्यासु अक्षरशिवशम्भुपरब्रह्मपरज्योतिःपरतत्त्वपरमात्मादिशब्दनिर्दिष्टमुपा- स्यं वस्त्विहैतै रेव शब्दैरनूद्य तस्य नारायणत्वं विधीयते । भूयसीषु विद्यासु श्रुतावनूद्य नारायणाभिधानभूयस्त्वं नारायण एव सर्ववि- द्यासूपास्यमस्थूलत्वादिविशेषितानन्दगुणकं परं ब्रह्मेति विशेषनिर्णये भूयो बहुतरं लिङ्गं भवति । लिङ्गशब्दश्चिह्नपर्यायः । चिह्नभूतं वाक्यं बहुतरमस्तीत्यर्थः । तद्धि प्रकरणाद् बलीय इति पूर्वतन्त्रे सिद्धम्। यत्पुनः, पद्मकोशप्रतीकाशमित्यादि वचनमस्य दहरविद्याशेषत्वमु- पोद्बलयतीत्युक्तम् । तन्न । लिङ्गात्मकेन बलीयसा प्रमाणेन सर्ववि- द्योपास्यनिर्द्धारणार्थत्वेऽवधृते सति दहरविद्यायामपि तस्यैव ना- रायणस्योपास्यत्वमित्यर्थकतया तद्वचनोपपत्तेः । नच सहस्रशीर्षं- मित्यादिद्वितीयानिर्देशेन पूर्वानुकोदितोपासनासम्बन्धः शङ्कनीयः । तस्मिन् यदन्तस्तदुपासितव्यमित्युपासिगतेन कृत्यप्रत्ययेन उपासि- कर्मणोऽभिहितत्वात्तदुपास्ये द्वितीयानुपपत्तेः । विश्वमेवेदं पुरुषः, तत्त्वं नारायणः पर इत्यादि प्रथमानिर्देशाच्च प्रथमार्थे द्वितीया वे- दितव्या । अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराडिति निर्देशैः सर्वस्मात् परो नारायण

एव सर्वत्रोपास्य इति निर्णीयमानत्वाच्च प्रथमार्थे द्वितीयेति निश्चीयत इत्युक्तम् ॥

मम त्वत्रान्यदपि प्रतिभाति। सहस्रशीर्षादिषु त्रिषु मध्यममन्त्रे तुरीयपादे यद्, उपजीवतीति क्रियापदं तत्र कर्मत्वेन द्वितीयान्तपदान्यन्वयं प्राप्नुवन्ति। तन्मन्त्रारम्भे विश्वत इत्यनेन यज्जगद्रूपं विश्वमुक्तं तदिदं विश्वमेव पुरुषः क्षरः परमं विश्वं नारायणं हरिमुपजीवतीत्येवं पदसम्बन्धे बाधाभावात्। एवमन्यान्यपि पदानि तत्रैव योजनीयानि। बाहुलकाश्रयापेक्षया व्यवहितान्वयपक्षस्य लघुत्वादिति। अग्रे तु तैरष्टसु सूत्रेषु शङ्कराचार्याद्युपन्यस्तैव विद्या विचारिता ॥

तन्मतचौरः शैवस्तु, तद्वदेवैकसूत्रेऽस्मिन्नधिकरणे, महानारायणोपनिषत्स्थं, सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्रः सन्महो नमो नमः। विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु इति मन्त्रमुदाहृत्य तदग्रिमं, कद्रुद्रायेति मन्त्रं त्यक्त्वा, नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतये उमापतये पशुपतये नमो नम इति मन्त्रं चाग्र उदाहृत्य, अत्र किं सर्वात्मत्वादिभिरुमापतित्वेन च श्रूयमाणं परं ब्रह्म पूर्वप्रकृते सवितृमण्डलविद्यामात्र उपास्यमुत सर्वासु परविद्यास्विति सन्देहे, प्रकरणाद्यप्राप्तिमुद्भाव्य परविद्यालिङ्गसबन्धवाक्यभूयस्त्वात् सर्वासु परविद्यास्विति सिद्धान्तयित्वा, सर्वो वै रुद्र इति वाक्ये सर्वं खल्विदं ब्रह्मेति शाण्डिल्यविद्योपास्यलिङ्गं, पुरुषो वै रुद्र इत्यत्र पुरुषसूक्तोपकोसलविद्याद्युपास्यलिङ्गं, सदित्यत्र सद्विद्योपास्यस्य, मह इति तद् ब्रह्म अङ्गान्यन्या देवता इति व्याहृतिविद्योपास्यस्य, कद्रुद्रमन्त्रे शंतमꣳ हृदेति हृदयद्योतनाद्दहरविद्योपास्यस्य हिरण्यबाहव इति हिरण्यरूपत्वं सवितृमण्डलोपास्यस्य, उमापतय इति सर्वविद्योपास्यस्येत्यूचिवान्। तन्मन्दम्। आद्यायां परविद्यालक्षणाभावात्। अथ परा यया तदक्षरमधिगम्यत इत्यक्षरप्रापकत्वस्य तद्गमकत्वस्य वा तल्लक्षणत्वात्। अस्यास्तु सर्वप्रतीकतया तत्क्रतुन्यायात् क्षरप्रापकत्वेनाक्षराप्रापकत्वात् सर्वस्य ब्रह्मकारणकत्वमात्रभावनेनादृश्यत्वादिलक्षणकाक्षराज्ञापकत्वाच्च। द्वितीयेऽपि वाक्ये पुरुषशब्दस्य गौणत्वात्। 'भगवानिति शब्दोऽयं तथा पुरुष

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥५४॥

ननु ब्रह्मविदाप्नोति परमिति श्रुत्याक्षरब्रह्मविदः परब्रह्मप्राप्तिरुच्यते । तत्रेतरसाधनसापेक्षं ब्रह्मज्ञानं परं प्रापयत्युत तन्निरपेक्षमिति भवति संशयः । अत्र श्रुतौ तन्मात्रोक्तेरितरनिरपेक्षमेव तत्तथेति पूर्वः पक्षः । सिद्धान्तस्त्वेवं सति ज्ञानमार्गीयाणामपि परप्राप्तिः स्यात् । सा त्वनेकप्रमाणबाधितेति पूर्वमवोचाम ।

इत्यपि। निरुपाधी च वर्त्तते वासुदेवे सनातने' इति विष्णुपुराणवाक्येन । 'स एव वासुदेवोऽयं साक्षात्पुरुष उच्यते । स्त्रीप्रायमितरत् सर्वं जगद् ब्रह्मपुरःसरम् । स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः । प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद्वैभवादपी'ति नारसिंहवाक्याभ्यां च पुरुषशब्दस्य भगवत्येव मुख्यवृत्तत्वेन तदभिमते शिवे तथात्वस्य बाधितत्वात् । अत एव तृतीयवाक्येऽपि सन्मह इत्येकं पदं सतो महस्तेजः सन्मह इति चैकपद्ये तदर्थस्तेन तयोरपि पदयोः सद्विद्याव्याहृतिविद्योपास्यलिङ्गत्वाभावाद्, हिरण्यबाहव इत्यस्य सवितृमण्डलोपास्यत्वगमकताण्यक्षिद्वित्वलिङ्गविरुद्धेत्यस्याऽन्तस्तद्धर्माधिकरण एवास्माभिरुपपादितत्वात् । उमापतिपदस्य कस्यामपि निसन्दिग्धायां परविद्यायामदर्शनाच्च । इदं यथा तथा मया ब्रह्मस्ताख्ये वाद उपपादितत्वान्नात्र विशिष्योच्यते । दहरविद्योपास्यत्वं तु क्रममुक्तौ प्राप्यविभूतिमध्येऽपि शिवस्य सत्त्वादनुमोदामह इति दिक् ॥ ५३ ॥ १७ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ पूर्वाधिकरणान्तिमसूत्रे तैत्तिरीयश्रुतिः सम्मतित्वेन प्रदर्शितेति प्रसङ्गात्तदर्थविचाराद्याधिकरणान्तरमारभत इत्याशयेन तद्विषयादिकं वदन्तस्तदवतारयन्ति । * ननु ब्रह्मेत्यादि * । प्रकृते सहकार्यनुक्तिः केवलाक्षरविदां तद्प्राप्तिदर्शनं च सन्देहबीजम् । पूर्वपक्षसिद्धान्तौ तु स्फुटौ । *सा त्वनेकेत्यादि * । ज्ञानमार्गीयाणां परप्राप्तिस्तु, यमेवैष वृणुते, नायमात्मा बलहीनेन, भक्त्या मामभिजानाति, भक्त्याहमेकया ग्राह्य

किञ्च ज्ञानशेषभूतब्रह्मापेक्षया फलात्मकस्य परस्य मुख्यत्वात्तदेषाऽभ्युक्तेति श्रुतिस्तदेव प्रतिपाद्यत्वेनाभिमुखीकृत्य ऋगुक्तेत्याह । तेन तत्र ब्रह्मपदे पुरुषोत्तमपरे ज्ञायेते । तथाच गुहायां यद्याविर्भूतं परमं व्योम पुरुषोत्तमगृहात्मकमक्षरात्मकं व्यापि वैकुण्ठं भवति तदा तत्र भगवानाविर्भवतीति तत्प्राप्तिर्भवतीत्युच्यते । यो वेद निहितं गुहायां परमे व्योमन्नित्यनेन । तथाच ज्ञानिनां गुहासु परमव्योम्नो व्यतिरेक एव तत्र हेतुमद्भावाभावित्वादिति । यमेवैष वृणुत इति श्रुतेर्वरणाभावे भगवद्भावस्यासम्भवाज्ज्ञानिनां तथा वरणाभावाद्भगवद्विषयको भावो न भावीति तथेत्यर्थः।ननु ज्ञानविषयत्ववदाविर्भावोऽप्यस्तु । किञ्च । तदतिरिक्तमाविर्भावमपि न पश्याम इत्याशङ्कायामाह । न तूपलब्धिवदिति । उपलब्धिर्ज्ञानं, तद्वद्गुहायामाविर्भावो न भवतीत्यर्थः । यस्मै भक्ताय यल्लीला-

---

इत्यादिप्रमाणबाधितेति, इतः पूर्वाधिकरणेष्ववोचामेति नात्र सिद्धान्ते सन्देग्धव्यमित्यर्थः । ननु भवत्वेवं तथाप्ययमर्थः प्रकृतश्रुतेः सूत्राच्च कथं लभ्यत इत्याकाङ्क्षायां पूर्वं श्रुतेस्तल्लाभमाहुः । * किञ्चेत्यादि * । * तेन तत्रेति * तेनास्यामृचि। * ज्ञायेते इति *। आनन्दमयाधिकरणद्वितीयवर्णकस्थेन, अथवा अक्षरे ब्रह्मण्यानन्दात्मके इत्यादिव्याख्यानान्तरेण ज्ञायेते । ऋचि, परमं व्योमेति पदद्वयं ज्ञानशेषभूतब्रह्मपरमित्याशयेन ऋक्सिद्धमर्थमाहुः । * तथाचेत्यादि * । * उच्यत इति * अस्यामृच्युच्यते । तथाचास्यां श्रुतौ गुहायां परमे व्योमनि परप्राप्तिरुक्ता । परमव्योमाविर्भावस्तु न ज्ञानमार्गीयगुहायाम् । अतः परमव्योमपदादत्र सोऽर्थो लभ्यत इत्यर्थः । सूत्रात्तद्विवृण्वन्ति । * तथाचेत्यादि * । * व्यतिरेक इति * अभावः । सूत्रशेषमवतारयन्ति । * ननु ज्ञानेत्यादि * । * ज्ञानविषयत्ववदिति * अक्षरस्य ज्ञानविषयत्ववत् । * तदतिरिक्तमिति * ज्ञानविषयत्वातिरिक्तम् । * व्याकुर्वन्ति * । * उपलब्धिरित्यादि *। अनाविर्भावे हेतुं स्फुटीकुर्वन्ति । * यस्मा इत्यादि * ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ५ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड २)	५	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा। श्रीमदन्नंभट्टप्रणीता खण्डानि ९	९	०
रसमञ्जरी। व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख०	१०	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्विरचिता खण्डे २	२	०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३	३	०
श्रीमदणुभाष्यम्। श्रीश्रीवल्लभाचार्यविरचितम। गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्यव्याख्या समेतम खण्डानि १२	१२	०
तत्त्वशेखरः। श्रीभगवल्लोकाचार्यप्रणीतः। तथा—तत्त्वत्रयचुलुकसंग्रहः। कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः।	१	०
श्रीभाष्यवार्तिकम्। श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्रतिपादनपरम्।	१	०

ब्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस

BENARES SANSKRIT SERIES;

A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
No. 127.

श्रीमदणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितभाष्य-
प्रकाशाख्यव्याख्यासमेतम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितम् ।

ANU BHÂSHYA,

ON BRAHMASÛTRA BY ŚRÎ VALLABHÂCHÂRYÂ,
With the Commentary called Bhâshya Prakâśa,
By Goswâmi Śrî Purushottamjee Mahârâj.
EDITED BY RATNA GOPÂL BHATTA.
Fasciculus XIII

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhambâ Sanskrit Book Depôt.

Printed at the Vidyâ Vilâs Press,
BENARES.

1906.

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वासिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

विशिष्टं स्वरूपमनुभावयिता प्रभुर्भवति तद्गुहायां तल्लीलाश्रय-
भूतमक्षरस्वरूपं वैकुण्ठलोकवदाविर्भावयतीति नोक्तशङ्कालेशोऽपि।
यत्र पुरुषोत्तमस्य चाक्षुषत्वं तत्र ततोऽधःकक्षस्य तस्य तथात्वे
का शङ्का नाम। एतदुपपादितं पूर्वं, विद्वन्मण्डने च। ननु ज्ञानि-
ज्ञानविषयभक्तगुहाविर्भूताक्षरयोर्भेदोऽस्ति, न वा। नाद्यः। माना-
भावादेकत्वेनैव सर्वत्रोक्तेः। न द्वितीयः। निरवयवस्य क्वचि-
ल्लोकरूपत्वातद्रूपत्वाभ्यामेकत्वानुपपत्तेरिति चेन्मैवम्। लोकरूपत्व-
स्य पश्चाद्भावित्वे हीयमनुपपत्तिर्न त्वेवं, किन्त्वक्षरस्वरूपमेव तथेति
श्रुतिराह, अम्भस्यपारे भुवनस्य मध्य इत्युपक्रम्य तदेव भूतं त-
दु भव्यमा इदं तदक्षरे परमे व्योमन्। एतदग्रे च, यमन्तः समुद्रे

लोकवदिति*लोकयुक्तम्। तथाच ज्ञानमार्गीयान् प्रति तादृशतदनु-
भावनेच्छाया अभावान्न परमव्योमात्मकाक्षरस्वरूपस्याविर्भावः। स
चाविर्भावो दर्शनविषयत्वयोग्यतारूपो, न तु ज्ञानविषयत्वमात्रम्।
अतो भगवतस्तथेच्छाभावेन केवलाक्षरज्ञानिनो वरणात्मकसहकारि-
शून्यत्वान्न परप्राप्तिरिति ज्ञानिभक्तस्यापि वरणात्मकसहकारिसापे-
क्षमेव ज्ञानं परप्राप्तिजनकमिति सिद्धान्तो निर्विचिकित्स इत्यर्थः।
ननु श्रुतावक्षरस्यादृश्यत्वादिगुणकत्वस्योक्तत्वात् समन्वयाध्याये त-
था निर्णीतत्वाच्च नेदं साधीय इति शङ्कायामाहुः। * यत्रेत्यादि *
तथाच वरणेन पुरुषोत्तमस्वरूपस्य चाक्षुषत्वं वरणश्रुतौ, भक्त्या त्व-
नन्ययेति गीतास्मृतौ चोक्तम्। अक्षरस्यापि कश्चिद्धीरं इति श्रुतावु-
क्तम्। तच्च पुरुषोत्तमादधःकक्षमतः साधनविशेषसम्पत्तौ कैमु-
तिकन्यायावतारात् सर्वादृश्यतायामपि दृश्यत्वे विरोधाभावान्न स-
न्देह इत्यर्थः। अत्राक्षरस्वरूपविचारेण चोदयति। * नन्वित्यादि *
तथाच शब्दापेक्षयार्थस्य बलिष्ठत्वादर्थस्वरूपविचारे पूर्वोक्तमनुप-
पन्नमित्यर्थः। तत्र समादधते। * मैवमित्यादि * । * निर्णीतमि-
त्यन्तेन * । * इयमिति * उक्तविकल्परूपा। * न त्वेवमिति * न
तु रूपभेदः। शेषमुत्तानार्थम्। तथाच स्वरूपस्योक्तरूपत्वाद् भग-

कवयो वयन्ति यदक्षरे परमे प्रजा इत्यादिरूपा । स्मृतिरपि, "परस्तस्मात्तु भावोऽन्योऽव्यक्तो व्यक्तात् सनातनः । यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति । अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम" इत्यादि तु गीतासु । श्रीभागवतेऽपि, "दर्शयामास लोकं स्वं गोपानां तमसः परम् । सत्यं ज्ञानमनन्तं यद् ब्रह्म ज्योतिः सनातनम् । यद्धि पश्यन्ति मुनयो गुणापाये समाहिता" इति दशमे। द्वितीये च, तस्मै स्वलोकं भगवान् समाहितः सन्दर्शयामासेत्युपक्रम्य कालत्रिगुणमायासम्बन्धराहित्यमुक्त्वा भगवत्पार्षदानुक्त्वा विमानप्रमदा उक्त्वा श्रीरुक्ता ।तथाच श्रुतिस्मृत्येकवाक्यतायां तादृक्स्वरूपमेवाक्षरमिति निर्णयो भवति । एवं सति सच्चिदानन्दत्वदेशकालापरिच्छेदस्वयम्प्रकाशत्वगुणातीतत्वादिधर्मवत्त्वेनैव ज्ञानिनामक्षरविज्ञानम् । भक्तानामेव पुरुषोत्तमाधिष्ठानत्वेन तथेति ज्ञेयम् । मल्लानामशनिरिति श्लोकोक्तरीत्या पुरुषोत्तमस्येव । प्रभुणा ये यथा विचारिताः सन्ति ते तथा भवन्तीति तद्विचार एव सर्वेषामधिकाररूप इति कृतप्रयत्नापेक्षस्त्वित्यत्र निर्णीतम् ॥ ५४ ॥

अस्मिन्नर्थे कैमुतिकन्यायकथनार्थं निदर्शनत्वेनोत्तरं पठति ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥५५॥

यागे तत्तदृत्विङ्नियतकर्त्तव्यान्यन्वाधानादीन्यङ्गानि । तद्भावबद्धाः सर्व एवर्त्विजो यजमानेन । अवबन्धनं नामाध्वर्युं त्वां

वदिच्छयाविकारभेदेन तस्य तस्य तथा भानाच्च काऽप्यनुपपत्तिरित्यर्थः ॥ ५४ ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम ॥ सूत्रमवतारयन्ति । * अस्मिन्नित्यादि * । व्याकुर्वन्ति । * याग इत्यादि * । *

वृणे होतारं त्वां वृण उद्गातारं त्वां वृण इत्यादिरूपं वरणमेवा-न्यथा सर्वकर्मविदुषां तत्तत्कृतिपटूनामेकत्राधिकारो, नान्यत्रेति नियमो न स्यात्। तस्य तस्य तथा वरणे तु यजमानेच्छैव हेतुः। ते च तदा न सर्वासु शाखासु विहितान्यङ्गानि कर्त्तुं सर्वेऽपि शक्ताः, किन्तु यजमानवरणनियमिता एव तथा। तत्र हेतुमाह। हि यतः कारणात् प्रतिवेदं नियमितान्यङ्गानि, हौत्रमृचाऽऽध्वर्यवादि यजुषौद्गात्रं साम्नेति। तथाचालौकिके वैदिके कर्मणि जीवेच्छापि नियामिका भवति यत्र तत्र किमु वाच्यं प्रतिरोमकूपं सावकाशममितब्रह्माण्डस्थितिमतस्तदीशितुरिच्छैव नियामिका तत्तत्साधनफलसम्पत्ताविति ॥ ५५ ॥

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥

ननु पूर्वं कर्मज्ञाननिष्ठानामपि पुंसामग्रे भक्तिमार्गीयत्वं यत्र भवति तत्र तथैव भगवद्वरणमिति हि सिद्धान्तः। ऋत्विजस्त्वेकस्मिन् याग एकत्र वृतस्य नापरत्रापि तथेति विरुद्धो दृष्टान्त इत्यरुच्या निदर्शनान्तरमाह। यथैक एव कश्चिन्मन्त्रो बहुषु कर्मसु

इत्यादिरूपवरणमिति*तत्तत्कर्मकर्तृतानियमनरूपं सम्भजनं, विभाग इति यावत्। शेषं स्फुटम्। तथाचाक्षरस्य तत्सर्वरूपत्वेऽपि ज्ञानिषु तथानाविर्भावे भक्तहृदये च तथाविर्भावे उक्तरीत्या कैमुतिकन्यायाद्भगवतस्तेषां तेषां तादृक्तादृक्फलदित्सैव नियामिकेत्यर्थः ॥ ५५ ॥

मन्त्रादिवद्वाऽविरोधः ॥ सूत्रमवतारयन्ति। * नन्वित्यादि* तथैव भगवद्वरणमिति। तत्तदनन्तरमेतं भक्तिमार्गे प्रवेशयिष्यामीत्येवं विचारितत्वात्तत्तदनन्तरमेव भगवद्वरणम्। ऋत्विज इति * षष्ठी। * नापरत्रापि तथेति * नान्यकार्यो विनियोगः। सूत्रं व्याकुर्वन्ति। * यथैक एवेत्यादि * उदाहरणं त्वाद्यस्य। देवस्य त्वा सवितुः प्रसव इत्यादिरनुषङ्गमात्रः। द्वितीयस्य सूर्योपस्थाने मन्त्रे-

सम्बध्यते कश्चिद् द्वयोः कश्चिदेकत्रैव तथैव विधानात् तथात्रापीत्यर्थः । आदिपदात् कर्मोच्यते । यत्र काम्येनैव नित्यकर्मनिर्वाहस्तत्र कामितार्थसाधकत्वे प्रत्यवायपरिहारेऽप्येकमेव तदुपयुज्यते । यथाच सर्वतोमुखेऽनेकहोतृप्रवरेऽध्वर्युप्रवरे च गृह्यमाणे, देवाः पितर इत्यादिना यजमानकर्तृकाऽनुमन्त्रणमेकमेव सर्वत्र सम्बद्ध्यते, तथैव विधेस्तथात्रापि तावद्विधं यदेकमेव वरणं तेन तत्तन्निष्ठाऽनन्तरं भक्तिनिष्ठेति न दृष्टान्तविरोध इत्यर्थः। अथवा ॐमित्युदाहृत्यैव मन्त्राणामुच्चारणान्मन्त्रादिरोङ्कारः । स यथा ब्रह्मात्मकत्वेनैक एव सर्वमन्त्रेषु सम्बद्ध्यते। तथा वरणमपीति तथेत्यर्थः। यद्यपीतरनिष्ठानन्तरभूतभक्तिनिष्ठावतोऽपि वरणं तथाभूतमेकमेवेति नोक्तदोषस्तथाऽप्युत्कृष्टमार्गे वृतस्यनीचकक्षापादनमनुचितमिति मत्वा पक्षान्तरमुक्तम् । वस्तुतस्तु साधनमर्यादया यत्र भक्तिर्दित्सिता तत्र तथेति नानुपपत्तिः काचित् ॥ ५६ ॥

हादिनिवारणे च गायत्रीमन्त्रः। तृतीयस्य तेजस्वीभूयासमिति । एवमन्यदपि द्रष्टव्यम् । कर्मोदाहरणं, ज्योतिष्टोमादि, जयन्तीव्रतादि च द्रष्टव्यम् । कर्मोदाहरणमन्यदप्याहुः । * यथाचेत्यादि * सर्वतोमुखः कश्चिद्यागविशेषः । * तावद्विधमिति * क्रमिकतत्तत्प्रकारकम् । मन्त्रादिपदं तद्गुणसंविज्ञानबहुव्रीहिणा व्याख्याय षष्ठीसमासपक्षेण प्रकारान्तरमाहुः । * अथवेत्यादि * ननु पूर्वव्याख्याने को दोषो येन व्याख्यानान्तरमत्रोक्तमित्याकाङ्क्षायां तदुक्तमङ्गीकृत्य सम्भावितं दोषमाहुः । * यद्यपीत्यादि * । * तथाभूतमिति * यादृशं केवलभक्तिमार्गीयस्य तादृशम् । * पक्षान्तरमिति * ॐकारनिदर्शनपक्षः । तथाच ब्रह्मात्मकत्वेनोत्कृष्टस्याप्योङ्कारस्य तत्तन्मन्त्रसाङ्गत्वाय तत्तत्सम्बन्धो न दोषावहस्तथा वृतस्यापि तत्सम्बन्धो मर्यादामार्गरक्षार्थत्वान्न दोषावह इत्यर्थः । युक्त्या समाधाय सिद्धान्तेन समाधानमाहुः । * वस्तुत इत्यादि * तथाच भगवदिच्छावि-

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥५७॥

ननु सुखस्वरूपजिज्ञासायां यो वै भूमा तत् सुखमित्युक्तं भूमस्वरूपजिज्ञासायां, यत्र नान्यत् पश्यतीत्यादिना तद्यन्निरूपितं तत्सर्वात्मभावस्वरूपमिति यदुक्तं तन्नोपपद्यते। भूम्नो हि सुखरूपतोच्यते। सर्वात्मभावे तु विरहभावे दुःसहदुःखानुभवः श्रूयते। तेन मोक्षसुखमेव यो वै भूमेत्यादिनोच्यते। यो वै भूमा तदमृतमिति वाक्याच्च। अग्रे च, स वा एष एवं पश्यन्नित्याद्युक्त्वा तस्य सर्वेषु लोकेषु कामचारो भवतीति फलमुच्यते। तच्च मोक्षानन्तरमसम्भव्यतः स भावो, मोक्षो वात्रोच्यत इति संशयः। तत्र कामचारोक्तेर्मुक्तिपूर्वदशायां तन्माहात्म्यनिरूपणार्थत्वादमृतशब्दाच्च मुक्तिरेव भूमपदेनोच्यत इति पूर्वपक्षः। तत्र भूमशब्देन स

चारादेवानुपपत्तिपरिहारो, निदर्शनं तु वादिनिग्रहायेति सूत्रकाराशय इत्यर्थः ॥ ५६ ॥ १८ ॥

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ प्रासङ्गिकं विचार्य पुनः प्रकृतशेषमेव विचारयतीत्याशयेनाधिकरणमवतारयन्तः संशयं व्युत्पादयन्ति * नन्वित्यादि *। * तद्यदिति * भूमस्वरूपम्। * श्रूयते इति * पुराणवाक्येभ्यः श्रूयते। * तेनेति * सुखस्य दुःखविलक्षणत्वेन। * यो वै भूमा तदमृतमिति वाक्याच्चेति * इदमपि तन्नोपपद्यत इत्यत्र मोक्षाङ्गीकारे च हेत्वन्तरम्। तत्रानन्तरं दुःखसद्भावेन सुखस्यामृतत्वाभावाद्, मोक्षे चानन्तरं दुःखाभावेन सुखस्याऽमृतत्वादिति। एवं मोक्षकोटिर्व्युत्पादिता। अग्रे चेत्यादिना असम्भवीत्यन्तेन सर्वात्माभावकोटिर्व्युत्पादनम्। अत उभयबीजसद्भावादेवं संशय इत्यर्थः। पूर्वपक्षमाहुः। * तत्रेत्यादि * कामचारोक्तेरिति षष्ठी। सिद्धान्तमाहुः। * तत्र भूमेत्यादि * सम्प्रसादाऽधिकरणे भूमशब्देन परमात्मनो निर्णीतत्वाल्लिङ्गभूयस्त्वाधिकरणे सर्वात्मभावस्यापि निर्णीतत्वादत्र भूमलक्षणवाक्ये भूमपदेन स

भाव एवोच्यत इति सिद्धान्तस्तत्र दुःखदर्शनानुपपत्त्या सर्वाधिकत्वलक्षणं भूमत्वमनुपपन्नमिति शङ्कां परिहरति । भूम्नः सर्वात्मभावस्य ज्यायस्त्वं सर्वस्मान्मन्तव्यम् । तत्रोक्तानुपपत्तिपरिहारार्थं दृष्टान्तमाह । क्रतुवदिति । दर्शपूर्णमासप्रकरणे तैत्तिरीयके पठ्यते परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्तेन स परमां काष्ठामगच्छदित्युपक्रम्य, य एवं विद्वान् दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छतीति । यथा व्रतादिदुःखात्मकत्वेऽपि परमकाष्ठालक्षणफलगमकत्वेन दर्शपूर्णमासयोः सर्वक्रतुभ्योऽधिकत्वं वक्तुमग्रआसीदिति श्रूयते । तथा दुःखहेतुत्वेऽप्यनन्यलभ्यसाक्षात्पुरुषोत्तमानन्दप्राप्तिहेतुत्वेन सुखरूपत्वमुच्यत इत्यन्येभ्यः सर्वेभ्यो ज्यायस्त्वं मन्तव्यमित्यर्थः । अत्रोपपत्तिमाह । तथाहि दर्शयति । श्रुतिस्तु स एवाधस्तादित्याद्युक्त्वाथाहङ्कारादेश इत्याद्युक्त्वाऽथात्मादेश इत्याद्युक्तवत्यग्रे चैतादृशस्यात्मन एव प्राणाशास्मरादिसर्वमिति

भावः सर्वात्मभावसहित एव परमात्मोच्यते । यथा घटेन जलमाहरेत्यादौ घटादिपदेन छिद्रेतरत्वादिसहितो घटादिस्तद्वदिति सिद्धान्त इत्यर्थः । एवं सिद्धान्तं सामान्यत उक्त्वा तं व्युत्पादयितुं सूत्रमवतारयन्ति । * तत्र दुःखेत्यादि * व्याकुर्वन्ति । * भूम्न इत्यादि * सर्वात्मभावस्येति । इदं षष्ठ्यर्थस्य विवरणम् । भूमसम्बन्धिनः सर्वात्मभावस्येत्यर्थः । अत्र लौकिकतन्निरासायैव कथनमिति बोध्यम् । * तत्रेति * ज्यायस्त्वप्रतिज्ञायाम् । * दर्शपूर्णमासप्रकरण इति * संहिताप्रथमाष्टकषष्ठप्रपाठकनवमानुवाके । * अग्र आसीदिति * परमेष्ठिनो वा एष यज्ञोऽग्र आसीत् । * उच्यत इति * भाविस्वरूपमादायोच्यते । तथाच परमकाष्ठाप्रापकत्वात्तथेत्यर्थः । ननु भाविस्वरूपमादायैवोच्यते, न विद्यमानं स्वरूपमादायेत्यत्र किं गमकमित्याकाङ्क्षायामाहुः । * अत्रोपपत्तीत्यारभ्य, न यदेदित्यन्त-

च दर्शयति । एतत्सर्वात्मभाववत्स्वेव सर्वमुपपद्यते, न मुक्तस्य । वृत्तिभेदाभावात् प्राणाद्यभावाच्च । जीवन्मुक्तिदशायां प्राचीनानामेव सत्त्वादात्मनः प्राणा इत्यादि न वदेत् । यद्वा, ननु लोकेऽपि शृङ्गाररसभाववति पुंसि नार्यां च त्वदुक्तभावसम्बन्धिव्यभिचारिभावाः श्रूयन्ते । सैव सर्वत्र, स एव सर्वत्रेति । एवं सति लौकिकसधर्मवत्त्वाच्च त्वदुक्तभावस्यालौकिकज्ञानादिभ्य आधिक्यं वक्तुं शक्यमलौकिकविषयत्वाल्लौकिकत्वमपि न तथेति भवति संशयः । तत्र मनुजत्वरिपुत्वादिज्ञानानामिव कामादिभावेन स्नेहभावस्यापि सम्भवान्नास्यालौकिकत्वमिति पूर्वः पक्षः । सिद्धान्तस्त्वस्य लौकिकेभ्यो ज्यायस्त्वं मन्तव्यम् । ननूक्तं लोकसाधारण्यं बाधकमिति शङ्कानिरासाय निदर्शनमाह । क्रतुवदिति ।

म् * । तथाच भूमपदेन यदि मोक्षावस्थामभिप्रेयात् तदैवं त्रिविधा वृत्तीर्न वदेत् । प्राणादीनां नामान्तानां तत्र सम्बन्धं च न वदेत् । तदानीं तदुभयाभावादतस्तदन्यथानुपपत्त्या भूमलक्षणे सर्वात्मभावभाविस्वरूपमेवोच्यत इति सर्वात्मभावसहित एव भूमा, न तु मोक्षावस्था । नापि जीवन्मुक्तावस्थेति युक्तम् । तां चेदभिप्रेयात् तदा आत्मनः प्राण इत्यादि न वदेत् । तस्यामवस्थायां प्रारब्धवशादेव पूर्वप्राणादीनां सत्तायाः सत्त्वात् । अतो द्विविधस्यापि मोक्षस्यात्रादातुमशक्यत्वात् सर्वात्मभावोऽत्र ग्राह्य इत्यर्थः । एतस्यार्थस्य पूर्वाधिकरणस्थेन सामान्यसूत्रार्थविचारेणापि सिद्धप्रायत्वमित्यरुच्या वर्णकान्तरेण सूत्रं व्याकुर्वन्ति * यद्वेत्यादि ** श्रूयन्त इति * साहित्यग्रन्थेषु भरतसूत्रादौ चोच्यन्ते । * अलौकिकज्ञानादिभ्य इति * । लोकविलक्षणेभ्योऽक्षरज्ञानमुक्तिजीवन्मुक्तिभ्यः । * न तथेति भवति संशय इति । * न वक्तुं शक्य इति लौकिकसजातीयधर्मवत्त्वाल्लौकिकविषयत्वाभ्यां हेतुभ्यां भवति संशय इत्यर्थः । पूर्वपक्षमाहुः । * तत्रेत्यादि * । * तत्रेति । * भगवति । सिद्धान्तं वदन्तः सूत्रं व्याकुर्वन्ति । * सिद्धान्त इत्यादि । * प्रतिज्ञायां हेतुं

यथा दर्शादिषु दोहनाधिश्रयणातञ्चनव्रीह्यवघातादिपुरोडाशभक्ष-णादीनां लौकिकक्रियातुल्यत्वेन दर्शनेऽपि न लौकिकत्वम् । लौकिकप्रमाणाप्राप्तत्वादलौकिकतत्प्राप्तत्वात्तथोक्तप्रमाणरूपवरण-लभ्यत्वेन श्रुत्युक्तत्वान्न लौकिकत्वमस्य भावस्येति दिक् ॥

वस्तुतस्तु ग्रामसिंहस्य सिंहस्वरूपत्वेऽपि न तादृूप्यं वक्तुं शक्यम् । तथा लौकिकपुंसि नार्यां वा तदाभासो रसशास्त्रे निरूप्यते । तदृष्टान्तेन भगवद्भाववद्भक्तरीतिभावनार्थं, न तु

वक्तुं, नन्वित्यादिना बाधकमाशङ्क्य दृष्टान्तं व्युत्पादयन्ति । * यथे-त्यादि । * उक्तप्रमाणरूपवरणलभ्यत्वेनेति * । अलौकिकप्रमाण-रूपतल्लभ्यत्वेन । तथाच सर्वात्मभावो लौकिकसदृशत्वेऽपि न लौ-किकः । अलौकिकप्रमाणप्राप्तत्वात् । लौकिकप्रमाणाप्राप्तत्वाच्च । यागीयदोहनाधिश्रयणादिवत् । यन्नैवं तन्नैवम् । लौकिकतद्भावदिति हेतुसिद्ध्या न प्रतिज्ञायां दोष इत्यर्थः । एतादृश्यश्च सादृश्यदर्शन-जाः शङ्का अविचारकस्यैवोद्यन्ति, न तु विचारकस्येत्याशयेनाहुः । * वस्तुत इत्यादि * तथाच विचारकस्तु लोकेऽपि तथा तद्भावं पश्यन्नैवं शङ्कत इत्यर्थः । ननु यदि न सादृश्येन तादृूप्यं तदा ऋषि-भिर्भरतादिभिरलौकिकभावधर्मसादृश्यं लौकिके रसे कुतो निरूप्य-ते अतस्तद्दर्शनाद्विचारकस्यापि शङ्का तुदत्येवेत्याकाङ्क्षायामृषीणां त-था तन्निरूपणस्य तात्पर्यमाहुः । * तथा लौकिकेत्यादि * । * भग-वद्भाववद्भक्तरीतिभावनार्थमिति * भगवति विगाढभाववान् यो भ-क्तस्तद्रीतिभावनार्थम् । ननु ऋषीणां तथैव तात्पर्यमित्यत्र किं गम-कमत आहुः । * न त्वित्यादि * तदुक्तं कामसूत्रसमाप्तौ वात्स्याय-नेन । "तदेतद् ब्रह्मचर्येण परमेण समाधिना । विहितं लोकयात्रार्थं न रागार्थोऽस्य संविधिः । रक्षन् धर्मार्थकामांस्त्रीन् सम्पश्यन् लोक-वर्त्तनीम् । अस्य शास्त्रस्य तत्त्वज्ञो भवत्येव जितेन्द्रिय" इति। तथाच यदि लौकिके तात्पर्यं स्याद् एतच्छास्त्रतत्त्वज्ञस्य जितेन्द्रियभवनरूपं फलं न वदेत् । एवं भरतोक्ते सङ्गीतशास्त्रेऽपि ज्ञातव्यम् । उपवेद-

ऋषीणां लौकिके तात्पर्यं भवितुमर्हति । अत्रोपपत्तिमाह । तथा-त्वादि । पूर्वोक्तभाववत आत्मनः प्राणादिकं सर्वं दर्शयति श्रु-तिः । तस्य ह वा एतस्यैवं पश्यत इत्यादिना । इतः, पूर्वमपि स वा एष एवं पश्यन्नित्युपक्रम्यात्मरतिरात्मक्रीड आत्ममिथुन आत्मा-नन्दः स स्वराड् भवति सर्वेषु लोकेषु कामचारो भवतीति श्रु-तिश्च । न हि लोक एवं सम्भवत्यात्मपदानां भगवद्वाचकत्वादिति सर्वोत्तमविषयकभावस्यैव तथात्वं युक्तमिति चोपपत्तिर्हिशब्देन सूच्यते ॥ ५७ ॥

नाना शब्दादिभेदात् ॥ ५८॥

पूर्वाधिकरणैः सर्वात्मभावस्वरूपादिनिर्णयं कृतवान् । अथ

त्वात् । अतः पूर्वोक्त एव निश्चयः । सूत्रशेषमवतारयन्ति । * अत्रे-त्यादि * उक्तस्यार्थस्य प्रकृतश्रुत्याभिप्रेतत्वे उपपत्तिमाहेत्यर्थः । उप-पत्त्यन्तरं बोधयितुं हिशब्दार्थमाहुः । * सर्वोत्तमेत्यादि * । * तथा-त्वमिति * सर्वसाधनज्यायस्त्वम् ।

अत्रान्ये, वैश्वानरविद्यामुदाहृत्य किमिहोभयथाऽप्युपासनं स्याद् व्यस्तस्य समस्तस्य चोत समस्तस्यैव वेति सन्देहे, व्यस्तस्यापि वि-हितत्वात् फलस्यापि कथनादुभयथेति प्राप्ते, समस्तस्यैव न्याय्यम् । आन्तमेकवाक्यत्वात् । यथा वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात इत्यत्र । मूर्द्धा ते व्यपतिष्यन्मां नागमिष्य इत्याद्यनर्थस्य व्यस्तो-पासने दर्शितत्वाच्चेत्याहुः । तन्नास्माकं रोचते । पूर्वकाण्डे उदव-सानीयाख्ये कर्मणि अपवैसोमेनेजानाद्देवताश्च यज्ञश्च क्रामन्तीत्या-दिना देवतायज्ञावरोधार्थं पूर्वं पञ्चकपालं विधाय, ततो, गायत्रो वा अग्निरित्यादिना तद्दोषदर्शनेन दूषयित्वाऽष्टाकपालमाग्नेयं पुरोडाशं पञ्चसंख्याके याज्यानुवाक्ये चोपसंहारे विहिते इति पूर्वविधानस्या-ऽनभिप्रेतत्वबुद्धेः शीघ्रमुदयेन न पूर्वप्रकारकरणशङ्कोदयस्तथात्रापि शङ्काया एव पराहृत्यानुदयेन पूर्वपक्षानुदयादिति ॥ ५७ ॥ १९ ॥

नानाशब्दादिभेदात् ॥ सङ्गतिं बोधयन्तोऽधिकरणमवतारय-न्ति । * पूर्वेत्यादि * । प्रदानवदित्यादिभिः पूर्वाधिकरणैर्मुख्याधि-

मत्स्यादिरूपाणां भगवदवतारत्वमविशिष्टमिति सर्वेषां समस्योपासना कार्येत पार्थक्येनेति विचारयति । अत्रोपास्याभेदेऽपि रूपभेदादेकत्रोपासकस्यान्यत्रानुपासनलक्षणावज्ञासम्भवादस्या अप्यसिद्धिसम्भवादपि समस्यैव सा कार्येति प्राप्ते सिद्धान्तमाह । सर्वेष्ववतारेषु नानैवोपासना कार्या । तत्र हेतुः, शब्दादिभेदादिति । तत्तत्स्वरूपवाचकशब्दानां मन्त्राणां चादिपदादाकारकर्मणां च भेदादित्यर्थः । एतेनैव मिथोविरुद्धानामाकारकर्मणामेकत्र भावनस्याशक्यत्वमयुक्तत्वं चेति भावः सूचितः ॥ ५८ ॥

कारिणामर्थे सर्वात्मभावस्वरूपस्य तदुत्कर्षस्य तत्फलस्य तदधिकारिणां च निर्णयं कृतवान् । अथ तदनन्तरं पुराणोक्तानां मत्स्याद्युपासनानामपि नित्यानुमेयवेदमूलत्वादिदानीमपि केषाञ्चिद् वामनहयग्रीवाद्युपासकानां दर्शनात् तादृशानामर्थे उपासनान्तरनिर्णयस्यावश्यकत्वात् । मत्स्यादिरूपाणां भगवदवतारत्वमविशिष्टम् । यथा सुतेजःप्रभृतीनां वैश्वानरावयवत्वमिति तेषां सर्वेषां समस्य भगवतैकीकृत्योपासना कार्या ? उत सुतेजःप्रभृतीनां व्यस्तोपासने दोषश्रवणवदत्र दोषस्याश्रवणाद् व्यस्ततया कार्येति शङ्कायां प्रसङ्गाद्विचारयतीत्यर्थः । पूर्वपक्षमाहुः । * अत्रेत्यादि * । * अस्या अप्यसिद्धिसम्भवादिति * । रूपान्तरावज्ञारूपापराधकृतप्रतिबन्धेन असम्भवात् । तथाचात्र दोषाश्रवणेऽप्युक्तरीत्या दोषसम्भवान्न कार्येत्यर्थः । सिद्धान्तं बोधयितुं सूत्रं व्याकुर्वन्ति । * सर्वेष्वित्यादि * । तर्ह्यवज्ञादोषस्य कथं निवृत्तिरित्यत आहुः । * एतेनेत्यादि * । * एतेनैवेति *उपासनभेदस्थापनेनैव । *अयुक्तत्वमिति*विरुद्धत्वादयुक्तत्वम् । तथाच शक्यस्य युक्तस्याकरणे ह्यपराधो, न त्वशक्यस्याऽयुक्तस्याकरणे । अतोऽनुपासनस्य तत्रापराधाप्रसञ्जकत्वेन प्रतिबन्धाभावान्नासिद्धिरित्यर्थः।एतेन यत् पूर्वं, न भेदादितिसूत्रेऽधिकगुणोपसंहारौचित्यमुक्तं तत्प्रकारोऽत्र दर्शितः । तत्तद्रूपप्राधान्येन ब्रह्मोपासकस्याधिका अपि गुणा अविरुद्धा एवोपसंहार्या, न त्वन्येऽपीति ।

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥

पार्थक्येनोपासनानि कर्त्तव्यानीति स्थिते विचार्यते। किमग्निहोत्रदर्शपूर्णमासादिवदेषां समुच्चय उत फलविकल्प इति।

तस्मात्तेषां व्यस्तोपासनमेव कर्त्तव्यमिति सिद्धम् ॥

अन्ये तु, अत्र यासु यासु विद्यासु श्रुतिनानात्वेऽप्यर्थैक्याद्वेद्यैक्यं, यथा मनोमयः प्राणशरीरः, कं ब्रह्म, सत्यकामः सत्यसंकल्प इत्यादौ। यथा च, प्राणो वा व संवर्गः, प्राणो वा व ज्येष्ठः श्रेष्ठः, प्राणो ह पिता प्राणो मातेत्यादौ च। तत्र श्रुतिनानात्वस्य गुणान्तरपरत्वाद्, वेद्याभेदेन विद्यैक्याच्च स्वपरशाखोक्तं गुणजातं विद्याकात्स्न्यार्थमुपसंहार्यमिति पूर्वपक्षे, शब्दादिभेदाद्विद्याभेदं सिद्धान्तयन्ति। पूर्वतन्त्रे शब्दान्तरादीनां कर्मभेदकत्वेन सिद्धत्वात् प्रकृते च, वेद, उपासीत, क्रतुं कुर्वीतेत्यादिशब्दभेदात्। आदिपदेन यथासम्भवं गुणादीनामपि भेदस्य संग्रहाच्च। नच शब्दभेदेऽपि, यजति जुहोतीत्यादिवद् वेदोपासीतेत्यादावर्थभेदाभावान्न भेद इति वाच्यम्। तथाऽप्येकस्मिन्नेव वेद्ये प्रतिकरणमितरेतरव्यावृत्तगुणोपदेशरूपानुबन्धभेदेन तस्यां तस्यां विद्यायां तादृक्तादृग्गुणविशिष्टस्यैवोपास्यतया विद्याभेदोपपत्तेः। एवं स्थितेऽपि सर्ववेदान्तप्रत्ययेत्यादि द्रष्टव्यमिति चाहुः।

तदसङ्गतम्। सर्ववेदान्तप्रत्ययसूत्रोक्तचोदनाद्यविशेषरूपहेत्वभावादेवोक्तस्थलेषु विद्याभेदस्य सिद्धत्वेनैतत्सूत्रारम्भवैयर्थ्यप्रसङ्गात्। नचोपसंहारनिवृत्त्यर्थत्वान्नानर्थक्यमित्यपि युक्तम्। ऐक्यहेत्वभावादेव सिद्धे विद्याभेदे उपसंहारप्राप्तेरेवाभावात्। विद्यासूचकनानापदविरोधाच्चेति ॥ ५८ ॥ २० ॥

विकल्पोऽविशिष्टफलत्वात् ॥ अधिकरणमवतारयन्ति। * पार्थक्येनेत्यादि *। * विचार्यत इति *। उपोद्घातसङ्गत्या विचार्यते। संशयमाहुः। * किमित्यादि *। तथाच विधिसामान्यात् क्रमेण कार्याणीत्येवं समुच्चय? उत फलतौल्याद्विकल्प इत्यर्थः। पूर्व -

तत्र विधिफलयोः समानत्वात् समुच्चय इति प्राप्ते निर्णयमाह ॥ उपासनानां विकल्प एव । तत्र हेतुरविशिष्टफलत्वात् ।

मुक्तिफलकत्वं हि सर्वेषामुपासनानामविशिष्टम् । एवं सत्येकेनैव तत्सिद्धावपरस्याऽप्रयोजकत्वादग्निहोत्रादिवन्नित्यताबोधकश्रुत्यभावात्तदर्थिनो विकल्प एव ॥ ५९ ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥

येषु तूपासनेषु भिन्नानि भिन्नानि फलान्युच्यन्ते, तत्र त्व-

पक्षमाहुः । * तत्रेत्यादि * । विधिः फलं च सर्वत्र तुल्यम् । यथाऽग्निहोत्रादीनाम् । तथा सति यदेव न क्रियते तत्फलाभावेन न्यूनतापत्तेर्विकल्पस्य प्राप्तप्रामाण्यपरित्यागादिदोषवत्तया तदादरे तत्संसर्गाच्च समुच्चय एव ज्यायानित्यर्थः । सिद्धान्तमाहुः । * उपासनानामित्यादि * तथाचाग्निहोत्रादितौल्यस्याभावाच्चित्रोद्भिदादितौल्यस्य सत्त्वाद्विकल्पस्यादुष्टत्वेन स्वर्गादिवद्विश्वमायानिवृत्तिरूपायां तत्तदवतारसायुज्यरूपायां च मुक्तौ विशेषाभावेन च फलस्याविशिष्टत्वात् समुच्चये अप्रयोजकत्वदोषापत्तेश्च विकल्प एव ज्यायानित्यर्थः । एतेनैव फलप्राप्तिफलानां सद्विद्यादहरविद्योपकोसलविद्याशाण्डिल्यविद्याऽक्षरविद्यादीनामेकफलानां प्राणादिविद्यानां च विकल्पोऽवगन्तव्य इत्यपि बोधितम्।अत्र सर्वेऽप्येवमेवाहुः ॥५९॥२१

काम्यास्तु यथाकामं समुच्चीयरन् न वा पूर्वहेत्वभावात् ॥ अविशिष्टफलत्वादित्यस्य विकल्पहेतोः प्रत्युदाहरणमिदम् । एवं मुक्तिफलिका उपासना विचार्य काम्यासु पक्षद्वयस्य सम्भवात् ताः पृथग् विचारयतीत्याशयेन सूत्रं पठित्वा व्याकुर्वन्तस्तत्र तत्तत्फलानां काम्यत्वादुपासनानां समुच्चयपक्षं व्याकुर्वन्ति । * येष्वित्यादि * येषु स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति, सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासत इत्यादिषु तथेत्य-

नेकफलार्थिनस्तत्तत्फलकोपासनानि समुच्चीयेरन्नविशिष्टफलत्वाभावात्। यत्र त्वेकस्यैवोपासनस्य स्वकामितानेकफलकत्वं श्रूयते तत्र तथैव चेदुपासनं करोति तदा न समुच्चीयेरन्नपि। स्वकामितेष्वेकतरस्य तदन्यफलवैशिष्ट्येनाविशिष्टफलत्वाभावादिति पूर्वहेत्वभावादतिश्लिष्टप्रयोगाभिप्रायेणोक्तमिति ज्ञेयम्।

अथवा कामैक्ये नियतफलकानि तानि न समुच्चीयेरन्। अत्र हेतुः स्पष्टः॥ ६० ॥

र्थः। एवं समुच्चयपक्षं व्याख्याय, न वा इति पदाभ्यामुक्तमसमुच्चयपक्षं व्याकुर्वन्ति*यत्र त्वित्यादि* *श्रूयते इति*यथा भार्गव्यां विद्यायां, य एवं वेद प्रतितिष्ठति, अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्येति श्रूयते। तत्र तथैव चेत्। तदुक्तस्वकामितसकलफलसाधकतया चेत्तदुपासनं करोति तदा तत्फलकान्यन्यानि तत्प्रतिष्ठेत्युपासीत तन्मह इत्युपासीतेत्यादीनि तत्तद्गुणकान्युपासनानि न समुच्चीयेरन्नपि। अत्रापि हेतुः पूर्वहेत्वभावादिति। तं विवृण्वन्ति * स्वकामितेष्वित्यादि * स्वकामितफलेष्वेकतरस्य फलस्य तदन्यफलवैशिष्ट्येन अविशिष्टफलत्वाभावादिति। तथाच समुच्चये अविशिष्टत्वाभावोऽनेकफलत्वात्। समुच्चयाभावे त्वविशिष्टफलत्वाभावस्तत्फलस्यान्यफलविशिष्टत्वादिति भेदेऽपि, पूर्वहेत्वभावादिति यत्सूत्र उक्तं तत्तथेत्यर्थः।अत्र व्याख्यानक्लेशात् पक्षान्तरमाहुः। * अथवेत्यादि *। * कामैक्ये इति * एकमात्रविषयत्वेन तदैक्ये। अत्र हेतुः * स्पष्ट इति * अस्मिन् पक्षे तेषां फलभेदेन विशिष्टफलतया अविशिष्टफलत्वाभावरूपः पूर्वहेत्वभावः स्फुट इत्यर्थः। अत्रापि माध्वाचार्यभिक्षुव्यतिरिक्तानां सर्वेषामैकमत्यम्। अस्माकं त्वेतावान् विशेषः। अत्र सूत्रे काम्यपदादुद्गीथाद्युपासना अपि संग्रहीतुं शक्यन्ते। तास्वपि यदेव विद्यया करोतीत्यादिभिः फलश्रवणात्। कामपदाभावेऽपि रात्रिसत्रन्यायेन काम्यत्वस्य शक्यत्वादिति॥ ६० ॥ २२ ॥

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥

प्रधानेषु निर्णयमुक्त्वाङ्गेषु तमाह । एकार्थसाधकानामुपासनानां भेदेनाङ्गभेदेऽप्येकतरोपासने फलैक्यादङ्गानि तत्र समुच्चीयेरन्न वेति संशये निर्णयमाह । उपासनाङ्गानां तदेवाश्रयस्तथाच यदङ्गं यदुपासनाश्रितं तत्रैव तस्य भाव इत्यर्थः ॥ ६१ ॥

अत्र हेतुमाह ॥

अङ्गेषु यथाश्रयभावः ॥ कर्माङ्गत्वेऽपि स्वव्यापारेण फलसाधने उपासनान्तरानपेक्षत्वात् प्रधानानामुद्गीथाद्युपासनानामपि काम्यत्वेन यथाकामसमुच्चयविकल्पयोः पूर्वसूत्रेणैव सिद्धत्वादत्र विषयान्तरं बोधयन्तोऽधिकरणमवतारयन्ति । प्रधानेत्यादि । अन्यानपेक्षतया स्वव्यापारद्वारा फलजनकानि प्रधानानि तेषु समुच्चयादिनिर्णयमुक्त्वा अन्यापेक्षतया तथा फलजनकेष्वङ्गेषु निर्णयमाहेत्यर्थः । ननु किं प्रयोजनं येन पृथगारम्भ इत्यत आहुः । * एकार्थेत्यादि * एकोऽर्थ एकं फलम् । तत्साधकानामनेकेषामुपासनानां रूपादिभेदेन भेदेऽपि तेषां मध्य एकतरोपासनेऽन्येषामस्य च फलैक्यात् तत्फलार्थं यान्यङ्गानि तत्र तत्रोक्तानि तान्येकस्मिन्नुपासने समुच्चीयेरन्नवेति संशये उपसंहारसूत्रेऽर्थाभेदपदस्य फलाभेदवाचकत्वे फलैक्यात् समुच्चयप्राप्तौ वक्ष्यमाणहेतुभ्यां निर्णयमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * उपासनाङ्गानामित्यादि * । * तदेवेति * उपासनमेव । तथाच आश्रयमनतिक्रम्य यथाश्रयभावः सत्ता, यथाश्रयं भावो यथाश्रयभाव इति सूत्रयोजना । उदाहरणं तु छान्दोग्ये मनो हिङ्कारो वाक्प्रस्ताव इत्यादिभिर्दशभिर्वाक्यैर्गायत्ररथन्तरवामदेव्यबृहद्वैरूपवैराजशाक्वररैवत्ययज्ञायज्ञीयराजननामग्रहणपूर्वकं विहितानि दश सामोपासनानि । तेषु ह्येकमेकमसाधारणं फलमुक्त्वा तदुत्तरं सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्येति सर्वोपासनेषु साधारणं फलमुक्त्वा क्रमेण महामनाः स्यात् तद् व्रतं,न प्रत्यङ्ङग्निमाचामेन्न ष्ठीवेत् तद् व्रतम्, एवं न काञ्चन

शिष्टेश्च ॥ ६२ ॥

तत्तदुपासनं तत्तदङ्गविशिष्टमेव वेदे शिष्यत इति तथेत्यर्थः । चकारादतिरिक्तकरणे प्रायश्चित्तोक्तिरपि बाधिकेति सूच्यते॥६२

समाहारात् ॥ ६३ ॥

कर्ममार्गीयोपासने निर्णयमुक्त्वा ज्ञानमार्गीयोपासने तमाह । अथर्वोपनिषत्सु नृसिंहोपासनादिषु मत्स्यकूर्मादिरूपत्वेनापि स्तुतिः श्रूयते । श्रीभागवते च, नमस्ते रघुवर्यायेत्यादिरूपा स्तुति-

---

परिहरेत्, न तपन्तं निन्देत्, न वर्षन्तं निन्देत्, नर्त्तूंन्निन्देत्, न पशून्निन्देत्, संवत्सरमश्नो नाश्नीयात्, ब्राह्मणान्न निन्देद् इति तत्तदुपासनाङ्गभूतानि व्रतान्युक्तानि । तथाच तस्य व्रतस्य तत्तदुपासन एव सम्बन्धो, नान्यत्रेति बोध्यम् । एवञ्जातीयमन्यदपि । न्यायस्य साधारणत्वात् । यथा भार्गव्या आनन्दविद्याया अङ्गभूतेषु त्रिष्वन्नप्रतिष्ठितत्वोपासनेषु प्रतिष्ठादीनां फलानामैक्यं तत्तदुपासनाङ्गभूतानाम् । अन्नं न निन्द्यात् तद् व्रतम्, अन्नं न परिचक्षीत तद् व्रतम्, अन्नं बहु कुर्वीत तद् व्रतमिति तत्तद्व्रतानां भेद इति ॥६१॥

शिष्टेश्च ॥ अत्र भाष्यं स्फुटम् ॥ ६२ ॥ २३ ॥

समाहारात् ॥ सूत्रप्रयोजनमाहुः । * कर्ममार्गीयेत्यादि * कर्माङ्गतया कर्ममार्गीयेषु सामाद्युपासनेषु अङ्गनिर्णयमुक्त्वा ज्ञानाऽङ्गतया ज्ञानमार्गीयेषु तेष्वङ्गनिर्णयमाहेत्यर्थः । सूत्रं व्याकुर्वन्तो विषयमाहुः । * अथर्वेत्यादि * अत्र मत्स्यकूर्मादिपदात् पूर्वं ब्रह्मविष्ण्वादीति पदस्य त्रुटिर्बोध्या । तथाच नृसिंहोपासनायां यो वै नृसिंहो देवो भगवान् यश्च ब्रह्मा तस्मै वै नमो नम इति, श्रीरामोपासनायां च यो वै रामचन्द्रो भगवान् ये च मत्स्यकूर्माद्यवतारास्तस्मै वै नमो नम इत्येवंविभागेन स्तुतिः श्रूयत इत्यर्थः । द्वितीयं पौराणोदाहरणम् । एवं विषय उक्तः । तत्र तत्सर्वरूपत्वेनोपासना कार्या ? उत तेषां रूपाणां विरुद्धधर्मवत्त्वात् तथा न कार्येति संशये शब्दादिभेदेन नानोपासनस्य पूर्वमुक्तत्वात् सर्वरूपत्वेनोपासने च तद्विरो-

व्रजनाथे । एवं सति रूपभेदेऽपि भगवदवतारत्वस्याविशिष्टत्वादेकस्मिन् रूपे रूपान्तरसमाहारो दृश्यत इति सर्वरूपत्वेनैकत्रोपासनमपि साध्वित्यर्थः ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

ऐश्वर्यवीर्यादिगुणानां सर्वेष्ववतारेषु साधारण्यं श्रूयते । तेन धर्मिधर्माणामैक्यात् पूर्वोक्तं साध्वित्यर्थः ॥ ६४ ॥

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥

नन्वेवमुपासनं नित्यमुत वैकल्पिकमिति संशय उक्तरीत्या

भावकार्येति प्राप्तम् । तत्र सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति । * एवं सतीत्यादि * अत्राङ्गेषु यथाश्रयभाव इत्यनुवर्त्तते । * समाहार इति * एकीभावः । तथाच ज्ञानमार्गीयोपासनाङ्गेष्वपि यथाश्रयभावे सति, रूपभेदेऽपीत्यादिनोक्तरीत्या समाहारदर्शनात् तथेत्यर्थः । एतदेवाभिप्रेत्य, भेदान्नेतिचेदिति सूत्रे उपासनाविषयेष्वित्यादिनाऽवतारेष्वपि सर्वगुणोपासंहारौचित्यमुक्तम् ॥ ६३ ॥

अत्र हेत्वन्तरं सूत्रान्तरेणाह ।

गुणसाधारण्यश्रुतेश्च ॥ अत्र चकारोऽधिकरणपूर्णत्वद्योतकः । शेषं प्रकटार्थम् । तथाच भगवत्त्वप्राधान्योपासने एवं सर्वरूपत्वेनोपासनं कार्यम् । तत्तद्रूपप्राधान्येनोपासने तथा न कार्यमिति विभागान्न कोऽपि विरोध इत्यर्थः ॥ ६४ ॥ २४ ॥

न वा तत्सहभावाश्रुतेः ॥ अधिकरणमवतारयन्ति । * नन्वित्यादि * । सर्वरूपत्वेनैकावतारोपासनं नित्याग्निहोत्रदर्शपूर्णमासादिवत् क्रमेण समुच्चेतव्यमुतैकमेव यावज्जीवं कर्त्तव्यमित्येवं वैकल्पिकमिति संशये उक्तरीत्या सर्वेषां सर्वरूपत्वेनैश्वर्यादिगुणसाधारण्येन च क्रमिकसमुच्चये प्राप्ते तस्य समुच्चयस्य निषेधमाहेत्य-

नियतत्वे प्राप्ते तन्निषेधमाह । नेति । किन्तु वा विकल्प एवैवमुपासन ऐच्छिकस्तत्र हेतुमाह । सहभावाश्रुतेरिति।नियमतस्तेषां रूपाणां सहभावश्रवणं चेत्स्यात्तदा स्यात्तथोपासनस्य नियतता, न त्वेवमतो विकल्प एवेत्यर्थः ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥

योऽपि रूपान्तरसमाहारपूर्वकमुपास्ते सोऽप्येकं रूपमुपास्यत्वेन मत्वा तत्तथोपास्त इति फलं तस्यैकस्यैव रूपस्य दर्शनं भवति, न तु सर्वेषामितोऽपि हेतोर्विकल्प एवेत्यर्थः । एतद्दृष्टान्तेन यस्मिन् रूपे यादृग्धर्मवत्त्वं श्रूयते तादृग्धर्मविशिष्टमेवैकं रूपमुपास्यमिति व्यासहृदयमिति ज्ञायते । उपासनानिर्णयान्ते दर्शनात्मकहेतूक्त्या सर्वोपासनानां भगवत्साक्षात्कारः फलमिति ध्वन्यते । माहात्म्यज्ञापनार्थम् । परं सर्वावताररूपत्वं यथार्थमेव

र्थः । व्याकुर्वन्ति । * नेतीत्यादि * । * चेत्स्यादिति * । दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यादिवच्चेत् स्यात् । शेषं स्फुटम् ॥ एतमेव विकल्पमभिसन्धाय स्वाध्यायस्तत्रेतिसर्वदृष्टान्तव्याख्यानोत्तरं प्रकृतेऽपीत्यादिना तत्तद्रूपे तत्तदसाधारणधर्मोपसंहारो व्यवस्थापितः ॥ ६५ ॥

दर्शनाच्च ॥ पूर्वसूत्रात्तत्पदमत्रानुवर्तत इत्याशयेन सूत्रं व्याकुर्वन्ति । * योऽपीत्यादि * । * तत्तथोपास्त इति * । तद् एकमवताररूपं सर्वरूपवत्तथोपास्ते । * एतद्दृष्टान्तेनेति * । दर्शनदृष्टान्तेन । एतेन पूर्वाधिकरणोक्तपक्षस्य गौणता सूचिता । तथा दर्शनाभावादिति । सर्वनिरूपणान्ते एवं कथनस्य तात्पर्यमाहुः *उपासनेत्यादि * । ननु यद्येकस्यैव रूपस्य दर्शनं तदा सर्वरूपोपसंहारबोधनस्य किं प्रयोजनम् अत आहुः । * माहात्म्येत्यादि * । *

कैश्चिज्ज्ञाप्यते । यथार्थत्वात्तदप्यविरोधीति ज्ञेयम् ॥ ६६ ॥

इति श्रीवेदव्यासमतवर्त्तिश्रीवल्लभाचार्यविरचिते
व्याससूत्राणुभाष्ये तृतीयाध्यायस्य तृतीयः
पादः समाप्तः ॥ ३ ॥ ३ ॥

कैश्चिदिति * । स्मृतिपुराणादिवाक्यैः । * तदपीति * । सर्वरूपोपसंहरणम् । तथाचैकरूपदर्शनेऽपि सर्वरूपोपसंहारोऽप्येकदेशिनां न दुष्ट इति भावः । अन्ये तु इदं षट्सूत्रमेवाधिकरणमङ्गीकृत्य कर्माङ्गभूतेषूद्गीथादिषु य आश्रिता वेदत्रयविहिताः प्रत्ययास्ते समुच्चीयेरन्नुत यथाकामं स्युरिति संशये, प्रत्ययाश्रयभूताः स्तोत्रादयो यथा समुच्चीयन्त एवं तदाश्रिताः प्रत्यया अपि । तत्रानुशिष्टत्वादिभ्यो हेतुभ्यः समुच्चीयेरन्निति पूर्वपक्षे, सहभावाश्रवणादिहेतुभ्यां यथाकामं स्युरिति सिद्धान्तयन्ति ।

तन्नास्माकं रोचते । यथाकामसूत्रोक्तहेतुनैव तादृशनिर्णयसम्भवेनैतद्वैयर्थ्यात् । गुणसाधारण्यसूत्रे पूर्वपक्षसमाप्त्या शिष्टिसूत्रस्थचकारवैयर्थ्यापत्तेश्चेति । तस्मात् पूर्वोक्तमेव युक्तमिति दिक् ॥

अत्रायं संग्रहः । सर्वे वेदा यत्पदमामनन्तीति श्रुतेः सर्वस्य वेदस्य ब्रह्मविद्यात्वम् । इतिहासपुराणं च वेदानां पञ्चमं वेदमितिश्रुतेर्वेदपदेन तयोरपि संग्रहात्तयोरपि तथात्वम् । द्वे विद्ये वेदितव्ये इत्याद्याथर्वणश्रुतेर्ऋग्वेदादिरूपा अपरा अक्षराधिगमिका परेति फलतो विभागः । परास्वपि, ब्रह्मविदाप्नोति परम्, अक्षरात् परतः पर इति श्रुतेः पुरुषोत्तमस्य तत आधिक्ये तद्विद्यानां विषयफलयोर्बलादक्षरविद्यातोऽप्याधिक्यम् । परास्वपरासु च तत्तद्वेदोक्तासु सर्ववेदान्तप्रत्ययसूत्रोक्तहेतुना फलसंयोगरूपचोदनानामविशिष्टत्वे विद्यैक्यनिर्णयः । तन्मध्ये अन्यतरस्याभावे तु विद्याभेदः । गुणोपसंहारस्तु प्रायशो रूपैक्यात् प्रयोजनैक्याद्वा, क्वचित्त्वर्थवादतौल्यादपि । स च स्वाध्यायसूत्रोक्तैर्निरूपणप्रकारभेदाधिकारिभेदसम्बन्धिभेदैर्योऽन्यथा सन्तमिति वाक्योक्तदोषापत्त्या च कासुचिदात्मविद्यासु बाध्यते । कर्मणि तु पूर्वोक्तैस्त्रिभिर्न्यूनातिरिक्तप्रायश्चित्तश्रवणाच्च बाध्यते । तदभावे तु भवति । पराविद्या अपराविद्याश्च

फलैक्ये विकल्पन्ते । फलभेदे तु यथाकामं समुच्चीयन्ते । क्वचिदेकस्योपासनस्य स्वकामितानेकफलत्वे विकल्पन्ते च । कर्ममार्गीयविद्याङ्गानि तु बहूनां विद्यानां फलैक्येऽपि यथाश्रयं तत्रैव व्यवतिष्ठन्ते । ज्ञानमार्गीयविद्याङ्गानि तु यथाश्रयं क्वचित् समाह्रियन्ते, क्वचित्तु यथाश्रयं व्यवतिष्ठन्ते।अवतारोपासनं च यथाकाममेव भवति । सर्वासां परविद्यानामुपास्यरूपसाक्षात्कारः फलमिति च ॥६६ ॥ २५॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य
पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे तृतीयाध्यायस्य
तृतीयः पादः ॥ ३ ॥ ३ ॥

तृतीयाध्यायस्य चतुर्थः पादः ।

पुरुषार्थोऽतःशब्दादिति बादरायणः ॥ १ ॥

उपासनाभेदेऽप्युपास्याभेदाच्छाखान्तरोक्तधर्माणामप्युपसंहारः कर्त्तुमुचित इति पूर्वपादे निरूपितमिति तन्न्यायेनोत्तरकाण्डप्रतिपाद्यब्रह्मफलकसर्वात्मभावेऽपि पूर्वकाण्डप्रतिपादितकर्मणा-

---

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ अथ तुरीयपादं विवरिषवः सङ्गतिबोधनाय पूर्वपादार्थमनुवदन्त एतत्पादार्थमाहुः। *उपासनेत्यादि *। फलमत उपपत्तेरित्यत्र हेतुव्यपदेशेन जैमिनिमतनिरासपूर्वकं परमेश्वरस्यैव कारयितृत्वं फलदातृत्वं च समर्थयित्वा ततोऽनन्तरूपस्य भगवतस्तत्तत्फलदानाय साक्षात्कारो यथा भवति तदर्थं तत्तदुपासनमुक्तम् । तेन तत्तदुपास्यरूपसाक्षात्काररूपविद्यासिद्धौ परमेश्वरात् फलं भवतीति सिद्धम् । तथा उपासनाः कथं कर्त्तव्या इत्यपेक्षायां तं तं मार्गं स्वस्वाधिकारं तत्तद्भगवद्रूपं वानुरुध्यते । ते तत्तत्स्वरूपगुणास्तत्तदुपासनास्वरूपनिर्वाहकत्वादन्तरङ्गा इत्यन्तरङ्गविचारेण तत्तद्गुणानां बुद्धौ विषयीकरणरूपो गुणोपसंहार उक्तः। तत्रोपसंहारोऽर्थाभेदादिति सूत्रेऽर्थपदस्य वस्तुवाचकतामादाय उपासनाभेदेऽप्युपास्यवस्त्वभेदाद्यथा शाखान्तरोक्तधर्माणामप्युपसंहारः कर्त्तुं युक्त इति निरूपितं, तथा अस्मिन् पादे उपासनाया बहिरङ्गाणामाश्रमादीनां विचारे उपसंहारसूत्रीयार्थपदस्य प्रयोजनवाचकतामादाय ब्रह्मदर्शनरूपफलैक्यात् तन्न्यायेन उत्तरकाण्डोक्तब्रह्मफलकसर्वात्मभावेऽपि पूर्वकाण्डोक्तकर्मणामुपसंहारः। स च कर्मणां तत्तदुपासनोपकारकतया बुद्धौ विषयीकरणरूपः करणार्थं प्राप्नोति "यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव

मुपसंहारः प्राप्नोति न वेत्यधुना विचार्यते । विधिपक्षे तत्सहकृत-स्यास्य फलसाधकत्वमिति सिद्ध्यति । निषेधपक्षे तु केवलस्येती-ममेव पक्षं सिद्धान्तत्वेनाह । पुरुषार्थ इत्यादिना । सिद्धान्ते ज्ञा-ते तत्र पूर्वपक्षसम्भव इत्यादौ तमेवाह । अतः सर्वात्मभावादेव केवलात् पुरुषार्थः सिद्ध्यति । कुतः । शब्दात् । श्रुतेरित्यर्थः । श्रुतिस्तु, नायमात्मा प्रवचनेनेत्युपक्रम्य, यमेवैष वृणुत इत्यादिका ब्रह्मविदाप्नोति परमित्यादिका, तमेव विद्वानमृत इह भवतीति, सनत्कुमारनारदसंवादे यत्र नान्यत् पश्यतीत्याद्यात्मिका छान्दो ग्यश्रुतिश्च । एतदादिश्रुतिषु पूर्वोक्तरीत्या केवलस्यैव भगवद्भावस्य फलसाधकत्वं श्रूयते इति तथा । अत्र, फलमत उपपत्तेरित्यत्रेवो-पपत्तिं हेतुत्वेनानुक्त्वा श्रुतिपदं चानुक्त्वा शब्दपदं यदुक्तवांस्तेन श्रुतिस्मृत्यात्मकः सर्वोऽपि प्रमाणशब्दो हेतुत्वेन व्यासाभिमत

———

तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् । एतान्यपि तु कर्मा-णि सङ्गं त्यक्त्वा फलं तथा । कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्त-मम्"इति गीतावाक्यात् । सहस्रसमे सत्रे हिरण्मयशकुनिरूपब्र-ह्मदर्शनस्य तत्र श्रावणात् । नाभ्यादीनां यज्ञेषु भगवत्प्रादुर्भावस्य श्रीभागवतेऽप्युक्तत्वाच्च । अथवा, यमेवैष वृणुते तेन लभ्यः, भ-क्त्या त्वनन्यया शक्य इत्यादिषु साधनान्तरव्युदासान्न प्राप्नोतीति सन्देहे अधुना प्रथमाधिकरणे विचार्यते । तथाच शेषिशेषभावः सङ्गतिरित्यर्थः । ननु गुणानामिव कर्मणामुपासनास्वरूपनिर्वाहक-त्वाभावेनानावश्यकत्वात् किं तद्विचारेणेत्याकाङ्क्षायां विचारफलं पादार्थं वदन्तः सूत्रमवतार्य व्याकुर्वन्ति । * विधीत्यादि * । * इ-ममिति * । निषेधपक्षम् । तथाच विद्यासामर्थ्यबोधनायाऽयं विचार इत्यर्थः । सिद्धान्तेनाधिकरणं हेतुव्यपदेशादित्यत्र सिद्धान्तिनः सूक्ष्मदर्शित्वस्यावधारितत्वात्तथेत्येतदर्थं तमेवाहेत्यर्थः । शब्दशब्दप्र-योगतात्पर्यमाहुः । * अत्रेत्यादि * । संग्रहेण यत् सिद्धं तदाहुः ।

इति ज्ञायते। तेन "केवलेन हि भावेन गोप्यो गावः खगा मृगाः। येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा । यन्न योगेन सांख्येन दानव्रततपोऽध्वरैः । व्याख्यास्वाध्यायसन्न्यासैः प्राप्नुयाद् यत्नवानपि" इत्यादिरूपा स्मृतिरपि संगृह्यते। एतेन श्रुत्यादिप्रमाणवादिनामिदमेवाभिमतं, तद्विरुद्धवादिनामितोऽन्यादिति तेषामप्रमाणिकत्वं ज्ञाप्यते । अत एव स्वनाम गृहीतम्। स्वस्य वेदव्यासकर्तृत्वेन तत्रैव यतो भरः। अपरं च वैदिकसिद्धान्ते भगवत्स्वरूपस्यैव स्वतन्त्रपुरुषार्थत्वात् प्राप्ततत्स्वरूपाणां मुक्त्यनिच्छाकथनान्मुक्तोपसृप्यव्यपदेशाच्च मुक्तेरपरमपुरुषार्थत्वात् सा भवतु नामाऽन्यैः साधनैः। वस्तुतः परमपुरुषार्थो य उक्तरूपः स तु सर्वात्मभावेनैवेति ज्ञापनाय फलपदमनुक्त्वा पुरुषार्थपदमुक्तम्। एवं सत्यस्य सूत्रस्यार्थान्तरमपि व्यासाभिमतमिति ज्ञायते। तथा सत्ययं श्लिष्टः प्रयोगः। तथाहि। पुरुषार्थो भगवानेव। कुतः। अतःशब्दात्। अतःपदविशिष्टश्रुतिवाक्यादित्यर्थः।

---

* एतेनेत्यादि *। * अभिमतमिति *। तात्पर्यगोचरम्। * तद्विरुद्धवादिनामिति *। तत्तात्पर्यविरुद्धवादिनाम्। * अप्रामाणिकत्वमिति *। प्रमाणतात्पर्यानभिज्ञत्वम्। बादरायणपदोक्तितात्पर्यमाहुः। * अत एवेत्यादि *। * तत्रैवेति *। प्रमाणभूते शब्दे। पुरुषार्थपदतात्पर्यमाहुः। * अपरं चेत्यादि *। * अन्यैः साधनैरिति *। मर्यादामार्गीयैः कर्मज्ञानविहितभक्तिरूपैः साधनैः। एतेन भास्कराचार्याद्यङ्गीकृतो ज्ञानकर्मसमुच्चयः पूर्वकक्षाविश्रान्त इति बोधितम्। पुरुषार्थपदेन सूचितमर्थान्तरमाहुः * एवं सतीत्यादि * अस्यां श्रुतौ तमसः परस्तादित्यनेनानुपाधित्वबोधनात् स्वतो विरुद्धधर्माधारत्वं बोध्यते। परात् परमित्यनेनाक्षरादुत्तमत्वम्। तथा चाक्षरात् परो यः स एव परमपुरुषार्थ इति सिद्ध्यति। एवं व्या-

तैत्तिरीयोपनिषत्सु पठ्यते। अतः परं नान्यदणीयसꣳ हि परात् परं यन्महतो महान्तं, यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तादिति ॥ १ ॥

अथात्र प्रसवतिष्ठते।

शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥ २ ॥

विष्णोरिज्यत्वेन कर्मशेषत्वात् तत्स्वरूपज्ञानपूर्वको यागः फलातिशयहेतुरिति तन्माहात्म्यमुच्यत इत्यर्थवादरूपं तत्। अत्र दृष्टान्तमाह। यथान्येष्विति अन्येषु द्रव्यसंस्कारकर्मसु, यस्य पर्णमयी जुहूर्भवति न पापꣳ श्लोकꣳ शृणोति यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते यत्प्रयाजानुयाजा इज्यन्ते वर्म वा एतद् यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्यै इत्येवंजातीयिका फलश्रुतिरर्थवादस्तद्वदित्यर्थः ॥ २ ॥

ख्यानद्वयेन केवलविद्याया एव पुरुषार्थपर्यवसायित्वम्। पुरुषोत्तमस्यैव च परमपुरुषार्थत्वं बोधितम् ॥ १ ॥

शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ सूत्रमवतारयन्ति। ※ अथेत्यादि ※। सिद्धान्तसूत्रे सर्वात्मभावस्य स्वतन्त्रतया पुरुषार्थपर्यवसायित्वे परब्रह्मण एव च परमपुरुषार्थत्वे दर्शितेऽपि हेतुव्यपदेशविषयश्रुतौ फलदित्सया कारयितृत्वस्योक्तत्वात् क्रिययैव फलम्। छान्दोग्ये कर्माङ्गोपासनानामेव पूर्वमुपक्रान्तत्वादन्यासामपि कर्मशेषत्वेन फलत्वम्। ईश्वरस्य च तच्छेषतयैव फलदत्वमित्याशयेन पूर्वमीमांसक उक्तेर्थे प्रातिकूलतयाऽवस्थितो भवतीत्यर्थः। सूत्रं व्याकुर्वन्ति। ※ विष्णोरित्यादि ※। अयमर्थः। पूर्वपादे कर्माङ्गोपासनानां निर्णये तु न पूर्वकाण्डविरोधः। यत्पुनरात्मज्ञानादेः सर्वात्मभावस्य च स्वातन्त्र्येण पुरुषार्थपर्यवसायित्वं परब्रह्मणः परमपुरुषार्थत्वं चेत्युक्तम्। तन्न युक्तम्। कुतः। शेषत्वात्। शेषलक्षणे पुरुषः कर्मार्थत्वादिति पुरुषस्य कर्मार्थत्वमुक्तम्। तथ चोदनाविचारे कर्तृतया सिद्ध्यतीत्यात्मज्ञापकानि वाक्यानि कर्तृ-

ननु तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति । एतदग्रे च ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति श्रुतिर्भगवज्ज्ञानवतः सर्वत्यागं वदतीति न त्वदुक्तं साधीय इत्यत उत्तरं पठति ॥

आचारदर्शनात् ॥ ३ ॥

ब्रह्मविदामपि वसिष्ठादीनामग्निहोत्रादिकरणं जैमिनिः पश्यतीति तदाचारं प्रामाणिकमिति च मनुत इति तन्मतमनुवदन्निममप्यनूक्तवान् व्यासः । ब्रह्मविदां त्यागावश्यकत्वे गार्हस्थ्यमेतेषां न स्यादिति भावः । उक्तश्रुतिस्तु कर्मण्यशक्तानां तेषां

स्वरूपबोधकानि । एवं ब्रह्मवाक्यानि ब्रह्मणोऽनन्तरूपैरिज्यत्वात् यो देवानां नामधा एक एवेत्यादिमन्त्रवर्णेन तत्तन्नामकत्वाच्च कर्मशेषत्वं तस्मात् । तत्स्वरूपज्ञानेत्यादिवक्ष्यमाणभाष्योक्तरीत्या तत्तादृशमतस्तत्र पुरुषार्थत्ववाद इत्यर्थः । विष्णोरिज्यत्वं ब्रह्मत्वं च शतदूषणीकारोपन्यस्तात् संकर्षणकाण्डसमाप्तिस्थात्, स विष्णुराह हि, तद् ब्रह्मेत्याचक्षते इति सूत्रद्वयात् सिद्ध्यतीति मुख्यतया तस्यैव शेषत्वमत्र व्याख्यातम् । अन्येषां च शेषत्वात् तत्फलस्यार्थवादत्वं जैमिनिना चतुर्थस्य तृतीयपादे उक्तम् । द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यादिति । तदुदाहरणं च, यस्य पर्णमयीत्यादिनोक्तम् ॥ २ ॥

आचारदर्शनात् ॥ सूत्रचतुष्टयमवतारयन्ति * ननु तमित्यादि * । * उत्तरं पठतीति * उक्ताशङ्कायां विद्यायाः पुरुषार्थत्वं वारयितुमग्रिमसूत्राणि वक्तीत्यर्थः । सूत्रं व्याकुर्वन्तः प्रथमत आचारमेव कुतो वदतीत्यत आहुः । * ब्रह्मविदामित्यादि * । * प्रामाणिकं च मनुत इति * । यदेव विद्ययेतिश्रुत्युपोद्बलकत्वेन तथा मनुते । तर्हि तमेव विदित्वेत्यादिश्रुतेः का गतिरित्यत आह । *उक्तेत्यादि * । ननु प्रव्राजश्रुतेरशक्ताधिकारकत्ववत् कर्मकरणश्रुते-

सागमनुवदति। लोकैषणायाश्च व्युथायेति श्रुतेर्लोकसंग्रहार्थं तत्करणमिति न वक्तुं शक्यम् ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥

ब्रह्मविदः कर्माचारनिरूपकश्रुतेरित्यर्थः । सा च, जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेज इत्यादिरूपा । तथाच ज्ञानेनैवार्थसिद्धिश्चेत् स्यात्तदा तद्वत आयाससाध्ये कर्मणि प्रवृत्तिर्न स्यादिति भावः ॥ ४ ॥

समन्वारम्भणात् ॥ ५ ॥

तं विद्याकर्मणी समन्वारभेते इति श्रुतिः फलारम्भे विद्याकर्मणोः साहित्यं दर्शयतीति न स्वातन्त्र्यं विद्यायाम् ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥

ब्रह्मिष्ठो ब्रह्मा दर्शपूर्णमासयोस्तं वृणीत इति कल्पश्रुत्या ब्रह्मविदो ब्रह्मत्वेन वरणं विधीयत इतिब्रह्मज्ञानस्यार्त्विज्याधिकारसम्पादकत्वात् कर्मशेषत्वमेवेत्यर्थः ॥ ६ ॥

ननु यदहरेव विरजेत् तदहरेव प्रव्रजेद्, गृहाद्वा प्रव्रजेद्वनाद्वे-

---

लोकसंग्रहार्थत्वस्यापि शक्यवचनत्वान्नेदं साधीय इत्यत आह*लोकेत्यादि * तथाच आचारदर्शनान्यथानुपपत्त्या तथा कल्प्यत इत्यर्थः । अन्ये त्वाचारदर्शनसूत्रे जनको ह वा इति श्रुतिं, द्वितीये च यदेव विद्ययेत्युदाहरन्ति । तच्चिन्त्यम् । द्वितीयसूत्रवैयर्थ्यापत्तेः॥३॥

तच्छ्रुतेः ॥ ४ ॥

समन्वारम्भणात् ॥ ५ ॥

तद्वतो विधानात् ॥ एतद्भाष्यं सुगमम् ॥ ६ ॥

त्यादिश्रुतिभ्यो विहितत्वाविशेषात् कर्मतत्त्यागयोरैच्छिको विकल्पोऽङ्गीकार्योऽतो न शेषिशेषभाव इत्यत उत्तरं पठति ॥

नियमाच्च ॥ ७ ॥

आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत् ऐन्द्राग्नंपुनरुत्सृष्टमालभेत य आतृतीयात् पुरुषात् सोमं न पिबेद् विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्नाऽऽतृतीयात् पुरुषात् सोमं न पिबति। यावज्जीवमग्निहोत्रं जहुयादित्यादिश्रुतिभ्यो यथा कर्मकरणे नियमः श्रूयते, न तथा तत्त्याग इति नोक्तपक्षः साधुरित्यर्थः । चकाराद् "नियतस्य तु संन्यासः कर्मणो नोपपद्यते । मोहात् तस्य परित्यागस्तामसः परिकीर्त्तित" इत्यादिरूपा स्मृतिः समुच्चीयते । त्यागविधिरशक्तविषय इत्युक्तमिति प्राप्ते ॥ ७ ॥

प्रतिवदति ॥

नियमाच्च ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । व्याकुर्वन्ति । * आश्विनमित्यादि * । अत्र दुर्ब्राह्मण इति विच्छिन्न इति पदाभ्यामकरणे निन्दा बोध्यते । तेन च नियमेन नित्यत्वं कर्मणो व्यक्तीभवति । तथाग्रे यावज्जीवाधिकरणं सूत्रपञ्चकोक्तं निगमयन्ति । * त्यागेत्यादि * । * इति प्राप्ते इति * । एवं प्रकारेण ब्रह्मणस्तद्विद्यायाः कैमुतिकेन जीवविद्यायाश्च कर्मशेषत्वे प्राप्ते ।

अन्ये तु, तच्छ्रुतेरित्यत्र विद्यायाः कर्मशेषत्वाय, यदेव विद्ययेति श्रुतिमुदाहरन्ति । तद्वतो विधानादित्यत्र, आचार्यकुलाद्वेदमधीत्येति छान्दोग्यसमाप्तिस्थश्रुत्या वेदार्थज्ञानवतः कर्माधिकारं व्याकुर्वन्ति । नियमाच्चेत्यत्र, कुर्वन्नेव हि कर्माणि जिजीविषेच्छतं समाः एवं त्वपि नान्यथेतोऽस्ति न कर्म लिप्यते नर इतीशावास्यश्रुतिं, जरामर्यसत्रश्रुतिं चोदाहरन्ति । तन्मते विद्यायाः कर्मशेषत्वमिति पूर्वपक्षः ॥ ७ ॥

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुशब्दः पूर्वपक्षं व्यवच्छिनत्ति। यदुक्तं शेषत्वात् पुरुषार्थवाद इति तन्नोपपद्यते। कुतः। अधिकोपदेशात्। कर्मसाम्यमपि न वक्तुं शक्यं यत्र तत्र तच्छेषत्वं दूरापास्तम्। यत ईश्वरः कर्मणः सकाशादधिक उपदिश्यते। तथाहि। स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च। स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्युपक्रम्याऽग्रे पठ्यते, तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीत्यादि। एवं सति यज्ज्ञानसाधनत्वं यज्ञे तस्य यज्ञशेषत्वं कथं स्यात्। किन्तु यज्ञस्य तद्वेदनशेषत्वम्। एतेनेज्यत्वेन तच्छेषत्वं प्रत्युक्तं वेदितव्यम्। तज्ज्ञानस्य यागपूर्वाङ्ग-

---

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ परिहारं व्याकुर्वन्ति * तुशब्द इत्यादि *। * पूर्वपक्षमिति *। ईश्वर इज्यत्वात् कर्मशेष इति पक्षम्। * कर्मसाम्यमिति *। कर्मणो ब्रह्मसाम्यम्। स वा अयम् इति श्रुतिस्तु बृहदारण्यके शारीरब्राह्मणे * एवं सतीत्यादि *। उक्तश्रुतौ वेदानुवचनेनेत्यादिभिस्तृतीयाश्रुतिभिर्भगवज्ज्ञानशेषत्वे कर्मणामुक्ते सति। * तस्येति *। यज्ञशेषिभूतस्य। अधिकोपदेशेन हेतुना यत् सिद्धं तदाहुः। * एतेनेत्यादि *। उक्तहेतुना तत्प्रयुक्तमित्यर्थः। तद् व्युत्पादयन्ति। * तज्ज्ञानस्येत्यादि *। इज्यत्वेन ज्ञानस्य यागपूर्वाङ्गत्वात् पूर्वं सत्त्वेऽपि तादृशज्ञानपूर्वकं यागकरणे तादृशज्ञानविशिष्टस्य यागस्य ब्रह्मज्ञानसाधनत्वात् तत्फलस्य ज्ञानस्य यः शेषी तस्यैकदेशज्ञानशेषत्वापादने यस्य ज्ञानं यागपूर्वाङ्गं स यागशेष इति नियमो हेतुत्वेन वक्तव्यः। स तु स्वर्गादौ व्यभिचरति। स्वर्गादेः फलस्वज्ञानं विना तदर्थके यागे प्रवृत्त्यभावेन तज्ज्ञानस्य यागपूर्वाङ्गत्वेऽपि स्वर्गादेः

त्वाद् तद्विशिष्टस्य तस्य ब्र[illegible]नत्वात् । नच पूर्वं सामान्यत इज्यज्ञानमासीद् यज्ञेन विशेषतो ज्ञाने सति पुनर्यज्ञकरणे पूर्णं कर्मफलं भवतीति न तद्शेषत्वमिति वाच्यम् । तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीति श्रुतेस्तद्वेदनस्य गार्हस्थ्यविरोधित्वेन तदसम्भवाद् । यश्च साध्वसाधुकर्मफलसम्बन्धरहितस्तस्य कर्तृत्वेन तथात्वमनुपपन्नमतो जीवात्मन एव तथात्वं न तु परस्य । नचैतयोर्वास्तवाऽभेदान्नैवमिति वाच्यम् । वास्तवाभेदाज्जीवेऽप्युक्तश्रुतिभ्यस्तथात्वस्य सुवचत्वात् । वास्तवाऽभेदस्य पूर्वमेव निरस्तत्वात्तमादाय ये पूर्वपक्षास्ते पूर्वपक्षा एवेस-

---

फलत्वेन यागशेषत्वानङ्गीकारात् । अतस्तदप्रयोजकमित्यर्थः । पुनः शेषत्वमाशङ्क्य निषेधन्ति * नचेत्यादि * । पूर्वं गुरुमुखादध्ययने ततस्तस्यावर्त्तनेन स्वाध्यायत्वसम्पादने ब्रह्मण इज्यत्वेन सामान्यतो ज्ञानमासीत्ततस्तदुद्देश्यकस्य ब्रह्मयज्ञस्य द्रव्ययज्ञस्य च करणे विशेषतो ज्ञाने सति पुनर्यज्ञकरणे यदेव विद्ययेति श्रुत्या यागस्य वीर्यवत्तायां पूर्णं फलं भवतीति तात्पर्यात्, तमेतं वेदानुवचनेनेति श्रुत्या न ब्रह्मणो यागशेषत्वनिवृत्तिरित्येवं न वाच्यम् । एतमेवेत्यादितदग्रिमश्रुतेस्तादृग्ब्रह्मज्ञानस्य गार्हस्थ्यविरोधित्वेन यज्ञासम्भवात् । तदसम्भवे तथा फलोत्पत्त्यापादानस्यापि कर्त्तुमशक्यत्वाद् ब्रह्मणः कर्मशेषत्वं नापादयितुं शक्यमित्यर्थः । नन्वीश्वरस्य कर्त्तृत्वाद्विश्वसृड्न्यायेन यज्ञकर्त्तृत्वे सुखेन तच्छेषत्वसम्भव इत्याशङ्क्य परिहरन्ति । * यश्चेत्यादि * । * तथात्वमिति * । कर्मशेषत्वम् । एकदेशिप्रतिपन्नम् । जीवब्रह्मैक्यमादाय पुनः शेषत्वाशङ्कायां तदुपगम्य परिहरन्ति । * नचैतयोरित्यादि * । * तथात्वस्येति * । ईश्वरवत् कर्मशेषित्वस्य । ननु यदि जीवेश्वरयोर्वास्तवाभेद उपगतस्तर्ह्येकतरपक्षपातस्य कर्त्तुमयुक्तत्वादुभयमप्यस्त्विति शङ्कायां सिद्धान्ते तदनुपगमेनाहुः । * वास्तवाभेदस्येत्यादि * । जीवब्रह्मणोर्हि घटाकाशमहाकाशयोरिवोपाधितो भेदो, वस्तुतस्त्वभेदः ।

लमुक्त्वा। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायां विभ्राजते यद् यतयो विशन्तीति श्रुत्या कर्मप्रजाधनैर्मोक्षाप्राप्तिमुक्त्वा त्यागेन तत्प्राप्तिरुच्यते। त्यागविषयस्यान्यस्यानुक्त्या सान्निध्यात् कर्मादीनामेव त्यागोऽभिप्रेतः। तथाच मुक्तोपसृप्यत्वाद्भगवत उक्तसाधनेन मुक्ताः सन्तो नाकं परेण विद्यमानमपि भक्त्या गुहायां विभ्राजते, यद्, यस्मात् परं नापरमस्तीत्यादिनोपक्रान्तत्वात् पुरुषोत्तमस्वरूपं यतयो विरहभावेन तद्विना स्थातुमशक्तास्तत्प्राप्त्यर्थं यतमाना विशन्तीति भक्तिमार्गीयाणां फलमुक्तम्। अग्रे वेदान्तविज्ञानेत्यृचा ज्ञानमार्गीयाणां फलमुक्तम्। अन्यथा पौनरुक्त्यं स्यात्। एवं कर्मज्ञानाभ्यामधिको भक्तिमार्गस्तत्प्राप्यः पुरुषोत्तमश्च श्रुतावुपदिश्यत इति तदेकप्रमाणवादिनो बादरायणस्य मतमप्येवं जैमिनिमतादधिकमित्यर्थः। एवं श्रुत्या परमतं निरस्य शिष्यविश्वासार्थं स्वानुभवमपि प्रमाणयति। तद्दर्शनादिति। उक्ताधिक्यवत्त्वेनैव भगवतो भक्तिमार्गस्य

एतादृशाभेदस्य द्वितीयाध्यायतृतीयपादे, अंशो नानेत्यत्रांशत्वव्यवस्थापनेन निरस्तत्वात्। तमादाय ये पूर्वपक्षास्ते जीवस्वरूपाज्ञानात्पूर्वपक्षा एव न भवन्तीति तथेत्यर्थः। श्रुत्यन्तरेणापि कर्मशेषत्वं परिहरन्ति। * न कर्मणेत्यादि *। श्रुतिस्तु बृहन्नारायणे अणोरणीयानित्यनुवाकस्था। अत्रानुवाकारम्भमन्त्रे महिमानमीश इत्यनेनेशपदवाच्यस्य शिवस्य विभूतित्वकथनाद्, यस्मात् परमिति मन्त्रस्य श्वेताऽश्वतरेऽपि श्रवणाच्छिवपरत्वभ्रमो मा भूदित्येतदर्थं भाष्ये पुरुषोत्तमस्वरूपपदमुक्तम्। एतस्यानुवाकस्य यथा पुरुषोत्तमपरत्वं तथा प्रहस्ताख्ये वादे मया सम्यगुपपादितमिति विशेषतो नोच्यते। अत्रैतन्मन्त्रद्वयोक्तयोः प्रवेशपरिमोक्षयोर्भक्तिज्ञानफलयोरनावृत्तिरूपत्वाद् दुःखसाहचर्याभावेन कर्मफलादाधिक्यं बोधितमिति तौ कर्ममा-

चानुभवादित्यर्थः । श्रुतयोऽधिकमात्मानन्दर्शयन्तीति न व्याख्यानम् । उपदेशपदेन पौनरुक्त्यापत्तेः । तन्मतमनिरस्य तस्मात् स्वमत आधिक्यमात्रोक्त्या निष्कामकर्मणश्चित्तशुद्धिहेतुत्वेन परम्पराज्ञानमार्गोपयोगाङ्गीकारोऽत्र सूच्यते । पुष्टिभक्तिमार्गे तु सोऽपि न । यन्न योगेनेति वाक्यात् । एवं सति क्व कर्मशेषत्वगन्धोऽपि ब्रह्मणीति भावः ॥ ८ ॥

तुल्यं दर्शनम् ॥ ९ ॥

यदुक्तमाचारदर्शनात् कर्मशेषत्वं ब्रह्मण इति तदपि न साधीयः । तुल्यं यतो दर्शनम् । ब्रह्मविदां शुकतृतीयजन्मवदार्षभादीनां त्यागदर्शनात् । एतेन यद्विदां कर्मत्यागस्तस्य कर्मशेषत्वं कथं शङ्कितुमपि शक्यमिति भावः सूच्यते । एतेन कर्मण्यशक्तान् प्रति त्यागविधिरिति निरस्तम् । शुकादीनामतथात्वात् ॥ ९ ॥

र्गादुत्कृष्टाविति सिद्धम् । दर्शनव्याख्याने, भक्तिमार्गस्य चेति चकारो ज्ञानमार्गसमुच्चायकः । श्रुतिसूत्रशेषयोर्व्याख्यानं तूत्तानार्थम् । मतान्तरीये एतद्व्याख्याने अयुक्तत्वं बोधयन्ति । * श्रुतय इत्यादि * शारीराद्धिकं परमात्मानं दर्शयतीति यद् व्याख्यानं तत्पौनरुक्त्यापादकत्वादयुक्तमित्यर्थः । एवं स्वोक्तं व्याख्यानं समर्थयित्वा बादरायणपदेन स्वमतबोधनस्य तात्पर्यमाहुः । * तन्मतमित्यादि * । * तन्मतमिति * जैमिनीयं मतम् । अर्थस्तु स्फुटः । एवमेतेन सूत्रेण जैमिन्युक्तस्य शेषत्वस्य हेतोर्बाधितत्वं स्फुटीकृतम् ॥ ८ ॥

एवं ब्रह्मणः कर्मशेषत्वं निराकृत्य विद्यायाः कर्मशेषत्वं वारयतीत्याशयेनाहुः ॥

तुल्यन्दर्शनम् ॥ भाष्यमत्र प्रकटार्थम् । तथाच य आचारदर्शन इति हेतुर्विद्यायाः कर्माङ्गत्व उक्तः सोऽपि साधारणत्वाद्धेत्वा-

ननु जनको ह वैदेह इति श्रुतिसाहाय्यादाचारदर्शनं त्याग-दर्शनादधिकबलमित्यत उत्तरं पठति ।

असार्वत्रिकी ॥ १० ॥

ब्रह्मविदां सर्वेषामेतदाचारं चेन्निरूपयेच्छ्रुतिस्तदा त्वदुक्तं स्यान्न त्वेवम् । यत एतादृशी श्रुतिर्ब्रह्मवित्सु सर्वेषु न श्रूयते । तथाहि । एतद्ध स्म वै तद्विद्वांस आहुरृषयः कावषेयाः । किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे । एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवाञ्चक्रिरे एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति । एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेत्यादिश्रुतयो बह्व्यस्तद्विदां कर्मत्यागमेवानुवदन्त्यतस्त्यागपक्ष एव बलवान् ॥ १० ॥

ननु ब्रह्मवित्त्वाविशेषेऽप्येकेषां कर्मकृतिरेकेषां तत्त्याग इति विभागः कुत इत्याशङ्क्य तत्र हेतुमाह ।

भास इति बोध्यते । ब्रह्मणः कर्माङ्गत्वं च कैमुतिकान्निरस्यते । जैमिनीयकृता त्यागव्यवस्था च निरस्यत इति तत्र बोधितम् ॥ ९ ॥

असार्वत्रिकी ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * सदाचारस्य तुल्यत्वेऽपि केवलस्य परमुखनिरीक्षकत्वेन श्रुत्युपष्टब्धस्यैव बलवत्त्वमतस्तुल्यत्वं न हेतोः साधारणत्वापादकमित्याशङ्कायां श्रुतेरपि साधारण्यं बोधयितुं सूत्रान्तरं पठतीत्यर्थः । सूत्रं व्याकुर्वन्ति । *ब्रह्मविद्यामित्यादि * अत्र प्रथमा श्रुतिर्बृहदारण्यके शारीरब्राह्मणे । द्वितीया मैत्रेयीब्राह्मणे । तथाच श्रुतेरपि साधारणत्वात् तद्बहुत्वानुगृहीतस्त्यागपक्ष एव बलवान्न तु तत्करणपक्ष इत्यर्थः ।

अन्ये तु यदेव विद्ययेति श्रुतिरुद्गीथविद्यापाठितेति तस्या एव कर्माङ्गतां बोधयतीति विद्यायाः कर्माङ्गता असार्वत्रिकीत्यर्थमाहुः ॥ १० ॥

विभागः शतवत् ॥ ११ ॥

एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेर्मानुषानन्दमारभ्य ब्रह्मानन्दपर्यन्तं ये गणिता आनन्दास्ते सर्वे पुरुषोत्तमानन्दात्मका एव । एवं सति येषु यावानानन्दो दत्तोऽस्ति तावन्तं तं निरूपयन्त्यधिकारतारतम्येन तद्दानमिति ज्ञापनाय शतोत्तरमानन्दं श्रुतिर्न्यरूपयत् । अत एव पुरुषायुःसंख्यासमानसंख्ययैवोत्कर्ष उक्तस्तेन पुरुषधर्मस्याधिकारस्यैवोत्कर्षः सूच्यते । एवं प्रकृतेऽप्यन्यभावराहित्यतारतम्येन भगवद्भावतारतम्यमत्र त्वनुग्रह एवाधिकाररूप इति तदुत्कर्षे त्यागस्तदनुत्कर्षे नेत्यर्थः॥११॥

यच्चोक्तं तद्धतो विधानादिति तत्राह ।

विभागः शतवत् ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । यदि बहुप्रमाणप्रमितत्वात् कर्मत्यागपक्ष एव ज्यायाँस्तदोक्तरूपो विभागः किंहेतुक इति वक्तव्यम् । तदवचने तु ब्रह्मवित्स्वपि ये कर्मण्यधिकारशून्यास्तेषामेव कर्मत्यक्तृत्वं सेत्स्यतीति न विद्याया वेद्यस्य वा आधिक्यसिद्धिरित्याशङ्कायां कर्मत्यागात्यागविभागे हेतुमाहेत्यर्थः । * एतस्येत्यादि * । निरूपयन्तीति सुब्विभक्तिर्बोध्या । * अत एवेति * । अधिकाराभिप्रायादेव । * प्रकृत इति । कर्मत्यागात्यागविभागे ब्रह्मविदाचारविभागे वा। * अत्र त्विति * । भगवद्भावतारतम्ये तु , तथाच कर्मत्यागात्यागविभागे एवमुत्कर्षस्तदभावश्च बीजं, न तु त्वदुक्तमित्यर्थः ॥

अन्ये तु इदं सूत्रं समन्वारम्भणसूत्रोत्तरत्वेनाङ्गीकृत्यैवं व्याकुर्वन्ति। यथा शतमाभ्यां दीयतामित्युक्तेऽर्द्धमेकस्मा अर्द्धमन्यस्मै दीयते तथा। विद्यान्यमारभते कर्मान्यमिति विभागो द्रष्टव्य इति । तच्चिन्त्यम् । तत्र उपसंहारे इति तु कामयमान इति कथनात् कर्माङ्गभूतविद्याया एव विवक्षितत्वावगमेन समन्वारम्भणस्य हेतुत्वाशङ्काया भ्रान्तिमूलत्वेन तदुपेक्षाया एव युक्तत्वादिति ॥ ११ ॥

अध्ययनमात्रवतः ॥ १२ ॥

यदुक्तं ब्रह्मिष्ठो ब्रह्मेत्यादि तत्र ब्रह्मशब्देन वेद एवोच्यते, न तु परस्तथा च तं ब्रह्मत्वेनाविकृतशब्दरूपत्वं ज्ञात्वा सततं तदध्ययनमात्रं यः करोति, न तु तेन किञ्चित् कामयते तस्याधिकारो ब्रह्मत्वार्त्विज्य इत्युच्यत इति न ब्रह्मज्ञानस्य कर्मशेषत्वम्। प्रत्ययस्यातिशायनार्थकत्वादतिशयेन ब्रह्मरूपस्तदैव भवतीति युक्तं तस्य तदार्त्विज्यमेवं सति ब्रह्मपदं ब्राह्मण्यपरमपि सङ्गच्छते ॥

अथवा वेदाध्ययनमात्रवतः कर्मण्यधिकारो, न तु ब्रह्मविदोऽपीत्यर्थः। नच तदन्तःपातित्वेन वेदान्तानामप्यध्ययनस्यावश्यकत्वे तत्प्रतिपाद्यब्रह्मज्ञानस्याप्यवर्ज्जनीयत्वात्तद्वत एव तत्राधिकार इति वाच्यम्। शाब्दपरोक्षज्ञानस्य ब्रह्मज्ञानत्वाभावात्। न हि, सिता मधुरेतिशाब्दज्ञानमात्रवांस्तन्माधुर्यज्ञो भवति। तथा सति पित्तो-

---

अध्ययनमात्रवतः ॥ सूत्रमवतारयन्ति । * यच्चेत्यादि * । व्याकुर्वन्ति । * यदुक्तमित्यादि * । इष्ठन्प्रत्ययसूचितमर्थमाहुः । * प्रत्ययस्येत्यादि * । एतादृशस्य दुर्लभत्वाद्दर्शपूर्णमासयोश्च प्रतिपक्षान्तं कर्त्तव्यत्वात् तादृशाभावे तल्लोपप्रसङ्ग इत्यरुच्या पक्षान्तरमाहुः । * अथवेत्यादि * । आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य शुचौ देशे स्वाध्यायमधीयान इति श्रुतावध्ययनमात्रश्रवणात्तावन्मात्रवत एवेति तथेत्यर्थः । नन्वध्ययनस्याक्षरग्रहणरूपत्वेऽविद्वत्त्वात् कर्मानधिकारप्रसक्तिरथार्थज्ञानस्याप्यपेक्षितत्वं तदा तु वेदान्तेभ्यो ब्रह्मज्ञानस्यापि सम्भवाद् ब्रह्मिष्ठस्यापि कर्मशेषत्वमनिवार्यमित्याशङ्कामनूद्य परिहरन्ति । * नचेत्यादि * । * ब्रह्मज्ञानत्वाभावादिति * । अत्र शाब्दज्ञानस्य तथात्वेन विवक्षितत्वाभावात् । तदुपपादयन्ति । * न हीत्यादि * । * तथा सतीत्यादि * । तावतैव तन्माधुर्यज्ञत्वे सति तस्यापरोक्षज्ञानस्य रासनरूपत्वात् तत्कार्यं स्यात् तत्तु न दृश्यते । एवं प्रकृतेऽपि यदि

पशमादिकं तत्कार्यमपि स्यान्न त्वेवम् । अत एव छान्दोग्ये सनत्कुमारेण, यद्वेत्थ तेन मोपसीदेत्युक्तो नारद ऋग्वेदमारभ्य सर्पदेवजनविद्यापर्यन्तं स्वाधीतमुक्त्वाह, सोऽहं मन्त्रविदेवास्मि नात्मविदितोऽपरोक्षब्रह्मज्ञानमेव ब्रह्मज्ञानमुच्यते । अत एव तैत्तिरीयोपनिषत्सु वेदान्तविज्ञानसुनिश्चितार्था इति पठ्यते । विज्ञानमनुभव एव, न तु ज्ञानमात्रमतो दूरापास्तं कर्मशेषत्वं ब्रह्मणः । तं विद्याकर्मणी इत्यादिस्तु संसार्यात्मनः पूर्वदेहत्यागसामयिकं वृत्तान्तं निरूपयति, न तु ब्रह्मविद इति, समन्वारम्भणादिति सूत्रमुपेक्षितमाचार्येण ॥ १२ ॥

यच्चोक्तं नियमाच्चेति तत्राह ।

तत् तथा स्यात्तदा शुकादिवदेव चरेन्न त्वार्त्विज्यं कुर्यादतस्तद्वैतदपि नापरोक्षमित्यर्थः । अत्र श्रुतिसम्मतिमाहुः । * अत एवेत्यादि * । लिङ्गेन तस्यापरोक्षज्ञानत्वं निवार्य श्रुत्यापि वारणायाहुः । * तैत्तिरीयेत्यादि * । ननु भवत्वेवं तथापि समन्वारम्भणस्यापरिहृतत्वाद् विद्यायाः कर्मसाहित्येनैव फलजनकताङ्गीकार्येति विद्यायाः कर्मशेषत्वं त्वनिवार्यमित्याशङ्कायामाहुः । * तं विद्येत्यादि * । यतः सा संसारिवृत्तान्तं शारीरब्राह्मणे निरूपयत्यतस्तत्र विद्यापदेन विद्धद्वाक्योक्ता कर्माङ्गभूतैव विद्याऽभिप्रेयते । अत एव तत्र विद्याकर्मभ्यां दैवं वा, पित्र्यं वा, गान्धर्वं वेति तादृशशरीरमेव फलत्वेन वक्ति, न मोक्षमतस्तस्मिन् वाक्ये ब्रह्मवित्सर्गस्याप्यभावात् तदुपेक्षितमतो न वेदान्तोदितविद्याया अपि कर्मशेषत्वमित्यर्थः । एतेन यदन्यैरेव व्याख्यातम् । औपनिषदमात्मज्ञानं स्वातन्त्र्येणैव प्रयोजनवत् प्रतीयमानं न कर्माधिकारकारणतां प्रतिपद्यत इति प्रतिपादयाम इति । तत्र बीजमिदमेव वक्तव्यं, न तु क्रत्वन्तरज्ञानं क्रत्वन्तराधिकारणापेक्ष्यत इति दृष्टान्तबोधितमिति सूचितम् । तथा सत्यपि ब्रह्मिष्ठपदबोधितशेषताया अनपायादिति ॥ १२ ॥

नाविशेषात् ॥ १३ ॥

आश्विनमित्यादिश्रुतिभ्यः कर्मकृतो यथा नियमः श्रूयते, न तथा त्याग इति यदुक्तं, तन्न । कुतः । अविशेषात् । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति श्रुतिः कर्मादिना अमृतत्वाप्राप्तिमुक्त्वा तत्त्यागेन तां वदन्ती कर्मत्यागस्यावश्यकत्वं वदतीति तस्मान्न विशेषो यत इत्यर्थः । तथाचाऽमृतत्वमानशुरिति पदान्मुमुक्षोः कर्मत्यागनियमोऽमुमुक्षोस्तत्कृतिनियम इतिव्यवस्थेति भावः ॥

अथवा, ननु क्रमप्राप्ते तुरीयाश्रमे हि कर्मत्यागो, द्वितीये तस्मिन् कर्मकरणनियमस्तत्र च कर्त्तुरङ्गत्वेन तत्स्वरूपज्ञानमात्र-

---

नाविशेषात् ॥ अवतारयन्ति । * यच्चोक्तमित्यादि * । सौत्रं हेतुं व्याकुर्वन्ति । * न कर्मणेत्यादि * । तथाच यथा कर्मश्रुतावकरणनिन्दादिना तदावश्यकतया कर्मकरणनियमोऽवगम्यते तथा त्यागश्रुतावपि कर्मादिभिर्मोक्षाप्राप्तिकथनपूर्वकं त्यागेन तत्प्राप्त्युक्त्या तदावश्यकतया त्यागस्यापि नियमोऽवगम्यत इति तथेत्यर्थः । तेन सिद्धमाहुः । * तथाचेत्यादि * । एवं ब्रह्मज्ञानस्य कर्माङ्गत्वाऽभावेऽपि जीवस्वरूपज्ञानस्य कर्माङ्गत्वं न वारयितुं शक्यमित्याशङ्काऽप्यनेनैव निरस्ता भवतीत्याशयेन पक्षान्तरमाहुः * अथवेत्यादि * * तत्र चेति * । कर्मणि च अविशेषपदस्य व्याख्यानम् । आश्रमविशेषे विशेषाभावादिति । अयमर्थः । भाट्टा हि अध्ययनविधिगृहीतानां वेदान्तानां वेदशेषत्वायैवमुपवर्णयन्ति । तथाहि । यत्तावद् अविनाशी वा अरे अयमात्मेत्यादिना जायमानं शरीराद्यतिरिक्तनित्यात्मस्वरूपसद्भावज्ञानं तत् पारलौकिकफलककर्मानुष्ठानौपयिकत्वात् कर्मज्ञानवदेव सामर्थ्यतः क्रतुसंयोगात् क्रत्वर्थम् । यथा ज्योतिष्टोमादिवाक्याध्ययनं दृष्टेनैव द्वारेणानुष्ठानौपयिकं ज्ञानं जनयतीति तदर्थतयैवाध्ययनं विधीयते । तथा अविनाशीत्यादिवाक्यानामप्यध्ययनविधिरेव कर्मानुष्ठानोपयोग्यात्मज्ञानार्थतां विधत्ते । तद्यदि प्रमाणान्तरेणात्मनः शरीरादिविवेको नैकान्ततः सिद्ध्यति ।

ततो दृढविवेकप्रतिपादकानामुपनिषद्वाक्यानां विस्पष्टज्ञानमेव फलम्। तदुक्तम् । "इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या । दृढत्वमेव तद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन" इति । यदि च शरीरादिव्यतिरिक्तात्मज्ञानमन्यतोऽपि सिद्ध्यति ततो यथैवान्यतः क्रतुज्ञानसम्भवेऽप्यध्ययनोपात्तवेदवाक्यावगतकर्मरूपाणामेव पुंसां कर्मस्वधिकारस्तथैवाध्ययनोपात्तोपनिषद्वाक्यावगतात्मतत्त्वानामेवाधिकार इत्यध्ययनविधिबलादेव कल्प्यते । यत्त्वात्मसद्भावप्रतिपादनोपक्रमे, आत्मा वा अरे द्रष्टव्य इत्यादिकं विधिरूपं वाक्यं तत्तु वक्ष्यमाणार्थस्यातिगहनत्वान्महोपयोगित्वाच्चालस्यं निवार्य श्रद्धाविशेषेण कृत्वा वक्ष्यमाणार्थप्रतिपत्तिमात्रार्थम् । तस्मादेतज्ज्ञानं दृष्टोपयोगित्वात् क्रत्वर्थम् । यानि पुनरितिकर्त्तव्यताविशेषे उपासनात्मकानि ज्ञानानि विधीयन्ते तेषां क्रतौ दृष्टोपयोगाभावाददृष्टफलत्वम् । अदृष्टं च फलं वाक्यशेषाद् द्विविधं अभ्युदयरूपं निःश्रेयरूपं च । सर्वांश्च कामानाप्नोति, सोऽश्नुते सर्वान् कामानित्याद्युक्तमभ्युदयफलम् । न स पुनरावर्त्तत इत्याद्युक्तं निःश्रेयसफलमिति विवेकः ।

यत्तु, विज्ञानघन एवैतेभ्यो भूतेभ्य समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञास्तीति ब्राह्मणेन भूतचैतन्यमुक्तमित्याशङ्क्यते तन्न । स्वयमेव ब्राह्मणेन, अत्रैवमा भगवनमूमुहं न प्रेत्य संज्ञास्तीत्यनेन पूर्वोक्ताऽजराऽमृतत्वस्य विनाशित्वाभिधानतो बाधात् पूर्वपक्षं चोद्याख्यमुत्थाप्य, न वा अरे मोहमहं ब्रवीम्यविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मेत्युक्त्वा मात्रासंसर्गस्त्वस्य भवतीति कथनेन मात्राशब्दवाच्यानां भूतेन्द्रियधर्माणां विकाराणां सम्बन्धबोधनात् विज्ञानघनशब्दोक्तो ज्ञानशक्तिस्वभाव आत्मा एतेभ्यो भूतेभ्यः समुत्थाय व्यक्तो भूत्वा तान्येवानुविनश्यति । भूतविनाशाद्विनष्ट इव भवति । भूतसंस्थो ह्यसौ स्वयं प्रत्यक्षेण गृह्यते । परैश्च शरीरचेष्टादिलिङ्गकाऽनुमानेन । मुक्तस्तु प्रमाणपथातिवर्त्तनाद्विनष्ट इव भवतीति प्रकारेण मात्राणामेव नाश उच्यते, नात्मन इत्यविरोधात् । तदुक्तम् । "अविनाशी स्वरूपेण पुरुषो याति नाशिताम् । मात्राणां सविकाराणां भूतादीनामसंज्ञिते"ति । अत्र हि मुक्तस्य ज्ञानाभावो बोध्यते । भूतेन्द्रियादिवियोगे करणाभावेन ज्ञानोपायाभावात् । तत्केन कं पश्ये-

दित्यारभ्य विज्ञातारमरे केन विजानीयादित्यन्तेन विज्ञानाभावोपपा-
दनात् । वस्तुतस्तु प्रकरणार्थोपसंहारोऽयम् । यत एव पूर्वोक्तन्या-
येन भूतचैतन्यं न सम्भवति तस्माद् भूतेन्द्रियाणामसंज्ञित्वम् । अ-
चैतन्यम् । अन्यस्तु तेभ्यो नित्यश्चेतनस्य स्वर्गगमनसम्भवान्न स्वर्गं
लोकं यातीत्यस्य प्रत्यक्षस्य विरोध इत्येवं भट्टकारिकाया अर्थादि-
ति पार्थसारथिमिश्राः । तथाच यथा प्रोक्षणसंस्कृता एव व्रीहयो
याग उपयुज्यन्त एवमौपनिषदज्ञानसंस्कृत एव कर्त्ता उपयुज्यत
इति तत्स्वरूपनिरूपकत्वेन वेदशेषा वेदान्ता इत्याहुः । तत्र भाष्यो-
क्तं दूषणं पश्चाद् व्युत्पाद्यम् । पूर्वं तु तदुक्तेऽस्यात्मवाक्यतात्पर्य-
त्वासङ्गतिः प्रकाश्यते । शरीरादिव्यतिरिक्तात्मसत्तामात्रसाधना-
याऽविनाशीत्यादिश्रुतिरिति यदुक्तम् । तन्मदम् । शाबरभाष्ये नै-
यायिकाद्युक्तयुक्तिभिरेव तत्सिद्ध्या तत एव नास्तिक्यनिराकरणासि-
द्धावविनाशी वा अर इत्यादिश्रुतिसन्दर्भस्य तदर्थताया वक्तुमयुक्त-
त्वात् । एतदुपक्रमे, येनाहं नामृतास्यां किमहं तेन कुर्यामिति मो-
क्षार्थत्वस्य श्रावणान्निरुपाधिप्रियत्वबोधनस्याप्यन्यत्र वैराग्योत्पादना-
र्थत्वेन संसारिलिङ्गत्वाभावात् । ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्र-
ह्म वेदेत्यादिनिन्दाश्रुत्या आत्मज्ञानेन सर्वज्ञानश्रावणस्यापि स्तुत्यर्थ-
ताया वक्तुमशक्यत्वात् । अध्ययनवाक्ये तु न विधिः, किन्त्वावश्य-
कार्थे तव्य इति जिज्ञासासूत्र एवोपपादितम् । अर्थज्ञानं तु सामा-
न्यतो गुरुकृताज्ज्ञापनात् । विशेषस्तु तपआदिभ्यः साधनेभ्यो मी-
मांसाद्ययसहकृतेभ्य इत्यपि । अर्थज्ञानं च न द्रव्ययज्ञमात्रानुष्ठानो-
पयोगि । चातुराश्रम्यधर्मार्थत्वात् । अन्यथा तद्वाक्यवैयर्थ्यापत्तेः ।
धर्मोऽपि न धर्मत्वेन रूपेण वेदार्थः, किन्तु ब्रह्मात्मकत्वेन । यज्ञो वै
विष्णुरिति, धर्मो यस्यां मदात्मक इति श्रुतिस्मृतिभ्यां, सर्वे वेदा य-
त्पदमामनन्तीति वेदैश्च सर्वैरहमेव वेद्य इत्यादिश्रुतिस्मृतिभ्यश्च ।
एवञ्च विधिपक्षेऽपि आत्मावारे द्रष्टव्य इति दर्शनविधानं ब्राह्मणो-
पक्रममारभ्यान्तं प्रोक्तस्यार्थस्यातिगहनत्वात् तदर्थं न तुक्रत्वर्थम् ।
सोऽश्नुते सर्वानित्यस्य यदभ्युदयरूपत्वमुक्तम् । तदप्यबुद्ध्वा । पर-
प्राप्तिविवरणरूपत्वेन तस्य निःश्रेयसरूपत्वात् । इदं च प्रागुप-
पादितम् । यदपि, न प्रेत्य संज्ञास्तीत्यनेन मोक्षदशायामात्मनः
करणाभावाज्ज्ञानशून्यत्वमुच्यत इत्युक्तम् । तदपि तथा ।

श्यकम् । तच्च वेदान्तैरेवेति कथं न कर्मशेषत्वमित्युत्सूत्रमाशङ्क्य निषेधति । नेति । यदहरेव विरजेदिति श्रुतेस्तावत् कर्माणि कुर्वीत न निर्विद्येत यावतेति भगवद्वाक्याच्च त्यागे वैराग्यस्य च प्रयोजकत्वादाश्रमविशेषे विशेषाभावादप्रयोजकत्वादित्यर्थः । यत्रापि क्वचित्क्रमप्राप्तिस्तत्रापि न तज्ज्ञानं ब्रह्मज्ञानमिति

अनुच्छित्तिधर्मेत्यनेन तत्रैव धर्मानुच्छित्तिं श्रावयित्वा यद्वैतन्न पश्यति पश्यन् वै तद् द्रष्टव्यं न पश्यतीत्यादिना करणाभावेऽपि स्वत एव दर्शनस्य विभक्ताभावेनान्यादर्शनस्य चोक्त्या स्वतोऽविभक्तदर्शनस्यैव व्युत्पादनादिति । वस्तुतस्त्विदमपि ब्रह्मप्रकरणमिति वाक्यान्वयाधिकरणे व्युत्पादितमिति न तत्र जीवात्मसत्तासाधनार्थत्वगन्धोऽपि । तस्मान्न कर्तृशेषा वेदान्ताः । अतः परं भाष्यं विव्रियते । * यदहरेवेत्यादि * यदुक्तं कर्तृस्वरूपनिरूपकत्वात् कर्मशेषत्वं वेदान्तानामिति । तन्न युक्तम् । कर्तुः कर्मशेषत्वाभावात् । यदहरेवेत्यादिश्रुतेस्तावत् कर्माणीति भगवद्वाक्याच्च त्यागे वैराग्यस्यैव प्रयोजकत्वाद्वैराग्योत्पत्तिपर्यन्तमेव कर्मकरणप्राप्तेराश्रमविशेषस्याप्रयोजकत्वाद्वेदानां पूर्वोक्तरीत्या कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथेति स्मृत्या च कर्मत्याग एव तात्पर्याद्वेदानां वेदान्तशेषत्वाज्जीवनिरूपकवेदान्तभागस्यापि त्यागकर्तृनिरूपकत्वमेव मुख्यम् । कर्मकर्तृनिरूपणं तु प्रासङ्गिकम् । अत एव तद्वाक्येषु, इति तु कामयमान इति, अथाकामयमान इत्युभयविधं तत्स्वरूपं निरूप्यते । अत आश्रमविशेषमादाय वेदान्तानां कर्मशेषत्वस्थापनमयुक्तमेवेत्यर्थः । ननु त्यागस्य फलार्थत्वेऽपि ज्ञानाङ्गत्वाज्ज्ञानस्य च वेदान्तसिद्धस्य कर्माङ्गतायाः प्रागेवोक्तत्वात् प्रव्राजेऽपि चातुराश्रम्यपक्षकथनेनाध्ययनोपात्तवेदान्तभागजन्यस्य ज्ञानस्य कर्मशेषत्वमनिवार्यमेवेत्याशङ्कायां तस्याः पूर्वमेवोत्तरं दत्तमित्याहुः । * यत्रापीत्यादि * यत्रापि कस्मिंश्चित् पुरुषविशेषे क्रमेण त्यागप्राप्तिस्तत्रापि शाब्दज्ञानस्य मुक्तिसाधकत्वाभावान्न विवक्षितब्रह्मज्ञानत्वमिति पूर्वस्मिन्नध्ययनमात्रवत इति सूत्र एव व्युत्पादितमतो न ब्रह्म-

पूर्वसूत्र एवोक्तमिति भावः । एतेन वेदाध्ययनादिकमप्यप्रयोजकमिति ज्ञापितम्।अत एव शुकस्य वैराग्यातिशयादुपनयनादेरप्यनपेक्षोच्यते । एवं सूत्रद्वयेन कर्माधिकारसम्पादकत्वेन ब्रह्मज्ञानस्य तच्छेषत्वं निरस्तम् ॥ १३ ॥

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

अथ ग्रहिलतया ब्रह्मिष्ठ इत्यत्र ब्रह्मपदेन पर एवोच्यत इति वदसि तत्रापि वदामः । दर्शपूर्णमासावेतादृशौ यत्रब्रह्मविदार्त्विज्याधिकारीति तत्स्तुत्यर्थं ब्रह्मिष्ठो ब्रह्मेत्यनेन ब्रह्मविदोऽप्यार्त्विज्येऽनुमितिः क्रियते, न तु तस्याधिकारित्वमभिप्रेतम् ।

ज्ञाने कर्मशेषत्वगन्धोऽपीत्यर्थः । ननु तथापि, ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यादिश्रुतिभिर्वेदाध्ययनादिकं त्वावश्यकम् । तदपि कर्मैवेति तदङ्गत्वं त्वात्मज्ञानस्य भविष्यत्येवेति कथं न कर्माङ्गत्वमित्यत आहुः । * एतेनेत्यादि * । * अप्रयोजकमिति * ज्ञानस्य कर्माङ्गत्वाप्रयोजकम् । अत्र निदर्शनमाहुः । * अत एवेत्यादि * । सिद्धमाहुः * एवमित्यादि * एवमधिकोपदेशसूत्रेण स्वोक्तमुपष्टभ्य शेषैः पञ्चभिः सूत्रैर्जैमिन्युक्ता हेतव आभासीकृताः ॥

अन्ये, तु कुर्वन्नेव हीत्यत्र न विदुष इति विशेषेण नियमविधानमित्येवं सूत्रार्थमाहुः । तथाचाविद्वद्विषयत्वेऽपि वाक्यसामञ्जस्यान्न तेन विद्यायाः कर्माङ्गत्वसिद्धिरिति तदाशयः ।

रामानुजास्तु, उक्तवाक्ये कर्मणां करणनियमेऽपि कर्मसु विशेषो नोच्यते । यज्ञाद्येव कार्यं नान्यदिति । अतो यथा अविदुषां स्वतन्त्रफलसाधकं नियतमेवं विदुषां विद्याङ्गभूतमत एवमपि वाक्यसामञ्जस्यान्नानेन विद्यायाः कर्माङ्गत्वप्राप्तिरित्याहुः । तदप्यविरुद्धम् ॥ १३ ॥

स्तुतयेऽनुमतिर्वा ॥ एवं षड्भिः सूत्रैर्जैमिनीयोक्तं निराकृत्य पुनरुत्सूत्रं किञ्चिदाशङ्क्य निराकरोतीत्याशयेन सूत्रमवतारयन्ति । * अथेत्यादि * व्याकुर्वन्ति । * दर्शेत्यादि * । * तस्येति * ब्रह्म-

उक्तानुपपत्तिभिरित्यर्थः ॥ १४ ॥

कामकारेण चैके ॥ १५ ॥

नन्वेष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयानिति श्रुत्या ब्रह्मविदः कर्मकृतगुणदोषौ निषिद्ध्येते । स च प्राप्तिपूर्वक इति ब्रह्मविदः कर्मकरणमावश्यकमिति प्राप्ते, उच्यते ।

ज्ञानस्य । तथाचोक्तवाक्ये ब्रह्मिष्ठपदमतिशयेन ब्रह्मवानित्यर्थकम् । अतिशयश्च श्रद्धया साक्षात्कारेण वेति, यो यच्छ्रद्धः स एव सः, ज्ञानी त्वात्मैव मे मतमिति गीतास्मृत्याऽवसीयते । तादृशश्चेद् ब्रह्मा कृताकृतावेक्षकतया यागे तिष्ठति तदा परमकाष्ठाप्रापकौ दर्शपूर्णमासौ साङ्गौ भवतः । यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेदित्यष्टमस्कन्धे शुक्राचार्यं प्रति भगवद्वाक्यात् । अतो ब्रह्मिष्ठो ब्रह्मेति पदसमभिव्याहाररूपस्यानुग्रहबीजस्य वाक्ये विद्यमानत्वाच्छुकाद्याचारकाद्वेषयश्रुतिविरोधत्यागनियमरूपाणामार्त्विज्यबाधकानामनुपपत्तीनां सत्त्वाच्च तस्या अनुज्ञायाः यागस्तुत्यर्थत्वमेवेत्यर्थः । सूत्रे, वाशब्दोऽनादरे । तेन ब्रह्मणि श्रद्धावतः सर्वत्र ब्रह्मद्रष्टुश्च तदार्त्विज्यं प्रासङ्गिकमिति बोधितम् । स्तुतिप्रयोजनं त्वविद्वत्प्ररोचनम् । अधिकाराभावेऽपि त्यागकरणेऽनिष्टं स्यादिति तन्निवृत्त्यर्थमिति बोध्यम् ।

अन्ये तु, कुर्वन्निति श्रुतौ प्रकरणसामर्थ्याद्विद्वानेव संबोध्यत इत्युच्यते । तदापि विद्यास्तुतये कर्मानुज्ञानं द्रष्टव्यम् । न कर्म लिप्यते नर इति वाक्यशेषात् । यावज्जीवं कर्म कुर्वत्यपि विदुषि विद्यासामर्थ्यात् कर्म न लेपाय भवतीति तत्रार्थादित्याहुः । तदप्यविरुद्धम् ॥ १४ ॥

कामकारेण चैके ॥ नन्वनुज्ञयाप्यार्त्विज्यकरणे विध्यधीनत्वं तु निर्बाधमतो भवतु कर्माङ्गत्वं विद्यायास्तद्द्वारेत्याशयेन सूत्रमवतारयन्ति । * नन्वित्यादि * । स चेति * । निषेधः । सूत्रं व्याकु-

कामकारेणेति । करणं कारः । कामेनेच्छया करणं कामकारस्तथाच परानुग्रहार्थमिच्छामात्रेण, न तु विधिवशाद् यत् करणं तत् कामकार इत्युच्यते। तथाचैवं कृते कर्मणि तत्कृतगुणदोषप्रसक्तौ तत्प्रतिषेधमेक शाखिन, एष नित्य इत्यादि पठन्ति॥ न ह्येतावता कर्मकृत्यधिकारप्राप्तिरिति भावः । अथवा । कामेन कारो यस्य स तथा । तादृशेन कर्मणा प्राप्तवृद्धिह्रासयोः सम्बन्धाभावं ब्रह्मविदि एके पठन्तीत्यर्थः । चकारेणेश्वराज्ञया लोकसंग्रहार्थं कृतं कर्म समुच्चीयते । सर्वस्य वशी सर्वस्येशान इति श्रुतेस्तथा॥ १५ ॥

चन्ति । * करणमित्यादि * । *इच्छामात्रेणेति * । स्वेच्छामात्रेण । एतस्यैव विवरणं, न तु विधिवशादिति । तेन "शौचमाचमनं स्नानं न तु चोदनया चरेत् । अन्याँश्च नियमान् ज्ञानी यथाहं लीलयेश्वर" इत्येकादशीयभगवद्वाक्यानुरूपया स्वेच्छयेति फलितं बोध्यम् । * एतावतेति * । गुणदोषनिषेधमात्रेण । एवं व्याख्याने स्वकृत्या दोषाद्यप्रसक्तिरायाति, न तु तदभिव्यङ्ग्यकर्मकृतगुणदोषाप्रसक्तिरपीत्यतः प्रकारान्तरमाहुः * अथवेत्यादि * । * स इति * । ब्रह्मवित् । तथाच श्रुतावेष इत्यनेन कृताकृतजन्यतापाभावरूपं पूर्वोक्तमहिमानं परामृश्य तस्य नित्यत्वोक्तिस्तस्यैकरसत्वोक्तिश्च कामकारलिङ्गम् । तेन तादृशपुरुषस्यापि चेत्कर्मशेषत्वनिवृत्तिस्तदा विद्यायाः कर्मशेषत्वं शङ्कितुमप्यशक्यमित्यर्थः । ईश्वरेच्छायां गमकमाहुः । * सर्वस्येत्यादि * । तथाच सर्ववशकरणार्थं कर्मणामावश्यकत्वाद् भगवतः सर्वेशनशीलत्वेन ज्ञानिनामपि भगवदीशितव्यतया तानाज्ञापयति लोकसंग्रहार्थमित्ययमर्थोऽनया श्रुत्यैव ज्ञायत इत्यर्थः । यद्यपि पूर्वपादे तन्निर्द्धारणानियमसूत्रेऽयमर्थस्तत्फलार्थमुक्तस्तथाप्यत्र स एव वादिनिराकरणार्थमुच्यत इति न पुनरुक्तिदोषः । एवं ब्रह्मविदः कामकारबोधनादार्त्विज्यमपि तस्य न विधिनियतमिति च समर्थितम् ॥

उपमर्दञ्च ॥ १६ ॥

अनेन कर्माधिकाराभावे हेत्वन्तरमुच्यते ॥ द्वैतभाने हि यथाकथञ्चित् कर्मकृतिसम्भावनापि।यस्य त्वखण्डब्रह्माद्वैतभानं ब्रह्मैसेव, न त्विदं ब्रह्मेति सखण्डम् । अत्रोद्देश्यत्वेन प्रपञ्चस्यापि भानात् सखण्डत्वन् । तथाचाखण्डतद्भाने कर्मतदधिकारादेरुपमर्दं चैके शाखिनः पठन्तीति न ब्रह्मज्ञानस्य कर्मशेषत्वसम्भावनापीत्यर्थः।श्रुतिस्तु, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदित्यादिरूपा ॥ १६ ॥

ऊर्द्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥

अन्ये तु, कामकार इच्छेति व्याख्याय, तद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नो ऽयमात्मा नायं लोक इति वाजसनेयिश्रुतौ कर्मत्याग इच्छयैव बोध्यत इति प्रत्यक्षीकृतविद्याफलानां तदवष्टम्भेन प्रजादिषु कामाभावकथनात् । अतो विद्याफलस्य प्रत्यक्षतया तत्फलश्रुतेरयथार्थताया वक्तुमशक्यत्वाच्च विद्यायाः कर्मशेषत्वमाश्रयितुं शक्यमित्येवं व्याकुर्वन्ति । तत्र कामपदस्येच्छावाचकत्वेऽपि कामकारपदस्य तद्वाचकत्वं चिन्त्यम ॥ १५ ॥

उपमर्दं च ॥ उक्तोपष्टम्भायसूत्रान्तरं पठतीत्याशयेन सूत्रमवतारयन्ति । * अनेनेत्यादि * । व्याकुर्वन्ति । * द्वैतेत्यादि * । अनेनापि पूर्वोक्तं समर्थितं ज्ञेयम् । शाङ्करग्रन्थेऽप्येवम् ।

रामानुजास्तु, भिद्यते हृदयग्रन्थिरिति श्रुतिमुपन्यस्यात्र विद्यया कर्मक्षयकथनाद्विद्यया तदुपमर्द इति न तस्याः कर्माङ्गत्वमित्याहुः ॥ १६ ॥

उर्ध्वरेतस्सु च शब्दे हि ॥ ननु पूर्वसूत्रैर्विद्यायाः कर्मशेषत्वं बहुधा निराकृतम् । फले स्वातन्त्र्यं च स्थापितमिति किमनेन सूत्रेणेत्य।शङ्कायां तत्प्रयोजनं वदन्तः पूर्वं त्रिभिः सूत्रैर्ग्रहिलवाद एकस्मि-

अत्रेदं विचार्यते। ब्रह्मचर्यानन्तरं गार्हस्थ्यमपि श्रुत्या बोध्यते। ब्रह्मचर्यादेव प्रव्रजेदित्यादिश्रुतिभिर्ब्रह्मचारिण एव च प्रव्रजनमपि बोध्यते। एवं सत्यविरोधाय यदहरेवेति श्रुतेश्च रागितद्रहितभेदेन विषयभेदो वाच्यः। तत्र ब्रह्मचार्याविशेषेऽपि भगवदनुग्रहविशेषजचित्तशुद्धिविशेषजवेदान्तार्थपरिज्ञानमेव हेतुर्वाच्यः। वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद् यतयः शुद्धसत्त्वा इति श्रुतिरिममेवार्थमाह। तथाचैतादृशा एवोर्द्ध्वरेतस इत्युच्यन्ते। एवं सत्यूर्द्ध्वरेतस्सु कर्माभाव उक्तरीत्या त्वयाऽप्युरीकार्य इति ज्ञानरहितानां कर्मण्यधिकारस्तद्रतां सन्न्यास इति त्वदुक्ताद्

श्निराकृतेऽपि श्रुतौ ब्रह्मचर्यगार्हस्थ्याविवाभिप्रेतौ चातुराश्रम्यपक्षस्तु स्मार्त्तत्वान्निर्बल इति तमादाय कर्मत्यागादरो न युक्त इति ग्रहिलवादान्तरं निराकरोतीत्याशयेन सूत्रं व्याकुर्वन्ति। * अत्रेत्यादि *। अयमर्थः। जाबालश्रुतौ हि संन्यासमनुब्रूहीति जनकप्रश्ने याज्ञवल्क्यो ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद्वनी भूत्वा प्रव्रजेदिति क्रमेण चातुराश्रम्यपक्षं पूर्वमुक्तवान्। तत्रायुर्भागक्रमेण तथा करणे आयुस्तुरीयभागे आन्ध्यादिकमपि क्वचित् सम्भवतीति तदा कर्मानधिकारे संन्यास इति शङ्का स्यादिति तदभावाय पक्षान्तरमाह। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वाऽथ पुनरव्रती वा व्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनाग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति। तेन कर्मानधिकारो न सन्न्यासप्रयोजकः, किन्तु वैराग्यमेव तत्प्रयोजकम्। तथा सति यावज्जीवमग्निहोत्रादिश्रुतीनामपि रागाधिकारकत्वान्न विरोध इति सिद्ध्यति। तथापि ब्रह्मचर्यस्य तद्धर्मस्य च सर्वसाधारणत्वेऽपि कथं कस्य चिदेव विरागो न सर्वस्येत्यपेक्षायां भगवदनुग्रहजनितचित्तशुद्धिरेव हेतुत्वेन वाच्या। भगवदनुग्रहे च व्यापारत्वेन वेदान्तार्थविज्ञानं तत्सहकारी सन्न्यासश्च वाच्य इति वेदान्तविज्ञानेति तैत्तिरीयश्रुत्याऽवसीयते। तथाचैवं भगवदनुगृहीता उर्ध्वरेतस इत्युच्यन्ते। तेषु

विपरीतोऽर्थः सिद्ध्यतीति क्व कर्मशेषत्वसम्भवना ज्ञाने । ननु सन्न्यासेऽपि तदाश्रमीणं कर्मास्तीति वैराग्यसहकृतं ज्ञानमेतच्छेषभूतं, तदसहकृतं तदग्निहोत्रादिशेषभूतमिति न वैपरीत्यमिति प्राप्त आह । शब्दे हीति । ज्ञानस्वरूपं तत्फलं च न युक्तिसिद्धं, किन्तु वेदमात्रसिद्धम् । तत्र तु, तमेवं विद्वानमृत इह भवति, ब्रह्मविदाप्नोति परम्, य एवं विदुरमृतास्ते भवन्तीत्यादिवाक्यैर्ब्रह्मज्ञानस्य मोक्ष एव फलं श्रूयते । सर्वसाधनानां साक्षात्परम्पराभेदेन तत्रैव पर्यवसानादतो धर्मिग्राहकमानविरोधात्सन्न्यासाश्रमीणकर्मशेषत्वमपि न वक्तुं शक्यमित्यर्थः । नन्वेवं संन्यासवैयर्थ्यमितिचेन्न । ब्रह्मविदातिरिक्तसङ्गस्य भगवद्विस्मारकत्वेनावश्यत्याज्यत्वेन श्रुत्या कथनादत एव, वेदान्तविज्ञानसुनिश्चितार्था इत्युक्त्वा, संन्यासयोगाद् यतयः शुद्धसत्त्वा इत्युक्तम् । अत्र पञ्चम्याऽन्तःकरणे

च कर्मभावे उक्तरीत्या हेतुभेदकृतविषयभेदेन सन्न्यासयोगात्त्वयाऽपि श्रौतवादिनाऽङ्गीकार्यः । अन्यथा श्रुतीनां सामञ्जस्यासम्भवात् । एवं सति, परिव्राड् विवर्णवासा मुण्डोऽपरिग्रहः शुद्धिरद्रोही भैक्षाण इत्यादिरूपं तदाश्रमवाक्यमपि सङ्गतं भवेत् । तस्मान्न ज्ञानस्य कर्मशेषत्वं शक्यवचनमपि । सूत्रशेषमवतारयन्ति । * नन्वित्यादि * । * तदाश्रमीणमिति * । शौचाचमनस्नानाऽग्रग्रासभक्षणयोगाभ्यासादि । व्याकुर्वन्ति * ज्ञानस्वरूपमित्यादि *। * धर्मिग्राहकमानविरोधादिति * धर्मि, कर्मशेषत्वेन मुख्यत्वेन च सन्दिह्यमानं ज्ञानम् । तद्ग्राहकं मानं तत्स्वरूपज्ञापिका श्रुतिः । सा तु ज्ञानस्य मोक्षपूर्वकालीनत्वं प्राप्तृविशेषणतां च कर्मनैरपेक्ष्येण वदन्ती मोक्षरूपं फलं प्रति साक्षादेव कारणतां बोधयतीति कर्मशेषत्वाङ्गीकारे तद्विरोधात् । तथाच ज्ञानस्य सन्न्यासाश्रमीणकर्मशेषत्वनिवारणाय मर्यादामार्गे सन्न्यासस्यावश्यकत्वबोधनाय चेदं सूत्रमित्यर्थः । अत्रैव किञ्चिदाशङ्क्य परिहरन्ति । * नन्वेवमित्यादि *।* एवमिति * ।

संस्कारविशेषाधायकत्वं च प्रतीयते संन्यासस्य । स च संस्कारः फलोपकार्यङ्गमित्यावश्यकः संन्यासो मर्यादामार्गे। पुष्टिमार्गे त्वन्यैव व्यवस्था । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहेति वा क्यात् ॥ १७ ॥

परामर्शं जैमिनिरचोदना चापवदति हि॥ १८ ॥

ज्ञानस्य केवलस्य कारणत्वे । तथाच मर्यादामार्गे प्रतिबन्धनिवृत्तेरावश्यकतया श्रुतौ सन्न्यासस्य सत्त्वशोधकत्वकथनेन ज्ञानस्वरूपोपकारकत्वेऽपि फलानुभवप्रतिबन्धनिवारकत्वात् तत्राप्यपेक्षासत्त्वेन न वैयर्थ्यमित्यर्थः । क्वचिद् व्यभिचारदर्शनेनावश्यकत्वशङ्कास्यादिति तन्निवृत्त्यर्थमाहुः । * पुष्टीत्यादि * । तथाच मार्गभेदान्न दोष इत्यर्थः । एवमेतैश्चतुर्भिः सूत्रैराग्रहवादनिराकरणेन विद्यायाः स्वातन्त्र्येण मोक्षसाधकत्वं दृढीकृतम् ॥

अन्ये तु, त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति, प्रथमस्तप एव, द्वितीयो ब्रह्मचर्याचार्यकुलवासी, तृतीयो योऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्, सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेतीति छान्दोग्यश्रुतिं, ये चेमेऽरण्ये श्रद्धातप इत्युपासत इति पञ्चाग्निविद्याश्रुतिम् । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति काण्वश्रुतिं चोपन्यस्य एतेषु शब्देषूर्ध्वरेतसामाश्रमाणां कथनात्तेषां चाग्निहोत्रादिकर्मासम्भवान्न विद्यायाः कर्माङ्गत्वमिति व्याकुर्वन्ति ॥ १७ ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥ अत्रान्ये पूर्वोक्ता एव श्रुतीरुपन्यस्य एतेषु शब्देष्वाश्रमान्तराणां परामर्शम् अनुवादं जैमिनिराचार्यो मन्यते, न विधिम् । अत्र लिङाद्यन्यतमस्य चोदनाशब्दस्याभावाद्, अर्थान्तरपरत्वस्यैतेषु शब्देषु प्रत्येकमुपलम्भाच्च । त्रयो धर्मस्कन्धा इत्यत्र त्रयाणां परामर्शपूर्वकपुण्यलोकप्राप्तिरूपमनात्यन्तिकं फलं सङ्कीर्त्य ब्रह्मसंस्थस्याऽमृतफलतायाः कथनेन, पञ्चाग्निविद्यास्थाद्वितीयश्रुतौ च देवयानोपदेशप्रत्ययेनाश्रमान्तरस्य सन्दिग्धतया तृतीयस्यां काण्वश्रुतौ च लोकपदतो लोकसंस्तवप्र-

ऊर्द्ध्वरेतस्सु च ज्ञानोक्तेस्तस्य मुक्तिफलकत्वोक्तेः, किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्यादिश्रुतेश्च ब्रह्मप्राप्तावेव सर्वस्याः श्रुतेस्तात्पर्यमिति सिद्ध्यति । तस्या एव सर्वक्लेशापायपूर्वकपरमानन्दरूपत्वान्न तु कर्मणि दुःखात्मकसंसारहेतुत्वात्तस्य जीवश्रेयोनिमित्तमेव श्रुतिप्राकट्यात् । अन्यथा निषेधविधिर्न स्यात् । तथाच कर्मविधिनाऽपि परम्परामोक्ष एव फलत्वेन परामृश्यत इति सिद्धम् । तं परामर्शं कर्मस्वातन्त्र्यवादी जैमिनिरपवदति बाधत इत्यर्थः । मोहकशास्त्रप्रवर्त्तकः स इतीश्वर-

---

तीत्या च तथाऽवसायात् । अपिचापवदति । वीरहा वा एष देवानामिति, आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीरिति, नापुत्रस्य लोकोऽस्तीति प्रत्यक्षा श्रुतिरेवाश्रमान्तरमपवदतीति व्याख्याय ब्रह्मचर्यादेव प्रव्रजेदिति जाबालश्रुतिमनपेक्ष्याऽयं विचार इत्याहुः । तत्र जाबालश्रुत्यनपेक्षायां बीजं नोपलभ्यते । परामर्शशब्दश्च ग्रहणे प्रसिद्धो, न त्वनुवाद इत्यतो न सूत्र तदुक्तोऽर्थोऽभिप्रेतः किन्तु पूर्वोक्तमेव सिद्धान्तं स्थूणाखननवद् दृढीकर्त्तुं पुनर्जैमिनिमतमुत्थापयतीत्याशयेन पूर्वसिद्धमनुवदन्तः सूत्रं व्याकुर्वन्ति । * ऊर्ध्वेत्यादि * । * तस्येति * । ज्ञानस्य । * इत्यादिश्रुतेश्चेति * । नापुत्रस्य लोकोऽस्तीत्यादिश्रुतिविरुद्धायाः, किं प्रजया करिष्यामो, न कर्मणा न प्रजयेत्यादिश्रुतेश्च । *तस्या इति* ब्रह्मप्राप्तेः । * न तु कर्मणीति * कर्मकरणं तु न तात्पर्यम् * तस्येति * कर्मणः । तथाच कर्मविधिनाऽपि, तमेवं वेदानुवचनेनेति श्रुत्यादिभिर्ज्ञानजननद्वारा कर्मणां फलत्वेन मोक्ष एव तात्पर्यगोचरीक्रियते इति श्रुतिसन्दर्भविचारात् सिद्धम् । तमेतं परामर्शं निश्चयं कर्मस्वातन्त्र्यवादी जैमिनिर्बाधत इति सूत्रभागस्यार्थो युक्त इत्यर्थः । पुनर्जैमिनिपदकथनतात्पर्यमाहुः । * मोहकेत्यादि * तदुक्तं पाद्मोत्तरखण्डे मोहकशास्त्रकथनप्रस्तावे । "द्विजन्मना जैमिनिना पूर्वं वेदमपार्थतः । निरीश्वरेण वादेन कृतं शास्त्रं महत्तरमि"ति । पराशरोपपुराणेऽपि "अक्षपादप्रणीते च का-

मेव न मनुते यतोऽतस्तत्प्राप्तिस्तस्य मते दूरापास्ता । कर्माऽनधिकारिणामन्धादीनां संन्यासविधिविषयत्वम् । अन्यथा, वीरहा वा एष देवानां योऽग्निमुद्वासयत इति श्रुतिर्न स्यादतो ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद्वनीभूत्वा प्रव्रजेद् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वनाद्वेतश्रुतेरप्यङ्गहीन एव स विषयो, यत आयुर्भागविभागेनाश्रमाणां विधानम् । तुरीये तस्मिन् देहेन्द्रियादिवैकल्यं नियतमतः कर्मण्येव श्रुतेस्तात्पर्यम् । अपिच, ज्ञानकर्मणोरलौकिकफलसाधकत्वेन विहितत्वमेव प्रयोजकम् । अपरोक्षब्रह्मज्ञानं च न विधेयम् । साक्षात्स्वकृत्यसाध्यत्वाच्चोदनाबोधकलिङाद्यभावाच्च ज्ञानस्य न मुक्तिसाधकत्वं वक्तुं शक्यम् । य एवं विदुरित्यादिस्तु यागेष्विज्यविष्णुस्तुतिपरेत्याशयेनाह । अचोदना चेति । जैमिनिवत्तत्सहायभूतेयमचोदना च परामर्शमपवदतीति सम्बन्धः । तथाच विधिसम्बन्धात् कर्मैवानुष्ठेयं, न तु मुक्तिसाधनमप्यतथात्वादिति स्थितम् ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

बादरायण आचार्यो जैमिनेरपि गुरुस्तदेव कर्त्तव्यमिति

णादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धोऽशः श्रुत्येकशरणैर्नृभिः । जैमिनीयेच"त्युक्तम् । तन्मतेन सन्न्यासविधितात्पर्यमाहुः । * कर्मेत्यादि * । * अङ्गहीन एव स इति * अङ्गहीनः पुरुषः । अत्र गमकं * यत इत्यादिनोच्यते । तदुपपादनम् * तुरीय इत्यादिना * । एतेन सिद्धमाहुः * अत इत्यादि * । अचोदनेत्याद्यंशमवतारयन्ति । * अपिचेत्यादि * । शेषं स्फुटम् ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ पूर्वसूत्रे जैमिनिमतमनूद्येदानीं तत्परिहरतीत्याशयेन सूत्रं व्याकुर्वन्ति । * बादरायण इत्यादि * । असुर्या इति मन्त्रे अविद्वांस इत्यनेन कर्माङ्गभूतविद्वद्वाक्यो-

शिष्यसंमतमनुष्ठेयं कर्मापवदवतीति पूर्वेण सम्बन्धः । तत्र हेतुः । साम्यश्रुतेः । यथा, वीरहा वा एष देवानामिति श्रुत्या कर्मत्याग-कर्त्तुर्निन्दा श्रूयत एवमेव भगवज्ज्ञानरहितस्यापि सा श्रूयते यतः । तथाहि । असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते-प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधा जनाः । एतदग्रे च, ये तद्विदुरमृता-स्ते भवन्त्यथेतरे दुःखमेवोपयन्तीत्यादिरूपा । एतच्च निन्दामात्रेण साम्यमुक्तमापाततः । वस्तुतस्तु, तमेतं वेदानुवचनेन विविदिष-न्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्तीति श्रुत्या ज्ञान-साधनत्वेनैवाश्रमकर्मकरणोक्तेश्च न स्वातन्त्र्यं कर्मणो वक्तुं शक्य-म् । अत एव शुकस्य न ब्रह्मचर्यादिकमपि । फलस्य जातत्वेन त-त्साधनानपेक्षणात् । नच स्वर्गकामपदश्रवणान्नैवमिति वाच्यम् । त्वदभिमतलोकात्मकस्वर्गे, यन्न दुःखेन सम्भिन्नमिति वाक्यशेषो-क्तस्वर्गपदप्रवृत्तिनिमित्तधर्माभावादात्मसुखस्यैव तादृशत्वात्तस्यैव तत्रोक्तेः । एवं सति तमेतं वेदानुवचनेनेतिश्रुत्यैकवाक्यतापि स-

———

क्तज्ञानशून्या एव निन्द्यन्त इति शङ्कानिरासायाहुः । * एतदग्र इ-त्यादि * श्रुतौ तु बृहदारण्यके शारीरब्राह्मणस्थे । तथाच यथा क-र्माकरणनिन्दया कर्मनित्यत्वं तथा अविद्वन्निन्दया ब्रह्मज्ञाननित्यत्वं प्राप्यतेऽतो निन्दामात्रेण कृत्वा कर्मकरणे श्रुतितात्पर्यसाधनमयुक्त-मित्यर्थः । ननु साम्यश्रुत्या ज्ञानस्याप्यावश्यकत्वं प्राप्यते, न तु क-र्मापवादस्तथा सति विद्वद्वाक्योक्तज्ञानवद्वेदान्तोक्तब्रह्मज्ञानस्यापि क-र्माङ्गत्वमवर्जनीयमित्याशङ्क्य तन्निवारणायाहुः । * एतदित्यादि * उक्तमापातत इति * भगवता व्यासेन तथोक्तम् । तथोक्तौ गम-कमाहुः * वस्तुत इत्यादि * । * न ब्रह्मचर्यादिकमिति * उपनयना-भावादाश्रमरूपं तन्न । तथाच श्रुत्यर्थसन्देहवारणायाचार्यस्य प्र-

स्पद्यते। अन्यथा तु विरोध एव। ननु दृष्टफलका अपि कारीरी-चित्रादियागाः श्रूयन्त इति नैवं निर्णय इति चेत्। उच्यते। नित्य-कर्मणो हि ज्ञानसाधनत्वमुच्यते। व्रीहिपश्वादीनां तन्निर्वाहकत्वा-

---

भूतत्वादुक्तश्रुतिदर्शनेऽपि यदेवं निन्दामात्रेण साम्यकथनं तदापात-त एव। नचोक्तश्रुतिदर्शनेऽपि साम्यकथनात् कर्मणां मुख्यत्वमेवा-भिप्रेतमिति शङ्क्यम्। शुकादिषु तथा दर्शनस्य विरोधप्रसङ्गात्। नच तत्तद्वाक्येषु स्वर्गकामादिपदश्रवणाज्ज्ञानसाधनत्वोक्तेश्च भिन्न-वाक्यगोचरत्वेन दुर्बलत्वान्नोक्तं साधीय इति शङ्क्यम्। स्वर्गकाम-पदावयवभूतस्वर्गपदस्यात्मसुखे लोके च शक्तेः किमत्राभिप्रेत-मिति सन्देहे प्रसिद्ध्यपेक्षया वाक्यशेषस्य बलिष्ठत्वात् त्वदभिम-तस्य वाक्यशेषेऽनुपपत्तावात्मसुखस्यैव वाक्यशेषे सिद्धेस्तदभिप्रा-येणैव तेषु वाक्येषु स्वर्गकामपदस्योक्तेः। नचात्र किं गमकमिति शङ्क्यम्। एवमात्मसुखस्य तत्रोक्तत्वे सति तस्यात्मज्ञानसापेक्षतयो-क्तश्रुत्यैकवाक्यता सिद्ध्येदन्यथा तु विरोध एव। स च सम्भवत्ये-कवाक्यत्वेऽयुक्त इति सर्वसामञ्जस्यस्यैव गमकत्वात्। अतो वाक्यशे-षोक्तमेवाङ्गीकार्यमित्यर्थः। अत्र किञ्चिदाशङ्कते * नन्वित्यादि *। तथाच श्रुत्यन्तरे तथादर्शनात् स्वर्गपदस्य प्रसिद्धाऽर्थाङ्गीकार एव युक्तो, न तु वाक्यशेषोक्तार्थाङ्गीकारः। तथा सति सुवर्गाय वा ए-तानि लोकाय हूयन्त इत्यादिकं युज्येत। अन्यथा तद्विरोधापत्तेरि-त्यर्थः।

अत्राभिदधते। * नित्येत्यादि *। उक्तश्रुतौ हि नित्यस्य कर्मणस्तथात्वमुच्यते। नित्यं च कर्म तदैव साङ्गं भवति यदा शुद्धै-र्द्रव्यादिभिरुपसम्पद्यते। अन्यथा, चाण्डालो जायते यज्ञकरणा-च्छूद्रभिक्षितादित्यादिनिन्दावाक्यानि न स्युः। अतस्तादृशद्रव्या-द्यर्थं चित्रादियागानां नित्यशेषतया विधानम्। एवमेकफलकेषु नानायागेष्वपि कश्चिदभिप्रायोऽस्तीत्यवगन्तव्यम्। अन्यथा तद्वैय-र्थ्यापत्तेः। एवमतिविमुखस्य सन्मार्गश्रद्धाजननार्थं दृष्टफलाः का-रीर्यादयो विधीयन्ते। इदमप्यश्वमूत्रणादिनिदर्शनादवगम्यते। एवं सति काम्यैस्तत्तद्यागैः समीचीनादृष्ट उत्पन्ने तन्निष्पन्नैरुपकरणैर्यदा

त्च्छेपत्वेन तेषां विधानम् । एवं सति वीरहेति श्रुतिः साग्निक-स्य गृहिण आलस्यादिदोषेण तदुद्वासने दोषमाह, न त्वाश्रमा-न्तरपरिग्रह इति मन्तव्यम् । अन्यथा तदुच्छेदस्तद्विधिवैयर्थ्यं च स्यात् । नचानधिकृतमादाय तत्समाहितिरिति वाच्यम् । अत्र पृच्छामो ऽन्ध-पङ्ग्वादिभिः प्रव्रजनं कार्यमिति विधिरस्त्याहोस्विद् यावज्जीव-म् अग्निहोत्रविधायकवाक्यप्रव्रजनविधायकवाक्ययोर्विरोधाभावाय विषयो भिन्नः कल्प्यते । नाद्यः । अश्रुतेः । न द्वितीयः । यदहरेव वि-रजेदिति श्रुत्या वैराग्यवतः प्रव्रजनविधानात्तेनैव विषयभेदसिद्धौ तत्कल्पनानवकाशात् । तेन, नापुत्रस्य लोकोऽस्तीति श्रुतिरप्य-विद्वद्विषयिणीति न विरोधः । विद्वांसः प्रजां न कामयन्त इति श्रुतेः । एतेनर्णत्रयापाकरणमपि प्रत्युक्तं वेदितव्यम् । अविद्वद्वि-

---

साङ्गनित्यकर्मसिद्धिस्तदा ज्ञानं भवति । तेन चात्मसुखम् । लोक-स्त्वङ्गवाक्येषु फलतयोच्यते । यदि प्राचीनदुरदृष्टवशाद् यष्टुर्लोक-कामना भवति तदा साङ्गात् कर्मणस्तद्भवतीति । अतो न तत्र ता-त्पर्यं, किन्तु वाक्यशेषोक्त एवेति कर्मणां ज्ञान एव तात्पर्यमित्यर्थः । ननु यदि ज्ञानमेव मुख्यं तदा त्यागावश्यकत्वे, वीरहेत्यादिनिन्दावा-क्यविरोधो दुर्वार इत्यत आहुः । * एवं सतीत्यादि * । ननु नि-न्दावचनद्वयानुरोधार्थमधिकारिभेदकल्पनमावश्यकम् । तत्र वीर-हेत्यादिविषयसङ्कोचापेक्षया. असूर्येत्यादिविषयसङ्कोच एव युक्तः । आज्यमवेक्षते, विष्णुक्रमान् क्रामतीत्यादिस्वारस्यात् । तत्रानधिकारे तु कर्मानधिकारात्तत्र त्यागादिविधिसार्थक्ये सर्वसामञ्जस्यादित्या-शङ्क्य विकल्पपूर्वकं तत् परिहरन्ति । * नचानधिकृतेत्यादि * । * तत्समाहितिरिति * । सन्यासोच्छेदतद्विधिवैयर्थ्ययोः समाधान-म् । तथाच यदि प्रव्राजवाक्ये, विरजेदित्यधिकारबोधकं पदं न भ-वेत्तदा तथा कल्पयितुं शक्येतापि । न तु तत्सद्भाव इति तदप्रयोज-कमित्यर्थः । श्रुत्यन्तरविरोधपरिहारायाहुः । * तेनेत्यादि * । * ए-तेनेति * अविद्वांस इति कथनेन ।

षयत्वात् । यदप्युक्तमचोदना चेति सूत्रावयवेन चोदनाबोधकलिङ्गाद्यभावो बाधक इति । तदपि न साधीयः । श्रुतिसाम्यादेव । श्रूयते हि तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदिति । नच प्रमाणवस्तुपरतन्त्रत्वान्न ज्ञानस्य विधेयतेति वाच्यम् । इतरज्ञानस्य तथात्वेऽपि जीवात्मलक्षणेऽधिष्ठाने परमात्मनो भगवतो दर्शनस्याऽन्यतोऽप्राप्तत्वाच्छ्रद्धान्तसाधनैस्तद्दर्शने स्वरूपयोग्यतासम्पत्तावात्मन्यधिष्ठाने परमात्मदर्शनानुकूलप्रयत्नविधानसम्भवाच्छ्रवणविधिना श्रुतिवाक्यजशाब्दज्ञानानुकूलप्रयत्नविधानवत् । एवमेव हि यागविधिनापि क्रियारूपयागस्य स्वानुकूलप्रयत्नाधीनत्वेन स प्रयत्न एव विधीयते । अन्याप्राप्तत्वात् । न तु क्रिया । तत्प्रयत्ने सति तस्याः

ननु साम्यश्रुतिरूपेण हेतुना भवतूक्तदोषपरिहारस्तथापि ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेन चोदनाविषयत्वाऽभावादचोदनाकृतापवादस्य कथं परिहार इत्यत आहुः । * यदपीत्यादि * । तथाच चोदनाश्रुतिसाम्यात् तस्यापि परिहार इत्यर्थः । अत्र पश्येदित्यस्य प्रमाणान्तरजन्यदर्शनानुवादत्वमाशङ्क्य निषेधन्ति * नचेत्यादि * । तथाचात्र एवं विदित्यादिभिर्निर्विचिकित्सशाब्दज्ञानवत्त्वशमदमवैराग्यदुःखसहिष्णुत्वश्रद्धावित्तत्वपूर्वकं जीवात्माधिकरणकपरमात्मदर्शनप्रयत्नस्य प्रमाणान्तरेणाऽप्राप्तत्वात् तद्विधानस्य सुखेन सम्भवान्नानुवादत्वमित्यर्थः । ननु तथापि कर्मचोदनासु कर्मण एव विधेयतेति तस्य फलवत्त्वमुचितम् । इह तु ज्ञानानुकूलप्रयत्नस्येति ज्ञानस्याविधेयत्वं दुर्वारमित्याशङ्कायां कर्मचोदनास्वप्येतत्तुल्यत्वं बोधयन्ति । * एवमेवेत्यादि * । * स इति * । यागाभिव्यञ्जकः । * न तु क्रियेति * । यज्ञो वै विष्णुः सुप्तं कर्मप्रबोधयंस्त्वित्यादिश्रुतिस्मृतिभिरलौकिकस्य कर्मणो नित्यत्वात् सा न विधेया । इदं यथा तथा समन्वयसूत्र एव व्युत्पादितं कारिकाभिः । भावार्थपादभाष्ये चाऽऽचार्यैः । तथाचोभयत्रापि तत्तदभिव्य-

स्वत एव सम्भवात्। अथवा। ननु यथा, वीरहेति श्रुत्या कर्मत्यागो निन्द्यते तथैव, असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधा जनाः । ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्तीत्यादिश्रुत्या भगवज्ज्ञानाभावो निन्द्यते । एवं सति कर्मज्ञानानुकूलप्रयत्नयोर्विधयत्वे मिथोविरोधादधिकारिभेदेन विधेयत्वं वाच्यम् । नच, तावत् कर्माणि कुर्वीत न निर्विद्येत यावतेति भगवद्वाक्याद्रागिणः कर्म विधीयते । तद्रहितस्य ज्ञानमिति वाच्यम् । जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेज इति श्रुतेर्नीरागत्वेन प्रसिद्धस्यापि तस्य कर्मणि प्रवृत्तिर्या सा न स्याद‌धिकाराभावात् । अथ जनकदृष्टान्तेन कर्मणोऽङ्गित्वं ज्ञानस्य तदङ्गत्वं वाच्यम् । तथाच ज्ञानवता कर्मानुष्ठेयमिति प्राप्ते प्रतिवदति ॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ ज्ञानमङ्गं तदङ्गित्वेनानुष्ठेयं कर्मेति मतं बादरायणोऽप्यवदतीति पूर्वेण सम्बन्धस्तत्र हेतुमाह । साम्यश्रुतेरिति । स्वतोऽपुरुषार्थं कर्म फलार्थिनैवानुष्ठेयम् । तथाचैष नित्यो महिमेति श्रुत्या ज्ञानवति विहितनिषिद्धयोः कर्मणोः फलाजनकत्वेन साम्यं श्रूयत इति फलार्थिप्रवृत्त्यसम्भवेन ज्ञानिनस्तथात्वाभावेन कर्मोच्छेदप्रसक्त्या न ज्ञानस्याङ्गत्वं वक्तुं

लकप्रयत्नस्यैव विधेयत्वात्तेनाभिव्यक्ताभ्यां सुखेन फलसम्भवान्न कोऽपि दोष इत्यर्थः । अस्मिन् व्याख्याने ज्ञानाङ्गत्वेन कर्म कर्त्तव्यमिति सिद्धम् । इदमेव च विधिर्वा धारणवदिति सूत्रे प्रतिपादनीयमित्येकतरवैयर्थ्यमापद्येतेत्यरुच्या प्रकारान्तरेण व्याकर्त्तुमवतारयन्ति * अथवेत्यादि * । * मिथोविरोधादिति * । कर्माङ्गस्य कामस्य ज्ञानाङ्गस्य शान्त्यादेश्चेतरेतरविरोधेन तयोर्विरोधात् । व्याकुर्वन्तो हेतुं विशदीकुर्वन्ति । * स्वत इत्यादि * । * तथात्वाभावेनेति* कर्मकर्तृत्वाभावेन। ननु ज्ञानिप्रवृत्त्यभावेऽपि न कर्मोच्छे-

शक्यम् । कृषीवलस्य व्रीहीणां वपने भर्ज्जनस्येव । तथाच ज्ञानिनः प्रवृत्त्यसम्भवेनान्येषां च, अथतरे दुःखमेवोपयन्तीति निन्दाश्रवणेन तथात्वात् सर्वार्थतत्त्वज्ञा श्रुतिर्ज्ञानबहिर्भूतं कर्म कथं विदध्यादिति ज्ञानस्य पुरुषार्थाऽसाधकत्वोक्तिमसहमानेनाचार्येण प्रौढ्या निरूपितम् ॥ १९ ॥

एवं सति पूर्वकाण्डवैयर्थ्यमापततीति तत्तात्पर्यमाह ॥

विधिर्वा धारणवत् ॥ २० ॥

यथा योगशास्त्रे मनःसमाधेरेव साध्यत्वात् तत्साधनत्वेनैव मानस्याः मूर्त्तेर्द्धारणं विधीयते, न तु स्वतन्त्रतया फलसाधकत्वेन मनःसमाधौ तत्त्यागात् । ततः किञ्चन न स्मरेत्, तत्रापि चित्तबडिशं शनकैर्वियुञ्ज्यात् इत्यादिवाक्येभ्यस्तथा । तथा सति भक्तिसा-

---

दः । फलार्थिनां प्रवृत्तेः सम्भवात् । नचासुर्यवाक्यान्निवृत्तिः । तत्राविद्वांस इत्यनेन विद्वद्वाक्योक्तज्ञानशून्यनिन्दाया अपि शक्यवचनत्वादित्याशङ्कायां स्वोक्तं विभजन्ते । * तथाचेत्यादि * । * अन्येषामिति * । ब्रह्मज्ञानशून्यानाम् । * तथात्वादिति * । कर्मकरणासम्भवात् । * ज्ञानबहिर्भूतमिति * । तत्सम्बन्धशून्यम् । एवं निरूपणस्य तात्पर्यमाहुः । * ज्ञानस्येत्यादि * । अन्ये तु, अनुष्ठेयमाश्रमान्तरम् । कुतः । साम्यश्रुतेः । त्रयो धर्मस्कन्धा इत्यादौ गार्हस्थ्येन सममेवाश्रमान्तरपरामर्शश्रुतिदर्शनादित्याद्याहुः। तत्तु जाबालश्रुतिचोदितत्वादेवाश्रमान्तराणां तद्विहायैवं व्याख्यानं न समञ्जसमिति प्रागेव दत्तोत्तरमित्यवधेयम् ॥ १९ ॥

विधिर्वा धारणवत् ॥ सूत्रमवतारयन्ति । * एवं सतीत्यादि । * एवं सतीति * । उक्तश्रुतिबलात्तु: कर्माकरणे प्राप्ते सति । व्याकुर्वन्ति । * तथेत्यादि * । अत्र, ततः किञ्चनेति वाक्यमेकादशस्कन्धीयम् । द्वितीयं तृतीयस्कन्धीयम् । * तथेति * । स्या-

धनत्वेनैवानुष्ठेयमिति तात्पर्येण कर्मविधिरुच्यते । न तु स्वतन्त्रतया फलसाधकत्वेन । ननु तत्र समाधिमधिकृत्य यमादीन्युक्त्वानीति तन्मध्यपातित्वेन धारणस्य तथात्वमुच्यते । प्रकृते ज्ञानं भक्तिं वाऽधिकृत्य न कर्म विहितमिति दृष्टान्तवैषम्यमिति चेत् । न । उक्तानुपपत्त्या स्वानिन्द्यमेव कर्मश्रुतिर्विदधातीत्यवश्यं वाच्यम् । निन्दायां चेतरपदाज्ज्ञानमध्यपातिन एव तद्विषयस्य प्राप्तेरावश्यकत्वात् । तथाच भगवज्ज्ञानस्येतरनिरपेक्षत्वेन स्वरूपोपकारित्वम-

---

ज्यत्वम् । तथा भक्तीत्यत्र भक्तिपदं ज्ञानस्याप्युपलक्षकम् । अत्र दृष्टान्तबलेन कर्मणोऽस्वातन्त्र्यसाधनसहमानो दृष्टान्तवैषम्यमाशङ्कते । ※ नन्वित्यादि ※ । वैषम्यं समादधते । * नेत्यादि * । एष नित्य इति श्रुतौ ज्ञानिनि कर्मणां फलाजनकत्वकथनात्तेषां कर्मण्यप्रवृत्त्या ज्ञाने कर्माङ्गतायामप्युक्तदोषतौल्येन उक्तश्रुतौ ब्रह्मज्ञानशून्यानां दुःखप्राप्तिकथनेन चान्येषामपि प्रवृत्त्यसम्भवे पूर्वकाण्डवैयर्थ्यप्रसक्तिरूपयाऽनुपपत्त्या स्वानिन्द्यमेव कर्म पूर्वकाण्डीयश्रुतिर्विदधातीत्यवश्यं वाच्यम् । अथेतर इत्यविद्वन्निन्दावाक्य इतरपदाज्ज्ञानशून्येषु निन्दितेषु ज्ञानवान् वा तद्योग्यो वा ज्ञानमार्गमध्यपात्येव कर्माधिकारी वाच्यः । तत्र जातज्ञानस्यापि न कर्मणेत्युक्तश्रुत्या निवृत्तौ तद्योग्यस्यैव विषयत्वेन प्राप्तेरावश्यकत्वात् । तथाच काम्यानां कर्मणां मूढविश्वासजनकतया परम्परातः सार्थक्यम् । नित्यानां त्वात्मसुखफलकानां विद्यासाहाय्यमन्तरेण तादृशफलोपधायकत्वस्यादृष्टत्वाज्जनकादिष्वपि विद्यासाहाय्यस्यैव दर्शनात् केवलभगवज्ज्ञानस्य च शुकारुणिभरतादिषु फलोपधायकत्वदर्शनात्तस्येतरनिरपेक्षकत्वेन नित्यकर्मविधिवैयर्थ्यपरिहाराय, तमेतं वेदानुवचनेनेत्यादितृतीयाश्रुत्या ज्ञानभक्ती प्रति स्वरूपोपकारित्वं नित्यस्य कर्मणो वाच्यमिति तात्पर्येण नित्यविधीनां, तदुपयोगित्वेन काम्यविधीनां च सामञ्जस्यान्न पूर्वकाण्डवैयर्थ्यमित्यर्थः । ननु भवत्वेवं कर्मणां ज्ञानाङ्गत्वं तथापि भक्त्यङ्गत्वे किं मानमत आहुः ।

स्य कर्मणो वाच्यम् । तथाचोक्तम् । "दानव्रततपोहोमजपस्वाध्यायसंयमैः । श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते" इति । एष नित्यो महिमेति श्रुतिरपि यज्ज्ञाने सति विहितनिषिद्धकर्मफलासम्बन्धस्तद्वित् स्यादित्यनुक्त्वा तस्यैव पदवित् स्यादिति यदुक्तवती तेन पदयोर्भक्तिमार्गरूपत्वात् तत्र च पदयोरेव सेव्यत्वेन मुख्यत्वात्तज्ज्ञानानुकूलप्रयत्नमेव पूर्वं विदधते । तेन "शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः । त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाऽम्बुजमि"ति वाक्याच्च वर्णाश्रमधर्मा आत्मधर्माश्च पदज्ञानसाधनत्वेन कर्त्तव्या इति सिद्धम् । तस्यैव, तच्छब्दस्य प्रसिद्धार्थकत्वाल्लोकवेदप्रसिद्धस्य पुरुषोत्तमस्यैव, तत्रापि, पदविदेव, दीनभावेन भक्तिमार्गीयज्ञानवानेव स्यादित्येवकारः सर्वत्रानुषज्यते । तथा सति भक्तौ जातायां स्वत एव भगवज्ज्ञानं भवतीति ज्ञापयितुं, तं विदित्वेति पश्चादुक्तवतीति तदाशयो ज्ञायते । अत एव पूर्वं कर्मनिरूपितम् । साधनत्वात् ।

स्यादेतत् । भक्तिसाधनत्वमेव चेत् कर्मणः श्रुतेरभिप्रेतं तदा भगवद्विदि तत्फलासम्बन्ध इत्यनुपपन्नमिति चेत् । मैवम् । कर्मणां

---

* तथाचोक्तमित्यादि * । ननु तथापि द्व्यन्तरितत्वाद् भक्त्यङ्गत्वापेक्षया ज्ञानाङ्गत्वमेव साधीय इति शङ्कायां भक्त्यङ्गत्वस्य श्रौतत्वं विशदयन्ति । * एष इत्यादि * । सिद्धमाहुः । * तेनेत्यादि * । उक्तेन स्वल्पोपपादनेनापरितुष्यन्तो विशेषतः श्रुत्यर्थं वदन्ति । * तस्यैवेत्यादि * । * सर्वत्रेति * । पदविच्छब्देऽपि । * पूर्वमिति * । पूर्वार्द्धे । तथाच पूर्वोक्तं युक्तमित्यर्थः । वस्तुतस्तु, तेनेत्यादिसिद्धार्थकथनात् पूर्वस्तस्यैवेत्यादिग्रन्थो लेखकभ्रमात् पश्चात् पतित इति प्रतिभाति ॥

अत्र पुनश्चोदयति । * स्यादित्यादि * । * अनुपपन्नमिति *

हि भक्त्युत्पत्तौ स्वरूपयोग्यतासम्पादकत्वमेव । नायमात्मेति श्रुतेः । कर्मज्ञानाभ्यामलभ्यत्वाद्भगवतः स्वरूपयोग्यतापेक्षाऽपि मार्यादिकस्य, न तु पौष्टिकस्यात एव, वाशब्द उक्तोऽनियमवाची । तथा सति भगवदनुग्रहश्चेत्तदा भक्तिस्तया पुरुषोत्तमज्ञानं तदा कर्मतत्फलसम्बन्धगन्धोऽपि नेति किमनुपपन्नम् । एतेन, तमेव विदित्वा मुनिर्भवति । अग्राह्यो न हि गृह्यते इत्यादिश्रुतीनां मिथोविरोधः परिहृतः । भक्त्या ग्राह्यत्वात् तदितरसाधनाग्राह्यत्वात् । अत एव विविदिषन्ति, न तु विदन्त्यपीत्याशयवती तमेतं वेदानुवचनेनेति श्रुतिः पठ्यते ।

नचानुपदमेव, तमेव विदित्वा मुनिर्भवतीत्युक्तेः सान्निध्यादुक्तसाधनैरेव वेदनमभिप्रेतमिति वाच्यम् । वेदानुवचनादीनां सर्वेषां वेदनसाधनत्वे सर्वेषां तत्कर्तॄणां वेदनसम्भवेन, मुनिर्भव-

---

साङ्गाद्वैदिककर्मणः फलावश्यम्भावनियमेन ततो भक्त्युत्पत्तिसम्भवादनुपपन्नमित्यर्थः । तत् समादधते । * मैवमित्यादि * । * उक्त इति * । ज्ञानस्य कर्मसापेक्षत्वात् पूर्वकाण्डे नित्यविधिर्ज्ञानमार्गीयस्येति कर्मणस्तदङ्गत्वबोधनाय सूत्रे उक्त इत्यर्थः । उक्तार्थोपष्टम्भार्थमेवन्तात्पर्याङ्गीकारे गुणान्तरमाहुः । * एतेनेत्यादि * । अत एवेति * । साधनबलेनाग्राह्यत्वादेव । * इत्याशयवतीति * । यद्यपि रथेन जिगमिषतीत्यादाविच्छामात्रस्यापुरुषार्थत्वात् फलपर्यन्तत्वमिष्यत इति प्रकृतेऽप्येवं वक्तुं शक्यम् । तथापि लोके फलपर्यन्ततायाः प्रायो दर्शनेन प्रतिबन्धाभावे तथा कल्पयितुं शक्यम् । प्रकृते तु नायमात्मेति श्रुत्या वरणाभावे ज्ञानाभावस्य निश्चितत्वात् केवलेन वेदानुवचनादिना ज्ञानरूपं फलं न वक्तुं शक्यते । अत इच्छायास्तदर्थकयत्नकारणत्वेनेच्छाकरणानां यज्ञादीनां ज्ञानं प्रति स्वरूपयोग्यतासम्पादकत्वमेवेत्याशयवतीत्यर्थः । अग्रिमवाक्यविरोधमाशङ्क्य परिहरन्ति । * नचानुपदेत्यादि * । * उक्तसाधनैरिति * । वेदानुवचनादिभिः । तथाच मुनिरित्येकवचनश्रुत्या-

तीत्येकत्वं तद्विदि न वदेदतो ज्ञानं कस्यचिदेकस्य भवतीति ज्ञानस्य दुर्ल्लभत्वं ज्ञाप्यते । "मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत" इति भगवद्वाक्याच्च । तर्हि वेदानुवचनादिषु निःशङ्का प्रवृत्तिः कथम् ? इत्थम् । स वा अयमात्मेत्यादिकया पूर्वश्रुत्या भगवन्माहात्म्यं श्रुत्वा यथाकथञ्चित् तद्वेदनौत्सुक्ये सति सत्सङ्गाभावेन भक्तिमार्गाऽपरिचयात् । कर्ममार्गमात्रमाश्रमधर्मत्वेनालौकिकार्थसाधकत्वेनापि पूर्वं ज्ञातमस्तीति तदेव भगवद्वेदनेऽपि साधनमिति मन्यमानास्तदेव कुर्वन्ति । ननु वैदिकसाधनानां वैयर्थ्यं कथमितिचेत् । न । भ्रमकृतत्वेऽपि जन्मान्तरीयाक्षरज्ञानोपयोगिसंस्काराधायकत्वेनावैयर्थ्यात् ॥ २० ॥

ऽननोपि तदुपोद्बलनमेव क्रियत इति न तद्विरोध इत्यर्थः । ज्ञानं कस्य चिदेवेति यदुक्तं तत्राशङ्कते । * तर्हीत्यादि * । * नित्यकर्मणाम् * । वेदानुवचनादीनां ज्ञान उत्कटेच्छाजननेन वा सत्त्वशोधनेन वा स्वरूपयोग्यतासम्पादन एव पर्यवसानं तदा ज्ञानमूलकारणस्य वरणस्य स्वविषयतानिश्चयस्याभावेन वेदानुवचनादिषु निःशङ्का प्रवृत्तिर्या दृश्यते सा कथमित्यर्थः । तत्परिहाराय प्रवृत्तिमुपपादयन्ति * इत्थमित्यादि * । स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च । स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष भूताधिपतिरेष लोकेश्वर एष लोकपालः स सेतुर्विधरण एषां लोकानामसम्भेदायेति माहात्म्यश्रवणेन वेदनौत्सुक्ये सति तेन तेषु तत्साधनत्वभ्रमात् प्रवृत्तिरित्यर्थः । ननु भ्रमात् करणे पापभ्रमेण कृतस्य प्रायश्चित्तस्येव तेषां वैयर्थ्यं स्यादित्याशयेनाशङ्कते । * नन्वित्यादि * । तत्र समादधते । * नेत्यादि * । तथाच तत्र कर्मफलनिषेधस्य, नान्तरिक्षे न दिवीत्यादिवन्नित्यानुवादरूपत्वादेते पदज्ञानसाधनत्वेन कर्त्तव्या इति विदित्वा ते कुर्वन्ति । तत्र भक्तिमार्गात्मकपदज्ञानाभावेऽप्यक्ष-

स्तुतिमात्रमुपादानादितिचेन्नाऽपूर्वत्वात् ॥ २१ ॥

ननु साम्यश्रुतेर्हेतोः कर्मशेषत्वं ज्ञानस्य यदपास्तं तन्नोपपद्यते । साम्योक्तेर्ज्ञानस्तुतिरूपत्वात् । अपिच । तथा ज्ञानिनोऽपि कर्मोपादानात् कर्मकृतिस्वीकारादिति यावत् । अन्यथा ज्ञानिनां कर्मकृत्स्वभावेन तत्कृतगुणदोषाप्रसक्त्या तन्निषेधानुपपत्तिः स्यात् तेषामपि तत्कृतगुणदोषसम्बन्धोऽस्त्येवेति ज्ञापनाय मात्रपदम् । निषेधेनेतरसाधारण्यं परिह्रियते । तथाच ज्ञानिनोऽपि कर्मकरणात् कर्मशेषत्वं ज्ञानस्य निष्प्रत्यूहमितिचेन्नैवं वक्तुं युक्तम् । यद्ज्ञानस्य कर्मफलासम्बन्धफलकत्वस्यापूर्वत्वाद्विधेयत्वमेव ।

रात्मकपद्ज्ञानस्य जन्मान्तरे भवनार्थं मनसि तत्संस्कारमाश्रमधर्मा आद्रियत इति पूर्वोक्तमक्षुण्णमित्यर्थः । न च पापभ्रमप्रायश्चित्तस्यैवास्य वैयर्थ्येऽपि दोषाभावात् सार्थकत्वसाधनमप्रयोजकमिति शङ्क्यम् । न हि कल्याणकृत् कश्चिदिति न्यायेन पापभ्रमप्रायश्चित्तस्यापि जन्मान्तरे तादृशपापविषयकमनःप्रवृत्त्या भावस्य फलत्वेन वक्तुं शक्यतया किञ्चिदंशेन तत्रापि सार्थक्यस्यैव युक्तत्वात् । तेन पूर्वोत्तरकाण्डयोरेकशास्त्र्यानुरोधादेवं श्रुतितात्पर्यनिश्चयेनैकवाक्यतायां पूर्वस्योत्तरशेषत्वमिति सिद्धम् ॥ २० ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ अत्रैव किञ्चिदाशङ्क्य परिहरतीत्याशयेन सूत्रं विवृण्वन्तः पूर्वपक्षभागं व्याकुर्वन्ति । * नन्वित्यादि * । ननु यदि साम्यश्रुत्या कर्मोपादानमापाद्यते तदा निषेधश्रवणं बाधितमेव स्यादित्यत आह । * निषेधेनेत्यादि * । * इतरसाधारण्यमिति * । अज्ञानिनां यथा कर्मजगुणदोषास्तथा ज्ञानिनो नेति तथेत्यर्थः । * कर्मशेषत्वमिति * । सन्न्यासाश्रमीणकर्मशेषत्वम् । परिहारभागं व्याकुर्वन्ति । * नैवमित्यादि * । * अपूर्वत्वाद्विधेयत्वमिति * यथा प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीत्यत्र रात्रिसत्त्रीयप्रतिष्ठाफलकत्वस्याऽपूर्वत्वाद् विधेयत्व-

न हि यस्य कर्मणो ज्ञानस्य वा यत्फलं तदुक्तिरपि स्तुतिरेवेति युक्तम् । तयोरुच्छेदापत्तेः । विधिर्हि प्रवर्त्तकः । तस्य पुरुषप्रवृत्त्युपयोग्यर्थकथनेनैव चारितार्थ्यादन्यार्थकथनस्य स्तुतित्वमस्तु नाम। न ह्येवं प्रकृते । मुमुक्षोः कर्मबन्धाभावप्रेप्सोस्तत्साधनत्वज्ञान एव प्रवृत्तिसम्भवात् । यच्च कर्मफलसम्बन्धनिषेधानुपपत्त्या कर्मसम्बन्ध इत्युक्तम् । तन्न साधीयः । न हि तरणौ तमःकार्याभाव इत्युक्ते तत्प्राप्तिरपि सम्भवति । अथवा पुरुषोत्तमज्ञानमुख्यफलस्यातिमहत्त्वेन साक्षाद्वक्तुमशक्यत्वं ज्ञापयन्ती कैमुतिकन्यायेन परम्परया तदाहानयर्चा तं विदित्वा ब्राह्मणो भवतीति श्रुतेर्ब्राह्मणपदेन ब्रह्मविदुच्यते । तथाचाद्यपदेन बुद्धिस्थब्राह्मणमाहात्म्योद्देशे कृते, स क इत्याकाङ्क्षायामाह, तं ब्राह्मणं विदित्वा विहितनिषिद्धफलासम्बन्धी भवतीति लक्षण इत्यर्थः । साक्षाद्भगवद्विदः किमु वाच्यमिति भावः । अतस्तस्यैव तच्छब्दस्य पूर्वपरामर्शित्वाद् ब्राह्मणस्यैव भगवद्विदो भक्तस्यैव पदवित् स्यात्

मेव न तु स्तुतिमात्रत्वं तथेत्यर्थः । तदेतदुपपादयन्ति । * न हीत्यादि * । यस्येति पदं यत् फलमित्यनेन सम्बध्यते । हिर्हेतौ । विधिर्हीत्यत्रापि तथा । * एवमिति * । अन्यार्थकथनम् । पूर्वोक्तमाशङ्कान्तरमनूद्य परिहरन्ति । * यच्चेत्यादि * । यतो वाचो निवर्त्तन्त इत्यत्राऽकुतोभयस्य भगवज्ज्ञानफलत्वश्रवणात् ततो न्यूनं कर्मफलसम्बन्धाभावमात्रस्य फलत्वकथनमप्रयोजकमित्यरुच्या एष नित्य इति ऋगुत्तरार्द्धं प्रकारान्तरेणाहुः । * अथवेत्यादि * । * तदाहेति * । महत्त्वमाह । तद्विशदयन्ति । * तमित्यादि * । तं विदित्वेति व्याख्येयप्रतीकम् । * श्रुतेरिति * । विपापादिपदोत्तरं पठितान्निरपेक्षाच्छब्दात् । * आद्यपदेनेति * । एष इति पदेन । * स क इति * । ब्राह्मणः कः । विहितनिषिद्धफलासबन्धीति । पापकपदे पापं कं सुखं यस्मादित्यस्याप्यर्थस्य संग्रहीतुं शक्यत्वात् तथेत्य-

तज्ज्ञानानुकूलप्रयत्नवान् स्यात् तद्भजेतेति यावत् । तथाच यत्र भक्तिविद्विषयकज्ञानस्याऽप्युक्तरीत्या न कर्मशेषत्वं वक्तुं शक्यं तत्र भगवज्ज्ञानस्य तथात्वं दूरदूरतरमिति सर्वं सुस्थम् ॥ २१ ॥

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २२ ॥

र्थः । * तद्भजेतेति * । पदं भजेत । * सुस्थमिति * । कर्मफलासम्बन्धस्य विधेयत्वेन स्तुतिरूपताया आदर्त्तुमशक्यत्वाज्ज्ञानस्य न सन्न्यासाश्रमीणकर्मशेषत्वमिति यदुक्तं तदक्षुण्णमित्यर्थः । एतदग्रे भावशब्दाच्चेति सूत्रं पठ्यते । तत्र च भावशब्दादित्यस्य विधिशब्दादित्यर्थः । तथाचापूर्वत्वादेव न पदज्ञानस्य विधेयत्वकल्पनं, किन्तु पदवित् स्यादिति विधिशब्दादपीत्यर्थो वक्तव्यः। "कुर्यात् क्रियेत कर्त्तव्यं भवेत् स्यादिति पञ्चकम्।एतत् स्यात् सर्व वेदेषु नियतं विधिलक्षणम्" इति वाचस्पतिलिखितान्न्यायविदां स्मरणात् । तच्च विधिर्वा धारणवदित्यत्रैतस्यैव स्यात् पदविदिति श्रुतिव्याख्यानेनैव व्युत्पादितमतः प्रयोजनाभावादुपेक्षितमिति प्रतिभाति । लेखकदोषात् त्रुटितं वेति ज्ञेयम् ॥

अन्येतु, स्तुतिमात्रमित्यादि द्विसूत्रमधिकरणान्तरमङ्गीकृत्य स एष रसानां रसतमः परमः परार्द्ध्योऽष्टमोऽयम् । उद्गीथ इत्याद्याः श्रुतयः किमुद्गीथादिस्तुत्यर्था उतोपासनविध्यर्था इति संशये, उद्गीथादिकर्माङ्गान्युपादाय श्रावणात् स्तुत्यर्था इति शङ्कायाम्, अपूर्वत्वाद्विध्यर्थाः । उद्गीथमुपासीतेति विधिशब्दाच्च तथेत्याहुः । ततः पारिप्लवादिसूत्रत्रयमप्यधिकरणान्तरत्वेनोक्त्वा अग्नीन्धनसूत्रं, पुरुषार्थोऽतःशब्दादित्याद्याधिकरणस्य फलोपसंहारार्थमिति चाहुः । तन्नास्माकं रोचते । विद्यायाः स्वतः पुरुषार्थत्वसाधनाय संन्यासस्य तदङ्गत्वसाधनाय चाऽऽचार्यस्य प्रवृत्तत्वान्मध्ये उद्गीथादिविचारे प्रसङ्गस्यादर्शनादिति दिक् ॥ २१ ॥

पारिप्लावार्था इतिचेन्न विशेषितत्वात् ॥ अत्राशङ्कान्तरं परि-

अथ प्रकारान्तरेण शङ्कते । भृगुर्वै वारुणिर्वरुणं पितरमुपससार। अधीहि भगव इति होपससाद सनत्कुमारं नारदः। प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगामेत्याद्युपाख्यानैर्हि ब्रह्म विद्या निरूप्यते । सर्वाण्याख्यानानि पारिप्लवे शंसतीति श्रुत्या शंसनशेषत्वं तेषामवगम्यते । शंसने शब्दमात्रस्य प्राधान्येनार्थज्ञानस्यातथात्वादुपदेशान्ताख्यानप्रतिपाद्यं ज्ञानं मन्त्रार्थवदप्रयोजकमिति कर्मशेषत्वमपि न वक्तुं शक्यम् । प्राधान्यं तु दूरापास्तम् । धर्मिण एवासिद्धिरित्याह । पारिप्लवार्था इति । उक्तरीत्या सर्वा उपाख्यानश्रुतयः कर्मशेषभूता इत्यर्थः । अत्राचार्य एवमपि कर्मशेषत्वं ज्ञानस्य न सम्भवतीत्याह । नेति । कुतः । विशेषितत्वात् । कर्मणः सकाशाज्ज्ञानं विशेषितमधिकधर्मविशिष्टत्वेनोक्तमिति न ज्ञानस्य कर्मशेषत्वमित्यर्थः । ननु विशेषितत्वमाख्यानेष्वेवेत्यप्रयोजको हेतुरितिचेन्मैवम् । आचार्याशयानवगमात् । तथाहि । पूर्वं तुष्यतु दुर्जन इति न्यायेनाख्यानानां शंसनशेषत्वमुपेक्षित्वोच्यते । न ह्याख्यानेष्वेव ज्ञानं निरूप्यते, किन्त्वन्यत्रापि। तथाहि । तैत्तिरीयके पठ्यते । ब्रह्मविदाप्नोति परं, तदेषाऽभ्युक्ता, सत्यं ज्ञानमनन्तं ब्रह्मेत्युपक्रम्य माहात्म्यविशेषज्ञानार्थमाकाशादिकर्तृत्वमुक्त्वाऽऽनन्दमयत्वं रसरूपत्वमुक्त्वा, भीषाऽस्मादित्याना सर्वनियामकत्वं चोक्त्वा भगवानेव पूर्णानन्द इति ज्ञापनायानन्दगणनां कृत्वा आनन्दमयं पुरुषोत्तमं प्राप्तेनानुभूयमानानन्दस्वरूपं, यतो

———

हन्तुमेषा त्रिसूत्रीत्याशयेनैतस्य पूर्वपक्षांशमवतारयन्ति । * अथेत्यादि * । * तेषामिति * । उपाख्यानानाम् । * धर्मिण एवासिद्धेरिति * । धर्मिणो ज्ञानस्यैव अप्रयोजकत्वादसिद्धेः । परिहारांशमवतारयन्तो व्याकुर्वन्ति । * अत्रेत्यादि * । * विशेषितमिति * । विशेषः सञ्जातोऽस्येति विशेषितम् । अधिकधर्मविशिष्टत्वं

वाचो निवर्त्तन्ते अप्राप्य मनसा सहेत्यादिनोक्त्वा तद्विदो माहात्म्यमुच्यते । एतꣳ ह वा व न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति । अत्र ज्ञानवान् सच्चिद्रूपदेशकालापरिच्छिन्नं सर्वकर्त्तारं निरवध्यानन्दात्मकं सर्वनियामकं मनोवागगोचरं पुरुषोत्तमं प्राप्नोति । कर्म तु स्वयं क्लेशात्मकं तद्वांश्चास्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः क्षुद्रतराऽऽनन्दजनकस्वर्गपश्वादिफलमाप्नोतीति विहितनिषिद्धकर्मणोश्चाप्रयोजकत्वं तस्मिन्नुच्यत इति कर्मणः सकाशाज्ज्ञानस्य निरवधिरेव विशेष उच्यत इति न धर्म्यसिद्धिर्न वा कर्मशेषत्वं ज्ञानस्य सिद्धयति॥२२

तथाप्याख्यानप्रतिपादितविद्यानामसिद्धिरेवेतिचेत्तत्राह ।

तथाचैकवाक्यतोपबन्धात् ॥ २३ ॥

यथा केवलश्रुतेर्विद्याप्राधान्यं तथैवोपाख्यानश्रुतीनामित्यर्थः । चकारेण प्रश्नोत्तरैर्निर्णीतार्थप्रतिपादनम् । महतामेवात्र प्रवृत्तिः । सापि वह्वायासपूर्विकेति विद्यामाहात्म्यज्ञापनं प्ररोचनञ्चाधिकमुपाख्यानानामुपाख्यानं विनैव विद्यानिरूपिकायाः श्रुतेः सकाशादित्युच्यते । तत्र हेतुरेकवाक्यतोपबन्धादिति । आचार्यवान् पुरुषो

च परमानन्दरूपफलजनकत्वं ज्ञेयम् । तदेवाग्रे व्युत्पाद्यम् । शेषं स्फुटम् ॥ २२ ॥

तथाचैकवाक्यतोपबन्धात् ॥ सूत्रप्रयोजनमाहुः । * तथाऽपीत्यादि * । * असिद्धिरिति * । कर्मशेषत्वाभावस्यासिद्धिः । तथाचाशङ्कान्तरस्य निवृत्तत्वेऽप्युक्ताशङ्काया अनिवृत्तत्वादेकदेशदोषपरिहारायेदं सूत्रमित्यर्थः । व्याकुर्वन्ति * यथेत्यादि * । *प्ररोचनं चाधिकमिति * इदमवान्तरफलमधिकम् । कथमेकवाक्यतोपबन्ध इत्याकाङ्क्षायां तामुपपाद्याहुः । * आचार्येत्यादि * । सर्वा-

वेदेति श्रुत्यैकवाक्यताज्ञानमाख्यानं विना न भवतीति तदर्थमुपबन्धाद् गुरुशिष्यकथोपबन्धादित्यर्थः । अथवोपाख्यानरहितायां श्रुतौ यथाज्ञानं निरूप्यते तथैवाधीहि भगव इति होपससाद सनत्कुमारं नारद इत्याद्याख्यानेष्वपि निरूप्यत इत्यनाख्यानश्रुत्यैकवाक्यतयैवाख्याने ज्ञानस्वरूपोपबन्धात् प्रतिपादनादित्यर्थः । नैकट्यवाचिनोपपदेन वस्तुसती या तत्तद्गुरुतत्तच्छिष्यकथा तत्सामीप्यमत्रोच्यते । अन्यथा सामीप्यासम्भवादतः कल्पितत्वशङ्कानिरासः । नन्वेवमपि पारिप्लवार्थत्वे न बाधकं पश्याम इतिचेद्, उच्यते । अश्वमेधप्रकरणे, मनुर्वैवस्वतो राजेत्यादीन्याख्यानानि

सां परविद्यानां परब्रह्मैवार्थस्तत्प्राप्तिरेव च प्रयोजनम् । आचार्यवान् पुरुषो वेदेति श्रुतिश्छान्दोग्ये श्वेतकेतूपाख्याने, यथा सोम्य पुरुषं गन्धारेभ्योऽभिनिबद्धाक्षमित्युपक्रम्य पठिता । तत्र तद्दृष्टान्तेन आचार्याच्छिष्यस्य ब्रह्मज्ञानादिकं श्राव्यते । अतः सर्वा एव विद्या गुरुशिष्यसाकाङ्क्षाः । तदुक्तश्रुत्युक्तमेकवाक्यताज्ञानम् आख्यानं न भवतीति तदर्थं तदुपबन्धात् ।

तथाच केवलानां यथा न शेसनशेषत्वं तथा आख्यानोक्तानामपि नेत्यर्थः । अन्ये तु सूत्र एकवाक्योपबन्धादिति पाठमङ्गीकृत्य एकवाक्यतयोपबन्धं व्याकुर्वन्त एकवाक्यपदं भावप्रधानं बोधयन्तीति न कश्चिद्विशेषः । नन्वेवमाख्यानरहितानामप्याख्यानाकार्थाकाङ्क्षत्वात्तासामेवैतच्छेषत्वं, न त्वाख्यानवर्तीनां तच्छेषत्वमिति नोक्तदोषनिवृत्तिरित्यपेक्षायां पक्षान्तरमाहुः । * अथवेत्यादि * तथाच यदि तत्रान्यदेवोच्येत तत्परत्वमेव स्यान्न ज्ञानपरत्वम् । निरूपिते तु ज्ञानस्वरूप एतासामपि केवलविद्याशेषत्वमतो न दोष इत्यर्थः । सूत्र उपोपसर्गकथनस्य तात्पर्यमाहुः । * नैकट्येत्यादि * अत्र पुनराशङ्कन्ते । * नन्वित्यादि * एवं पूर्वव्याख्याने तासामुपाख्यानाकाङ्क्षा, द्वितीये चोपाख्यानानां तदाकाङ्क्षेति परस्पराकाङ्क्षयैकवाक्यत्वे उभयविध-वाक्यानां पारिप्लवशेषता अदण्डवारितेति तथेत्यर्थः । अत्र समादधते । * उच्यत इत्यादि * तथाच प्रकरणेन

यत्र पठितानि तत्र सामान्यतस्तेषां विनियोगः, सर्वाण्याख्यानानि पारिप्लवे शंसतीत्यनेनोक्त इति सर्वशब्दस्तदाख्यानपर एव, न त्वाख्यानान्तरपरोऽपि । प्रकरणस्य नियामकत्वात् । एवं सति, यदा पारिप्लवाख्यकर्मप्रस्तावस्तदा विशेषविनियोग उक्तः । पारिप्लवमाचक्षीतेति । तत्र प्रथमेऽहनि मनुर्वैवस्वतो राजेति । द्वितीयेऽहनीन्द्रो वैवस्वत इति । तृतीयेऽहनि यमो वैवस्वतो राजेत्याद्याख्यानविशेषा वाक्यशेषे विनियुज्यन्ते । आख्यानसामान्यपरत्वे त्वहोविशेष उपाख्यानविशेषविधानं न स्यात् । अत एव पारिप्लवमित्येकवचनमतो नाख्यानान्तरगन्धसम्बन्धोऽपि । प्रापकाभावात् ॥ २३ ॥

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २४ ॥

एवं पुरुषार्थोऽतःशब्दादित्युपक्रम्य ज्ञानस्य फलसाधने कर्माऽनपेक्षत्वमुपपाद्य तत्रैवोपपत्त्यन्तरमाह । यतो ज्ञानी ज्ञानेन स्वयमेव यज्ञात्मको जातोऽत एव जरामर्याग्निहोत्रेऽग्निस्तदिन्धनं समिदा-

---

सर्वशब्दार्थसङ्कोचावगमादनेन वाक्येन विद्यानां न कर्मशेषत्वसिद्धिरित्यर्थः । उक्तेऽर्थे लिङ्गमप्युपोद्बलकमाहुः । * एवं सतीत्यादि * । * एवं सतीति * प्रकरणसंनिधिभ्यां सर्वशब्दार्थसङ्कोचे सति । तथाचेदं लिङ्गमपि सङ्कोचे मानमित्यर्थः । ननु, मनुर्वैवस्वत इत्यादीनि तत्तदहनि पूर्वमाख्यातव्यानीत्यभिप्रायेण विशेषविधानमित्याशङ्कावारणाय गमकान्तरमाहुः । * अत एवेत्यादि * तथाच यदि तथाभिप्रायः स्यात् तदा बहुवचनमादिपदं वा प्रयुक्तं स्यादतस्तदभावान्न तथेत्यर्थः । एवञ्च पारिप्लवसूत्रे यो विशेषितत्वरूपो हेतुरुक्तः स एव प्रकृतेतराण्याख्यानानि व्यावर्त्तयन् सर्वशब्दार्थसङ्कोचं बोधयतीति न काऽपि शङ्केति तात्पर्यम् ॥ २३ ॥

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ सूत्रप्रयोजनमाहुः । एवमित्यादि । व्याकुर्वन्ति । * य त इत्यादि * ।

दि, तदादय आज्यादयस्तेषामनपेक्षोक्ता । श्रुतौ तैत्तिरीयके पठ्यते । तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निरित्यादि । एतेन यदन्यस्य यज्ञतासम्पादकं तस्य स्वकार्यसाधने कथं यज्ञापेक्षा भवेदिति भावः सूच्यते ॥२४॥

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २५ ॥

उक्तन्यायेन ज्ञानं प्रति कर्मणः फलोपकारित्वाभावेऽपि स्वरूपोपकारित्वमस्ति न वेति चिन्त्यते । तत्र नेति पूर्वः पक्षः । गुरूपसत्तितदुपदेशैरेव तत्सम्भवादाचार्यवान् पुरुषो वेदेति श्रुतेः । अत्र सिद्धान्तमाह । सर्वापेक्षेति । सर्वेषां कर्मज्ञानभक्तीनां पुरुषोत्तमज्ञानोत्पत्तावस्त्यपेक्षा । अत्र प्रमाणमाह । यज्ञादिश्रुतेरिति यज्ञादिनिरूपिका श्रुतिरेव प्रमाणं यत इत्यर्थः । इदमत्राकूतम् । पुरुषोत्तम एव स्वतन्त्रपुरुषार्थरूपस्तत्प्राप्तिरेव फलम् । तत्र प्रेमभक्तिजं तज्ज्ञानमेव साधनमिति ब्रह्मविदाप्नोति परमित्यादिना एतद्विदुरमृतास्ते भवन्तीत्यादिश्रुतिसहस्रैश्च प्रतिपाद्यते । अथेतरे दुः-

---

शेषं स्फुटम् ॥ २४ ॥

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ अधिकरणमवतारयन्ति । * उक्तन्यायेनेत्यादि * । पूर्वाधिकरणे पुरुषोत्तम एव पुरुषार्थस्तत्प्राप्तिश्च केवलाज्ज्ञानादेवेति प्रतिज्ञाय शब्दाद्धेतोस्तत् साधयित्वा शब्दस्य तत्साधकत्वं व्युत्पादितम् । अत उक्तेन न्यायेन शब्देन ज्ञानं प्रति कर्मणः फलोपकारित्वाभावेऽपि कर्मणां सार्थक्याय स्वरूपोपकारित्वं यदुक्तं तद्युक्तत्वादस्ति, उतायुक्तत्वान्नास्तीत्येतदस्मिन्नधिकरणे विचार्यत इत्यर्थः । सिद्धान्तं व्याकुर्वन्ति । * सर्वेषामित्यादि * । तथाच मार्गत्रयापेक्षाकथनात्तत्तन्मार्गोक्तानां कर्मणामपेक्षास्तीत्यर्थो बोधितः । यज्ञादिपदे आदिशब्देन शमदमादीनां कर्मणां भगवद्धर्मरूपाणां शरणगमनादिकर्मणां च संग्रहः । यज्ञादिकर्मणां

खमेवोपयन्तीति श्रुत्या ज्ञानरहितानां दुःखमात्रप्राप्तिरुच्यते । एवं सति स्वतोऽपुरुषार्थरूपं यज्ञादिकं सर्वार्थितत्त्वप्रतिपादिका श्रुतिर्यन्निरूपयति तत्सर्वथा पुरुषार्थसाधनत्वेनैवेति मन्तव्यम् । तच्च निष्कामतयैव कृतं तथा । अत एव वाजसनेयिशाखायां यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवतीत्युपक्रम्य पठ्यते । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इति तु कामयमानोऽथाऽकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवति न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माऽप्येतीत्यादि । अत्र, अथाकामयमानः कर्त्ता निरूप्यत इति शेषः । यः पुमान् कर्मकृतावकामस्ततो निष्कामः सन्नात्मकामो निरुपधिस्नेहवान् प्रभौ ततो भगवत्प्राप्त्याऽऽप्तकामो भवतीत्यर्थः । अत्र यथाकारीत्यादिना कर्मकर्त्तुरेवोपक्रमादथाकामयमान इत्यनेनापि तथाभूतः स एवोच्यते । एवं सति सत्कर्मणि प्रवृत्त्यर्थं विविधफलानि स्वयमेवोक्त्वा जनान् भ्रामितवानिति स्वोक्तकरणाच्चिरेण दयया निष्कामं करोति सकामतयाऽपि क्रियमाणेन वैदिककर्मणाऽनेकजन्मभिः संस्कारविशेषप्रचयेनापि तथा । कषाये पक्वे ततो ज्ञानं प्रवर्त्तते इत्यादिस्मृति-

———

विद्यास्वरूपोपकारकत्वे कथं यज्ञादिश्रुतेः प्रमाणत्वमित्याकाङ्क्षायां तदुपपादयन्ति । * इदमत्रेत्यादि * । * एवं सतीति * । अनेन प्रकारेण ज्ञानशून्यकर्मणां दुःखप्रापकत्वे सति । * मन्तव्यमिति * । निरूपणान्यथानुपपत्त्या मन्तव्यम् । * तथेति * । पुरुषोत्तमज्ञानसाधकम् । अथाकामयमान इति श्रुतिभागं व्याकुर्वन्ति । * अथेत्यादि * । * तथा भूतः स इति * । एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलं तथेति गीतावाक्यादकामः कर्मकृतौ निष्कामः फले । एवं द्विविधकर्त्तृनिरूपणेन यत् सिद्ध्यति तदाहुः । * एवं सति सदित्यादि * । उक्तमर्थं स्मृत्योपष्टम्भन्ति । * कषाय इत्यादि * । एवं

भ्यश्च ज्ञानोत्पत्तौ कर्मापेक्षाऽस्तीति । चकारेण पुष्टावङ्गीकृतस्य सर्वानपेक्षेति सा समुच्चीयते । अत एव, नायमात्मेत्यादिश्रुतिर्न विरुद्ध्यते । ननु ज्ञानद्वारा कर्मादीनामेव फलसाधकत्वमस्त्विति शङ्कानिरासाय दृष्टान्तमाह । अश्ववदिति । यथा स्वेष्टफलसाधकदेशव्यवधानात्मकदेशातिक्रमेऽश्वस्य साधनत्वं, न तु तत्तत्फलसिद्धावपि तथाधिभौतिकाध्यात्मिकाधिदैविकप्रतिबन्धनिवृत्तावेव तेषां

मर्यादामार्गे कर्मापेक्षैव यद्यपि भगवत्साक्षात्कारे व्युत्पादिता, तथापि हेतुबोधके यज्ञादिश्रुतिपदे आदिशब्देन तैत्तिरीयाद्युक्तानामानन्दमयाद्युपासनानामन्यत्रोक्तानां शमादीनां ज्ञानोपकारिणाम, तथा भक्त्युपयोगिनां गोपालतापनीयाद्युक्तानां शरणगमनध्यानरसनभजनादीनां च संग्रहात्तदपेक्षापि बोध्या । साप्यग्रिमसूत्रेषु व्युत्पादयिष्यते । चकारार्थमाहुः । * चकारेणेत्यादि * । * सेति * । अत्राऽनुक्तापि । सोत्रस्य चकारस्यार्थे श्रौतार्थापत्त्योपपद्यन्ते । * अत एवेत्यादि * । * अत एवेति * मार्गभेदादेव । तथाच साधनदशायामेव कर्मापेक्षा, न तु सिद्धदशायामिति भावः । अत्रेदं बोध्यम् । पुरुषोत्तमज्ञानं हि मार्गभेदेन सामाद्यनश्चतुर्विधं वा । तत्र कर्ममार्गे यदाविर्भवति तत्सत्त्वगुणमाधारीकृत्य तत्रान्तर्यामिन्यायेन प्रविश्य सत्त्वं स्वान्तर्भूतं कृत्वा तेन तेन रूपेणाविर्भवतीति नाभि—दक्षादियज्ञेषु तत्तद्रूपेणाविर्भावादवगम्यते । ज्ञानमार्गे त्वक्षररूपेणैवाविर्भवतीति, ये त्वक्षरमनिर्देश्यमिति गीतावाक्यसन्दर्भादवगम्यते । ज्ञानभक्तिसाहित्ये तु यद् वलिष्टं तदनुसारेणाविर्भवति । एवं केवलेऽपि विहितभक्तिमार्गेऽपि तत्तदुपासनावाक्यैस्तत्क्रतुन्यायादवसीयते । अविहितभक्तिमार्गे तु वरणानुसारेणाविर्भवतीति वरणश्रुत्यादिभिरवसीयते । तत्र विहितमार्गत्रये च तत्तन्मर्यादामार्गीयसाक्षात्कारे साधनापेक्षा । पुष्टिमार्गे तु वरणमात्रैकसाध्यत्वान्न तदपेक्षेत्युभयमप्युपपन्नमिति । ननु सर्वापेक्षापदे कर्मज्ञानभक्तीनां पुरुषोत्तमज्ञानेऽपेक्षां व्याख्याय यज्ञादिश्रुतोरत्यस्यार्थव्युत्पादने द्विविधं कर्मकर्त्तारं व्याख्याय निष्कामकर्त्तुः कर्मापेक्षामात्रं व्युत्पादितम् । ततश्च

साधनत्वं, न तु भगवत्प्राप्तावपीत्यर्थः । इदं च मुमुक्षुभक्तविषयकमिति ज्ञेयम् । आत्यन्तिकभक्तिमतां भक्तीतरानपेक्षणात् ॥ २५ ॥

शमदमाद्युपेतः स्यात् तथाऽपि तु तद्विधे-
स्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २६ ॥

ननु तस्मादेवंविच्छान्तो दान्त इत्यादिना शमादेरेव ज्ञानसा-

———

ज्ञाने कर्मापेक्षासिद्धा, न तु ज्ञानभक्त्यपेक्षेति तत्कथनस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः * इदं चेत्यादि * । * इदमिति * । कर्मापेक्षणम् । * भक्तीतरानपेक्षणादिति * । अतीतपादे, सैव हि सत्यादय इत्यत्र निर्णीतत्वेन तथात्वात् । तथाचैकादशस्कन्धे योगास्त्रयो मया प्रोक्ता इत्यत्र कर्मज्ञानभक्तीरुक्त्वा "निर्विण्णानां ज्ञानयोगः कर्मयोगस्तु कामिनाम् । ननिर्विण्णोनातिसक्तो भक्तियोगोऽस्य सिद्धिद्"इति कथनेन तस्य तत एव सिद्धिरिति मुमुक्षभक्तस्य सोपाधिकस्नेहवत्त्वात्तस्य कर्मापेक्षणं युक्तम् । अत्र वाक्यसन्दर्भे योगशब्देन पुरुषार्थप्राप्त्युपाय उच्यते । ज्ञानशब्देन, सर्वभूतेषु येनैकं, कैवल्यं सात्त्विकं ज्ञानमित्यादिवाक्योक्तं ब्रह्मैव सर्वं, वासुदेवः सर्वमित्यत्र पर्यवसितं सात्त्विकं ज्ञानमुच्यते । कर्मशब्देन च पूर्वकाण्डाद्युक्तमग्निहोत्रादिलक्षणं विहितं कर्मोच्यते । भक्तिशब्देन च तापनीगीताश्रीभागवताद्युक्तो भगवद्विषयकः स्नेह उच्यते । अत एव त्रयः स्वस्वप्रकरणोक्तसाधनसहिता मार्गशब्देन व्यवह्रियन्त इति सोपाधिभक्तस्य तदपेक्षणं युक्तमेवेत्यर्थः । तस्मादस्ति ज्ञानस्वरूपे सर्वापेक्षेति सिद्धम् ॥ २५ ॥

शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । तमेतं वेदानुवचनेति श्रुतिलिङ्गाद्यभावेन विद्यास्तुत्यर्थं, यज्ञाद्यनुवादस्य शाक्यवचनत्वात् । विद्यार्थिनः, शान्तो दान्त इति श्रुत्या शमादीनां साधनानां विशेषतो विधानाद्भक्तिमार्गेऽपि, ॐकारेणान्तरितं कृत्वा यो जपति गोविन्दस्य पञ्चपदं मनुं तस्यैवासौ दर्शदात्मरूपमित्या-

धनत्वमुच्यते, न तु यज्ञादेरितिचेत्तत्राह शमदमाद्युपेतो भक्तिमार्गेऽपि स्यादेव यद्यपि तथापि तदङ्गतयाऽऽत्मन्येवात्मानं पश्येदिति ज्ञानमार्गीयज्ञानाङ्गतयैव शमादिविधेर्हेतोर्ज्ञानमार्गे तेषामवश्यानुष्ठेयत्वात्तथा विधिरित्यर्थः । भक्तिमार्गे स्वत एव शमादीनां सम्भवेऽप्यावश्यकत्वं न तेषामिति भावः ॥ २६ ॥

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २७ ॥

ननु सत्त्वशोधकत्वेन यज्ञशमदमादेर्विधानमिति मतं नोपप-

दिश्रुतीनां तापनीयेषु दर्शनाच्च तत्करणमेव युक्तं, न तु यज्ञादिकरणमिति पूर्वोक्तहेतोर्बाधितत्वमित्याशङ्क्य तत्परिहारमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * शमदमेत्यादि * । तथाविधिरिति * । साधनत्वेन विधानम् । तथाचानया श्रुत्या ज्ञानमार्गीयस्य साधनान्तरमधिकं विधीयते इति तेषामवश्यानुष्ठेयत्वम् । तत्र च न यज्ञादिकं निषिद्ध्यत इति तेषामप्यनुष्ठेयत्वम् । यद्यपि तत्र लिङाद्यभावस्तथापि विविदिषन्तीति फलसंयोगस्याऽपूर्वत्वात्तत्र रात्रिसत्रवद् दिष्टाग्निहोत्रस्थे, उपरि हि देवेभ्यो धारयन्तीति वाक्ये समिद्धारणवच्च विधिः कल्पयितुं शक्यत इति तेषामपि हेतुत्वमदण्डवारितमिति न पूर्वोक्तहेतोर्बाधितत्वमित्यर्थः । एतेन भक्तिमार्गेऽव्यवस्थाप्यर्थात् सिद्धेत्याहुः * भक्तीत्यादि * । भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्मिन् मनःकल्पनमिति भक्तिलक्षणात्तादृश्यां सत्यां तन्मार्गे स्वत एव शमदमादीनां सम्भवान्न तेषामावश्यकतया विशेषतो विधानम् । अत एव तत्र एतदेव च नैष्कर्म्यमिति सन्न्यासरूपत्वं श्रावितम् । तथाच ज्ञानेऽन्तरङ्गाणां शमादीनां बहिरङ्गाणां यज्ञादीनां चाऽस्त्यपेक्षा । भक्तौ तु तेषामर्थात् सिद्धिरिति भेद इत्यर्थः ॥ २६ ॥

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ अत्रैव किञ्चिदाशङ्क्य परिहरतीत्याशयेन सूत्रमवतारयन्ति । * नन्वित्यादि * तथाच यथा प्राणसंवादस्थश्रुतिभ्याम् आहारशोधकश्रुत्युक्तमपोद्यते, तथा ताभ्यां शमयज्ञाद्यपवादोऽपि वक्तुं शक्यते । तस्मात् सत्त्वशुद्ध्यर्थं

यते । आहारशुद्धौ सत्त्वशुद्धिरिति श्रुतेस्तद्विरुद्धा सर्वान्नभक्षणानुमतिरपि यतः श्रूयते छन्दोगानाम् । न ह वा एवं विदि किञ्चनानन्नं भवति, तथा वाजसनेयिनां, न ह वा अस्यानन्नं जग्धं भवतीत्यादि । तस्मात् सत्त्वशुद्ध्यर्थं यज्ञादेर्न विधानमिति प्राप्ते विषयव्यवस्थामाह । आहारदौर्लभ्येन प्राणात्यय उपस्थिते प्राणधारणस्य ज्ञानाऽन्तरङ्गतमसाधनत्वेनाहारस्य देहपोषकत्वेन ततो बहिरङ्गत्वात् तदनुमतिः क्रियत इत्यर्थः । अत्र प्रमाणमाह । तद्दर्शनादिति । चाक्रायणः किलर्षिरापद्गत इभ्येन सामिखादितान् कुल्माषांश्चखादेत्यादिश्रुतिदर्शनादित्यर्थः । यद्यपि ज्ञानसाधनत्वेन सत्त्वशुद्धेरपेक्षितत्वाज्जाते ज्ञाने तत्साधानपेक्षणादेवंविदीति वचनात् तादृशे सार्वदिक्यपि तदनुमतिर्नानुचिता । अपि स्मर्यते इत्यनेनाविदुषोऽप्यनुमतेर्वक्ष्यमाणत्वाच्च । तथाऽप्याचार्येणावस्थाविशेषविषयकत्वमुक्तं यत् तेन ज्ञानिनोऽप्यऽनापदि विहितत्यागोऽविहितकरणं च चित्तमालिन्यजननेन ज्ञानतिरोधायकमिति श्रुत्यभिमतमिति ज्ञाप्यते । अत एव श्रीभागवते द्वितीयस्कन्धे "विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितम् । सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् । ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाश-

---

यज्ञशमदमादेर्न विधानं, किन्त्वेतानि वाक्यानि विद्यास्तावकान्येवेति प्राप्ते तानि न स्तावकान्यपि तु विशेषविधानार्थान्येवेति हृदिकृत्य, अन्नभक्षणवाक्यव्यवस्थामाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * आहारेत्यादि * । * क्रियते इति * प्राणधारणार्थं क्रियते । तथाच सर्वान्नानुमतेर्ज्ञानान्तरङ्गसाधनार्थं व्यवस्थितत्वेनासार्वदिकत्वान्न तया सार्वदिकानां सत्त्वशोधकसाधनानां ज्ञानमार्गे बाधः शक्यवचन इत्यर्थः । अत्र किञ्चिदाशङ्क्य परिहरन्ति । * यद्यपीत्यादि * । * तथापीत्यादि च * । ननु भवत्वेवं ज्ञानमार्गे तथापि भक्तिमार्गे शम-

याः । यदा तदेवासत्तर्कैस्तिरोभूयेत विप्लुतम्" इति ब्रह्मणोक्तम् । "ज्ञानिनामपि चेतांसि देवी भगवती हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छतीति" इति मार्कण्डेयेनाप्युक्तम् । एषा ज्ञानमार्गीयज्ञानवतां व्यवस्थेति ज्ञेयम् । भक्तिमार्गीयस्यैवमापद्सम्भवात् । "अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्" इति भगवद्वाक्यात् । मामेव ये प्रपद्यन्ते मायामेतान्तरन्ति त इत्यत्रैवकारेण पुरुषोत्तमज्ञानवत एव मायातरणोक्तेरक्षरमात्रज्ञानवतां तथात्वमुचितम् ॥ २७ ॥

अबाधाच्च ॥ २८ ॥

आपदि तथान्नभक्षणेन चित्ताशुद्ध्यसम्भवेन तज्जनितप्रतिबन्धाभावाच्च न दोष इत्यर्थः ॥ २८ ॥

अपि स्मर्यते ॥ २९ ॥

आपद्यविदुषोऽपि दुष्टान्नभक्षणे पापाभावो यत्र स्मर्यते तत्र विदुषि श्रुत्यनुमते का शङ्केत्यर्थः । स्मृतिस्तु "जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः । लिप्यते न स पापेन पद्मपत्रमिवाऽम्भसा" इति । अथवा विदुषो दुष्टकर्मासम्बन्धो, ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथेति स्मर्यतेऽपीत्यर्थः ॥ २९ ॥

दमादीनां सत्त्वशोधकानां स्वभावतः प्राप्तत्वेन तदर्थकानिर्बन्धाभावात्तस्या अनुपस्थितौ पूर्वोक्तानुमतेरपि तत्र वक्तुमशक्यत्वात्तस्य का गतिरित्यत आहुः । * भक्तिमार्गीयस्यैवमिति * । ननु यद्येवं तदा ज्ञानमार्गीयस्य कथमापत्तिरित्यत आहुः * मामेवेत्यादि * तथाच मायातरणाभावादापत्तिमत्त्वमित्यर्थः ॥ २७ ॥

अबाधाच्च ॥ २८ ॥

अपि स्मर्यते ॥ २९ ॥

शब्दश्चातोऽकामकारे ॥ ३० ॥

यतो ज्ञानाग्निरेव सर्वकर्मदहनसमर्थ इति फलदशायां कामकारेऽपि न दोषोऽत एव साधनदशायां तदभावेन तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुरित्यादिरूपः शब्दः कापकारनिवर्त्तकः श्रूयत इत्यर्थः ॥ ३० ॥

एवं ज्ञानस्य कर्मनाशकत्वे सिद्धे जातज्ञानस्याश्रमकर्म कर्त्तव्यं न वेति चिन्त्यते । तत्र फलस्य जातत्वात् कृतस्यापि नाश्यत्वेनाप्रयोजकत्वान्न कर्त्तव्यमिति पूर्वः पक्षः । तत्र सिद्धान्तमाह ।

विहितत्वाच्चाश्रमकर्माऽपि ॥ ३१ ॥

यथा ज्ञानिनामप्यनापदि शिष्टानामेवान्नं भक्षणीयं विहितत्वात् तथाश्रमकर्मापि कर्त्तव्यमेव नित्यं विहितत्वादित्यर्थः । यथाऽनापद्यशिष्टान्नभक्षणं दोषाय, निषिद्धत्वाद् एतच्चोपपादितं, सर्वान्नानुमतिरित्यत्र । तथा नित्यत्यागोऽपि प्रत्यवायजनक इति तत् कर्त्तव्यमेवेति भावः ॥ ३१ ॥

यच्चोक्तं कृतस्यापि नाश्यत्वेनाप्रयोजकत्वान्न कर्त्तव्यमिति तत्राह ।

शब्दश्चातोऽकामकारे ॥ एतत्सूत्रत्रयभाष्यमतिरोहितार्थम् ॥

अन्ये तु, सर्वान्नानुमतिरित्यादिसूत्रचतुष्टयात्मकमधिकरणान्तरमङ्गीकृत्य किमत्र विद्यावतः सर्वान्नभक्षणं विधीयत उत विद्यास्तुत्यर्थं कीर्त्यत इति संशये, न द्वयमपि, किन्तु प्राणरक्षार्थम् अनुज्ञामात्रम् । अतोऽर्थवाद एवेति सिद्धान्तयन्ति । तदप्यविरुद्धम् ॥ ३० ॥ २ ॥

विहितत्वाच्चाश्रमकर्मापि ॥ अधिकरणप्रयोजनं पूर्वपक्षादिकं चाहुः * एवं ज्ञानस्येत्यादि * । सूत्रव्याख्यानं तु स्फुटम् ॥३१॥

सहकारित्वेन च ॥ ३२ ॥

शमदमादीनामन्तरङ्गसाधनानां सहकारीण्याश्रमकर्माणीत्येत-द्रहितैः शमादिभिरपि ज्ञानं न स्थिरीकर्तुं शक्यमिति तानि कर्त्त-व्यान्येवेत्यर्थः । संसारवासनाजनकत्वस्वभावो यः कर्मणां स ज्ञानेन नाश्यत इति न सहकारित्वेऽनुपपत्तिः काचिदिति भावः ॥ ३२ ॥

एवं ज्ञानमार्गीयज्ञानस्थैर्यसाधनमुक्त्वा भक्तिमार्गीयसाधना-नां भगवच्छ्रवणादीनामपि आधिक्यमावश्यकतां चाह ॥

सर्वथापि त एवोभयलिङ्गात् ॥ ३३ ॥

भगवच्छ्रवणकीर्त्तनादयः साधनान्तरवद्विहितत्वेन कर्त्तव्या एव यद्यपि तथापि सर्वथापि अन्येषां युगपदुपस्थितौ तदनुरोध-

---

सहकारित्वेन च ॥ ननु गीतास्मृतौ ज्ञानस्य सर्वकर्मनाशक-त्वमुक्तम् । जातज्ञानस्य च ज्ञानं वर्त्तत इति तेन कर्मनाशे कथं तेषां सहकारित्वं युज्यत इत्याशङ्कायामाहुः । * संसारेत्यादि * तथाच स्मृतावेधोऽग्निदृष्टान्तस्योक्तत्वाद् यथाग्निरेधांसि दहंस्तेषां धूमादिज-नकं स्वभावं नाशयति, स्वस्थितिपर्यन्तमङ्गाररूपेण स्थापयति च त-त्स्वरूपं, तद्वदत्रापि स्वान्तर्गतमेव कर्मस्वरूपं कृत्वा स्थापयतीति न सहकारित्वेऽनुपपत्तिरित्यर्थः ॥ ३२ ॥

सर्वथापि त एवोभयलिङ्गात् ॥ पूर्वं सर्वापेक्षासूत्रे सर्वपदेन कर्मज्ञानभक्तीनां संगृहीतत्वात्तेषु कर्मणामङ्गाङ्गतयैव सङ्ग्रहो मुख्य-तया तु ज्ञानभक्त्योरिति पूर्वं प्रथमकक्षाविश्रान्तज्ञानमार्गीयज्ञानस्थै-र्यप्रकारं दर्शयित्वाऽधुना भक्तिमार्गीयाणां तं दर्शयतीत्याशयेन सूत्र-मवतारयन्ति । * एवमित्यादि * । * आहेति * शारीरब्राह्मणस्थ-श्रुतिविचारेण, श्रीभागवतगीतावाक्यविचारेण चाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * भगवदित्यादि * । * अन्येषामिति * आश्रमधर्मा-णाम् । ननु तच्छब्दस्य पूर्वपरामर्शित्वात् पूर्वं चाश्रमधर्माणां शमा-

प्रकृत्यापि त एव भगवद्धर्मा एव कर्त्तव्या इत्यर्थः। कुतः। श्रुतिलिङ्गात् स्मृतिलिङ्गाच्च । श्रुतिलिङ्गं तु, तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद् बहूञ्छब्दान् वाचो विग्लापनं हि तदिति । तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथाऽमृतस्यैष सेतुरित्यपि । अत्रैवकारेण भगवदतिरिक्तं प्रतिषिद्ध्य तद्विषयकज्ञानानुकूलं प्रयत्नं श्रवणात्मकं विज्ञायेति विधाय स्मरणमपि तन्मात्रविषयकमेव प्रज्ञां कुर्वीतेति वचनेन विधाय तदेकनिष्ठताहेतुभूतानामेव शब्दानामावर्त्तनमर्थानुसन्धानमपि कर्त्तव्यं, नान्येषामिति नानुध्यायाद् बहूनित्यनेनोक्तवती । अत्रानित्युपसर्गेण ध्यानस्य पश्चाद् भावित्वमुच्यते । तेन योग्यतया श्रवणकीर्त्तने एव तत्पूर्वभाविनी प्राप्येते । स्मृतिस्तु—"शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः । त एव पश्यन्त्यचिरेण

दीनां चोक्तत्वात्तान् विहायात्र तच्छब्देन भगवद्धर्मा एव कथं गृह्यन्त इत्याशङ्कायां हेतुव्याख्यानेन तामपि निरस्यन्ति । * श्रुतिलिङ्गं तु तमेव धीर इत्यादि * तथाच पूर्वं सूत्रेषु शमादीनां यज्ञादीनां च शारीरब्राह्मणस्थानामेव परामृष्टत्वादत्रापि तत्रत्यमेव साधनं परामृश्यते । तत्र च पूर्वं, तमेव धीर इति वाक्यमेवोक्तम् । ततो वेदानुवचनवाक्यम् । ततः शान्तदान्तवाक्यम् । अतः सूत्रस्थेन तच्छब्देन श्रुतिस्थं यत्पूर्वं तदेव परामृश्यते । श्रुतावेषां पूर्वमुक्तत्वेऽपि यदेषां पश्चाद्विचारणं तदेकादशस्कन्धे भगवता, ज्ञानं कर्म च भक्तिश्चेति पश्चादुक्तत्वात्, तमेवैकमिति मुण्डकश्रुतिश्चासन्दिग्धतया सम्यङ्माहात्म्यस्फोरणाय पठ्यते। केन लिङ्गेनात्र भगवद्धर्मप्राप्तिरित्याकाङ्क्षायाम् । इतरानुध्याननिषेधकवाक्यगतानूपसर्गस्य पश्चाद्भावित्वप्रकाशकत्वलिङ्गेन तत्पूर्वभाविनी श्रवणकीर्त्तने प्राप्येते । तेन तदनन्तरं तत्सारभूतशब्दार्थानुसन्धानमेव कार्यं, न त्वन्येषां तदर्थमन्यानुवादकानामपीति बोध्यत इति न कोऽपि शङ्कालेशः । स्मृतिलिङ्गं वक्तुमाहुः । * स्मृतिस्त्वित्यादि * । अत्रापि प्रथमवाक्ये फलश्रुति-

तावकं भवमवाहोपरमं पदाऽम्बुजमिति । महात्मानस्तु मां पार्थ दैवीं प्रकृतिमास्थिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् । सततं कीर्त्तयन्तो मां यतन्तश्च दृढव्रताः। नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासत''इति । एतेन भगवद्धर्माणामात्मधर्मत्वेनान्तरङ्गत्वादाश्रमकर्मणो देहधर्मत्वेन बाहिरङ्गत्वात्तदविरोधनैव तत्र कर्त्तव्यमिति स्थितम् । अत एव भगवद्धर्माऽन्यधर्मं प्रतिषिद्ध्य तेषां सर्वेभ्य आधिक्यं ज्ञापयितुं, स वा अयमात्मा सर्वस्य वशीत्यादिना भगवन्माहात्म्यमुक्तम् ॥ ३३ ॥

अनभिभवं च दर्शयति ॥ ३४ ॥

प्राधान्येन भगवद्धर्मा एव कर्त्तव्या इत्यत्रोपोद्बलकान्तरमनेन उच्यते । सर्वं पाप्मानं तरति, नैनं पाप्मा तरति, सर्वं पाप्मानं तपति, नैनं पाप्मा तपतीत्यादिना भगवद्धर्मानुरोधेनाश्रमकर्माकरणजदोषैरनभिभवं च श्रुतिर्दर्शयत्यऽतो भगवद्धर्मा एव सर्वेभ्य उत्तमानि साधनानीत्यर्थः ॥ ३४ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३५ ॥

लिङ्गेन तेषां करणं लभ्यते । एवं गीतावाक्येऽपि ज्ञेयम् । सिद्धमाहुः । * एतेनेत्यादि * एतदुपष्टम्भाय प्रकृतश्रुतिस्थमेव लिङ्गं दर्शयन्ति । * अत एवेत्यादि * । तथाचान्ते भगवन्माहात्म्योक्तिरपि भगवद्धर्माणामाधिक्ये तेषामवश्यकर्त्तव्यत्वे च लिङ्गमित्यर्थः । एतेन अस्मिन् सूत्रे त एवेत्यवधारणेन त्रयाणां युगपदुपस्थितौ भगवद्धर्मातिरिक्तान् आचार्यो निवर्त्तयतीति बोधितम् । एतदुपष्टम्भायैवाग्रिमा पञ्चसूत्रीति ॥ ३३ ॥

अनभिभवं च दर्शयति ॥ अत्र भाष्यमतिरोहितार्थम् । सर्वं पाप्मानं तरतीति श्रुतिस्तु शारीरब्राह्मणस्था ॥ ३४ ॥

भगवद्धर्मेभ्य आश्रमधर्मा हीना इत्यप्यऽल्पमुच्यते । अपि तु तस्मिन् पुरुषोत्तमे धर्मिण्येव दृष्टिस्तात्पर्यं यस्य पुंसस्तस्याश्रमधर्मा अन्तरा च फलसिद्धौ व्यवधानरूपाश्चेति श्रुतिर्दर्शयतीति पूर्वेण सम्बन्धः । अन्तराशब्दोऽत्राव्ययात्मको व्यवधानवाचकः । तथाच श्रुतिः—एतद्ध स्म वै तत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ऋणाऽपाकरणहेतुत्वेन लौकिकोत्कर्षहेतुत्वेनापि प्रजाया अभीष्टत्वेऽपि तदुत्पादनव्यासङ्गेन भगवदानन्दानुभवेऽन्तरायो भविष्यतीति तद्दृष्ट्या तत्रोपेक्षां दर्शयति ॥ ३५ ॥

अपि स्मर्यते ॥ ३६ ॥

अपिशब्देनाश्रमधर्माणां तथात्वं किमु वाच्यं, यतो ज्ञानतत्साधनवैराग्यादीनामप्यन्तरायरूपत्वं स्मर्यते । "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह" इति भगवद्वाक्यम् ॥ ३६ ॥

विशेषानुग्रहश्च ॥ ३७ ॥

स्मर्यत इति पूर्वेण सम्बन्धः । ज्ञानादेः सकाशाद्भक्तिमार्गे

अन्तरा चापि तु तद्दृष्टेः ॥ * व्यवधानवाचक इति * । अन्तरेऽन्तरा, अन्तरेण च मध्ये स्युरिति कोशात् । मध्यस्थितस्य च व्यवधायकत्वाद् व्यवधानवाचक इत्यर्थः । आश्रमकर्मणां कथं व्यवधायकत्वमित्याकाङ्क्षायां श्रुत्या तदुपपादयन्ति । * तथाचेत्यादि * । इयमपि श्रुतिस्तत्रत्यैव ॥ ३५ ॥

अपि स्मर्यते ॥ ३६ ॥

विशेषानुग्रहश्च ॥

एतद्भाष्यमप्यतिरोहितार्थम् ॥ अनुग्रहस्तु धर्मान्तरं कृपादयाद्यपरपर्यायम् । न तु फलदित्सा । यस्यानुग्रहमिच्छामीति

फलतोऽप्युत्कर्षमाह । ज्ञानादिसाधनवत्स्वनुग्रहो मुक्तिपर्यन्त एव । भक्तिमार्गे तु, अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विजेत्यादिवाक्यैर्विशेषरूपो मुक्तादिभ्योऽपि भक्तानां व्यावर्त्तको भगवदनुग्रहः स्मर्यत इत्यर्थः ॥ ३७ ॥

गूढाभिसन्धिमुद्घाटयन् फलितमर्थमाह ।

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३८ ॥

अत इति पूर्वोक्तश्रुतिस्मृतिपरामर्शः । तथाचेतरस्या मुक्तेरपि भक्तिमार्गीयतदीयत्वमेव ज्याय इत्यर्थः । अत्र हेत्वन्तरमाह । लिङ्गाच्चेति । मुक्तानां तु मायाविनिर्मुक्तमात्मस्वरूपमेव, न तु देहेन्द्रियादिकमप्यस्ति येन भजनानन्दानुभवः स्यात् । भक्तानां तु देहेन्द्रियादिकमपि मायातत्कार्यरहितत्वेनानन्दरूपत्वेन च भगवदुपयोग्यतोऽपि तत्तथेत्यर्थः । न हि मुक्तात्मनां कश्चन भगवदुपयोगोऽस्तीति भावः । तदुक्तं श्रीभागवते, न यत्र माया किमुताऽपरे

वाक्यात् । अयमेव च पुष्टिशब्देनोच्यते । पोषणं तदनुग्रह इति वाक्यात् । एतत् सर्वं मत्पितृचरणविरचिते पुष्टिप्रवाहमर्यादाख्यग्रन्थविवरणे प्रपञ्चितमिति नात्रोच्यते ॥ ३७ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ मुक्तेरिति पञ्चमी । * अत्रेति * । भक्तिमार्गीयभगवदीयत्वस्य मुक्तितोऽपि ज्यायस्त्वे । * स्वरूपमेवेति * तिष्ठतीति शेषः । * अतोऽपीति * भगवदुपयोगिलिङ्गस्थूलशरीरद्वयात्मिकाया भजनानन्दानुभावकसामग्र्या आधिक्यादिति । एतेन "सर्वेन्द्रियैस्तथाचान्तःकरणैरात्मनाऽपि हि । ब्रह्मभावात्तु भक्तानां गृह एव विशिष्यत इति निबन्धोक्तं स्मारितम् । ननु भगवदुपयोगित्वस्य कथं मुक्त्यपेक्षया भक्ताधिक्यलिङ्गत्वमित्यपेक्षायां तत्र प्रमाणमाहुः । * तदुक्तमित्यादि * । एतद्वाक्ये मायासंसर्गरहिते स्थाने भगवदनुव्रतानां कथनाद्भगवतो मुक्तसेव्यत्वस्य पूर्वं

हरेरनुव्रता यत्र सुरासुरार्चिता इत्यादि, मुक्तोपसृप्यत्वं चोच्यते । अत एव सप्तमस्कन्धे देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनामित्युक्तम् । पुरवासित्वे देहादेरावश्यकत्वान्निषेधो जडात्मकानामेवेत्यवगम्यते । इतरज्ज्याय इति पाठे तु पूर्वोक्ताश्रमकर्मपरामर्शोऽत इत्यनेन उक्तयोरेव वा । एतेन, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्युक्तफलवत्त्वं तस्य सूच्यते ॥ ३८ ॥

भगवता सूत्रकारेण मुक्तोपसृप्यसूत्रे उक्तत्वाच्च तदेव प्रमाणमित्यर्थः । एतदुपोद्बलनाय निषेधमुखेनालौकिकदेहबोधकं वाक्यान्तरमाहुः । * अत एवेत्यादि * । एवमेकपाठं व्याख्याय पाठान्तरं व्याकुर्वन्ति । * इतरदित्यादि * । उक्तयोरिति * । श्रुतिस्मृत्योः । अस्मिन् पक्षे इतरदिति पदेन भक्तिमार्गीयभगवदीयत्वं बोध्यम् । सिद्धमाहुः । * एतेनेत्यादि * । * तस्येति * । तादृशभगवदीयत्वस्य । एवं ज्ञानिधर्माणां शमादीनामाश्रमधर्माणां च विहितत्वेन तौल्यादवश्यकर्त्तव्यत्वे प्राप्तेऽप्यनभिभवादिपञ्चसूत्र्या भगवद्धर्माणामुत्कर्षप्रदर्शनेन अन्येषामेतेषां च युगपदुपस्थितौ भक्तिमार्गीयेण पूर्वमेत एव कर्त्तव्या, गौणकाले त्वन्य इति निर्णीतम् ॥ यद्यप्यतीतपादे,आदरादलोप इत्यधिकरणे राजसभक्तानां कर्मासक्तिनिवृत्तयेऽयमर्थ उक्तस्तथाप्यत्र कर्मोपसंहारप्रकारदाढ्यार्थं पुनर्विशेषतो युक्तिपूर्वकं बोधित इति न पुनरुक्तिदोष इति ज्ञेयम् ।

सर्वथाऽपीति सूत्रद्वयमाश्रमकर्माधिकरणशेषत्वेनाङ्गीकृत्य त एवेत्यवधारणेनाश्रमधर्मातिरिक्तधर्मान्तरनिवृत्तिमङ्गीकुर्वन्ति । यथा हि, मासमग्निहोत्रं जुह्वतीति कर्मान्तरमुपदिश्यते तथा नात्र । किन्तु तान्येव वेदानुवचनादेरनूद्य पृथक्संयोगो विधीयते तस्मादिति । तत्रैवं व्याख्याने सर्वथेति पदानर्थक्यम् । आश्रमधर्मपक्षे भेदशङ्काया एवानुदयादिति । अनभिभवसूत्रवैयर्थ्यं च ॥

तथा, अन्तरा चापीति सूत्रचतुष्टयात्मकमधिकरणान्तरमङ्गीकृत्य तत्र विधुरादीनां द्रव्यादिसम्पद्रहितानां चान्यतमाश्रमप्रतिपत्तिहीनानां च विद्यायामधिकारोऽस्ति, न वेति संशये, रयिक-

तद्भूतस्य तु नाऽतद्भावो जैमिनिरपि नियमातद्रूपाभावेभ्यः ॥ ३९ ॥

अथेदं विचार्यते। तदीयानामपि कदाचित् सायुज्यमस्ति, न वेति। तत्र भक्तिमार्गस्यापि साधनरूपत्वात्तस्य च मुक्तावेव पर्यवसानात्तदीयत्वस्य साधनावस्थारूपत्वात् तेषामपि मुक्तिरावश्यकी। तथाच फलतो न कश्चिद् विशेष इति प्राप्ते, उच्यते। तद्भूतस्येत्यादि। तुशब्देन मर्यादामार्गीयव्यवच्छेदः। अत्र विश्वासदार्ढ्यायाह। अन्यस्य का वार्त्ता, कर्ममात्रनिरूपकस्य जैमिनेरपि यदि कदाचिद्भगवत्कृपयाऽयं भावो भवेत् तदा तद्भूतस्य पुष्टिमार्गीयभगवद्भावं प्राप्तस्य तस्यापि नातद्भाव उक्तभावतिरोधानं न कदाचिदपीत्यर्थः। अत्र हेतूनाह नियमादीन्। तैत्तिरीयके, ते ते धामान्युष्मसीति मन्त्रे यत्र भूरिशृङ्गा अयासस्तदुरुगायस्य परमं पदमित्युक्त्वा तदनन्तरं तत्र कृतानि कर्माण्यपि, विष्णोः कर्माणि

वाचक्नवीप्रभृतीनामपि ब्रह्मवित्त्वश्रुत्युपलब्धेः। संवर्त्तप्रभृतीनां च नग्नचर्यादियोगादनपेक्षिताश्रमकर्मणामपि महायोगित्वस्मरणात्। विधुरादीनामविरुद्धैः पुरुषमात्रसम्बन्धिभिर्धर्मविशेषैर्विद्यानुग्रहस्मरणाच्च। तेषामप्यस्त्यधिकार इति निर्णयमाहुः। अन्तरालवर्त्तित्वापेक्षया आश्रमित्वं ज्यायो विद्यासाधनमिति चाहुः॥
तत्रोदासीना वयम्॥ ३८॥ ३॥

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः। अधिकरणमवतारयन्ति। * अथेत्यादि *। * कदाचित् सायुज्यमस्ति, न वेति साधनभक्तिपरिपाकदशायामक्षरसायुज्यमस्ति न वेत्यर्थः। * तस्य चेति *। साधनस्य। सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति। * तुशब्देनेत्यादि *। तेन नैकात्मतां मे स्पृहयन्तीत्यादीनां भक्तमुक्तिबोधकानां वाक्यानां न विरोध इति बोधितम्। मर्यादासहितपुष्टौ पुरुषोत्तमसायुज्य एव पर्यवसानादिति। * यदि कदाचि-

पश्यतेति मन्त्रेण निरूप्य पुनः पूर्वोक्तलीलास्थानं, तद्विष्णोः परमं पदमिति पदेनानूद्य तस्य नित्यत्वनिरूपणायोच्यते, सदा पश्यन्ति सूरय इति सूरयो विद्वांसः पुरुषोत्तमज्ञानवन्त इति यावत् । तच्च भक्त्यैवेति सूरिपदेन भक्ता उच्यन्ते । तथाच भक्तानां सार्वदिकदर्शनं नियम्यते, सदेति पदेन । एवं सति पुष्टिमार्गीयभगवद्भावं प्राप्तस्य मुक्तावुच्यमानायां तन्नियमो भज्येतेत्यर्थः । यच्चोक्तं साधनावस्थायामुत्तमावस्थारूपत्वं परं तदीयत्वस्य फलं मुक्तिरेवेति तत्राहाऽतद्रूपेति । उक्तभगवदीयत्वं न साधनरूपमपि तु मुक्तेरपि फलरूपम "मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्ताऽऽत्मा" इति वाक्यात् । "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत" इति श्रुत्या अमृतस्य मुक्तस्य ब्रह्मस्वरूपभोग उच्यते । स च, यमेवैष वृणुत इति श्रुतेर्भगवदीयत्वसाध्य एवेति स्पष्टफलत्वमस्यातोऽतद्रूपत्वम । किञ्च । फलं हि साधनादुत्तमं भवति । भगवदीयत्वादुत्तमस्यार्थस्याभावादपि न मुक्तिर्वक्तुमुचिता । तदुक्तं श्रीभागवते पञ्चमस्कन्धे पूर्वं भक्तिस्वरूपं निरूप्य, तयैव परया निर्वृत्त्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्था इति ॥ ३० ॥

दिति * । अनेकजन्मसुविहितकर्मकरणेन भगवत्तोपे जाते । * तन्नियम इति * सार्वदिकदर्शननियमः । पुष्टिमार्गीयभगवदीयत्वस्य मुक्तिफलरूपत्वं श्रुतिं दर्शयन्ति * यदा सर्वे इत्यादि * । इयं शारीरब्राह्मणस्था । तत्र अकामयमानं कर्त्तारमुपक्रम्य तादृशस्य प्राणानुत्क्रमणं ब्रह्मैव सन् ब्रह्माप्येतीति ब्रह्मणि लयं चोक्त्वा लयस्वरूपं विवक्तुं तदेष श्लोको भवतीति प्रतिज्ञाय, यदा सर्वे इति पठ्यते । तत्र सर्वकामप्रमोके अस्याऽमृतत्वभवनमुक्त्वा, अत्र एतल्लोक एव, ब्रह्म

नचाधिकारिकमपि पतनानुमानात् तदयोगात् ॥४०॥

अथेदं विचार्यते। ध्रुवायेव ब्रह्मादिलोकाधिकारं दत्वा तत्सम्बन्धिफलं ददाति, न वेति । तत्र नेत्याह । नचेति । तत्र हेतुः । पतनानुमानादिति । आब्रह्मभवनाल्लोकाः पुनरावर्त्तिनोऽर्ज्जुने-

---

समश्नुते इत्यनेन सोऽश्नुते इत्यत्रैवाश भोजने इति धातोरेव विकरणपदव्यत्ययाभ्यां प्रयोगात्तस्यैवार्थो गृह्यत इति मुक्तस्य ब्रह्मस्वरूपभोग एवात्रोच्यते । स च, यमेवेति श्रुत्यन्तरैकवाक्यतया तथाऽवधार्यते इति मुक्तिफलरूपत्वान्न तस्य मुक्तिसाधनरूपत्वमित्यर्थः । तेन, अतद्रूप इति भावप्रधानो निर्देश इति बाधितम् । न च सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यत्रेयं वाजसनेयिश्रुतिरकामयमानस्येत्यारभ्य ब्रह्म समश्नुत इत्यन्तं सुषुप्तिपरत्वेन भाष्य एव व्याख्यातेति कथमेवमुच्यत इति शङ्क्यम् । याज्ञवल्केन शिष्टतया तत्र सुषुप्तिमोक्षावस्थे बाधिते इति बाधनार्थे तत्र तथा व्याख्यानं, न तु सिद्धान्तबोधनार्थेति तत्रैव मया व्युत्पादितत्वादिति । शेषं स्फुटम् । यद्यप्यर्तातपादे लिङ्गभूयस्त्वाधिकरणस्थेऽनुबन्धादिसूत्रेऽयमर्थो निर्णीतस्तथापि सर्वात्मभाववत एव निर्णीतो, न तु पुष्टिमर्यादामार्गीयभगवद्भक्तस्यापीति न पुनरुक्तिरिति ज्ञेयम् ।

अन्ये तु अत्र ऊर्ध्वरेतआश्रमात् कथमपि पुनराश्रमान्तरं भवति न वेति संशयेऽनेन सूत्रेण तदभावः साध्यत इत्याहुः । तदस्माकमपि संमतम् । यत्तु जैमिनिपदमैकमत्यबोधनायेत्याहुः । तत् तद्दर्शने तद्विचारादर्शनाच्छिष्यत्वेन तत्सम्मतिप्रदर्शनप्रयोजनाभावाच्चेति न रोचिष्णु ॥ ३९ ॥

नचाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ अधिकरणमवतारयन्ति । * अथेत्यादि * । * अथेदं विचार्यत इति * । पुष्टिमर्यादामार्गीयफलविचारोत्तरं मर्यादापुष्टस्य फलं विचार्यत इत्यर्थः । * तत्सम्बन्धीति * अधिकारसम्बन्धि । सिद्धान्तमाहुः । * तत्र नेत्यादि * ईदृशे सन्देहे ध्रुवायेव ददातीति पूर्वपक्षे नेत्याहेत्यर्थः । व्याकुर्वन्ति । * आब्रह्मेत्यादि * । सूत्रयोजना तु, आधिकारिकं

ति स्मृतेरित्यर्थः । फलस्य सावधिकत्वादिति भावः । किञ्च ता-दृशे भगवदीये यजनाऽयोगादपि न तथा । अथवा । तादृशस्य सदा भक्तिरसानुभवात्तदतिरिक्तस्यानपेक्षणादन्येषां फलानां स-म्बन्धाभावादित्यर्थः ॥ ४० ॥

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥ ४१ ॥

एके भक्ता आधिकारिके फले पतनमात्रं न हेयत्वप्रयोजक-मिति वदन्त्यऽपि तूपपूर्वं पतनमेव तदिति वदन्ति । भक्तिभावा-च्च्युतेः। अधिकारसमाप्तौ भगवदनुग्रहाशाऽपि कदाचित् सम्भव-तीत्युपपतनं तत्।मुक्तौ त्वपुनरावृत्तेर्भक्तिरमाशाऽपि नेति महा-पतनमेव सेति भावः । तेन निषिद्धकर्मफलतुल्यत्वं ज्ञापितं भवति। अत एव श्रीभागवते "नारायणपराः लोके न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन" इति गीयते । भक्तिमार्गे तु साक्षात्सङ्गाभावेऽपि तदीयभावमात्रमप्यशनवत् साक्षाद्भगवत्स्व-

---

फलं चकारादधिकारमपि न, पुष्टिमार्गीयेभ्यो न ददात्येव । कुतः । पतनानुमात् । अनुमीयते श्रुतिरनेनेत्यनुमानं स्मृतिः पतनबोधकम-नुमानं पतनानुमानं तस्मात् । शेषा तु स्फुटा । तर्हि, ध्रुवाय कथं दत्तवानिति तु न शङ्क्यम् ।

द्वितीयस्कन्धे, ते वै विदन्त्यतितरन्ति च योगमायामिति भगवद्योगमायाज्ञानरूपसाधनान्तरस्य ध्रुवे उक्तत्वेन, नैच्छन्मुक्ति-पतेर्मुक्तिं पश्चात्तापमुपेयिवानिति वाक्येन च तस्य मुमुक्षुतया मर्या-दामार्गीयत्वावगमात् । ये पुनः पुष्टावङ्गीकृतास्तेषां तु मुक्तावप्या-काङ्क्षाराहित्यात्तामेव न ददातीति दूरापेतमाधिकारिकमित्यर्थः । किञ्च तस्यापि तत्र मुक्तिरेव मायातरणरूपा फलत्वेनोच्यते, न तु भक्तिफलमतो न दोषः । भक्तस्वरूपविचारेणार्थान्तरं तद्योगपद-स्याहु । * अथवेत्यादि ॥ ४० ॥

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम ॥ उक्तेऽर्थे हेत्वन्तर-माहत्याशयेन सूत्रं व्याकुर्वन्ति । * एके इत्यादि * ।

रूपभोगवदेव मन्यते। तदुक्तं श्रीभागवते, अथ ह वा व तवेत्यादि-ना । साक्षाद्भगवद्भोगो जीवस्यासम्भावित इति शङ्कानिरासायाह । तदुक्तमिति। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति, अत्र ब्रह्मसमश्नुत इत्यादिश्रुतिषु साक्षाद्ब्रह्मस्वरूपरसाशनमुक्तमित्यर्थः ॥ ४१ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४२ ॥

अथेदं चिन्त्यते । प्रचुरभगवद्भावमात्रवतः साक्षात् स्वरूपभोगवतो वा गृहत्यागः कर्त्तव्यो न वेति फलस्य सिद्धत्वान्नेति पक्षव्यवच्छेदाय, मद्वार्त्तायातयामानां न बन्धाय गृहा मता इति वा-

---

अथ ह वा वेति* इदं गद्यं षष्ठस्कन्धे नवमाध्याये अथ ह वा व तव महिमाऽमृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मृतदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतसुहृदि सर्वात्मनि नितरां निरन्तरनिर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाऽम्बुजानुसेवां विसृजन्ति, न यत्र पुनरयं संसारपर्यावर्त्त इति । तथाच पूर्णानुग्रहभाजनानामेव भगवत्परायणत्वात् तेषामाधिकारिकं फलमधिकारं च तुच्छत्वान्न ददाति, किन्तु भगवल्लोकेषु नित्यमक्षरात्मकं सेवानुरूपं देहमन्तर्भजनानन्दानुभवं च ददातीत्येतादृशं मर्यादापुष्टानां फलमिति सिद्धम् । एतेन भक्तिमार्गे मध्यमजघन्याधिकारिणोरपि ज्ञानफलतः फलोत्कर्षाद्भक्तिमार्ग उत्कृष्ट इत्यपि सिद्धम् ॥ ४१ ॥ ९ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ अधिकरणप्रयोजनमाहुः । * अथेदमित्यादि * । अथ भक्तिमार्गीयमध्यमजघन्ययोः फलविचारोत्तरं मध्यमस्य त्यागरूपं साधनं चिन्त्यत इत्यर्थः । मध्यमत्वं विशदयन्तः संशयादिकमाहुः । * प्रचुरेत्यादि * । अत्राधिकारिद्वयस्योक्तत्वाद् द्विविधपूर्वपक्षव्यवच्छेदार्थस्तु शब्द इत्याशयेनाहुः । * फलस्येत्यादि * । मद्वार्त्तेत्यादि च * ।

क्याद् बन्धकत्वेन त्याज्य इति पक्षव्यवच्छेदाय च तुशब्दः। भावमात्रे साक्षात्प्रभुसम्बन्धे वोभयथापि गृहाद् बहिर्गमनं गृहत्याग इति यावत् । स आवश्यकः । तत्र प्रमाणमाह । स्मृतेरित्यादि । त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु । मय्यावेश्य मनः सम्यक् समदृग्विचरस्व गामित्यादिस्मृतिर्भगवद्भाववतस्तत्सङ्गविशिष्टस्यापि बहिर्गमनमाह। तदाचारोऽपि तथैव श्रूयतेऽतस्तथा। अत्रायमाशयः । आश्रमधर्मत्वेन गृहत्यागो यदहरेवेत्यादिश्रुतिभ्यः पूर्वमुपपादितोऽपि यदधुना पुनरुच्यते तेन तदतिरिक्तोऽयमिति ज्ञायते। तथाचोक्तवाक्यान्मुमुक्षुमुक्तिप्रतिबन्धकत्वाभावेऽपि व्यासङ्गस्य तत्रावश्यकत्वादुक्तोभयोरप्यनवरतं प्रभुरसास्वादे प्रतिबन्धकत्वेन तस्य तत्त्यागस्य विप्रयोगरसानुभावकत्वेन च स कर्त्तव्यः । यद्यपि स्नेहान्तरायत्वेन स्वत एव तत्त्यागो भावी तथाप्याश्रमादाश्रमं गच्छेदिति वाक्यादत्राश्रमान्तरत्वाभावेन त्यागस्याऽविहितत्वशङ्काभावायेयमुक्तिरिति ॥ ४२ ॥

---

* अतस्तथेति * उक्तप्रमाणप्राप्तत्वात्त्यागः कर्त्तव्य इत्यर्थः। उद्धवस्य मध्यमाधिकारित्वं तु, उद्धवादिमध्यमभावबोधकाय नम इति नामावल्यां स्फुटम्। पुनरुक्तिपरिहाराय तदाशयमाहुः * अत्रेत्यादि * *पूर्वमिति*। ऊर्ध्वरेतःसूत्रे। * उक्तवाक्यादिति * । मद्वार्त्तायातयामिति वाक्यात् । * तस्येति * । गृहस्य । * इयमुक्तिरिति * । अनेन सूत्रेणानुज्ञा । तथाचाश्रमान्तररूपत्वाभावेन स्मृत्यन्तरोक्तत्वाभावेऽपि । एकादशस्कन्धेऽष्टादशाध्याये "यदा कर्मविपाकेषु लोकेषु निरयात्मसु । विरागो जायते सम्यङ् न्यस्ताग्निः प्रव्रजेत्तत" इत्यादिषोडशभिः श्लोकैस्त्रिदण्डं सन्न्यासमुक्त्वा, ततो, "ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः । सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचर" इत्यादाभिरेकादशभिर्ज्ञाननिष्ठस्य भक्तस्य च तदतिरिक्तः

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४३ ॥

पुष्टिमार्गीयभक्तस्य विहितत्वादिति ज्ञानमप्रयोजकम् । तत्र हेतुः—तस्य भक्तिमार्गस्वामिनः श्रीगोकुलेशादेव फलस्य श्रुतेरतो बहिर्गमनं न साधनत्वेनात्र कार्यमिति भावः । अत्र, यमेवैष वृणुत इति श्रुतिरनुसन्धेया । एतदनुपदमेव पठ्यते । नायमात्मा बलहीनेन लभ्य इति । अत्र भगवद्वरणानन्तरमपि जीवबलं कतमद्, यदपेक्षो भगवल्लाभ इति जिज्ञासायां सर्वात्मभाव एव बलमिति निर्णीयते । तस्यैव मर्यादाबलोपमर्दकत्वाद्भगवद्वशीकारहेतुत्वाच्च । व्रजसीमन्तिनीनां प्रभुवचनातिक्रममपि कृत्वा स्वरूपपरिग्रहस्तद्बलेनैव यत इत्यात्रेय आचार्यो मनुते । इदमत्राभिप्रेतम् । सर्वात्मभावस्य यद् बलं, तत्तदात्मकस्य प्रभोरेव तस्य चायं स्वभावो यदन्यन्न रोचते। अत एव व्रजपरिवृढवदनेन्दुवचनकिरणप्रचारप्रो-

---

संन्यास उक्तः। तद्बोधनायेदं कथनमित्यर्थः।एतस्य प्रपञ्चः संन्यासनिर्णयग्रन्थादवगन्तव्यः ॥ ४२ ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ननु भक्तिमार्गीयत्यागो मध्यमस्य कर्त्तव्यत्वेनोक्त इत्याकाङ्क्षायामिदं सूत्रं प्रवृत्त इत्याशयेन व्याकुर्वन्ति । * पुष्टीत्यादि * । * विहितत्वादिति * । विहितत्वेन ज्ञानम् । तथात्वेन फलसाधकत्वज्ञानं च । * साधनत्वेनेति * फलप्राप्तिसाधनत्वेन । * अत्रेति * । स्वामिन एव फलमित्यस्मिन्नर्थे नायमात्मा बलहीनेनेति वाक्यार्थस्य गुणोपसंहारपाद एव विचारितत्वात्तद्विचारोऽत्र न क्रियते। * तस्यैव मर्यादेत्यादि * "धर्मः सत्यदयोपेतो विद्या वा तपसान्विता । मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हीति । न साधयति मां योगो न सांख्यं धर्म उद्धव । न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिते"त्येकादशस्कन्धीयवाक्याभ्यां तथात्वादित्यर्थः । * तदात्मकस्येति * । सर्वात्मभावात्मकस्य । * अन्यदिति * । भगवदतिरिक्तम् । सिद्धमाहुः । * अत

च्छलतर्केवलभावाऽम्भोधिवचनवीचयो गीयन्ते—यर्ह्यम्बुजाक्ष तव पादतलमस्प्राक्ष्म तत्प्रभृति नान्यसमक्षं स्थातुं पारयाम इत्यादयः। अतस्त्यागस्तु पृष्ठलग्न इवायातीति न तदर्थं यतनीयमिति विष्ण्ववतारत्वेन पुरुषोत्तमभावस्वरूपज्ञोऽयमिति तथा ॥ ४३ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥४४॥

सर्वत्यागपूर्वकं यद् बहिः प्रभुसमीपगमनं भक्तस्य तदार्त्विज्यमृत्विक्कर्मैवेत्यौडुलोमिराचार्यो मन्यते । तस्यायमभिसन्धिः । यजमानो हि स्वेष्टसिद्ध्यर्थमृत्विज आदौ वृणुते । प्रकृते च, यमेवैष वृणुत इति श्रुतेस्तस्मादेकाकी न रमत इति श्रुतेश्च स्वक्रीडार्थं भगवान् स्वचिकीर्षिततत्तल्लीलानुरूपाञ्जीवान् वृणुते । यूनः स्थविरान् वेति विकल्पादेकरूपाणां यथा सोमादिषु वरणं तथा सर्वात्मभाववत्त्वेनैकरूपाणामेवात्र वरणम् । तत्र यथा स्वीयस्वीयतदङ्गमात्रकरणं तेषां तथेतरसम्बन्धानिवर्त्तनपूर्वकं तेद्भाग्यसमर्पकत्वमत्र। तदुक्तं भगवता, यदा पुमाँस्त्यक्तसमस्तकर्मा निवेदि-

---

इत्यादि * । तथाचोत्तमस्य स्वत एव गृहत्यागः सम्भवतीत्यतो नोक्त इत्यर्थः । नन्वात्रेयस्य कथमेवं भक्तिमार्गीयभावस्वरूपज्ञानं येन गृहत्यागयत्नं निषेधतीत्यत आहुः । * विष्ण्ववतारेत्यादि * । "अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाऽहमिति यद्भगवान् स दत्त" इति द्वितीयस्कन्धवाक्याद्वतारत्वेन तथेत्यर्थः ॥ ४३ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ औडुलोम्याशयमाहुः । * तस्यायमित्यादि * । यूनः स्थविरान् वेति * । सर्वान् यूनः सर्वान् स्थविरान् वा । * तत्रेति * । सोमादियागे । * अत्रेति * । भक्तिमार्गीयलीलायाम् । तत्र सम्मतिमाहुः । * तदुक्तमित्यादि * । यदा पुमानिति वाक्यम् । एकादशस्कन्धे ऊनत्रिंशाध्या-

तात्मा विचिकीर्षितो म इति । अत्र पूर्वपदेनेतरसम्बन्धनिवर्त्तनोक्त्या सर्वात्मभाव उक्तो भवति । तदनन्तरमात्मनिवेदने सति तद्विषयकलीलाकरणेच्छाविषयः सम्भवति । अन्तरङ्गलीलाप्रवेशनमिच्छायां विशेषः । तस्मात् सुष्ठूक्तमार्त्विज्यमिति । एतेन, न ददाति न पचतीत्यादिश्रुतेर्यथा सोमादौ दीक्षितस्य तद्यागेतरधर्मनिवृत्तिः स एव परमो धर्मो यतस्तथा पुरुषोत्तमस्योक्तभक्तैः सह रमणमेव सार्वदिकम्, एतदेव च महन्महत्त्वमिति सूचितं भवति। प्रकृते भक्तानामृत्विक्त्वेन निरूपणे हेतुत्वेन तात्पर्यान्तरमप्याह । तस्मै यजमानारब्धकर्मसाङ्गत्वाय ऋत्विक् परिक्रीयते । वरणेन स्वकार्यमात्रोपयोगित्वाय स्वीयः क्रियते तथा प्रकृतेऽपि ।

येऽस्ति । तद् व्याकुर्वन्ति । * अत्रेत्यादि * । * पूर्वपदेनेति * । त्यक्तसमस्तकर्मेति पदेनेतरसम्बन्धनिवर्त्तनोक्त्या भक्तिमार्गीयो विगाढभावैकदेशः सर्वात्मभाव उक्तो भवति । नचायं ज्ञानमार्गीय इति वक्तुं शक्यः । अग्रे निवेदितात्मपदात् । तदनन्तरमात्मनिवेदने सति । विचिकीर्षितो निवेदितात्मजीवविषयकलीलाकरणेच्छाविषयः स निवेदितात्मा जीवो भवति विचिकीर्षितपदे व्युपसर्गेण अन्तरङ्गलीलाप्रवेशनरूपो विशेष इच्छायां बोध्यते । एतदुत्तरार्द्धे तु तदाऽमृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै इत्यस्ति । तदर्थस्तु यदैवं भवति तदा अमृतत्वं ब्रह्मभावं वह्नचयोगोलकन्यायेन प्रतिपद्यमानः सन् मया सह कल्पते कामाशनसमर्थो भवति । च पुनः आत्मभूयाय स्वरूपेणावतारेणेति न्यायेन मदात्मत्वाय कल्पत इति । क्वचित्तु, यदा पुमानित्यत्र मर्त्यो यदेति मूले पाठस्तदाऽप्यर्थे न कोऽपि विशेषः ।

तदेतत्सूत्रार्थत्वेन निगमयन्ति * तस्मादित्यादि * आर्त्विज्यपदमेवं व्याख्याय तत्सूचितमर्थमाहुः । * एतेनेत्यादि * । * एतदेव च महत्त्वमिति * । रमणे सार्वदिकत्वमेव च भक्तिमार्गे उत्कर्षः । सूत्रशेषं व्याकुर्वन्ति । * प्रकृत इत्यादि * । * तथा प्रकृत इति * चिकीर्षि-

नच, कच्चित् कल्याण्यो दक्षिणा इति प्रश्नवचनात्तदर्थैव तत्प्रवृत्तिरत्र तु स्वतः पुरुषार्थत्वेन भगवदर्था प्रवृत्तिरतो वैषम्यमिति वाच्यम् । नीरागस्यापि वरणसमये तत्प्रश्नस्यावश्यकत्वात्तथैव दक्षिणादानमप्यन्यथा निरङ्गत्वापत्तेः । प्रकृतेऽपि भक्तानां स्नेहादेव प्रवृत्तिर्भगवान् स्वानुभवार्थमेवताननुभावयतीति न वैषम्यम् ॥ ४४ ॥

श्रुतेश्च ॥ ४५ ॥

अथर्वणोपनिषत्सु पठ्यते भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्मिन् मनःकल्पनमेतदेव च नैष्कर्म्यमिति ॥

तल्लीलासाङ्गत्वाय तत्तद्भक्तवरणमित्यर्थः । स्मृतिषु याजनस्य वृत्तिमध्ये गणनादार्त्विज्ये स्वार्थमेव प्रवृत्तेर्भजनस्य च भगवदर्थत्वेन तदभावात् तद्वैषम्यमाशङ्क्य परिहरन्ति । * नचेत्यादि * । * नीरागस्येति * याजनेन वृत्तिमनिच्छतः । * आवश्यकत्वादिति * वैधत्वेनावश्यकत्वात् । * तथैवेति * वैधत्वेन । * अनुभावयतीति * लीला अनुभावयति । तथाच यथा तत्र वैधत्वमेव तादृशप्रश्नादिप्रवृत्तिप्रयोजकमेवमत्र निरुपधिस्नेहो यथा तत्र तद्दानेन कर्मसाङ्गता तथात्र स्वलीलानुभावनमतो न वैषम्यमित्यर्थः । तथाच भगवदिच्छायां सत्यामुत्तमस्य गृहत्यागः कर्त्तव्योऽन्यथा तु न कर्त्तव्यो यजमानाधीनर्त्विग्वत्तादृशस्य केवलं प्रभ्वधीनत्वादिच्छा चानियताऽतो नोक्त इत्यौडुलोमिराशय इति बोध्यम् ॥ ४४ ॥

श्रुतेश्च ॥ व्याकुर्वन्ति । * अथर्वणेत्यादि * तथाचात्र विहिताया भक्तेः सन्न्यासरूपताया उक्तत्वाद् बुद्धिपूर्वकं तत्करणमावश्यकं, न तु त्यागस्यापि, श्रुतौ तावन्मात्रस्यैव कथनादिति व्यासमतमित्यर्थः । तेनात्र भक्तिमार्गे साधनपरिपाकदशायां द्विविधः सन्न्यासः । अत्यन्तासिद्धानां विगाढभावस्वाभाव्यादेव प्राप्तो यथा व्रजभक्तानामतः सोऽवैधः । तत ईषन्न्यूनां तु विरहानुभवार्थं कर्त्तव्यो यथा श्रीमदुद्धवानाम् । स वैधः । त्वं तु सर्वं परित्यज्येति, मद्भक्तोवाऽनपेक्षकः, सलिङ्गानाश्रमाँस्त्यक्त्वा चरेदविधिगोचर इत्यादि-

भक्तिमार्गप्रचारैकहृदयो बादरायणः ।
मानं भागवतं तत्र तेनैवं ज्ञेयमुत्तमैः ॥ ॥ ४५ ॥

वाक्यतः प्राप्तत्वात् । द्वावप्येतौ नाश्रमरूपाविति तूपपादितमतो न कोऽपि सन्देहः ॥ नन्वत्रान्यैः परामर्शादिसूत्रेष्वाश्रमरूपं संन्यासं विचार्य, अन्तरा चाऽपीति सूत्रे विधुरादीनामपि तस्य कर्त्तव्यता विचारिता, महायोगिनां नग्नचर्यादिकं च । तद्भूताधिकरणे च ऊर्ध्वरेतोभ्य आश्रमेभ्यः प्रच्युतभावश्च विचारितः । तन्मते चाश्रमात्मक एव संन्यासो विविदिषाविद्वद्दशाभेदेनेति तदेवात्र कुतो नाद्रियत इत्याकाङ्क्षायामाहुः । * भक्तीत्यादि * । "अनर्थोपशमं साक्षाद् भक्तियोगमधोक्षजे । लोकस्याजानतो व्यासश्चक्रे सात्वतसंहिताम्"इति श्रीभागवतवाक्याद्भागवतं पुराणमेव सर्वं तत्र व्यासस्य तादृशत्वे मानं प्रमितिजनकम् । तेन हेतुना उत्तमैर्भक्ताधिकारिभिरेवं ज्ञेयम् । यद्यपि प्रकारान्तरेण व्याख्यातृभिरुक्तैः सूत्रवर्णकैर्ज्ञानमार्गीयो द्विविधोऽपि संन्यासो व्याख्यातस्तथापि विविदिषायां कालक्षेपेणापचारदोषस्य तैरेव दर्शितत्वात् । आन्तरवैराग्याभावे बहिर्लिङ्गमात्रस्थापने च, "गृहस्थस्य क्रियात्यागो व्रतत्यागो बटोरपि । तपस्विनो ग्रामवासो भिक्षोरिन्द्रियलोलता । आश्रमाऽपसदा ह्येते खल्वाश्रमविडम्बकाः । देवमायाविमूढाँस्तानुपेक्षेतानुकम्पये"ति सप्तमस्कन्धीयनारदवाक्ये "मौनानीहानिलायामा दण्डा वाग्देहचेतसाम् । यस्यैते न भवन्त्यङ्ग वेणुभिर्न भवेद्यतिरि"त्येकादशीयभगवद्वाक्ये च तादृशस्य निन्दितत्वात् । विद्वद्दशायां चेदानीं दुर्घटत्वात् तदनादृत्य भक्तिमार्गीय एव साधनपरिपाकदशायां कर्त्तव्यो, न त्वन्यथापीत्यर्थः ॥

अन्ये तु, आत्रेयादिसूत्रत्रये अङ्गोपासनानां यजमानकर्मत्वं वार्त्विक्कर्मत्वं वेति संशये, आत्रेयमते यजमानकर्मत्वमौडुलोमिमते ऋत्विक्कर्मत्वं तदेव च युक्तमिति व्यवस्थापयन्ति ।

तत्रोदासीना वयम् ।

अप्रासङ्गिकत्वेनारुच्यत्वादिति ॥ ४५ ॥ ६ ॥

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

ननु यमेवेति श्रुतिः साधनान्तरनिषेधपूर्वकं वरणस्यैव साधनत्वमाह । तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वाऽऽत्मन्येवात्मानं पश्येदिति श्रुतिः साधनान्तरमप्याह । एवं विरोधे श्रुतित्वाविशेषात् किमादरणीयं, किं नेति संशये साधनान्तरविधिरेवादरणीयोऽन्यथा शास्त्रवैयर्थ्यं स्यादिति प्राप्ते, उच्यते । सहकार्यन्तरविधिरिति । मर्यादापुष्टिभेदेन वरणं द्विधोच्यते । तत्र सहकार्यन्तरविधिस्तु मर्यादापक्षेणोच्यते । पुष्टौ तु नान्यापेक्षेति न विरोधगन्धोऽपि । अपरं च साधनं हि कायिकं वाचिकं मानसिकं च विधीयते । तत्र मननमेवात्रत्यमिति श्रुतेस्तृतीयं मुख्यम् । तदपि तावदेव मार्यादिकस्यापि विधेयत्वेन कर्त्तव्यम् । यावत्स्नेहो न भवति । यतस्तद्वतः स्नेहवतस्तूक्तं तृतीयं साधनमपि विध्यादिवत् । यथा तद्वतो विधिरर्थवादो वा प्रवृत्तावप्रयोजक-

---

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ एवं भक्तिमार्गीयस्य गृहत्यागावश्यकत्वे साधिते तद्वत्साधनान्तरं शमादिरूपमप्यायातीति तद्व्यवस्थां बोधयितुमिदमधिकरणमित्याशयेन तदवतारयन्ति —

* ननु यमेवेत्यादि * । * व्याकुर्वन्ति * । * मर्यादेत्यादि * * नान्यापेक्षेति * । नाऽयमात्मा बलहीनेन लभ्य इति श्रुत्युक्तादन्यस्याऽनपेक्षा । नन्वेतानि शमादीन्यन्तरङ्गाणि मानसानि साधनानि किमिति पाक्षिकाणि क्रियन्त इत्यत आहुः *अपरं चेत्यादि* । विधीयन्त इति । तमेतं वेदानुवचनेन, शान्तो दान्त इत्यादिवाक्यैर्विधीयन्ते । * तृतीयमिति * । शान्तादिवाक्योक्तम् * । * विध्यादिवदिति * । विधिश्च तदादिश्च विध्यादी तद्वत् । प्रथमार्थे वतिः । तथाच पित्रादौ सहजस्नेहवतां यथा तत्सेवाविधिस्तत्फलबोधको-

स्तस्य स्वत एव सम्भवात्तथा भगवत्प्राप्ताविदमित्यर्थः । कैमुतिकन्यायेन पूर्वयोरप्रयोजकत्वमेतच्छेषत्वादेवायास्यतीति तृतीयमेवोक्तम् ॥ ४६ ॥

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

ननु बहिस्तूभयथेत्यादिना भगवदीयस्य गृहत्याग आवश्यक इति निरूपितम् । छान्दोग्ये त्वाचार्यकुलादित्युपक्रम्य छान्दोग्योपनिषदन्ते आचार्यकुलाद्वेदमधीत्य गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन् सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्त्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते । नच पुनरावर्त्तते नच पुनरावर्त्तते ।
इदं विषयवाक्यम् । ब्रह्मलोकमभिसम्पद्यत इति गृहिणोपसंहारः कृतः वाजसनेयिशाखायां च तद्धस्म वै तत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्त इत्युपक्रम्याथ भिक्षाचर्यं चरन्तीति पठ्यते । एवं सति विकल्पे सम्भवत्युपसंहारस्य तात्पर्यग्राहकत्वाद् गृहिण एव यथोक्तकर्त्तुर्ब्रह्मसम्पत्तिरिति श्रुतेस्तात्पर्यम् । त्यागोक्तिस्तु ब्रह्मैतादृशं यदर्थं सर्वं त्यज्यत इति स्तुतिपरेति प्राप्ते गृहिणो-

---

ऽर्थवादो वा न तत्प्रवृत्तिप्रयोजकस्तस्य तत्र स्वत एव प्रवृत्तिसम्भवात् । तथा भगवत्प्राप्त्यर्थमिदं शमादिकं स्वभावादेव सम्भवतीति न तदर्थं वाक्यापेक्षा । अतो भक्तिदार्ढ्येच्छुं प्रत्येवेदं विधेयं, न तु दृढभक्तिमन्तं प्रतीति तथेत्यर्थः । तेन पुष्टिमार्गे वरणमात्रमेव साधनम् । मर्यादामार्गे एव त्वन्याकाङ्क्षेति सिद्धम् ॥ ४६ ॥

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ पूर्वाधिकरणोक्तं दृढीकर्त्तुं किञ्चिदाक्षिप्य समाधत्त इत्याशयेन सूत्रमवतारयन्ति । * ननु

पसंहारे हेतुत्वेन तात्पर्यमाह । कृत्स्नेति । त्यागे वाङ्मनसोरेव भगवति विनियोगो न सर्वेन्द्रियाणाम्। गृहिणस्तु सर्वैः प्रकारैर्भजनं भवतीति । परिजनश्च कृतार्थो भवतीति च भजने कृत्स्नता भव-

---

बहिरित्यादि * । * तात्पर्यमाहेति * । उक्तश्रुतेस्तात्पर्यमाहेत्यर्थः । श्रुत्यर्थस्तु–आचार्यकुलाद् गुरुगृहाद्, गुर्वभावे तत्पत्न्यां तत्पुत्रे तद्गोत्रे वा ब्रह्मचर्यमिति ज्ञापयितुं कुलपदम् । वेदमधीत्य गुरोः कर्मातिशेषेण गुरोः सेवारूपं यत्कर्म तत् कृत्वा ततोऽतिशेषोऽवशेषो यः कालस्तेन कालेन वेदाध्ययनं साङ्गं सरहस्यार्थज्ञानपुरःसरं कृत्वा अभिसमावृत्य जिज्ञासाद्वयसमापनोत्तरमाचार्यकुलान्निवृत्य दारानाहृत्य कुटुम्बे स्थित्वा गार्हस्थ्यविहिते कर्मणि तिष्ठन्, शुचौ देशे स्वाध्यायमधीयानो विविक्ते स्वाध्यायब्राह्मणोदितप्रकारे पवित्रे देशे यथावकाशेन आवृत्तिमधीतस्य कुर्वन्, धार्मिकान् विदधत् पुत्रान् शिष्यांश्च शिक्षणेन धर्मशीलान् कुर्वन्, आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्य हार्देऽन्तर्यामिणि परे ब्रह्मणि बाह्याभ्यन्तरेन्द्रियाणि सम्यक् स्थापयित्वा, ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीति न्यायेन तमेव शरणत्वेन ज्ञात्वा कर्माणि तत्र सन्न्यस्येति यावत् । अहिंसन् सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः, तीर्थानि शास्त्रादिष्टा भिक्षाद्युपायास्तेषु परपीडापि सम्भवति । यथा याज्ञवल्क्यस्य कुरुपाञ्चलस्थब्राह्मणैः सह चर्चायां, तदादिभ्यो भिक्षाटनाद्युपायेभ्योऽतिरिक्तस्थले हिंसां परपीडामकुर्वन्, स खल्वेवं वर्त्तयन् सोऽधिकारी उक्तेन प्रकारेण वर्त्तमानः पुत्रादिपरिजनमप्येवं वर्त्तयन् यावदायुषं यावज्जीवं, ब्रह्मलोकमभिसम्पद्यते देहान्ते भगवल्लोकं प्राप्नोति । नच पुनरावर्त्तते । प्राप्तेर्जन्यत्वेन पुनरावृत्तिः शङ्क्येत । जन्यभावत्वेन नश्वरत्वेन लोके व्याप्तेः । तदभावायात्रावृत्तिर्निषिद्ध्यते । तेन लोकवैलक्षण्यं बोधितम् । पुनः कथनं समाप्तिद्योतनायेति बोध्यः । सूत्रं व्याकुर्वन्तः श्रुतितात्पर्यमाहुः । * त्याग इत्यादि * । * कृत्स्नतेति * । सर्वेषामान्तराणां बाह्यानां च सार्थक्यम् ।

तीति तेनोपसंहारः कृत इत्यर्थः । अत एवात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्येत्युच्यते । अत्रात्मपदं भगवत्परमिति ज्ञेयम् । कर्ममार्गीयगृहिव्यवच्छेदाय तुशब्दः । अत्रेदमाकूतम् । भक्तिमार्गो बहुविध इति कापिलदेववाक्यात् केचन भक्ताः स्वगृहेष्वेव स्नेहेन भगवदाकारे विविधोपचारैः सेवां कुर्वन्तस्तयैव निर्वृत्त्या मुक्तिमपि तुच्छां मन्यन्ते । तदुक्तं,—मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुरिति । तेन भगवद्भजन एव तत्रापि पुष्टिमार्ग एव श्रुतेर्भर इति ज्ञायते । पूर्वमुत्कटभगवद्भाववतां तदर्थं त्यागं निरूप्य गृहिणोपसंहारतात्पर्यं पश्चाद् यन्निरूपितवाँस्तेन तादृग्भाववतैव त्यागः कार्यः । तद्रहितेन तु गृह एवोक्तरीत्या प्रभुभजनं कार्यम् । तेनैव तल्लाभ इति व्यासहृदयमिति ज्ञायते। उक्तभावाभावे त्याग-

---

* तेनेति * । गृहिणा । एवं तात्पर्ये गमकमाहुः * अत एवेत्यादि * । * कर्ममार्गीयेति * । जैमिनीयतन्त्रविचारितेत्यर्थः । ननु पूर्वाधिकरणे त्यागं निरूप्य यदत्र गार्हस्थ्यं प्रशंसति तत्किमित्याकाङ्क्षायामाहुः । * अत्रेदमित्यादि * ।

* भक्तिमार्गो बहुविध इति कापिलदेववाक्यादिति * । "भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते । स्वभावगुणभेदेन पुंसां भावो विभिद्यत" इति कापिलदेववाक्याद् भक्तिमार्गो बहुविध इत्यन्वयः । * तदुक्तमिति * । "यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् । नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुरि"ति पञ्चमस्कन्धे भवाटवीसमाप्तौ शुकेनोक्तम् । तथाच भरतस्य राजदशायां तथाभावस्योक्तत्वादन्यस्यापि गृहिणस्तथाविधत्वे तथात्वमित्यर्थः । * तेनेति * गृहिणोपसंहारे आत्मनि सर्वेन्द्रियसम्प्रतिष्ठापनादिकथनेन । श्रुतितात्पर्यं निरूप्य व्यासतात्पर्यं निरूपयन्ति । * पूर्वमित्यादि * । * तल्लाभ इति * भगवत्प्राप्तिः । * उक्तभावाभावे त्यागधर्मानिर्वाहादिति * विगाढभावाभावे स एवाधस्तादित्यादिनोक्तस्य सर्वत्र तद्भान-

धर्मानिर्वाहादिति। केचन भक्ता भाषणादिलीलादर्शनं विना स्था-तुमशक्ताः प्रचुरभावविवशाशया गृहाँस्त्यक्त्वा वनं गच्छन्ति। आ-त्रेयौडुलोमिभ्यां तु भगवदवतारसामयिकभक्तदशोक्ता । एते सर्वे फलमार्गीयाः। वाजसनेय्युक्तास्तु साधनमार्गीया इति नानुपपत्तिः काचित् ॥ ४७ ॥

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

किञ्च संन्यासिन आवश्यका ये धर्मास्ततोऽधिकास्ते गृहिणः

रूपस्य त्यागधर्मस्य मध्ये विच्छेदेन सर्वदा स्थैर्याभावात् । ननु यद्येवं दौर्लभ्यं तदा तत्कथनमशक्योपदेशरूपत्वादप्रयोजनकमतो न वक्त-व्यमेवेति किमित्युक्तमत आहुः * केचनेत्यादि * तथाच दौर्लभ्ये-ऽपि तत्सत्तास्तीत्यतस्तदनूदितम् । अतस्तादृशाधिकारे भगवत्कृपया सम्पन्ने तत्कर्त्तव्यताबोधनार्थं तत्कथनमित्यर्थः । नन्वात्रेयौडुलोमि-भ्यामेतादृशदशासम्पत्तौ गृहत्याग उच्यते। वाजसनेयके तु किं प्रजया करिष्यामो येषां नो ऽयमात्मा नायं लोक इति श्रावणादात्मलोकका-मनामात्रे बोध्यत इति ताभ्यामुक्तं श्रुतिविरुद्धम् । किञ्च । ये लीला-दर्शनार्थं वनं गच्छन्ति ते भगवदागमने पुनरायान्ति, न तु वन एव स्थित्वा संन्यासिधर्मानातिष्ठन्तीत्यतोऽपि तच्छ्रुतिविरुद्धमतः कथं श्रौते विचार एवं तन्मतोपन्यास इत्यत आहुः । * आत्रेयेत्यादि * एते सर्वे यदीया दशा ताभ्यामुक्ता ते सर्वे भक्ताः फलमार्गीयाः,मार्ग उपायः फलमेव मार्गो यत्रासौ मार्गः फलमार्गस्तत्सम्बन्धिनः । यथा गोपालतापनीयोक्ता गान्धर्वीप्रभृतयः । तथाच फलरूपो भगवानेव स्वरूपंताननुभावयतीति भगवत्कृपाविशिष्टयैवेच्छया तेषां सर्वेन्द्रि-यव्यापाराः । वाजसनेयिनां कहोडब्राह्मण उक्तास्तु साधनमार्गीयाः। साधनं शमादिविशिष्टं ज्ञानमार्ग उपायः फलप्राप्तौ यत्रासौ साधन-मार्गस्तत्सम्बन्धिन इति तत्तदधिकारिभेदेन तथा तथा कथनान्न पू-र्वोक्ता श्रुतिविरोधरूपा काऽप्यनुपपत्तिरित्यर्थः ॥ ४७ ॥

मौनवदितरेषामप्युपदेशात् ॥ सूत्रमवतारयन्ति । * किञ्चे-

सिद्ध्यन्तीत्यतोऽपि हेतोस्तेनोपसंहारः कृत इत्याशयेनाह । मौनव-दित्यादि । मौनपदमनीहानिलायामादित्रिदण्डधर्मोपलक्षकम् । यथा वागिन्द्रियमात्रदेहमात्रचित्तमात्रनियामकास्ते धर्मा उक्ता न्यासिनस्तथेतरेषामपीन्द्रियनियामकानां धर्माणामात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्येति श्रुत्या गृहिण उपदिश्यन्त इति युक्तो गृहिणोपसंहार इत्यर्थः। तत्र नियमनमात्रम्, अत्र तु भगवति विनियोगाद् आधिक्यमिति भावः । वस्तुतस्तु केवलनियमनस्याप्रयोजकत्वात्तत्रापि भगवति विनियोग एव तात्पर्यमिति ज्ञेयम् ॥ ४८ ॥

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

ननु भगवति सर्वेन्द्रियविनियोगाद् गृहिणोपसंहार इति न युज्यते । शुचौ देशे स्वाध्यायमधीयान इत्यादिकर्ममार्गीयसाधनश्रुतेरित्याशङ्क्य तत्तात्पर्यमाह। अनाविष्कुर्वन्निति । भगवद्भावस्य रसात्मकत्वेन गुप्तस्यैवाभिवृद्धिस्वभावकत्वादाश्रमधर्मैरेव लोके स्वं भगवद्भावमनाविष्कुर्वन् भजेदित्येतदाशयेन ते धर्मा उक्ताः । गोपने मुख्यं हेतुमाहाऽन्वयादिति। यतो भगवता सममन्वयं सम्बन्धं प्राप्य वर्त्ततेऽतो हेतोस्तथा । अत्र ल्यब्लोपे पञ्चमी । एतेन यावद् अन्तःकरणे साक्षात् प्रभोः प्राकट्यं नास्ति तावदेव बहिराविष्करणं भवति । प्राकट्ये तु न तथा सम्भवतीति ज्ञापितम् ॥४९॥

त्यादि * व्याकुर्वन्ति । * मौनपदमित्यादि * यद्यपि मुनेर्भावो मौनमिति योगेन विचारात्मकं ज्ञानमप्यादातुं शक्यते तथापि भगवता, मौनानीहानिलायामा दण्डा वाग्देहचेतसामिति वाक्ये त्रयाणां समभिव्याहृतत्वाद्वाग्दण्डरूपं मौनं रूढं गृहीतं ज्ञेयम् । शेषं स्फुटम् ॥४८॥

अनाविष्कुर्वन्नन्वयात् ॥ सूत्रमवतार्य व्याकुर्वन्ति । * नन्वित्यादि * । भाष्यमत्राऽतिरोहितार्थम् ॥ ४९ ॥

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

वैदिककर्मकरणे तात्पर्यमुक्त्वा लौकिकस्यानावश्यकत्वेऽपि तत्समयमाह । प्रस्तुतं प्रभुभजनं तत्प्रतिबन्धासम्भव एवैहिकं कर्म कार्यम्। नन्वैहिकं कर्माऽस्तु मा वा, अतस्तत्समयोक्तिर्व्यर्थेत्याशङ्क्याऽऽह प्रस्तुतं प्रभुभजनं, तद्दर्शनादिति । आचार्यकुलादित्युपक्रम्याऽग्रे पठ्यते, धार्मिकान् विदधदिति । अतो धार्मिकपुत्रविधानमैहिकं कर्म श्रुतौ दृश्यतेऽतस्तत्समयोक्तिरावश्यकी । अन्यथा श्रुतावुक्तमस्तीति प्रस्तुतबाधेऽपि तत्करणे फलप्रतिबन्धः स्यादितिभावः ॥ ५० ॥

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥

अत्रापि भाष्यं प्रकटार्थम् । एवञ्च यस्य मर्यादायां वरणं वर्त्तते तेन साधनापरिपाकदशायामाचार्यकुलादिति श्रुत्युक्तरीत्या गृह एव स्थित्वा भगवद्भजनं कर्त्तव्यं स्वधर्मरहस्यं च गोपनीयमिति सिद्धम् ॥

शङ्कराचार्यास्तु, सहकार्यन्तराधिकरणं त्रिसूत्रमङ्गीकृत्य, तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण इति बृहदारण्यकीयकहोडब्राह्मणे किं मौनं विधीयत उत नेति संशये । मौनं विधीयते । यद्यप्यत्र न विधिस्तथाप्यपूर्वत्वाद्विधिराश्रयणीयः । मौनं च पाण्डित्यातिरिक्तं ज्ञानातिशयरूपम् । मुनीनामप्यहं व्यास इति प्रयोगदर्शनात् । अतो मननान्मुनिस्तद्भावो मौनम् । अतोऽथ मुनिरित्यत्र मुनिः स्यादित्येवं विधिराश्रयणीयः । यद्यपि गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थ्यमित्यत्र मुनिशब्दस्तत्तदाश्रमेऽपि श्रुतस्तथापि, वाल्मीकिं मुनिपुङ्गवमित्यत्र व्यभिचारदर्शनान्न नियमतोऽन्यत्र तदर्थको ग्रहीतुमुचितः । उक्तश्रुतौ त्वाश्रमान्तरसन्निधानाद्युक्तं तद्ग्रहणम् । ज्ञानप्रधानत्वादुक्तमाश्रमस्य तस्माद् बाल्यपाण्डित्याऽपेक्षया तृतीयं मौनमत्र विधीयते । निर्वेदनीयत्वनिर्देशादपि मौनस्य

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेज़ीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चान्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ५ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयकाण्डम् हेलाराजटीकासहित खण्ड २)	५	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा। श्रीमदन्नंभट्टप्रणीता खण्डानि १०	१०	०
रसमञ्जरी। व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख०	१०	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिरचिता खण्डे २	२	०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३	३	०
श्रीमदणुभाष्यम्। श्रीश्रीवल्लभाचार्यविरचितम्। गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्यव्याख्या समेतम् खण्डानि १३	१३	०
तत्त्वशेखरः। श्रीभगवल्लोकाचार्यप्रणीतः। तथा—तत्त्वत्रयचुलुकसंग्रहः। कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः।	१	०
श्रीभाष्यवार्तिकम्। श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्रतिपादनपरम्।	१	०

ब्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 128.

श्रीमदणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितभाष्यप्रकाशाख्यव्याख्यासमेतम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा रत्नगोपालभट्टेन संशोधितम् ।

ANU BHÂSHYA,

ON BRAHMASÛTRA BY ŚRÎ VALLABHÂCHÂRYÂ,

With the Commentary called Bhâshya Prakâśa,

By Goswâmi Śrî Purushottamjee Mahârâj.

EDITED BY RATNA GOPÂL BHATTA.

Fasciculus XIV.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhambâ Sanskrit Book Depôt.

Printed at the Vidyâ Vilâs Press,

BENARES.

1906.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	६	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रश्न परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
[illegible] (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	१	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदी भाषाटीका	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वासप्रासिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

बाल्यपाण्डित्यवद् विधेयत्वाश्रयणम् । तद्वत इति विद्यावतः संन्यासिनो ग्रहणम् । कहोडब्राह्मणे तस्यैव प्रस्तुतत्वात् ।

ननु विद्यावत्त्वे तत एवातिशयप्राप्तेः किं मौनविधिनेत्यत आह । पक्षेणेति । यस्मिन् पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मिन् पक्षे विधिरिति विध्यादिवदिति । यथा दर्शपूर्णमासादौ सहकारित्वेनाग्न्याधानाद्यङ्गजातविधिरेवमविधिप्रधानेऽस्मिन् विद्यावाक्येऽपि मौनविधिरित्याहुः । तेन तन्मते तद्वतः पक्षेण सहकार्यन्तरविधिरिति प्रतिज्ञा, तृतीयं विध्यादिवदिति हेतुवाक्यमिति सिद्ध्यति ।

भास्कराचार्यास्तु पूर्ववदेवाङ्गीकृत्य सूत्रमेवं योजयन्ति । विधीयत इति विधिः । तद्वतो विद्यावतस्तृतीयं मौनं ज्ञानप्रकर्षपक्षेण सहकार्यान्तरविधिः । तथाच ज्ञानातिशयमापादयेज्ज्ञानपरिपाकाय योगाभ्यासं कुर्यादित्यर्थः । विध्यादिवत् । यथा अग्निहोत्रादिकम् अविदुषः फलातिशयार्थिनो विधीयते तथा विदुषो व्युत्थायिनो ज्ञानप्रकर्षरूपं मौनं कर्त्तव्यत्वेन विधीयत इति वदन्ति ।

रामानुजाचार्यास्तु सूत्रयोजनां भास्कराचार्यवदेवाङ्गीकृत्य तदर्थमेवमाहुः। विधिशब्देन यज्ञादिः, सर्वाश्रमधर्मः शमदमादिश्च विधिशब्देनोच्यते । आदिपदेन श्रवणमनने गृह्येते । सहकार्यान्तरं विधीयत इति सहकार्यन्तरविधिः । तथाच यथा, तमेतं वेदानुवचनेनेत्यादिना, शान्तो दान्त इत्यादिना च यज्ञादिः शमादिश्च सहकारित्वेन विद्यावतो विधीयते । यथा च, श्रोतव्यो मन्तव्य इत्यादिश्रवणमनने चार्थप्राप्ते विद्यासहकारित्वेन गृह्येते तथा । तस्माद् ब्राह्मणः पाण्डित्यमित्यादिना पाण्डित्यं बाल्यं मौनमिति त्रयं विद्यायाः सहकार्यन्तरं विधीयत इत्युक्तं भवति । मौनं च पाण्डित्यादर्थान्तरमित्याह । पक्षेणेति । इदं च मननं श्रवणप्रतिष्ठार्थान्मननादप्यर्थान्तरम् । उपासनालम्बनस्य पुनः संशीलनं तद्भावनारूपम् । अतोऽपूर्वत्वादत्र विध्यश्रवणेऽपि तदाश्रयणम् । मुनिः स्यादिति । तस्मादेवं वाक्यार्थः । ब्राह्मणो विद्यावान् पाण्डित्यं निर्विद्य उपास्यं ब्रह्मतत्त्वं परिशुद्धं परिपूर्णं च विदित्वा श्रवणमननाभ्यां प्राप्तं वेदनेन प्रतिलभ्येति यावत् । तच्च भगवद्भक्तिभूतं सत्त्ववृद्धिकृतम् । नाहं वेदैरित्यारभ्य, भक्त्या त्वनन्यया शक्यो ज्ञातुमिति गीतायामुक्तत्वाद्, यस्य देवे परा भक्तिरिति, नायमात्मा प्रवचनेन लभ्य इति श्रुतावप्युक्तत्वाच्च ।

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदव-
स्थावधृतेः ॥ ५१ ॥

बाल्येन तिष्ठासेदिति । बालस्य यत्स्वभावानाविष्काररूपं कर्म तेन स्थातुमिच्छेत् । बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः स्याद् बाल्यपाण्डित्ये यथावदुपादाय परिशुद्धे परिपूर्णे ब्रह्मणि निदिध्यासनरूपप्राप्तये मननशीलो भवेत् । एवं त्रितयोपादानेन लब्धविद्यो भवेदित्याह। अमौनं च मौनं च निर्विद्याथ ब्राह्मण इति । अमौनं मौनेतरसहकारिकलापस्तञ्च मौनं च यथावदुपाददानस्तदेकानिष्ठायां विद्याकाष्ठां लभत इत्येवं विषयवाक्यं व्याख्यातवन्तः । बृहदारण्यकमिताक्षरायां तु, पण्डा वेदाध्ययनजन्या बुद्धिस्तद्वान् पण्डितस्तस्य कर्म वेदान्तविचारलक्षणं श्रवणापरपर्यायं पाण्डित्यं निर्विद्य निःशेषं कृत्वाऽनन्तरं बाल्येन तिष्ठासेत् । श्रवणज्ञानोत्पन्नाशेषानात्मदृष्टितिरस्करणसामर्थ्यं बलं तस्य भावो बाल्यं तेन बाल्येन विषयाऽनाकृष्टस्तिष्ठासेन्मननं कुर्यादिति यावत् । बाल्यं च पाण्डित्यं च निःशेषं कृत्वा अथ मुनिर्मौनवान् धारावाहिकात्मप्रत्ययप्रवाहवान् तिष्ठासेदित्यनुषज्यते। निदिध्यासनं कुर्यादिति यावत्। एवममौनशब्दवाच्यं श्रवणमननाख्यं मौनशब्दवाच्यं निदिध्यासनं निर्विद्य अथ ब्राह्मणो निरुपचरितब्राह्मण्यवान् ब्रह्मैव स्यात् कृतकृत्यो भवेदित्येवं व्याख्यातम्। तत्र मतभेदेन वाक्यव्याख्यानस्य भिन्नार्थत्वेऽपि मौनस्य प्रकृष्टज्ञानरूपस्यैवाङ्गीकारादर्थस्तुल्यप्रायः । सूत्रव्याख्याने तु शाङ्करे भास्करे च मते व्युत्थायिनं प्रति तद्विधिः । रामानुजे तु अपरिपक्वं प्रत्यावश्यकतया विद्यापरिपाकार्थं तद्विधिरिति फलति । सिद्धान्ते तु यावन्त्येतानि तानि सर्वाणि मर्यादापक्षान्तानि चरन्तीत्यत एतद्विहाय स एवाहृत इति बोध्यम् । अग्रे तु न तथा विरुद्धम् । गृहिणोपसंहारं तु बहुकर्मोपदेशं बीजमाहुः । बहुकर्मोपदेशे तु न किञ्चिदपीति तत्साकाङ्क्षत्वादरुच्यम् । मौनवत्सूत्रे तु विद्यायाः सर्वाश्रमसाधारण्यं व्याकुर्वन्ति । अनाविष्कुर्वन्नित्यत्र च बाल्यरूपं निश्चिन्वन्ति । तदविरुद्धमित्युपरम्यते ॥ ५० ॥

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ सूत्र-

ननु तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति श्रुतौ मुक्त्यनन्तरं ब्रह्मसम्पत्तिः श्रूयते । सा तु पुरुषोत्तमसङ्ग लीलारसानुभवातिरिक्ता वक्तुमशक्या । मुक्तोपसृप्यव्यपदेशात् । "मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुन" इति स्मृतेश्च। मुक्तेः फलं भक्तिरसानुभव एवं सत्युक्तगृहिणस्तत्फलं भवति, न वेति संशये निर्णयमाह । एवं भूतस्योक्तरूपस्य मुक्तस्य मुक्तेर्यत्फलं भक्तिरसानुभवस्तस्यानियमस्तस्य भगवदिच्छाधीनत्वात् । साधनाप्राप्यत्वात् । अत एव मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगमिति शुकवाक्यम् । अत्रौत्सर्गिकहेतुमाह । तदवस्थेति । न स पुनरावर्त्तत इत्यस्यावृत्त्या मुक्त्यवस्थाया एव सार्वदिकत्वेन निर्द्धारः क्रियते। यद्यप्येवं मुक्तिफलाभावनियम एवायाति, न तु तदनियमस्तथापि

मवतारयन्ति । * ननु तस्येत्यादि * सेति * ब्रह्मसम्पत्तिः । तस्या उक्तरूपत्वे मानम् * मुक्तेत्यादि * । * एवं सतीति * । लीलारसानुभवस्य मुक्तिफलत्वे सति । एवं संशये व्युत्पादिते पूर्वपक्षः स्वत एव भास्यत इत्याशयेन निर्णयमेव सूत्रे आहेत्यर्थः । व्याकुर्वन्ति । * एवमित्यादि * । * उक्तरूपस्य मुक्तस्येति * । गृहिणो मुक्तस्य । * अत एवेति * । साधनाप्राप्यत्वादेव । * औत्सर्गिकमिति * । अधिकारसामान्यात् प्राप्तम् । नन्वनया श्रुत्या पुनरावृत्तिकथनेन मुक्तावस्थाया एव नित्यत्वनिर्द्धारे लीलारसानुभावकब्रह्मसपत्तिरूपस्य मुक्तिफलस्य भेदसाध्यत्वात्तदभावेन मुक्तिफलाभावनियम एवायाति, न त्वनियम इत्याशङ्क्य तत्परिहरन्ति । * यद्यपीत्यादि * । सत्यं यद्यपि, न स पुनरावर्त्तत इति तदवस्थावधारणश्रुत्या उक्तानियमो नायाति तथापि तस्य तावदेव चिरमिति श्वेतकेतूपाख्यानश्रुतावाचार्यतः पुरुषस्य ब्रह्मज्ञानोत्तरं मोक्षानाभिपर्यन्तमेव ब्रह्मसंपत्तिविलम्बो, न तु तदुत्तरमिति श्राव्यते । ब्रह्मसम्प-

तस्य तावदेव चिरमित्यादिप्रमाणैर्न स पुनरावर्त्तत इति श्रुत्या समं विरोधाभावायौत्सर्गिकी तदवस्था । तत्फलं तु कस्यचिदत्यनुग्रहेण पुष्टौ प्रवेशने भवतीति स्वाभिप्रायं प्रकटीकुर्वता बादरायणेन अनियम इत्युक्तम् । एवं सति, न स पुनरावर्त्तत इति श्रुतिः प्रपञ्चे पुनरावृत्तिं निषेधति, न तु तदतीतेऽपीति ज्ञेयम् । समाप्तिज्ञापनार्थावृत्तिः । अथवा श्रुतौ तदवस्थावधृतेर्हेतोरस्माकमपि तदवस्थावधारितयतोऽतः फलाऽनियमनिश्चयोऽपीत्यर्थः । एवं सति मुक्ति-

---

त्तिश्च सता सोम्य तदा सम्पन्नो भवतीति परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते, स उत्तमः पुरुष इत्यादौ सम्परिष्वङ्गरूपैव सिद्ध्यत्येकीभावदशा विरुद्धा । अतस्तदविरोधार्थमेतयोः श्रुत्योर्विशेषौत्सर्गिकभाव आदर्त्तव्यः । वरणेन पुष्टौ प्रवेशने मुक्त्यनन्तरं ब्रह्मसम्पत्तिरूपं फलं तदभावे तु मुक्त्यवस्थैवेति । तथाच वरणस्य भगवदिच्छामात्राधीनत्वात् तस्याश्च पूर्वं ज्ञातुमशक्यत्वाद्भगवता सूत्रकृता एवम्भूतस्वाभिप्रायस्य बोधनार्थमनियम इत्युक्तमित्यर्थः । नन्वेवं सति वृतस्य भेद आयाति स च तस्यावृत्तिमापादयन्नुक्तां श्रुतिं विरुणद्धीति शङ्कायामाहुः । * एवं सतीत्यादि * । श्रुतिद्वयस्या ऽविरोधे कर्त्तव्ये सत्यनावृत्तिश्रुतिः प्रपञ्चे पुनरावृत्तिं निषेधति । उपकोसलब्राह्मणे एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्त इति विशेषनिर्देशात् । न तु तदतीतेऽपि । एतेनैवावृत्तिनिषेधस्य सामान्यत्वनिवारणादिति ज्ञेयमित्यर्थः । सूत्रस्थपदावृत्तः समाप्तिमात्रबोधकत्वेऽधिवक्ता न स्यादित्यतः पक्षान्तरमाहुः । *अथवेत्यादि* । * अत इति * । श्रुत्यन्तराविरोधात् । सिद्धमाहुः । * एवमित्यादि * । भगवद्भाव इति सप्तमी । तथाच परप्राप्तौ भगवद्भाव एव परमा साधनकाष्ठेत्यत्र सिद्धमित्यर्थः ॥

अन्ये तु ऐहिकसूत्रे साधकस्यैतज्जन्मनि विद्योत्पत्तिरुत जन्मान्तरे इति सन्देहे, मम जन्मान्तरे विद्या भवत्वित्यभिसन्ध्यभावादिभिरस्मिन्नेव जन्मनीति प्राप्ते, प्रतिबन्धकाभावस्य कारणतायाः सर्वत्र सिद्धत्वादत्र वा परत्र वा यदैव प्रतिबन्धककर्मादिनिवृत्तिस्तदैव तत्र विद्योत्पत्तिरिति

पर्यन्तं साधनं भगवद्भाव इति निर्णयः सम्पन्नः ॥ ५१ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते
ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य
चतुर्थः पादः ॥ ३ ॥ ४ ॥

सिद्धान्तयन्ति॥एवं मुक्तिफलानियम इति सूत्रे तु यथा साधनवीर्यविशेषाद्विद्याया ऐहिकामुष्मिकत्वकृतो विशेषस्तथा विद्याफलभूताया मुक्तेरप्युत्कर्षापकर्षरूपो विशेषो भवेदित्येवं प्राप्ते । उच्यते । एवं मुक्तिरूप विशेषनियमो नास्ति । कुतः । तदवस्थावधृतेः सर्वेषु ब्रह्मरूपत्वावधारणात् । अस्थूलमनणु, स एष नेति नेत्यात्मा, यत्र नान्यत् पश्यति इत्यादिश्रुतिभ्यो ब्रह्मण एकलिङ्गत्वस्यैव सिद्धत्वादित्याहुः । तदस्मन्मते पूर्वकक्षारूपमिति लिङ्गभूयस्त्वाधिकरणे निर्णीतम् । तदवगमिका विद्या च तत्रैव विश्रान्तेति निर्णीतमक्षरधियामित्यधिकरणे ।

अतो नास्माभिस्तत्राधिकं किञ्चिद्विचार्यत इति बोध्यम ॥ ५१ ॥ ९ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य
पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे तृतीयाध्यायस्य
चतुर्थः पादः ॥ ३ ॥ ४ ॥

समाप्तस्तृतीयोऽध्यायः ॥

अथ चतुर्थाध्यायस्य प्रथमः पादः ।

समन्वयेनाविरोधात् साधनैर्ब्रह्मविद् यदि ॥
तस्याग्रिमव्यवस्था या सा च तुर्ये विविच्यते ॥ १ ॥
जीवतो म्रियमाणस्य गच्छतः सफलस्य च ॥
अतो ब्रह्मविदा कार्यमेवमेव, न चान्यथा ॥ २॥

अथ चतुर्थाध्यायं विवरिषवो यथा पूर्वाध्यायारम्भे कारिकाभिरध्यायार्थः पादार्थश्च संगृहीतस्तथात्राध्यायार्थं पादार्थांश्च संगृह्णानाः पूर्वाध्यायसङ्गतिं निरूपणप्रकारं च बोधयितुं पूर्वाध्यायार्थान् स्मारयन्तः प्रस्तुताध्यायार्थं सार्द्धेनाहुः । * समन्वयेनेत्यादि * श्रुतीनां परस्पराविरोधाद् यो ब्रह्मणि सम्यग् अबाधितोऽन्वयः सम्यग्बोधनरूपस्तेनानुष्ठितैः साधनैर्यदि ब्रह्मविद् विरुद्धसर्वधर्माधारभूतब्रह्मविषयकनिर्विचिकित्सशाब्दज्ञानवान् भवति, तस्य जीवतो म्रियमाणस्य गच्छतः सफलस्य च या अग्रिमव्यवस्था ज्ञानानुकूलप्रकारेण फलपर्यन्ता स्थितिः सा चतुर्थे फलाध्याये विविच्यते फलस्वरूपप्रकारबलानां निष्कर्षेण असङ्कीर्णतया प्रकाश्यते । तथाच यथा समन्वयाविरोधाभ्याम् उपनिषद्वाक्यानामाभासत्वनिराकरणेन तेषां ब्रह्मण्येव प्रमाणत्वं तेषु च ब्रह्मण एव प्रमेयत्वं व्यक्तीकृतम्, यथा च श्रुतीनां बोधकताप्रकारनिरूपणेनोपासनात्मकसाधनप्रकारनिर्णयाद् ब्रह्मवित्त्वं व्यक्तीकृतं, तथात्रोपासनादिसाधनवतो ब्रह्मविदोऽवस्थानिरूपणात् क्रमेण साक्षाच्च प्राप्यस्य ब्रह्मणः फलत्वमुपपत्तिपूर्वकं निरूप्यत इत्ययं निरूपणप्रकारः, कार्यकारणभावोऽवसरश्च सङ्गतिरित्यर्थः । पूर्वाध्याये यावज्जीवं ज्ञानानुकूलसाधनानुष्ठानरूपं जीवतो ब्रह्मविदः कार्यं निरूपितमिति पुनरत्र तत्कथनस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः । * अत इत्यादि * यतोऽयं सिद्धसाधनो, न तु प्राप्तफलोऽत ईदृशेन प्रथमपादोक्तरीत्यैव कार्यं, न तु ग्णर्तुं

तामसीं बुद्धिमाश्रित्य ये मूढाः सर्वविप्लवम् ॥
वदन्ति शास्त्रनाशाय सद्भिः शोच्याश्च येऽनु तान् ॥ ३ ॥
ब्रह्मविद्गमनाभावः शतांशेनापि चेद् भवेत् ॥
शास्त्रमेतद् वृथा जातं सर्वमूत्रविनाशतः ॥ ४ ॥

ध्येयम् । तस्यैव भयं विदुषोऽमन्वानस्येति प्रतिबन्धबोधकश्रुतेः । अतः सिद्धज्ञानस्याप्येतत्कर्त्तव्यताबोधनमेव प्रयोजनमित्यर्थः । नन्वत्रान्ये, किं प्रजया करिष्याम इति श्रुत्या "यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यत" इति गीतास्मृत्या च ब्रह्मविदः कार्यमात्रनिषेधमङ्गीकुर्वन्ति, तत्कथमत्र ब्रह्मविदः कार्यकरणशिक्षेत्याशङ्कायां तन्मतं दूषयितुमाहुः । * तामसीमित्यादि * "अधर्मं धर्ममिति या मन्यते तमसा वृता । सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी" इति गीतोक्तलक्षणका सर्वार्थवैपरीत्यबोधिका भ्रान्ता बुद्धिस्तामसी । तामाश्रित्य ये मूढाः वैयासशास्त्रनाशाय सर्वविप्लवं सगुणब्रह्मविद्याविषयस्य ब्रह्मस्वरूपस्य वेदोक्तसाधनगुरूपदेशप्रभृतीनां मायिकत्वादिरूपं वदन्ति, ये चताननु तदनुसारिणस्ते सद्भिः शोच्याः पूर्वोक्तश्रुतिस्मृत्युक्तस्य कार्यकरणनिषेधस्य बहिरङ्गसाधनविषयतयाऽन्तरङ्गतद्विषयत्वाभावादबोधग्रस्ता इत्यतः शोकविषयीकार्या एव, न तूपादेयवाक्याः । गीतायां यस्त्वात्मरतिरित्यादिवाक्यानन्तरं, "तस्मादसक्तः सततं कार्यं कर्म समाचर । असक्तो ह्याचरन् कर्म परमाप्नोति पूरुष" इति तथा कर्मकरणावश्यकत्वकथनात् । अतः शिक्षाकथनमेवात्र युक्तं, न तु साधननिरूपणस्य प्रासङ्गिकत्वकथनम् । साधनसिद्ध्यनन्तरमपि कर्त्तव्यतया फलविषयकपरोक्षानुभवरूपतया चावान्तरफलरूपत्वादित्यर्थः । नन्विदमप्रयोजकं, तस्य तावदेव चिरमिति श्रुतेर्ब्रह्मज्ञानोत्तरं सद्योमुक्तेरेव श्रावणात् अतो ब्रह्मविदो न किञ्चित् कार्यम् । यत्पुनरत्रोक्तं तत्तु जघन्याऽधिकारिणां सगुणविद्यावतां फलसिद्ध्यर्थम् । अत एवाग्रे द्वितीयतृतीययोरुत्क्रान्तिगमनादिविचारोऽपि युज्यते । तस्मान्नोक्तं साधीय इत्यत आहुः । * ब्रह्मविदित्यादि * ।

स्वाप्ययस्य च सम्पत्तेरत्र ब्रह्मगतिश्रुती ॥
अन्यथा न, श्रुतेरर्थः स्याच्चेद् व्यासो वदेन्न किम् ॥ ५ ॥
तामसीं बुद्धिमाश्रित्य या मुक्तिः कैश्चिदुच्यते ॥
सा सुषुप्तिश्रुतेरर्थो मोहादेवान्यथा मतिः ॥ ६ ॥

परब्रह्मविदो गमनाभावोऽर्चिरादिना क्रममुक्तिमार्गेण गमनस्य राहित्यं चेत्, शतांशेनापि प्रकारेण भवेत्, तदा एतत् तृतीयपादरूपं शास्त्रं, सर्वेषाम्, अर्चिरादिसूत्रमारभ्य, विशेषं च दर्शयतीत्यन्तानां सूत्राणां विनाशतः-अब्रह्मप्राप्तिपरतया वैयर्थ्याद् वृथा जातम् । कार्यात्यये परप्राप्तेः साधनं विनापि सम्भवादिति । नन्वत्र का उपपत्तिर्यया एतेषां सूत्रार्थानां परब्रह्मपरत्वं स्थाप्यत इत्यत आहुः । * स्वाप्ययस्येत्यादि * । अत्र दहरविद्यारूपे ब्रह्मविद्गतिप्रकरणे स्वाप्ययस्य सुषुप्तेः सम्पत्तेर्ब्रह्मप्राप्तेश्च सम्बन्धिन्यौ ब्रह्मगतिश्रुती, अथ या एता हृदयस्य नाड्य इत्यारभ्य, तेजसा हि तदा सम्पन्नो भवतीत्यन्ता, अथ यत्रैतदस्माच्छरीरादुत्क्रामतीत्यारभ्य शतं चैका च पुरुषस्य नाड्य इति श्लोकान्ता च ब्रह्मणि गमनबोधिके श्रुती पूर्वं वर्त्तेते । अतो भगवदुपन्यस्ते प्रजापतिवाक्येऽपि ते आदर्त्तव्ये । ज्ञेयस्यात्मन उभयत्राप्यैक्यात् । यतः प्रजापतिवाक्यरूपश्रुतेरर्थ,: अन्यथा न, पूर्ववाक्यविरुद्धो न । यदि स्यात्तदा व्यासः सर्वस्य ब्राह्मपदार्थस्य निर्णयार्थं प्रवृत्तः फलविवेचनावसरे तमर्थं किं न वदेदपि तु वदेदेव । तथाचानयोपपत्त्या तेषां ब्रह्मपरत्वं स्थाप्यत इत्यर्थः । ननु, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वान्न तु द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येदित्यादिना मुक्तौ भेददर्शनाभावश्रावणात्तत्र कथं ब्रह्मविदो गत्युपपत्तिरित्यत आहुः । * तामसीमित्यादि * । पूर्वोक्तां बुद्धिमाश्रित्य श्रुतौ या निःसम्बोधा मुक्तिः सांख्यमतवदिष्यते सा निःसम्बोधा मुक्तिः सुषुप्तिश्रुतेरर्थः शारीरब्राह्मणे तत्सजातीयवाक्यैस्तथा सिद्धत्वात् । अतः प्रजापतिवाक्यसिद्धायां मुक्तौ या तथा मतिः सा मोहादेव । तस्मात् प्रथमे पादे यदुक्तं तद् ब्रह्मविदः शिक्षार्थमेव न तु साधनशेषतयेत्येव

अतो ब्रह्मविदः कार्यं जीवतः पूर्वमुच्यते ॥
आवृत्तिः श्रवणादीनां नवकृत्वोपदेशतः ॥ ७ ॥
दर्शनार्थत्वतो लिङ्गादपि व्रीह्यवघातवत् ॥
आवृत्तौ श्रवणादीनामात्मेति स्याद् दृढा मतिः ॥ ८ ॥
आपाततो दर्शनं तदभेदेनापि बोध्यते ॥
प्रतीकोपासनादीनां नैवं भावो हि जायते ॥ ९ ॥
आलम्बनार्थं तत्रापि ब्रह्मदृष्टिर्विशिष्यते ॥
आदित्यादिब्रह्मदृष्टेरङ्गत्वं न स्वतन्त्रता ॥ १० ॥
मनने च निदिध्यासे विशेषश्चोच्यतेऽधुना ॥

मन्तव्यम् । तत्त्वेव भयमिति श्रुतेर्ज्ञानोत्तरमपि मननस्यावश्यकत्वादित्यर्थः । एवं पादप्रयोजनं निश्चित्य तदर्थमाहुः । *अत इत्यादि* । यस्माद् ब्रह्मविदोऽपि जीवद्दशायां फलानुकूलं कार्यमावश्यकम् । अतः पूर्वं प्रथमपादे तदुच्यते । किं तदित्याकाङ्क्षायामाहुः । * आवृत्तिः श्रवणादीनामिति * । तत्र गमकं हेतुत्रयम् । नवकृत्वोपदेशतः नवसंख्यां कृत्वा य उपदेशः, नवकृत्व उपदेश इति यावत् । तस्माल्लिङ्गात् स्मृतिरूपाद् व्रीह्यवघातवच्छ्रवणादीनां दर्शनार्थत्वतोऽपीति । सा आवृत्तिः प्रथमेऽधिकरणे उच्यते । तत्फलं द्वितीयमाहुः । * आवृत्तावित्यादि * । * आत्मेति * । भगवानात्मा । तथाचेदं तस्यावान्तरफलमित्यर्थः । आवान्तरत्वं साधयन्ति * आपातत इत्यादि * । भगवतः सर्वात्मकत्वात् सर्वरूपत्वादात्मात्मत्वाच्च तस्य यत् आत्मसूत्रप्रथमवर्णकोक्तरीत्या आत्माभेदेन दर्शनं तद् आपाततो दर्शनमिति बोध्यते । अपिशब्दाद्यथाधिकारमात्मोपदेशरूपं द्वितीयं ब्रह्मविदः कार्यं च । प्रतीकमुपासनं येषां ते प्रतीकोपासनाः । आदिपदात् कर्ममार्गीयाश्च । तेषां हि यतो हेतोर्भावो ज्ञानित्वं भक्तिर्वा नैव जायते । अत आलम्बनार्थं ध्यानविषयतया ग्रहणार्थं, तत्रापि अन्यैः प्रतीकत्वेनोच्यमाने विषयेऽपि ब्रह्मदृष्टिर्विशिष्यते विशेषबोधिका भवति । साऽपि तदीयं कार्यम् । तृतीयाधिकरणस्यार्थमाहुः । * आदित्येत्यादि * । स्पष्टम् । * मनने चेत्यादि * ।

आसनादिषडङ्गैस्तु चित्तं श्रौतार्थ एव हि ॥ ११ ॥
धारयेदामतेरेवं ततः सिद्धिमवाप्स्यति ॥
धर्माधर्मभयं तस्य नास्त्येवेति विनिश्चयः ॥ १२ ॥
अग्निहोत्रादिकं कार्यं संन्यासः फल एव हि ॥
षोढा चैव पुरुषो व्यक्तः प्रारब्धान्ते फलं भवेत् ॥ १३ ॥
एतावान् प्रथमे पादे निर्णयः सूत्रकृत्कृतः ॥
द्वितीये म्रियमाणस्य सर्वेन्द्रियलयः पुरा ॥ १४ ॥
लिङ्गस्यापि शरीरस्य नाड्योत्क्रान्तिरिहोच्यते ॥
दिनाऽयनकृतो नास्य विशेषोऽस्तीति चोच्यते ॥ १५ ॥

अधुना आदित्यमत्या आदित्याद्युपासनेनाऽऽदित्यादिभिः फलदानद्वारा माहात्म्यप्रतिपादनेन भक्तिद्वारा मनने, निदध्यासे, भावे घञ्, निदिध्यासने च विशेषतो भगवतो बहिरन्तःप्राकट्यरूपश्चोच्यते। तेन फलस्यापाततोऽनुभवप्रकारो मनननिदिध्यासनरूपं तृतीयं कार्यम् । तेन फलमाहुः ।* आसनादीति * । आसनं भगवतो बहिः प्रकटस्य उपवेशनम् । आदिपदेनाऽन्तरुपवेशनं लीलाप्राकट्यं च, तेषां यानि षडङ्गानि श्रवणाद्यावृत्तिः, आत्माभेददृष्टिः, तथा ग्राहणम्, अप्रतीकोपासनं, सर्वत्र ब्रह्मदृष्टिः, आदित्यादिष्वङ्गबुद्धिश्च तैश्चित्तं श्रौतार्थे भगवति धारयेत्। तदपि, आमतेः, मननमारभ्य, एवम् उक्तप्रकारेण, ततः-तदुत्तरं, सिद्धिं भगवदासनादिसम्पादकोत्कटस्नेहसम्भवरूपामवाप्स्यति । एवम् आप्रायणसूत्रान्तस्यार्थ उक्तः। तदधिगमादिसूत्रार्थमाहुः । * धर्मेत्यादि * ।
अग्निहोत्रादिसूत्रार्थमाहुः * अग्निहोत्रेत्यादि* । फल इति * फलनान्तरीयकदशायाम् । तदावश्यकत्वाय फलप्राप्तिप्रकारमाहुः । * षोढेत्यादि * । प्रथमपादार्थमुक्त्वोपसंहरन्ति । * एतावानित्यादि * । द्वितीयस्याहुः । * द्वितीय इत्यादि * । * सर्वेन्द्रियलय इति * । पुष्टिमार्गीयस्य भगवति, मर्यादामार्गीयस्य भूतेषु । * इहेति * ।

तृतीये क्रममुक्तौ यो मार्गो यस्य श्रुतेर्मतः ॥
तन्निर्द्धारोऽन्यमार्गाणामप्राप्यत्वं च वर्ण्यते ॥ १६ ॥
गन्तव्यं च परं ब्रह्म कार्यो लोकस्तु नेति च ॥
तुरीये पुष्टिमर्यादाभेदेन फलमुच्यते ॥ १७ ॥
प्रभोरेव फलत्वं तन्निर्द्दोषत्वं च वर्ण्यते ॥
लीलानित्यत्वतः पूर्णगुणत्वं च ततोऽखिलम् ॥ १८ ॥

अस्य फलप्रकरणत्वेऽपि साधनरूपस्यापि श्रवणस्यान्तरङ्गत्वं ज्ञापयितुं तन्निर्द्धारमप्याह ॥

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिवाक्यैर्विहितं श्रवणादिकं किं सकृदेव कर्त्तव्यमुतासकृदिति भवति संशयः। किं तावत् प्राप्तं, सकृदेवेति। तावतैव शास्त्रार्थस्य

जघन्याधिकारिणि उत्क्रान्तिरित्यर्थः। * तृतीय इत्यादि *। * यस्येति *। अधिकारिणः। * अन्यमार्गाणामिति *। अन्ये मार्गा उपाया येषां ते तथा, तेषाम्। तुरीयार्थमाहुः। * तुरीय इत्यादि *। सामान्यत उक्त्वा तत्र विशेषमाहुः। * प्रभोरित्यादि *। अत्र प्रभोः फलत्वम्, आत्मा प्रकरणादित्यादिसूत्रद्वये, तन्निर्दोषत्वं च, तत्त्वभावे संध्यवदित्यादिसूत्रद्वये। शेषं, जगद्व्यापारवर्जादिसूत्रेषु। * ततोऽखिलमिति *। ततः—तादृशनिरूपणाद्धेतोः। अखिलं लीलाविशिष्टं स्वरूपफलमित्यर्थः। एवं पादार्थनिरूपणमुखेनाध्यायार्थं निरूप्य सूत्राणि व्याचिकीर्षन्तोऽत्र फलप्रकरणे साधननिरूपणस्य किं प्रयोजनमित्याकाङ्क्षायां तत्प्रयोजनं वक्तुं सूत्रमवतारयन्ति। * अस्येत्यादि *। * अन्तरङ्गमिति *। फलपूर्वकक्षारूपतया फलमध्यपातित्वेन तदुपकारत्वम् ॥

आवृत्तिरसकृदुपदेशात् ॥ अस्याधिकरणत्वाय विषयादिकमाहुः। * आत्मेत्यादि *।

सम्पत्तेः । नच तण्डुलनिष्पत्तिफलकावघातस्येव दर्शनफलकानां श्रवणादीनां तत्सिद्धिपर्यन्तमावृत्तिर्न्यायप्राप्तेति वाच्यम् । अवघातस्य वितुषीकरणात्मकदृष्टद्वारकत्वेन तथात्वमस्तु नाम, प्रकृते त्वदृष्टद्वारकत्वात् सकृत्कृतेनैवादृष्टद्वारा फलसम्पादनसम्भवादावृत्तिरप्रयोजिकेति प्राप्ते, उच्यते। आवृत्तिरेव श्रवणादीनां श्रुत्यभिमता । कुतः ? । असकृदुपदेशात् । छान्दोग्ये श्वेतकेतूपाख्याने, ऐतदात्म्यमिदꣳ सर्वं, तत्सत्यं, स आत्मा तत्त्वमसि श्वेतकेतो इति वाक्येन जडजीवयोर्ब्रह्मात्मत्वं नवकृत्व उपादिष्टवान् । तथाच सकृदुपदेशेनैव चेदर्थसिद्धिः स्यात्तदैकमेवार्थमेकस्मा एकदैवासकृन्नोपदिशेत् । प्रयोजनाभावात् । एतेनावघातवदन्तःकरणदोषनिवर्त्तनं दृष्टद्वारमन्येषामुपदेशानां चरमस्य तस्य ज्ञानसाधकत्वमिति मन्तव्यम् ॥ १ ॥

---

* इति प्राप्त इति * । द्वाराविचारेणावृत्त्यानर्थक्ये प्राप्ते । हेतुं व्याकुर्वन्ति । * छान्दोग्ये इत्यादि * ।
* अर्थसिद्धिः स्यादिति * । अदृष्टद्वारा स्यात् । * अवघातवदिति * । सप्तम्यर्थे वतिः । तेन तत्र यथा वैतुष्यमेवमत्रान्तःकरणदोषनिवर्त्तनमतो नादृष्टमत्र द्वारं, किन्तु दृष्टमेवात आवृत्तिरावश्यकी । तत्र यथान्येषामवघातानां वैतुष्यजनकत्वं, चरमावघातस्य तण्डुलनिष्पादकत्वमेवमत्रान्येषामुपदेशानामन्तःकरणदोषनिवर्त्तनं चरमस्योपदेशस्य तु मनसा साक्षात्कारे जनयितव्ये तत्सहकारितया ज्ञानसाधकत्वम् । शब्दादपरोक्षमितिवादस्य प्रागेव निरस्तत्वात् । नच चरमोपदेशस्य करणत्वमेवास्त्विति शङ्क्यम् । तथा सति प्रत्यक्षसामग्रीनैर्बल्येऽपि तत् स्यात् । तथा सत्यसकृदुपदेशो मननादिविधयश्च मुधैव स्युः । सामग्रीप्राबल्यार्थमेव तदुपयोगात् । प्रबलायां च तस्यां शब्दस्य सहकारित्वमेव, लोके तथा दर्शनादिति । तस्माद् आवृत्तिरावश्यक्येवेत्यर्थः ॥ १ ॥

अत्रैव हेत्वन्तरमाह ॥

लिङ्गाच्च ॥ २ ॥

श्रुत्यनुमापकत्वेन स्मृतिर्लिङ्गमित्युच्यते। सा च, "यथा यथाऽऽत्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः। तथा तथा पश्यति तत्त्वसूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम्" इत्यादिरूपा तदावृत्तिमेव फलसाधकत्वेनाह ॥ अत्र दृष्टान्तेनापि दृष्टद्वारकत्वं श्रवणादीनां सूच्यते। आत्मा वाऽरे द्रष्टव्य इति पदेन श्रवणादीनां फलात्मकं दर्शनं पूर्वमुक्त्वा श्रोतव्यो मन्तव्य इत्यादिना तत्साधनानि पश्चाद्यदाह तेनात्मनः परोक्षमपि ज्ञानमवान्तरफलरूपमिति। भक्तिमार्गे परमफलरूपतत्सजातीयत्वेन च फलमध्यपातित्वेनेति श्रुत्यभिमतमिति ज्ञायते। तेन सूत्रकृदपि फलप्रकरणेऽपि साधन-

---

लिङ्गाच्च ॥ सूत्रमवतारयन्ति। * अत्रैवेत्यादि *। * अत्रैवेति *। आवृत्तावेव। किं लिङ्गमित्यपेक्षायां व्याकुर्वन्ति। * श्रुतीत्यादि *। स्मृतावात्मपदमन्तःकरणपरम्। * दृष्टान्तेनेति *। चक्षुर्दृष्टान्तेन। एवञ्च पूर्वाध्याये कर्मोपसंहारे, सर्वथाऽपि त एवोभयलिङ्गादित्यनेन श्रवणादीनां भगवद्धर्माणां यदवश्यकर्त्तव्यत्वमुक्तं तस्याऽवान्तरफलत्वाय तत्प्रकारोऽत्र फलाध्याये प्रथमत एव सूत्रद्वयेन दर्शितः। तेषां कथमवान्तरफलत्वमित्याकाङ्क्षायां श्रवणादीनामवान्तरफलत्वे बीजमाहुः। * आत्मा वाऽरे इत्यादि *। * तत्सजातीयत्वेनेति *। एकविषयतया साक्षात्कारसजातीयत्वेन। तथाच भक्तिमार्गेऽपि "सतामयं सारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि। प्रतिक्षणं नव्यवदच्युतस्य यत् स्त्रिया विटानामिव साधुवार्त्ता" इति न्यायेनाऽभीष्टरूपत्वादवान्तरफलत्वं बोध्यम्। "या प्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्माऽपसर्पत्वि"ति वैष्णवे प्रह्लादवाक्यादपि तथेत्यर्थः। अत्र गमकमाहुः। * तेनेत्यादि *। एवमेकेन प्रकारेण सूत्रं व्याख्याय तत्र

विचारं चकारेति निगूढाशयः । तथापि शाब्दक्रमादार्थक्रमो बलीयानिति न्यायाद् द्रष्टव्य इति पदस्य पश्चात्सम्बन्धे तूक्तरीतिर्नावसरं प्राप्नोतीति प्रकृतविचारस्य फलप्रकरणासङ्गतत्वमापततीति प्रकारान्तरेण सूत्रार्थ उच्यते । आवृत्तिरसकृदुपदेशात् । श्रुतिर्हि कर्मज्ञानभक्तीः साक्षात्परम्पराभेदेन पुरुषार्थसाधनत्वेन हीनमध्यमोत्तमाधिकारिणः प्रति कर्त्तव्यत्वेन प्रतिपादयति । तत्र तेषां स्वरूपं तृतीयेऽध्याये बादरायणेन प्रतिपादितम् । अथ तुरीयेऽध्याये तेषां फलं चिन्त्यते । तत्रादौ कर्ममार्गस्य फलमुच्यते । ज्ञानभक्त्योरेव क्रमेणोत्तमात्युत्तमफलकत्वमतस्तत्साधनत्वेनैव तत् कर्त्तव्यं,

---

दोषाभावेऽपि श्रुतौ कर्मज्ञानभक्तीनां मार्गाणामुक्तत्वेऽपि ज्ञानभक्त्योरेव फलत उत्कृष्टत्वं, न तु कर्ममार्गस्यापीति श्रुत्याशयं स्फुटीकर्त्तुमत्र कर्ममार्गस्य फलजाघन्यमपि बोधयतीति हृदि कृत्वा प्रकारान्तरेण व्याख्यातुं तद्बीजमाहुः । * तथापीत्यादि * । अस्मिन् दर्शने शाब्दस्यैव प्राधान्याद् यद्यपि शाब्द एव क्रमो मुख्यस्तथापि तन्त्रद्वयस्यैकशास्त्र्यात् पूर्वतन्त्रस्याप्याद्रणीयत्वम् । तत्र च क्रमलक्षणे, क्रमकोपोऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्चेत्यत्र, अग्निहोत्रं जुहोति यवागूं पचतीत्यादौ शाब्दक्रमादरे यवाग्वाः पाकस्य च वैयर्थ्यप्रसङ्गाददृष्टार्थत्वादरे च गौरवात्तमनादृत्य यवाग्वा होमसम्भवेन पूर्वोक्तदोषासम्भवादर्थक्रम एव युक्त इति निर्णीतम् । तन्न्यायाद् द्रष्टव्यादिवाक्येऽपि दर्शनानन्तरं श्रवणादीनां वैयर्थ्यप्रसङ्गः फलसिद्ध्या मोक्षस्यैव सम्भवेनादृष्टस्यापि कल्पनायोग इति शाब्दं तमनादृत्य तेषां साधनतया पूर्वमेव सबन्धो युक्त इति कश्चिद्बुद्ध्यावयेत् तदोक्तरीतिरनवसरपराहता स्यादतस्तथोच्यत इत्यर्थः । एवं प्रकारान्तरं प्रतिज्ञाय तस्मिन् पूर्वाध्यायसङ्गतिं वदन्तः प्रस्तुतार्थमाहुः । * श्रुतिर्हीत्यादि * । * तत्र तेषां स्वरूपमिति * । तत्र साधनविचारे तेषां कर्मज्ञानभक्तिरूपाणां पुरुषार्थसाधनानां स्वरूपं स्वं प्रति नियतं फलोपयोगि रूपम् । अध्यायार्थमुक्त्वा सूत्रमवतारयन्ति । * तत्रादावित्यादि * । *तत्कर्त्तव्यमिति* । कर्म कर्त्तव्यम् । तथाच

न तु स्वातन्त्र्येणेति ज्ञापयितुम् । आवृत्तिरिति । कर्ममार्गस्यावृत्तिः पुनर्ज्जन्मफलं तदप्यसकृत् । इदं पदमावृत्त्योभयत्रापि सम्बध्यते । तथाचात्र प्रमाणापेक्षायां तदाह हेतुत्वेनासकृदुपदेशादिति । श्रुतौ कर्ममार्गे पुनर्ज्जन्मासकृदुपदिश्यते यतः । अन्यथा सकृदुपदेशेनैव तदवगमेऽप्यसकृदुपदेशो व्यर्थः स्यादतस्तथेत्यर्थः । वाजसनेयिशाखायां पठ्यते, एवमेवायꣳ शारीर आत्मैभ्योऽङ्गेभ्यः सम्प्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैवेति तत्रैव पुनस्तेन प्रद्योतेनैष आत्मा निष्क्रामतीत्युपक्रम्य पठ्यते, तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति । तत्रैवैतदनुपदमेव तद्यथा तृणजलायुकेत्युपक्रम्य पठ्यते एवमेवायं पुरुष इदꣳ शरीरं निहत्याऽविद्यां गमयित्वान्यन्नवतरं कल्याणतरꣳ रूपं तनुते पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वाऽन्येभ्यो वा भूतेभ्य इति । तत्रैवाग्रे पठ्यते, प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इति ।

अत्र हेत्वन्तरमाह ॥ लिङ्गाच्च ॥ वेदानुमापकत्वेन स्मृति-

मार्गाऽन्तरप्रवेश एव कर्मण उत्तमफलत्वं, स्वतो मार्गत्वे तु जघन्यफलत्वमिति ज्ञापनाय कर्ममार्गफलमुच्यत इत्यर्थः । व्याकुर्वन्ति । कर्ममार्गस्येत्यादि * । * फलमिति * । साध्यान्तरसाधनव्यापारोपरमजनकं कार्यम् । * उभयत्रेति * । साध्ये हेतौ च । उभयत्र सम्बन्धस्य प्रयोजनमुच्यते । * तथाचेत्यादिना * तथेत्यर्थ इति * । पुनर्जन्मैव फलमित्यर्थः । तेन कर्मवाक्येषु यत् स्वर्गादिरूपं फलमुच्यते तत् प्रतिपत्तिरूपमेवेति श्रुतितात्पर्यं बोधितम् । वाजसनेयिशाखायामिति * । बृहदारण्यके शारीरब्राह्मणे । तथाचास्यां श्रुतावावृत्तावुपसंहारेणावृत्तावेव पूर्वकर्मव्यापारोपरमश्रावणात् कर्ममार्गस्य तदेव फलमित्यर्थः ॥

लिङ्गाच्च ॥ लिङ्गपदस्य स्मृतौ प्रयोगप्राचुर्याभावान्नेदं युक्त-

लिङ्गमित्युच्यते। सा च भगवद्गीतासु, त्रैविद्या मामित्युपक्रम्य पठ्यते, एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्त इति। आब्रह्मभवनाल्लोकाः पुनरावर्त्तिनोऽर्ज्जुनेति च।

अथवा यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति श्रुतिर्वर्त्तमानजन्मकर्मणोः पूर्वजन्मसम्बन्धिकर्मानुमापकत्वं वदतीति कर्मिणः पुनर्ज्जन्मावश्यकमिति ज्ञायते। एवं सति लिङ्गत्वेन निरूपणादिरर्थः सम्पद्यते। निवृत्तिमार्गीयस्यापि तस्य ज्ञानोपकर्तृत्वमात्रं, न तु जन्मनिवर्त्तकत्वं मानाभावात् ॥ २ ॥

एवं कर्मफलं विचार्य ज्ञानफलं विचारयति।

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

पूर्वार्थनिरूपणव्यवच्छेदाय तुशब्दः। ज्ञानिनो हि भगवन्तम्

मित्यतः पक्षान्तरेण व्याकुर्वन्ति। * अथवेत्यादि *। यथाकारीत्यारभ्य पापो भवतीत्यन्तेन पूर्वकृतकर्मणः फलमुक्त्वा पुण्यः पुण्येनेत्यादि यद् वदति तदेतज्जन्मीनकर्मणः पूर्वकर्मानुमापकत्वायैव वदति। अन्यथा पुनरुक्तं स्यादतस्तथेत्यर्थः। सूत्रार्थमाहुः। * एवं सतीत्यादि *। ननु तर्हि निवृत्तस्य कर्मणोऽपि तथात्वापातो, निवृत्तं कर्म सेवेतेत्याद्यनुज्ञावैयर्थ्यं च स्यादित्यत आहुः। * निवृत्तीत्यादि *। तथाचाङ्गत्वदशायां तस्य प्रधानोपकारातिरिक्तफलाभावात् प्रधानेन ज्ञानेनैव जन्मनिवृत्तेर्न तद्वैयर्थ्यमित्यर्थः। अस्मिन् पक्ष इदं सूत्रद्वयं नाधिकरणरूपमिति बोध्यम् ॥

अन्ये त्वत्र पूर्ववर्णकोक्तरीत्या जघन्याधिकारिणः श्रवणादिप्रत्ययावृत्तिमात्रं साधयन्ति। अस्य साधनाश्रयविचारस्यात्र प्रवर्त्तने बीजं तु न किञ्चिदपि वदन्तीति तच्चिन्त्यम् ॥ २ ॥ १ ॥

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ सूत्रमवतार्य व्याकुर्वे- * पूर्वेत्यादि *। नन्वात्मशब्दः सन्मात्रादिप्रत्यग्रसान्तद्वादशलक्षण-

आत्मत्वेनैवोपासते । तस्या नैरन्तर्येऽनेकजन्मभिस्तथैव तेषां हृदि भगवान् स्फुरति । तदा स्वानन्दांशस्याप्याविर्भावाद् ब्रह्मभूतः सन्नात्मत्वेनैव ब्रह्म स्फुरितमिति तदानन्दात्मकः संस्तमनुभवति । एवं स्थितः प्रारब्धसमाप्तौ देहापगमे तत्रैव प्रविष्टो भवति । एतादृशः सर्वोपकारीति परार्थमपि तस्मै भगवता ज्ञानं दत्तमिति प्रवचनमपि तस्य फलान्तःपातीत्यधिकारिण्युपस्थिते तथैवोपदिशति

विशिष्टवस्तुबोधकः । इतिशब्दः प्रकारवाची। तस्य च विस्मृतकण्ठमणिज्ञानवज्ज्ञानं मोक्षसाधनमित्येवार्थोऽत्राङ्गीकार्यः । यत उपगच्छतीत्यस्य ज्ञानार्थतैव प्रसिद्धेति साधनाश्रय एवात्र विचारः प्रतीयते इति कथमस्य फलाश्रयत्वमित्यतस्तदुपपादयन्ति * ज्ञानिनो हीत्यादि * । ज्ञानिनो ज्ञानमार्गीयास्ते हि, आत्मेत्येवोपासीत स म आत्मेति विद्यादित्यादिवाक्येभ्य आत्मत्वेनैव भगवन्तमुपासते । तस्या उपासनाया नैरन्तर्ये, बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यत इति स्मृतेरनेकजन्मभिरात्मत्वेनैव भगवान् हृदि स्फुरतीति त्वं वै अहं भगवो देवते अहं वै त्वं भगवो देवते इति व्यतिहारादवसीयते। तदा बह्वभ्यासे जीवानन्दस्याप्याविर्भावात् सच्चिदानन्दानां त्रयाणां प्राकट्ये, ब्रह्मैव सन् ब्रह्माऽप्येतीति श्रुतेर्ब्रह्मभूतः सन्, आत्मत्वेनैवेत्याद्युक्तरीत्या ब्रह्मानन्दात्मकः सन्नात्मानं साक्षात्करोति । ततः प्रारब्धसमाप्तौ ब्रह्मण्येव प्रविष्टो भवतीति मुख्यं ज्ञानिनः फलमुपगच्छन्तीत्यनेनोक्तम् । ग्राहयन्तीत्यनेनाऽवान्तरं तदुच्यत इत्याशयेन तदुपपादयन्ति। * एतादृश इत्यादि * । * फलान्तःपातीति * भगवत्कृपाकार्यत्वात् फलान्तःपाति। तथाचाऽयं सूत्रार्थः। इतिशब्दः प्रकारे पूर्वसूत्रद्वये श्रवणाद्यावृत्तेरुक्तत्वाच्छ्रवणादौ च ब्रह्मण एव विषयत्वात्तत्प्रकृतं ब्रह्म आत्मा स्वात्मा इति एवंप्रकारेण उपगच्छन्त्यनुभवन्ति। तत्क्रतुन्यायेन तत् प्राप्नुवन्ति, अन्यानप्यधिकारिणो ग्राहयन्ति, उपदिशन्ति चेति बोध्यः। ननु भवत्विदमेवं, तथापि आत्मत्वेन ग्रहणस्य तादृशग्रहणाऽनन्तरभावित्वाद् उपगच्छन्तीत्यस्य ज्ञानमेवार्थत्वेन

ष । एतदेवाह । आत्मेत्यादिना । उप समीपे गमनं प्रवेश इति यावत् ॥

अथवा । ननु ज्ञानभक्त्योरनावृत्तिः फलमत उत्तमे ते, न तु कर्मेत्याशयेन कर्मणः फलमावृत्तिरिति यन्निरूपितं तत्रेदं चिन्त्यते। न स पुनरावर्त्तत इति श्रुतिः सर्वथाऽनावृत्तिमाहो । सावधिकीं तामऽमरशब्देन तन्निवृत्तिमिव । किमत्र युक्तम् । सावधिकीमेवेति। तथाहि पूर्वकर्मनैयत्यस्य त्वयाप्यङ्गीकार्यत्वात् तस्य प्ररोहैकस्व-

---

प्रतीयते, न तु प्रवेश इत्यत आहुः * उपेत्यादि * । तथाचोपगच्छतीत्यत्र कर्त्रपेक्षायां साधकमात्रस्य ग्रहीतुमशक्यत्वाज्ज्ञानिन एव कर्तृत्वेन वाच्याः । तथा सति कर्तृविशेषणत्वेनैव तत्प्राप्त्याऽस्यार्थद्वयसंग्राहकत्वाद्योगान्तरेण तस्य फलबोधकत्वं नायुक्तम् । अत्र फलस्यैव प्रकरणाद्भिति । तथाचात्मनि प्राप्ते पुनरावृत्त्यभावाज्ज्ञानस्य अनावृत्तिरेव फलमित्यर्थः । अस्मिन् पक्ष एतस्यापि सूत्रस्य नाधिकरणत्वम् । पूर्वशेषत्वात् । एवमत्र ज्ञानफलस्य कथनात् कैमुतिकेन भक्तिफलस्य सूचितत्वेऽप्यविविचितत्वात् तद्विवेचनाय पूर्वसूत्रयोर्द्वितीयवर्णके यदुक्तं तदुपग्रहमाय चेदमपि अधिकरणान्तरमेवेत्याशयेनाहुः * अथवेत्यादि * । * तत्रेति * अनावृत्तौ । विषयमुक्त्वा संशयमाहुः । * न स इत्यादि * । उक्तवाक्येन गृहिणामुपसंहारस्थले कर्मकरणमुक्तम् । सन्न्यासिनो ज्ञाने स्वरूपोपकाराय कर्मकरणं सर्वापेक्षास्त्रति स्थापितम् । कर्मणां प्ररोहैकस्वभावत्वं च संयमाधिकरणे पूर्वसूत्रयोर्द्वितीयवर्णके च व्यवस्थापितम् । एवञ्च ज्ञानवता कर्मकरणे पुनरावृत्तिश्रुत्या ऽऽवृत्तिश्रुत्योर्विरोध आपतीति तत्सन्देहबीजं बोध्यम् । पूर्वपक्षमुपपादयन्ति । * तथाहीत्यादि * अनावृत्तिश्रुतेः पूर्वं यावदायुषमेवं वर्त्तयन्निति श्रवणादनावृत्तेः पूर्वं जीवद्दशायां कर्मनैयत्यस्य त्वया सिद्धान्तिनाप्यङ्गीकार्यत्वात् कर्मणां च प्ररोहैकस्वभावत्वात् स्वभावस्य च दुरतिक्रमत्वाज्जन्मान्तरे पूर्वकर्मफलानुभवस्यावश्यकत्वादनावृत्तिश्रुतिः पूर्वानुरोधेन सावधिकीमेव तां वदतीत्यर्थः । एवमावृत्तौ साधकमुक्ताऽनावृ-

भावत्वात्तस्य दुरतिक्रमत्वात्तत्फलानुभवस्यावश्यकत्वात्। अपिच, य एवं विदुरिति श्रुतेः सति ज्ञाने हि सा। यतो वाचः, अगृह्यो न हि गृह्यत इत्यादिश्रुतिभ्यो ब्रह्मज्ञानासम्भवात्। इत एव भक्तिरपि प्रत्युक्ता वेदितव्या। ज्ञानाविषये स्नेहासम्भवात्। किञ्च सर्वस्य वशी सर्वस्येशान इत्यादिश्रुतिभ्यो, यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः, न यं विदन्ति तत्त्वेनेत्यादिस्मृतिभ्यश्च का प्रत्याशा जीवस्यातिहीनस्य तत्प्राप्तौ। अत एवोपदेशाऽसम्भवोऽपीति प्राप्ते प्रत्याह। आत्मेतीत्यादिना। तुशब्दः पूर्वपक्षनिरासकः। अत्रायमाशयः। सत्यमुक्तं भवता। तत्रोच्यते। यथाऽगृह्यत्वातिमहत्त्वादिधर्मा भगवति सन्ति तथा सर्वात्मत्वमपि। य

स्तौ बाधकमाह। * अपिचेत्यादि * । * सतीति * । अनावृत्तिः। तथाच ज्ञानाभावे तत्कार्यभूता अनावृत्तिरपि न वक्तुं शक्या। नच भक्त्या सेत्यत आह * इत इत्यादि *। तथाच भक्तेर्माहात्म्यज्ञानपूर्वकस्नेहरूपत्वात् स्नेहस्य च ज्ञानोत्तरमेव सम्भवेन तदविषये स्नेहस्याशक्यवचनत्वेन भक्तेरप्यसम्भवादित्यर्थः। एवं प्रमाणबलेन साधनदौर्घट्यरूपं बाधकमुक्त्वा फलविचारेणापि तदाह। * किञ्चेत्यादि *। अत्र श्रुत्या प्राप्तिदौर्घट्यं, स्मृत्या च तत्साधनभूतज्ञानदौर्घट्यमुक्तम्। नच केवलकरणबलेन ज्ञानासम्भवेऽपि शब्दसहकृतेन ज्ञानसम्भव इत्याशङ्क्य निराचष्टे * अत एवेत्यादि *। शब्दो हि श्रुतः सह करोति। श्रवणं चोपदेशादुपदेशश्च ज्ञानवतो गुरोरेव, ज्ञानदौर्घट्यादुपदेशस्याप्यसम्भव इत्यर्थः। तथाच सर्वथाऽनावृत्तौ साधकस्याभावाद् बाधकानां च बहूनां सत्त्वादनावृत्तिः सावधिक्येवाङ्गीकार्येति कर्मज्ञानभक्तीनां फलतो न कश्चिद्विशेषः। वस्तुतस्तु तयोः सम्भव एव दुर्घट इति कर्मफलमेव फलं, नान्यदिति पूर्वः पक्ष इत्यर्थः। सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्तः पूर्वं ज्ञानदौर्घट्यमप्राप्यत्वं च परिहरन्ति। * तुशब्द इत्यादि * प्रापयतीत्यन्तम् *। * सत्यमुक्तमिति * । यतो वाच इत्यादिना, किञ्चेत्या-

आत्मनि तिष्ठन्नित्यादिश्रुतिष्वात्मत्वेनैवोक्तेः । सर्वधर्माश्रयत्वेऽपि यदा यं धर्मं पुरस्कृत्य लीलां करोति तत्कार्यमेव तदा सम्पद्यते । हितकारित्वस्वभावत्वात् तस्य। एवं सति यस्मिन् पुरुषे यदाऽऽत्मत्वेन लीलां करोति तदा स्वप्राप्त्यनुकूलप्रयत्नवन्तं विधायात्मानं प्रापयति । ननूक्तं दुरतिक्रमः कर्मस्वभाव इति । नैष दोषः । न ह्यन्नरसपाकाय जग्धमौषधमपि गौरवाय भवति, तेन न तन्निवृत्तिर्वा । व्यापादनैकस्वभावमपि विषमाशीविषं तदपगमपटुतरनिगमसङ्गमो नापगमयति वा। तथा भगवदर्पितं तदर्थं च कृतं कर्म न कर्मनाशाय भवतीति न वक्तुं शक्यम् । कर्ममोक्षाय कर्माणि

दिना च यदुक्तं तत्सत्यमुक्तम् । * आत्मत्वेनेति * । शरीरभूतस्याऽऽत्मनो नियामकत्वेन । * तस्येति * आत्मनः । तथाच कर्मस्वभाववदात्मस्वभावस्यापि तथात्वात् स्वयमेव भगवान् स्वलीलानुसारेण ज्ञानप्रणाड्या भक्तिप्रणाड्या वा यथाधिकारं स्वात्मानं प्रापयतीति, न ज्ञानभक्त्यात्मप्राप्तीनां वैयर्थ्यमित्यर्थः। अत्र शङ्कते । * नन्वित्यादि * तथाचात्मकर्मणोरुभयोरपि स्वभावस्य तथात्वादनावृत्तिमावधिकत्वाऽनवधिकत्वयोः संशय एव पर्यवस्यतीत्यर्थः । एतत् समाधातुं कर्मस्वभावातिक्रमप्रकारं व्युत्पादयन्ति । * न हीत्यादि * । तथाच यथाऽन्नौषधयोर्द्रव्यत्वेन भक्ष्यत्वेन च तौल्येऽपि तयोर्नैकस्वभावत्वमपि तु स्वभावभेदो, यथा च निगमस्य विषादिस्वभावनाशकत्वेऽपि तत्कार्यप्रतिबन्धकत्वं तथात्र आत्मनि सर्वेन्द्रियाणीत्यादिबोधितस्य भगवदर्पितस्य तदर्थं कृतस्य च कर्मणः कर्मत्वे तुल्येऽपि स्वभावभेदो वा, भगवदर्पणादेस्तत्स्वभावनिवर्त्तकत्वं वेत्यदोषः । उक्तं च मार्कण्डेये रौच्यमन्वन्तरे "अविद्याऽप्युपकाराय विषवज्जायते नृणाम् । अनुष्ठिताऽभ्युपायेन बन्धायाऽन्यायतो हि सा" इति । अविद्येति विद्याभिन्नं कर्म, भावरूपमज्ञानं चेत्युभयमपि सगृह्यते । एतदेव श्रुतितात्पर्यमित्यत्र गमकमाहुः । * कर्मनाशायेत्यादि * । एतदेकादशस्कन्धे योगेश्वरवाक्ये, "परोक्षवादो वेदोऽयं बालानामनुशा-

विधत्ते ह्यगदं यथेति वाक्यात् । अग्राह्यत्वग्राह्यत्वविरोधपरिहारस्तु जीवसामर्थ्येश्वरेच्छाभ्यां पूर्वं कृत इति नाधिकमत्र निरूप्यम् । इतिशब्दो हेत्वर्थे । तथाच भगवानात्मा भवति सर्वेषां जीवानामतो हेतोरुक्तरीत्या तदनुग्रहेण तमुपगच्छन्ति । ज्ञानमार्गेऽङ्गीकृतास्त्वात्मत्वेनैव ज्ञानादुप समीप एव गच्छन्त्युक्तरीत्याऽक्षरात्मके तत्रैव प्रतिष्ठा भवन्तीत्यर्थः । भक्तिमार्गेऽङ्गीकृतास्तु साक्षात् प्रकटे पुरुषोत्तमे सति तद्भजनार्थमुप समीपं गच्छन्तीत्यर्थः ।

———

सनम् । कर्मनाशाय कर्मणि विधत्ते ह्यगदं यथे"ति । क्वचित्तु कर्ममोक्षायेतिपाठस्तदाऽप्यर्थतौल्यम् । आत्मस्वभावस्य तु न नाशादिशङ्का । अनुच्छित्तिधर्मेति श्रुतेः, सर्वस्य वशीत्यादिश्रुतेश्च ततोऽधिकबलस्यान्यस्याभावात् । ननु विरुद्धधर्माधारत्वाद्धर्मा एव स्वभावबाधका भवन्त्वित्याशङ्क्य तेषामप्यबाधकत्वमाहुः * अग्राह्येत्यादि * । एतेन ज्ञानादिदौर्घट्यमपि परिहृतम् । एवं बाधकं परिहृत्य सूत्रं व्याकुर्वन्ति । * इति शब्द इत्यादि * । आत्मशब्दार्थस्तु सर्वान्तर्यामित्वादिरूपः पूर्वोक्त एव । एतावान् परं विशेषो यज्ज्ञानिनां प्रत्यग्रसत्वप्राधान्येन तत्स्फूर्त्तिर्भक्तानां तु सर्वात्मत्वपरमप्रियत्वानन्दप्राधान्येनेति । अत उक्तरीत्या यस्य मार्गस्य या रीतिः क्रमाक्रमादिना व्युत्पादिता तया रीत्या तं प्राप्नुवन्तीत्यर्थः । उपगमनं विभजन्ते । * ज्ञानमार्ग इत्यादि * । * भजनार्थमुपसमीपे गच्छन्तीति * मुक्तोपसृप्यत्वस्य पूर्वमुक्तत्वाद्, ब्रह्मविदाप्नोति परमित्युक्तायाः परप्राप्तेः, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्यत्र ब्रह्मसाहित्येन श्रावणाद्भूमविद्यायामात्ममिथुनत्वस्य श्रावणाच्च तथेत्यर्थः । अत्रेदं समाधेयं । भक्ता हि, पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेन अमृतत्वमेतीति श्वेताश्वतरश्रुत्या, आत्मन्येवोपासीतेत्युक्तत्वाच्च, आत्मानं प्रियमुपासीत इश्वरो हि तथा स्यात्. आत्मानं लोकमुपासीत इत्यस्मिन् प्रकरणे त्रिधोपासनश्रावणाज्ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते, एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुख-

एवं श्लेषोक्तिरियमिति ज्ञायते । सम्प्रदायानुवृत्तिरपि भगवद्भिरेवमादृशाः स्वयं येन मार्गेण फलं प्राप्तास्तं मार्गमन्यानपि ग्राहयन्त्वित्युद्देशतस्तत्रोभयत्राप्यात्मत्वमेव हेतुरन्यथाऽऽत्मारामस्य सर्वनिरपेक्षस्यैवं करणासम्भवेन मोक्षमार्गाप्रसिद्धिरेव स्यात् । तस्मात् सर्वथाऽऽत्मत्वेनानुवृत्तिरेव श्रुत्यभिमतेति ज्ञेयम् ॥ ३ ॥

नन्वात्मत्वेनोक्तिरुपासनार्थेति नोक्तं साधीय इत्यत उत्तरं पठति ।

न प्रतीकेन हि सः ॥ ४ ॥

मिति गीतास्मृतेश्च स्वात्मतया स्वात्मात्मतया च प्रियतया देहमारभ्य यावन्तो भजनीयाः प्रियास्तदात्मत्वेन चोपासते इति तत्क्रतुन्यायात् पृथगात्मसमीपे तिष्ठन्ति । ज्ञानमार्गीयास्तु त्वं वै अहं भगवो देवते अहं वै त्वं भगवो देवते इति व्यतिहारेण स्वात्मतयैवोपासते इति तत्क्रतुन्यायात्तत्रैव प्रविशन्ति । अतो ज्ञानिभक्तयोरुभयोरप्यात्मत्वेनोपासनस्य तुल्यत्वेऽपि उपासनाप्रकारभेदादेवं फलभेद इति । उभयसङ्ग्रहस्य सूत्राभिप्रेतत्वं स्फुटीकुर्वन्ति । * एवमिति * । एतादृशशब्दप्रयोगेण । अन्यथाचेदभिप्रेयात् गृह्णन्त्येवं ब्रूयादतस्तथेत्यर्थः । एवं मार्गद्वयस्य मुख्यं फलं निरूपितम् । अवान्तरफलं वक्तुं शेषं व्याकुर्वन्ति । * सम्प्रदायेत्यादि * । इति शब्दो हेतौ व्याख्यातस्तत्रात्मत्वस्य प्राप्तौ हेतुत्वं युक्तं, तस्या भगवत्सम्बन्धित्वात् । ग्राहणं तु ज्ञानिधर्मस्तत्रात्मत्वस्य कथं हेतुत्वमित्याशङ्कायां तत्रापि तस्य हेतुत्वं व्युत्पादयितुं मार्गद्वयग्राहणेऽपि तस्य हेतुत्वं व्यक्तीकुर्वन्ति । * उभयत्रेत्यादि * उभयत्रेति * । मार्गद्वयोपदेशे । सङ्गमाहुः—

* तस्मादित्यादि * । यस्माद्भगवतः सर्वज्ञत्वं सर्वशक्तित्वं चेति न तत्स्वभावस्य पर्यावृत्तिः किन्तु कर्मण एव स्वभावपर्यावृत्तिरतस्तथेति तात्पर्यभ्रमेण क्रियमाणकर्ममार्गे एवावृत्तिः फलं, न तु तात्पर्यज्ञानपूर्वकं भक्तिमार्गीयत्वेन ज्ञानमार्गीयत्वेन वा क्रियमाणे निवृत्तिरूपे कर्मण्यत्यनावृत्तिफलकत्वाज्ज्ञानभक्ती उत्तमे इत्यर्थः ॥३॥

न प्रतीकेन हि सः ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * ।

अतद्रूपे तत्त्वेनोपासनं हि प्रतीकमित्युच्यते। तथाच तादृशेन तेन स मोक्षो न भवतीत्यर्थः। श्रुतिसिद्धत्वान्नास्ति मोक्ष इति न

अयमर्थः। आत्मत्वेन ज्ञानस्याभेदे तादात्म्ये वा पर्यवसन्नत्वात्तत्तन्मार्गीया आत्मत्वेन ज्ञानात्तत्तन्मार्गीयो मोक्षोऽनावृत्तिरूपः फलमित्युक्तम्।

तदयुक्तम्। पादोऽस्य विश्वाभूतानि, ममैवांशो जीवलोक इत्यादिष्वात्मा ब्रह्मांशत्वेन सिद्धः। अहमात्मा गुडाकेशेत्यत्र विभूतिरूपत्वेन च। एवं सति यथा सर्वं खल्विदं ब्रह्मेत्यादौ सर्वादिर्ब्रह्मत्वेनोपासनार्थं स्तूयते, तथा आत्मेत्येवोपासीतेत्यादौ स्वात्मा परमात्मत्वेनोपासनार्थे स्तूयते। एवं सति तत्र यथा ब्रह्मत्वेनोक्तिरुपासनाऽर्था, तथा स्वात्मन्यपि परमात्मोक्तिरिति न पूर्वोक्तं साधीय इत्यर्थः। व्याकुर्वन्ति। * अतद्रूप इत्यादि *। सत्यमात्मत्वेनोक्तिरुपासनार्था, परन्तु तया श्रुत्या आत्मत्वज्ञानस्योपास्तित्वमिति बोध्यते, न त्वात्मत्वज्ञानस्य फलं निषिध्यते। तस्या अकृत्स्नत्ववारणार्थत्वात्। पूर्वं प्राणन्नेव प्राणो भवतीत्याद्युक्त्वा तान्येतान्यस्य कर्मनामान्येव स योऽत एकैकमुपास्ते न स वेदाऽकृत्स्नो ह्येषोऽत एकैकेन भवतीत्युक्त्वा अकृत्स्नत्ववारणार्थम्, आत्मेत्येवोपासीतेति वदन्नग्रे, अत्र ह्येते सर्वं एकं भवन्तीत्याह। तेनात्मत्वात् सर्वरूपस्य प्राणादिना एकदेशरूपेण यदुपासनं तत्प्रतीकरूपं तादृशेन तेन मोक्षो न भवतीति सिद्ध्यति, न त्वात्मत्वेन ज्ञानान्मोक्षो न भवतीति। अत्र ह्येते सर्वं एकं भवन्तीत्यनेन कृत्स्नत्वरूपस्य फलस्यात्मोपासने बोधितत्वात्। कृत्स्नत्वं सर्वभावपूर्वकक्षा, सर्वभावश्च मोक्षपूर्वकक्षेति तत्रैव पुरुषविधब्राह्मणे तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे इत्यत्र सिद्धम्। अतो मोक्षपूर्वकक्षाया अत्र बोधनादात्मनः परमात्मत्वेनोपासनायां मोक्ष एव फलमिति सिद्ध्यति। तथाच फलस्यापि वाक्यतात्पर्यनिर्णायकत्वान्मोक्षरूपेण फलेनात्मोपासनबोधकश्रुतितात्पर्यं निर्णीयते। अतः श्रुतिसिद्धत्वान्न मोक्ष इति न वक्तुं शक्यमिति भावोऽनेन सूत्रेण बोध्यते। अत आत्मनः परमात्मत्वेनोपासनं प्रतीकोपासनमिति तवाभिमतमसङ्गतमित्यर्थः। अस्मिन् पक्षे आत्मत्वेनोपासन-

वक्तुं शक्यमिति भावः । अथवाऽऽत्मत्वेनोक्तिरुपासनार्थेति वदन् वादी वक्तव्यः । फलार्थमेव तत् । फलं च श्रुत्युक्तस्तत्प्रवेश एवेति त्वयापि वाच्यम् । एवं सत्यादौ ज्ञानमार्गेऽनुपपत्तिमाह । न प्रतीकेऽनात्मभूते ज्ञानिन उपगमः पूर्वोक्तः प्रवेशः सम्भवतीति शेषः । भक्तिमार्गेऽपि तामाह । न हि स इति । न हि प्रतीकोपासने स लोकवेदप्रसिद्धः पुरुषोत्तमोऽस्त्युपास्यत्वेन, येन तत्प्राकट्यं स्यात्, तदुपगमनं चेत्यर्थः। एवं ज्ञानभक्त्योः फलसत्ता साधिता ॥ ४ ॥

स्याऽप्रतीकोपासनत्वाज्ज्ञानभक्त्योः फलवत्ता यद्यप्यायाति तथापि, न हीति पदद्वयं सूत्रे व्यर्थं स्यादित्यतः प्रकारान्तरेण सूत्रं व्याकुर्वन्तोऽवतारयन्ति । * अथवेत्यादि * । तदिति * । उपासनम् । उपासनस्य फलं च ब्रह्मैव सन् ब्रह्माप्येतीति श्रुत्युक्तस्तस्मिन् ब्रह्मण्युपासकस्य जीवस्य प्रवेश इति त्वयाऽपि वाच्यम् । अन्यथा उपासनाविधानस्य वैयर्थ्यापत्तेः । एवमात्मोपासनस्य फलवत्त्वे सति आदौ पूर्वं ज्ञानमार्गेऽनुपपत्तिम्, एकदेशोपासनेन फलाभावबोधिकां युक्तिमाहेत्यर्थः । उपगच्छन्तीति पूर्वसूत्रादनुवृत्य, न प्रतीक इति सूत्रभागस्यार्थमाहुः । * न प्रतीक इत्यादि * । * प्रतीक इति * । अनात्मभूते मनआदौ ब्रह्मत्वेनोपासिते प्रतीकत्वान्न ब्रह्मणि प्रवेशः फलं, किन्तु मनआद्युपासनासूक्तमेव । अत्र तु ब्रह्मणि प्रवेशस्योपपादितत्वान्न प्रतीकत्वमित्यर्थः । शेषमवतार्य व्याकुर्वन्ति । * भक्तीत्यादि * । तथाच यदीदं प्रतीकोपासनं न स्याद् अत्रोपास्यः पुरुषोत्तमो न स्यात् । यतोऽत्र पुरुषोत्तम एवात्मत्वेनोपास्यो, न त्वात्मा पुरुषोत्तमत्वेन । उपक्रमे सृष्टिकर्तृत्वरूपब्रह्मलिङ्गेन, अग्रे च आत्मानं प्रियमुपासीतेति विशेषकथनेन, ईश्वरत्वकथनादिना च तथा निश्चयात् । अतो नेदं प्रतीकोपासनमित्यर्थः । सिद्धमाहुः । * एवमित्यादि । तथाच मोक्षफलकं ज्ञानिनामात्मत्वेनोपासनं न प्रतीकम् । अकृत्स्नत्ववारणार्थत्वात् । भक्तानां चात्मत्वेनोपासनं पुरुषोत्तमपर्यवसायीत्यतोऽपि न प्रतीकम् ।

ननु सर्वं खल्विदं ब्रह्म, आत्मैवेद९ सर्वमित्यादिश्रुतयः सर्वत्र ब्रह्मदृष्टिं मुक्तिसाधनत्वेनोपदिशन्ति । सा च प्रतीकात्मिकैवेति कथं प्रतीकोपासनस्य न मोक्षसाधकत्वमिति प्राप्त उत्तरमाह ॥

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

सर्वत्र ब्रह्मदृष्टिर्न प्रतीकात्मिका सर्वस्य वस्तुतो ब्रह्मात्मक-

---

अतः पूर्वोक्तं तवाभिमतमसङ्गतमित्यर्थः । एवमप्रतीकोपासनेन ज्ञानभक्त्योः फलवत्त्वे सिद्धे तयोरनावृत्तिफलकत्वेन तदङ्गभूतकर्मणोऽप्यनावृत्तावेव पर्यवसानमित्यपि बोध्यम् ॥ ४ ॥

ब्रह्मदृष्टिरुत्कर्षात् ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । मुक्तिसाधत्वेनेति * । परम्परया साक्षाच्च तत्साधनत्वेन । सा च प्रतीकात्मिकैवेति । ब्रह्मकार्ये ब्रह्मांशे च ब्रह्मदृष्टिरूपत्वात्तथा । तथाच इदं वाक्यद्वयं छान्दोग्यस्थम् । तत्र प्रथमं शाण्डिल्यविद्यास्थम् । तेन शुद्धान्तःकरणस्याऽग्रे यस्य स्यादद्धेत्यनेन भगवत्प्राप्तिरूपं फलमुक्तम् । द्वितीयं सनत्कुमारनारदसंवादस्थम् । तत्रापि, न पश्यो मृत्युं पश्यतीत्यादिना तमसस्पारं दर्शयतीत्यन्तेन मुक्तिरूपमेव फलमुक्तम्। तच्चोपासनद्वयमपि प्रतीकरूपम् । सर्वरूप आत्मनि प्राणाद्यैकदेशदृष्टिवद् ब्रह्मकार्यरूपे जगति ब्रह्मांश आत्मनि च ब्रह्मदृष्टिरूपतया अतद्रूपे तत्त्वेनोपासनरूपत्वात् । तस्माच्च मुक्तिरुक्तेति प्रतीकेनापि मुक्तिसिद्धौ फलेन विषयेण च निर्णयाभावादात्मत्वेनोक्तेर्मोक्षफलकत्वोक्तेश्च तादृशप्रतीकानिवारकत्वकथनं न साधीय इत्याशङ्कायामुत्तरमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति । * सर्वत्रेत्यादि * । सर्वस्मिन् प्रपञ्चे या ब्रह्मदृष्टिः सा न प्रतीकात्मिका । कार्यस्य कारणात्मकत्वेन प्रपञ्चस्य ब्रह्मात्मकतया वस्तुनो ब्रह्मात्मकत्वस्य श्रुत्याभिप्रेतत्वात् । अन्यथा सर्वं खल्विति वाक्ये तज्जलानिति सर्वविशेषणमुपासनाहेतुत्वेन न वदेत् । खल्वित्यव्ययं च न वदेत् । ताद्विनापि प्रतीका-

त्वात् । सा च नोपदेशसाध्याऽतो नोपदिश्यते, किन्त्वनूद्यते । सा त्वधिकारोत्कर्षात् स्वत एव भवतीति प्रतीकोपासनस्य न मुक्तिसाधनत्वमिति साधूक्तम् । एतदेवोक्तमनेन सूत्रेण ॥ ९ ॥

———

पासनाया वाचो धेनुत्वोपासनवत्सुखेन सिद्धेः । अत इयं मननात्मिका । अत एवाग्रमवाक्ये, स क्रतुं कुर्वीतेति शब्दान्तरेण मननमुपदिश्यते, भेददृष्टिजनितभयाभावार्थम् । अन्यथा तत्त्वेव भयं विदुषोऽमन्वानस्येति श्रुत्यन्तराद्भयापत्तेः । श्वेतकेतुविद्यायामभ्यावृत्त्या मननमेव बोध्यते। मैत्रेयीब्राह्मणसनत्कुमारविद्यादिषु त्वनूद्यते यतः साऽधिकारोत्कर्षादेव सेत्स्यतीत्यभिप्रायेण । एवं मनो ब्रह्मेत्युपासीतेत्यादावपि मनो ब्रह्म इति हेतोस्तत्रोक्तफलार्थमुपासीतेत्येवमुपासनाहेतुत्वेनानूद्यते, न तु विषयत्वेनोपदिश्यते । सा त्वेवं ज्ञात्वोपासने क्रियमाणेऽधिकारोत्कर्षात् स्वत एव भवति । अतस्तत्र मुक्तिफलकथनेन त्वदुक्तेषु प्रतीकेषूपासनेषु न मुक्तिफलकत्वसिद्धिरतः पूर्वोक्तं साध्वेवेत्यर्थः । तथाचोपासनावाक्यगतस्यात्मशब्दस्य प्रतीकोपासननिवृत्त्यर्थत्वात् सर्वत्रात्मदृष्टेरप्रतीकत्वादात्मशब्दब्रह्मशब्दयोरैकार्थ्यात् सर्वत्र ब्रह्मदृष्टौ साक्षात्परम्परया च मोक्ष एव फलमिति ज्ञानभक्त्योरनावृत्तिफलकत्वमप्रत्यूहमिति सिद्धम् । नच यदि ब्रह्मदृष्टिर्न कुत्रापि प्रतीकात्मिका, तर्ह्यात्मनोऽप्यन्यतुल्यत्वात् पूर्वसूत्रे आत्मत्वेन ग्रहणमेव कुत उक्तं, विशेषाभावादिति वाच्यम् । सर्वत्र जडे सदंशमात्रस्य प्राकट्येन जीवात्मनि चिदंशस्यापि प्राकट्येन, द्वा सुपर्णा, ऋतं पिबन्ताविति श्रुतिभ्यां सखित्वैककार्यकारित्वयोः श्रावणेन, सरूपा इति साजात्यश्रावणेन, त्वं वै अहं भगवो देवते अहं वै त्वमिति व्यतिहारश्रावणेन च, "अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः । न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपी"ति छिद्राभावस्मरणेन च विशेषबाहुल्यात् । एतन्निगमयन्ति । * एतदेवेत्यादि * । तथाच ब्रह्मदृष्ट्युपदेशबोधनार्थं नेदं सूत्रं, किन्तु ब्रह्मत्वस्य फलदाने हेतुत्वेन बोधनार्थमित्यर्थः ॥

अन्ये तु, आत्मेतीत्यादिसूत्रत्रयं प्रत्येकमधिकरणत्वेनोपग-

च्छन्त आद्येऽधिकरणे शास्त्रोक्तलक्षणः परमात्माऽहमस्मीति ग्रहीतव्यः? किं वा मदन्य? इति संशये मदन्य इति प्राप्तम् । परमात्मनोऽपहतपाप्मादिगुणकस्य तद्विपरीततया ग्रहणस्यायुक्तत्वात् । तथा ग्रहणे चेश्वराभावप्रसङ्गात् । स्वस्येश्वरतया ग्रहणेन साधकाभावशास्त्रानर्थक्यप्रत्यक्षाविरोधानां प्रसङ्गाच्चेति । अतः शास्त्रात्प्रतिमासु विष्णुदृष्टिवत्स्वात्मनस्तत्तादात्म्यदृष्टिः कर्त्तव्या, न तु संसारिणो मुख्य आत्मा परमेश्वर एवेति प्रापयितव्यम् । एवं प्राप्ते, उच्यते ।

आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः । यतः परमेश्वरं प्रक्रियायां जाबाला आत्मत्वेनैवैनमुपगच्छन्ति, त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते इति । तथा अन्येऽपि, अहं ब्रह्मास्मीत्येवमादाय आत्मत्वोपगमा द्रष्टव्याः । ग्राहयन्ति चात्मत्वेनैवेश्वरं वेदवाक्यानि । एष त आत्मा सर्वान्तरः, एष त आत्माऽन्तर्याम्यमृतः, तत् सत्यं स आत्मा तत्त्वमसीत्येवमादीनि । यदुक्तं प्रतिमान्यायेन प्रतीकं भविष्यतीति । तदयुक्तम् । गौणत्वप्रसङ्गात् । मनो ब्रह्मेत्यादित्यो ब्रह्मेत्यादौ सकृदेव तद्वचनेन, इह चाहं त्वं त्वमहमित्यसकृद्वचनेन प्रतीकश्रुतिवैरूप्याच्च । अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमिति न स वेद, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति, सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेत्यादिषु भेददर्शनापवादाच्च । नच विरुद्धगुणयोरन्योन्यात्मत्वाऽसम्भवः शङ्क्यः । विरुद्धगुणत्वस्य मिथ्यात्वोपपत्तेः । नापीश्वराभावः शङ्क्यः । शास्त्रप्रामाण्येनास्माभिरीश्वरस्य संसारित्वाप्रतिपादनेन संसार्यात्मनः संसारित्वापोहेनेश्वरात्मत्वप्रतिपादनस्य क्रियमाणत्वेन तदभावात् । नाप्यधिकार्यभावः, प्रत्यक्षविरोधो वा । प्राक्प्रबोधाद् व्यवहारे संसारित्वस्य तद्विषयकप्रत्यक्षस्य चाङ्गीकारेण विरोधाभावात् । यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येदित्यादिना प्रबोधदशायामेव श्रुत्या प्रत्यक्षाद्यभावबोधनात्तदानीं च श्रुत्यभावस्यापि, अत्र पिता अपिता भवतीत्युपक्रम्याऽग्रे, वेदा अवेदा इति वचनेन वेदाभावस्यापीष्टत्वात् । यदपि कैश्चिदविद्याया ब्रह्मणः सद्वितीयत्वादद्वैतानुपपत्तिरिति शङ्क्यते, तदप्येतेनैव प्रत्युक्तम् । तस्मादात्मेत्येवेश्वरे मनो दधीतेति शाङ्करा आहुः । तन्न रुचिरम् । परमात्मन्यहंग्रहोपासने साध्यं प्रमाणत्वेनात्मत्वोपगमस्य वक्तुमशक्यत्वात् । परमात्मनि मुख्यवृत्तस्य

आत्मपदस्य, सर्वं खल्विदं ब्रह्म, इदं सर्वं यदयमात्मा आत्मैवेदं सर्वमित्यादिश्रुतिभिः सर्वस्य ब्रह्मत्वे बोधिते सर्वसंग्राहकतया स्वप्रत्यग्वित्तिवेद्यवाचकाहम्पदतो भिन्नार्थत्वेऽहम्पदार्थमात्रत्वप्रमित्यजनकत्वात् । अथात्मैवेदमग्र आसीदित्युपक्रम्य सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहंनामा अभवदिति श्रुतेः पर्यायत्वान्न दोष इत्युच्यताम् । तथा सति तेन तदहंवित्तिवेद्यत्वगुणकोपासनं सेत्स्यति, न तु तस्य स्वाभेदपर्यवसायित्वाहंवित्तिवेद्यत्वगुणकम् । ततश्च किमहमिति ग्रहीतव्यः, किं वा मदन्य इति संशयाकारासङ्गतिः । तत्रास्मत्पदाभ्यां प्रतिशरीरं भिन्नस्य स्वाहंवित्तिवेद्यस्यैव बोध्यमानत्वात् । नचोपाधेर्मिथ्यात्वात् तदनादरेण घटाकाशमहाकाशन्यायात्तयोरभेदस्यैव सिद्धेर्न दोष इति वाच्यम् । मिथ्यात्वेऽपि यावद्व्यवहारं तत्सत्तायां भेदाभावस्योपगन्तुमशक्यत्वात् । नच जाबालवाक्यादभेदोपगमनं शक्यम् । तत्रापि देवते इति द्विवचनेन देवतापदस्य सम्बुद्धित्वपक्षेऽपि स्वप्रत्यक्पराग्वित्तिवेद्यत्वाभ्यां च भेदस्यैव बोधनात् । नच व्यतिहारानुरोधादभेदः शक्यः । तस्य भेदविरुद्धस्वभावे तादात्म्यरूपे अभेदेऽप्युपपन्नत्वेनाभेदोपासनास्तुत्यर्थतया भेदाभावरूपतदगमकत्वात् । त्वं तु भागवतेष्वहम्, आयुधानामहं वज्रमित्यादावहम्पदस्य विभूतावपि प्रयोगेण त्वं वाऽहमस्मीत्यहम्पदस्य त्वद्विभूत्यात्मकोऽस्मीत्यर्थस्य, अहं वै त्वमसीत्यत्र विभूत्यात्मनाऽभेदस्य शक्यवचनत्वाच्च । नाप्यहं ब्रह्मास्मि, तत्त्वमसीत्यादिविरोधः । तत्रापि सुवर्णशकले सुवर्णबुद्धिवद् ब्रह्मांशे ब्रह्मबुद्धेरुपपन्नत्वेन तदविरोधात् । मामेव विजानीहीत्यादिवदाविष्टवाक्यादिरूपत्वेनाप्युपपत्तेश्च । अत एव, एष त आत्मेत्यादिषु ब्राह्मणवाक्येष्वप्यात्मपदमेवोक्तं, न तु, त्वं पदमहम्पदं वेति युज्यते । किञ्च । आत्मनः स्वप्रत्यग्वित्तिवेद्यस्य च सर्वथा भेदाभावे, अथातोऽहङ्कारादेश इत्यनन्तरम्, अथात आत्मादेश इति पुनर्नोपदिश्येत । तस्मात् स्वात्मेश्वरयोर्भेदविरुद्धस्वभावाभेदेनैवोपासना युक्ता, न तु भेदाभावरूपेणाभेदेन । एवमेव श्रीभागवतेऽप्युच्यते । आत्मानं चिन्तयेदेकमभेदेन मया मुनिरिति, न तु स्वाभेदेन मामिति । अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं हि स देवानामिति भेदोपासननिन्दाऽपि, न हि निन्दान्यायेन पूर्वोक्ताभेदोपासनास्तु-

त्यर्थत्वादुपपन्ना। एवमन्यान्यपि वाक्यानि बोध्यानि। एवञ्च प्रतिमाऽऽदौ विष्णुबुद्धेः प्रतीकत्वं यदुक्तं तदपि तथा। सर्वस्य ब्रह्मात्मकत्वेन तत्र विष्णुबुद्धेः प्रतीकत्वाभावात्। अतद्रूपे तत्त्वेनोपासनस्यैव भवद्भिः प्रतीकत्वोपगमात्। यदपि, वेदानामप्यभावः प्रबोधे इत्युक्तम्। तदपि तथा। यत्र त्वस्य सर्वमात्मैवाभूदित्यत्र सर्वस्य नाशाकथनेनाऽऽत्मभावस्य च कथनेन, वेदा अवेदा इत्यत्रापि ज्ञानाद्विकल्पबुद्धिमात्रबाधेन वस्तुस्वरूपाबाधात् स्वरूपतो वेदाभावस्य वक्तुमशक्यत्वादिति। यदपि, न प्रतीकसूत्रे प्रतीकोपासने आत्मदृष्टिर्न कार्येत्युक्तम्। तत्रापि मनआद्युपासनस्य प्रतीकत्वमेवायुक्तम्। सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेति सर्वत्राभेददृष्ट्यर्थं भेददृष्टिनिन्दाङ्गीकारेण भवतामपि सिद्धे सर्वस्य ब्रह्मात्मकत्वे मनआदीनामपि तथात्वात्पुरुषाङ्गे पुरुषबुद्धिवत् प्रतीकत्वाभावात्। अथ, अङ्गं प्रतीकोऽवयव इति कोशादङ्गोपासनैव प्रतीकोपासनेतीष्यते, तदा तु ओमिति ब्रूमः।

रामानुजाचार्यास्तु, तुशब्दोऽवधारणे। उपासितुरात्मत्येवोपास्यम्। उपासिता प्रत्यगात्मा स्वशरीरस्य स्वयं यथात्मा तथा स्वात्मनोऽपि परं ब्रह्मात्मेत्येवोपासीत। कुतः? एवं ह्युपगच्छन्त्युपासितारः। त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसीति। उपासितुरर्थान्तरभूतं ब्रह्म उपासितारः कथमित्युपगच्छतीत्यत्राह। ग्राहयन्ति चेति। इति इममर्थमविदूरोपासितॄन् ग्राहयन्ति शास्त्राणि तान् प्रत्युपपादयन्ति। य आत्मनि तिष्ठन्नात्मनोऽन्तरः। सन्मूलाः सोम्येमाः सर्वाः प्रजाः, ऐतदात्म्यमिदं सर्वं, सर्वं खल्विदं ब्रह्म तज्जलानिति च सर्वस्य चिदचिद्वस्तुनस्तज्जत्वात्तल्लत्वात्तदनत्वात्तन्नियम्यत्वात्तच्छरीरत्वाच्च सर्वस्याऽयमात्मा, अतः स त आत्मा। अतो यथा प्रत्यगात्मनः स्वशरीरं प्रत्यात्मत्वाद्देवोऽहं मनुष्योऽहमित्यनुसन्धानं तथा परमात्मनः प्रत्यगात्मनोऽप्यात्मत्वात्प्रत्यगात्मानं प्रत्यप्यहमित्यनुसन्धानं युक्तमित्युपपादनात्। सर्वबुद्धीनां ब्रह्मैकनिष्ठत्वेन सर्वशब्दानां ब्रह्मैकनिष्ठत्वमभ्युपगच्छतस्त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसीति व्यतिहारेणोक्तवन्तः। एवं चाथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमिति, अकृत्स्नो ह्येषः, आत्मेत्येवोपासीत, सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेति आत्मत्वानुसन्धान-

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

छान्दोग्ये, अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाचेति। अथ होवाचेन्द्रद्युम्नमित्युपक्रम्य त्वं कमात्मानमुपास्स इति वायुमेव भगवो राजन्निति होवाचेति। एवमेवाग्रे प्रश्नभेदेन वक्तृभेदेनाकाशाऽऽपप्रभृतय आत्मत्वेन उपासनाविषया उक्ताः । तत्रैवासौ वा आदित्यो देवमध्वित्युपक्रम्यान्ते पठ्यते । य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्त इति । अत्रेदं चिन्त्यते । अत्र प्रतीकोपासनत्वमस्ति?

निषेधः । तेन, पृथगात्मानं प्रेरितारं च मत्वेति पृथगात्मानुसन्धानं चाविरुद्धम् । अहमिति स्वात्मतयाऽनुसन्धानादन्यत्वानुसन्धाननिषेधो रक्षितः । स्वशरीरात्स्वात्मनोऽधिकत्वानुसन्धानवत् स्वात्मनोऽपि परात्मनोऽधिकत्वानुसन्धानात् पृथक्त्वाऽनुसन्धानविधानं च रक्षितम् । अधिकस्य ब्रह्मणस्तदात्मकत्वात् तस्य च ब्रह्मशरीरत्वान्निषेधवाक्येऽकृत्स्नो ह्येष इत्युक्तम् । अत उपासितुरात्मत्वेन ब्रह्मोपास्यमिति स्थितमित्याहुः ॥

तदपि शाङ्करादिमतापेक्षया उपपन्नम् ॥ ५ ॥ २ ॥

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ एवं प्रधानभूतानां ज्ञानभक्तिसम्बन्धिनीनाम् उपासनानां फलमुक्त्वा, अङ्गोपासनानां तदुक्तप्रतीकत्वं वारयितुमङ्गोपासनानां फलं विचारयतीत्याशयेनाधिकरणविषयमाहुः । * छान्दोग्ये इत्यादि * । * छान्दोग्ये इति * । तत्र वैश्वानरविद्यायाम्। अत्र प्रश्नप्रत्युत्तरे चक्षुष्ट्वे तदात्मन इत्यादिकथनादुआदित्यस्याङ्गत्वेऽपीतः पूर्वं प्रश्ने दिवमेव भगवो राजन्नित्यादिना द्युमतेरुक्तत्वेनादित्यमतेरादित्वाभावात्पूर्वं द्युमतेरुक्तत्वेन तस्याङ्गे बीजाभावादत्राङ्गोपासनाफलस्योत्कृष्टत्वाभावाद्भक्तिमार्गीयस्य नेदं युज्यत इत्यरुच्या विषयवाक्यमन्यदाहुः * तत्रैवेति * । छान्दोग्ये मधुविद्यायाम् । संशयमाहुः । * अत्रेत्यादि * । अत्रात्माङ्गेष्वादित्यादिष्वात्मबुद्धित्वबोधनादतद्रूपे तद्बुद्धिरूपतया प्रतीकत्वस्य पुरु-

न वेति ? । अस्तीति पूर्वः पक्षः । तथा हि । सर्वं खल्विदं ब्रह्मेति श्रुतौ सर्वमनूद्य ब्रह्मत्वं तत्र बोध्यत इति न क्वचित् प्रतीकोपासनमस्तीति हि पूर्वं निरूपितम् । तच्चोक्तश्रुतिभिः प्रत्येकं तत्त्वेनोपास्यत्वेनोक्त्या नोपपद्यते । ब्रह्मण एकत्वादेकप्रकारकेणैवोपासनेन सर्वेषां फलसिद्धेः पृथक्पृथगुक्तौ गौरवात् प्रयोजनविशेषाभावाच्च । तादृशाधिकाराभावात् पृथक् तदुक्तिरिति चेत् । न । सर्वत्र सदा तद्भावनायां तथाऽनुभवस्यापि सम्भवात् । एवं सति वस्तुतः सर्वस्य ब्रह्मत्वं नाभिमतं, किन्तु यथाऽऽदित्यादीनां तत्तथा तथा सर्वस्यापीति प्रतीकोपासनत्वमेव सर्वत्र । तेनैव फलमिति प्राप्ते प्रतिवदति । आदित्यादौ या ब्रह्मत्वमतय उच्यन्ते तास्तु साकारस्यैव ब्रह्मणो व्यापकत्वात् तस्य प्रत्येकमप्यङ्गमुपासितं फलद-

---

येकदेशे पुरुषबुद्धिवदत्र ब्रह्माङ्गे ब्रह्मबुद्धेरपि मननासिद्धत्वादप्रतीकत्वस्य सम्भवः सन्देहबीजम् । पूर्वपक्षं व्युत्पादयन्ति * तथाहीत्यादि * पूर्वं निरूपितमिति * पूर्वाधिकरणीयसूत्रद्वये व्युत्पादितम् * तत्त्वेनेति * ब्रह्मतया । * एकप्रकारकेणेति * सर्वं खल्विदमिति श्रुत्युक्तप्रकारकेण । प्रयोजनविशेषसत्तामाशङ्कते * तादृशेत्यादि * । * तादृशाधिकाराभावादिति * । उत्कृष्टाधिकाराभावात् । तथाच येषां न सर्वत्र ब्रह्मत्वेन स्फूर्त्तिस्तदर्थं पृथगादित्याद्युपासनोक्तिरित्यर्थः । समाधत्ते । * नेत्यादि * । सर्वत्र तद्भावनायां तया उपनयेनोपनीतभानरूपस्य ब्रह्मानुभवस्यापि सम्भवात् । * एवं सतीति * । अधिकाराभावेऽप्युक्तरीत्या सर्वत्र ब्रह्मदर्शनसम्भवेऽप्येवं पृथगुपासनोपदेशे सति । * वस्तुत इत्याद्युक्तरीत्या तत्तथा उपासनं प्रतीकं, तथा सर्वस्यापि ब्रह्मत्वेनोपासनमपि प्रतीकम् । तेनैव चित्तशुद्धिद्वारा मुक्तिरूपं फलं सम्भवतीति पूर्वसूत्रद्वयोक्तमयुक्तमिति प्राप्ते प्रतिवदति । आदित्याद्युपासनानामङ्गोपासनत्वेन फलवत्त्वं वदन् तासु तदुक्तप्रतीकरूपत्वं परिहरतीत्यर्थः । सिद्धान्तं वक्तुं सूत्रं व्याचक्षते । * आदित्येत्यादि * । * एकैकाङ्गविषयिण्य इति * । सूत्रे-

मित्येकैकाऽङ्गविषयिण्यस्ता विधीयन्ते । उपपन्नं चैतत् । न हि साकारव्यापकब्रह्मणोऽङ्गं न ब्रह्माऽतो, न प्रतीकोपासनत्वं तत्र । अपरञ्च । असौ वा आदित्यो देवमध्वित्युक्त्वा तस्य प्रतिदिक्करश्मीनां कृपावलोकनरूपाणां मधुत्वं निरूप्य तद् यत् प्रथममृतं तद्वसव उपजीवन्त्यग्निना मुखेन, न वै देवा अश्नन्ति न पिबन्त्येतदेवाऽमृतं दृष्ट्वा तृप्यन्ति।त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्तीति पठ्यते । तथाच दर्शनमात्रेण अन्यधर्मनिवृत्तिस्तस्यैव स्वतन्त्रपुरुषार्थत्वेन ज्ञानमतिशयितस्नेहजविगाढभावेन तत्रैव लयः।

ऽङ्ग इति सप्तम्या वैषयिकाधिकरणबोधनात्तथा । हेतुं व्याकुर्वन्ति । * उपपन्नमित्यादि * । तथाच, अङ्गं प्रतीकोऽवयव इति कोशादङ्गमेव प्रतीकं तदुपासनं चाङ्गोपासनमेव, न तु त्वदुक्तरीतिकप्रतीकोपासनम् । अतस्त्वदुक्तरीतिकात्तस्मान्न फलम् । अस्मदुक्तरीतिकात्तु तस्मात्फलम्। भगवदङ्गमाहात्म्यप्रतिपादने ज्ञानाङ्गभक्तिद्वारा भगवज्ज्ञाने ज्ञानमार्गीयस्योपकरोतीति भावः । अङ्गत्वेन प्रतीकत्वाच्च तावन्मात्रस्यात्मत्वेनोपासनेऽकृत्स्नत्वादन्धत्वदोषकथनमपि युज्यते । न च यद्येवं तदा, अत्यन्नं पश्यति प्रियमित्यादिफलकथनमपि कथमिति शङ्क्यम् । भगवदङ्गमप्युपासितं फलायेतिभगवन्माहात्म्यज्ञापनेन तत्र भक्तिसिद्ध्यर्थमिति जानीहि । एतासां भक्तिमार्गोपकारार्थम् । द्वितीयवाक्यस्यार्थं परोक्षवादेनाहुः । * अपरं चेत्यादि * । आदित्यो भगवच्चक्षूरूपः । मधुत्वं मधुनाडीत्वम् । प्राच्यो मधुनाड्य इत्यादिश्रुतेः । तासां मधुप्रधानत्वान्मधुत्वम् । ऋचां मधुकृत्त्वम्, ऋग्वेदस्य पुष्पत्वं तासामेव ऋचाममृतता ब्रह्मरूपत्वं, ताभिर्ऋग्वेदतापं, ताभिस्तप्तस्यर्ग्वेदस्य यशआदिरसजननं तत्क्षरणं, तस्य रसस्यादित्यमभितः श्रयणं, तस्यादित्यरोहितरूपत्वमित्येवं प्रतिदिक्करश्मीनां ये रसास्तेषाममृतत्वं च निरूप्य तदग्रे तद्यत्प्रथममृतमित्यादि पठ्यते। अत्र कल्पनोपदेशात्परोक्षवादता । तेन यदत्र सिद्धं तद्विशदयन्ति । * तथाचेत्यादि * अन्यधर्मनिवृत्तिरिति *।

पुनस्तद्दर्शनानन्दानुभवार्थं भगवानेव कृपया पुनः पूर्वभावं सम्पादयतीति तस्माद्रूपादुदयश्चैतत्सर्वं भगवदङ्गत्वे एवोपपद्यत इत्यपि हेत्वभिप्रेतोऽर्थो ज्ञेयः । न हि प्रतीकत्व इदं सर्वं सम्भवति, भक्तिमार्गीयत्वादस्यार्थस्येति भावः । अङ्गानां भगवत्स्वरूपात्मकत्वेनैक्यमिति ज्ञापनायैकवचनम् । एतेन स्वरूपस्यैव फलत्वमुक्तं भवतीति मुख्यः सिद्धान्तः सूचितो भवति ॥ ६ ॥

आसीनः सम्भवात् ॥ ७ ॥

पूर्वसूत्रेण धर्ममात्रस्य फलत्वमुक्त्वाऽधुना धर्मिणः फलत्वं तत्साधनं चाह । सम्भवात् । उत्कटस्नेहात्मकसाधनस्य सम्भवात् तदधीनः संस्तदग्र आसीनो भगवान् भवति । एतेन भक्तवश्यतोक्ता ॥ ७ ॥

प्राणधर्मरूपक्षुदादिनिवृत्तिः । * हेत्वभिप्रेतोऽर्थ इति * हेतुबोधके उपपत्तिपदेऽभिप्रायगोचरोऽर्थः । तदुपपादयन्ति । * नहीत्यादि * । ज्ञानमार्गे एवान्धत्वादिदोषो, न भक्तिमार्ग इत्यपि सूचितम् । शेषं स्फुटम् । किञ्चास्मिन् सूत्र आदित्यादिमर्तानामङ्गविषयकत्वकथनेन पूर्वम्, अन्तस्तद्धर्मादिसूत्रेपूक्तानां हिरण्मयपुरुषाकाशप्राणादीनामप्यङ्गत्वं बोध्यते । तेन तदुपासना अपि तथेत्यपि बोधितमिति ज्ञेयम् ॥ ६ ॥

आसीनः सम्भवात् ॥ सूत्रमवतारयन्ति । * पूर्वसूत्र इत्यादि * पूर्वसूत्रे चक्षुरादिरूपस्यादित्यादेर्धर्मस्य प्राप्यत्वेन फलत्वमुक्त्वाऽस्मिन् सूत्रे धर्मिणो भगवत एव तदुपासनफलत्वं तत्प्राप्तिसाधनं चाहेत्यर्थः । व्याकुर्वन्ति । * सम्भवादित्यादि * । भगवदङ्गत्वज्ञानपूर्विकया आदित्याद्युपासनया उत्कटस्नेहसम्भवात् तथा, न तु तदभावेऽपीत्यर्थः । एतेन ज्ञानमार्गिणामीदृशस्नेहाभावान्नासीनो भवति । किन्तु परोक्षज्ञानविषयो भवतीत्यपि बोधितम् । सिद्धमाहुः । * एतेनेत्यादि ॥ ७ ॥

एवं बहिः प्राकट्यमुक्त्वाऽऽन्तरं तदाह ॥

ध्यानाच्च ॥ ८ ॥

भावानौत्कट्यदशायां व्यभिचारिभावात्मकसततस्मृतिरूपध्यानादपि हृदि प्रकटः सन्नासीनो भवतीत्यर्थः । तेन स्थैर्यमुक्तं भवति ॥ ८ ॥

एवम्भक्तेच्छयैव स्वरूपप्राकट्यमित्युक्त्वा लीलानाविष्करणमाविष्करणं चापि तदिच्छयैवेत्याह ॥

अचलत्वं चापेक्ष्य ॥ ९ ॥

भक्तेच्छामपेक्ष्याचलत्वं चकाराच्चलत्वमपीत्यर्थः ॥ ९ ॥

स्मरन्ति च ॥ १० ॥

केचन भक्ताः स्वरूपानिरपेक्षास्तत्स्मरणजनितानन्देनैव विस्मृतापवर्गान्तफला भवन्ति । चकाराच्छ्रवणकीर्त्तनादयोऽपि समुच्चीयन्ते । तदुक्तम्—अथ ह वाव तव महिमाऽमृतसमुद्रविप्रु-

———

ध्यानाच्च ॥ सूत्रमवतारयन्ति । * एवमित्यादि * । * तदिति * । प्राकट्यम् । व्याकुर्वन्ति । * भावेत्यादि * । * स्थैर्यमुक्तं भवतीति * । एतेन ज्ञानमार्गे एतादृशस्यापि भावस्याभावादस्थैर्यमित्यपि बोधितम् ॥ ८ ॥

अचलत्वं चापेक्ष्य ॥ सूत्रमवतारयन्ति । * एवं भक्तेत्यादि * ॥ ९ ॥

स्मरन्ति च ॥ अनेन साधनान्तरमुक्तमित्याहुः ॥

* केचनेत्यादि * । अत्र भाष्यमतिरोहितार्थम् । अस्मिन्नपि सूत्रे अपेक्ष्येति कथनाज्ज्ञानमार्गीयस्योपासनामपेक्ष्य वाऽचलत्वादिकं बोध्यम् । एवञ्चात्रादित्यसूत्रोक्ते मनने आसीनसूत्रेण विशेष उक्तः, ध्यानसूत्रोक्तनिदिध्यासने चाचलत्वसूत्रेणेति ज्ञेयम् । अनेनाऽधिकर-

षा सकुल्लीदया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतसुखलेशाभासाः परमभागवता इति। अथवा, अहं भक्तपराधीन इत्यादिस्मृतिः पूर्वोक्ते प्रमाणत्वेनोक्ता ॥ १० ॥

यत्रैकाग्रता तत्राऽविशेषात् ॥ ११ ॥

अथेदं विचार्यते। बहिराविर्भावो येभ्यो, येभ्यश्चाऽन्तस्तेषां तेषां च मिथस्तारतम्यमस्ति, न वेति। तत्र निर्णयमाह। यत्र भक्तेष्वेकाग्रता भगवत्स्वरूपे प्रकट एवैकस्मिन् ग्राहकचित्तधारा, न त्वन्तर्बहिर्विज्ञानं तत्रोभयोरन्तःपश्यतो बहिः पश्यतश्च भावे भगवत्स्वरूपे च विशेषाभावान्न तारतम्यमस्तीत्यर्थः ॥ ११ ॥

णेन आदित्यादिरूपाणामङ्गानामुपासनानां जघन्याधिकारिषु फलदानद्वारा भगवन्माहात्म्यप्रतिपादनेन तत्र भक्तिजननद्वारा सर्वात्मभावरूपज्ञानाङ्गत्वमपि प्रतिपादितम्। तेन तासामपि परम्परया तदेव फलमिति सिद्धम् ॥

अन्ये तु—आदित्यादिमतिसूत्रमधिकरणान्तरत्वेनोक्त्वा तत्र य एवासौ तपति तमुद्गीथमुपासीतेत्यादिषु कर्माङ्गोपासनेषु किमादित्यादिषूद्गीथदृष्टिः कार्या? किं वोद्गीथादिष्वादित्यादिदृष्टिः? दृष्टेरनियमो वेति संशये, उद्गीथादिष्वङ्गेष्वेवादित्यादिदृष्टयः कार्या इति सिद्धान्तयन्ति। आसीन इत्यादिकं चतुःसूत्रमधिकरणान्तरमुक्त्वा तेष्वेवासननियमोऽस्ति, न वेति संशये आसीन एवोपासीतेति नियमं सिद्धान्तयन्ति। तत्रोदासीना वयम् ॥ १० ॥ ३ ॥

यत्रैकाग्रता तत्राऽविशेषात् ॥ एतस्य सूत्रस्य अधिकरणत्वं बोधयन्तोऽवतारयन्ति। * अथेत्यादि *। अथेति *। पूर्वाधिकरण आदित्यादिरूपाणामङ्गानामुपासनाभिः साधनभूतभक्त्युत्कर्षात् पुरुषोत्तमस्य बहिरन्तः प्राकट्यविचाराऽनन्तरम्। येभ्य इति चतुर्थी तादर्थ्ये। * तत्रेति *। उक्तसंशयोत्तरं प्राकट्यप्रकारभेदाद् भक्तयोस्तारतम्यमिति प्राप्ते। * न त्वन्तर्बहिर्विज्ञानमिति *।

आप्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥

उक्तेऽर्थ एवायं संशयः । अन्तः प्राकट्यवतो यदा बहिः संवेदने सत्यपि पूर्वानुभूतभगवत्स्वरूपानुभवस्तदा पूर्वमन्तरमन्वभूवमधुना बहिरनुभवामीत्यनुव्यवसायो भवति, न वेति । तत्र वैलक्षण्याद्भवितुमर्हतीति पूर्वः पक्षः । तत्र सिद्धान्तमाह ॥ आप्रायणादिति ॥ श्रीभागवते, प्रायणं हि सतामहमिति भगवद्वाक्यात् प्रायणशब्देन स्वतःपुरुषार्थत्वेन प्राप्यं परमं पारलौकिकं फलमुच्यते । तथाच फलं तन्मर्यादीकृत्य तस्य सैवावस्था सार्वदिकी, न तु बहिः प्राकट्येऽपि बहिष्ट्वाऽनुसन्धानमित्यर्थः । ततस्तस्य तत्र सायुज्यं भवति, न वेति संशये निर्णयमाह । तत्रापि प्रायणेऽपि

करणभेदानुसन्धानकृतमन्तर्बहिर्विज्ञानम् । शेषः सिद्धान्तग्रन्थस्तु स्फुटः । तथाचैकाग्र्याभावे भावतारतम्यम् । तेन च तयोस्तारतम्यं, न तु प्राकट्यप्रकारभेदादिति भावः ॥ ११ ॥ ४ ॥

आप्रायणात्तत्राऽपि हि दृष्टम् ॥ एतस्याऽप्यधिकरणान्तरत्वं बोधयन्त आहुः । उक्तेऽर्थ इत्यादि * । तेनानुप्रसङ्गः सङ्गतिरित्यर्थः । सत्यपीत्यपिशब्दोऽनुभवशब्दानन्तरमन्वेति । * तत्रेत्यादि * । वैलक्षण्यादिति * । भूतकालवर्त्तमानकालरूपविशेषणभेदकृतवैलक्षण्यात् । सिद्धान्तं वक्तुं सूत्रं विवृण्वन्ति । * श्रीभागवत इत्यादि * । तत्रैकादशस्कन्ध एकादशाध्यायोपान्ते ज्ञानमार्गाद् भक्तिमार्गोत्कर्षं वदता भगवतोक्तम् "प्रायेण भक्तियोगेन सत्सङ्गेन विनोद्धव । नोपायो विद्यते सम्यक् प्रायणं हि सतामह"मिति । प्रकृष्टम् । अयनं प्रायणमिति योगात्तादृशं फलमुच्यते । तथाच तादृशं फलं मर्यादीकृत्य तस्य भक्तस्य सैवावस्था एकाग्रतारूपा सार्वदिक्यतस्तथेति नानुव्यवसायवैलक्षण्यमित्यर्थः । तर्हि प्रायणे तु फले वैलक्षण्यं भविष्यतीति शङ्कायां सूत्रशेषमवतारयन्ति । * ततस्तस्येत्यादि * । निर्णयमाहेति * । तत्क्रतुन्यायाद्, यं यं वापीति स्मृतेश्च भवतीति प्राप्ते निर्णयमाहेत्यर्थः । व्याकुर्वन्ति । * तत्रापीत्यादि * ।

प्राप्ते तस्य पूर्ववत् प्रभुणा सममालापावलोकनश्रीचरणनलिनस्पर्शादिकं दृष्टमेव फलं, न त्वदृष्टं सायुज्यमित्यर्थः । यतः शुद्धपुष्टिमार्गेऽङ्गीकृतोऽन्यथा पूर्वोक्तभावसम्पत्तिः कथं स्यादित्युपपत्तिर्हिशब्देन सूच्यते । एतच्च तद्भूतस्य तु नातद्भाव इत्यत्र निरूपितम् ॥ १२ ॥

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

पुष्टिमार्गीयभक्तस्य फलं निरूप्य मर्यादामार्गीयस्य तस्य फलं चिन्त्यते । तत्र तु ज्ञानपूर्वकत्वं भक्तेरावश्यकम् । कर्ममर्यादा-

---

* सूच्यत इति * । हेतुतया सूच्यते । तथाच पूर्वपक्षोक्तन्यायादिर्हि उपासने प्रवर्त्तते । अत्र तु साक्षात्कार इति तस्य भावस्य सार्वादिकत्वं निष्प्रत्यूहमित्यर्थः ॥

अन्ये तु, पूर्वसूत्रे उपासनासु एकाग्रताप्रयोजकं यद्भवति तदेव दिगादिकं नियतं, न तु प्राच्यादिनियम इति सिद्धान्तयन्ति । अस्मिंस्त्वभ्युदयफलासूपासनास्वपि प्रयाणकालपर्यन्तं प्रत्ययावृत्तिं सिद्धान्तयन्ति । प्रायणपदेन च प्रयाणकालं व्याकुर्वन्ति । तदा प्रायणशब्दो यौगिक एव । अयनपदस्य गमनवाचकत्वादिति । तत्राप्युदासीना वयम् ॥ १२ ॥ ५ ॥

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ अधिकरणप्रयोजनमाहुः । * पुष्टीत्यादि * । * पुष्टिमार्गीयभक्तस्य फलमिति * । लौकिकदेहे भगवत्साक्षात्कारादिकं फलमासीनःसम्भवादिभिर्निरूप्य प्रायणप्राप्तौ अलौकिकदेहेऽस्य भगवत्संसेवनरूपं फलम् * चिन्त्यत इति * । कथं भवतीति विचार्यते । कुतश्चिन्त्यत इत्याकाङ्क्षायां संशयं तद्बीजं च सूचयन्तः पूर्वपक्षमाहुः । * तत्र त्वित्यादि * । * ज्ञानपूर्वकत्वं भक्तेरावश्यकमिति * । "तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव । ज्ञानविज्ञानसहितो

या अपि स्वकृतत्वात्तामनुल्लङ्घ्यैव भगवता फलं दीयते । तच्च, नाऽभुक्तं क्षीयते । तद्भोगानुकूलकर्मणा स्वसजातीयतत्सन्तानजननाद् अनिर्मोक्ष एव सर्वस्य सम्पद्यते । नच प्रायश्चित्तवज्ज्ञानस्य कर्मनाशकत्वं वक्तुं शक्यम् । तद्वत्तस्य तदुद्देशेनाविहितत्वात् । तथा कथने चान्योन्याश्रयः । दुरितस्य चित्ताऽशुद्धिहेतुत्वेन तन्नाशे ज्ञानोदयो यतोऽतो मर्यादामार्गे मुक्तिरनुक्तविषयेति प्राप्त उच्यते । तदधिगमे ब्रह्मज्ञाने सति तज्ज्ञानस्वभावादेवोत्तराऽघस्याश्लेषोऽसम्बन्धः पूर्वस्य तस्य विनाशो भवतीत्यर्थः ॥ अत्रोत्तर-

---

भज मां भक्तिभावत"इति भगवद्वाक्यात् तथा । * दीयत इति * । मर्यादामार्गे दीयते । * तच्चेति * । कर्म च । प्रायश्चित्तवज्ज्ञानस्य पापनाशकत्वाऽङ्गीकारे दूषणान्तरमाह । * तथेत्यादि * । अन्योन्याश्रयं व्युत्पादयति । * दुरितस्येत्यादि । * तथाच ज्ञानोदये दुरितक्षयो, दुरितक्षये च ज्ञानोदय इत्यन्योन्याश्रय इत्यर्थः । * अनुक्तिविषयेति * । तूष्णीम्भावविषया, अशक्यवचनेति यावत् । तथाच मर्यादामार्गे सर्वमर्यादारक्षणात् कर्ममर्यादाया अपि रक्षणीयतयोक्तप्रकारेण ज्ञानानुदये भक्त्यभावान्मोक्षरूपफलाभावः ? उत, यतो वाचो निवर्त्तन्त इति ज्ञानिनमुपक्रम्य, एतꣳ ह वा व न तपति किमहꣳ साधु नाकरवं किमहं पापमकरवमिति ज्ञानस्य बलवत्ताश्रावणात्तेन तन्नाशे भक्त्युदयात् फलं भवति ? इति संशये उक्तरीत्या मर्यादारक्षणावश्यकतया तूष्णीम्भाव एव शरणमिति प्राप्ते इत्यर्थः।सिद्धान्तं वदन्तः सूत्रं व्याचक्षते *तदधिगम इत्यादि * अत्राश्लेषपदार्थोऽसम्बन्धपदेन विवृतस्तं निर्णेतुं व्युत्पादयन्ति * अत्रेत्यादि * एतत्सूत्रार्थविचारेऽनुत्पन्नस्याश्लेष इति नार्थः । श्लिष आलिङ्गन इति धातोः संयोगविशेषार्थकतया गुणरूपस्य पापस्यात्मनि समवेतत्वेन संयोगस्य मूलत एवाभावादनश्यति च पापे समवायाऽभावस्य वक्तुमशक्यत्वाद् उत्पन्नस्य पापस्या ऽश्लेष इति नाऽर्थः, किन्तु तस्य पापस्यात्मनि लिङ्गविशिष्टे जीव एवोत्पत्तेरुत्पन्न-

स्योत्पन्नस्याश्लेष इति नार्थस्तस्यात्मन्येवोत्पत्तेस्तदातिरिक्तस्य श्लेषस्याभावादतोऽनुत्पत्तिरेवार्थः । नचैवं मर्यादामार्गीयत्वभङ्गः । साधनं विना स्वस्वरूपबलेनैव कार्यकरणं हि पुष्टिरिह तु नियतकर्मविरोधित्वस्वभावेन ज्ञानेनैव तथा सम्पत्तेः । अत एव, तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इति श्रुतिरग्निदृष्टान्तमाह । स्मृतिरपि "यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा" इति । सर्वं पाप्मानं तरति, तरति ब्रह्महत्यां योऽश्वमेधेन यजत इत्यादिश्रुतिभ्यस्त्वयापि न तद्भोगनियमो वक्तुं शक्यः । एतेनाभुक्तस्याऽक्षयाद्भोगे च कर्मान्तरजननान्मोक्षासम्भव इति निरस्तं वेदितव्यम् । नचान्योन्याश्रयः । अनाद्यविद्याजनितसंसार-

---

कार्यसमावायातिरिक्तस्य श्लेषस्याभावात् । अत उक्तानुपपत्तिरेवाऽर्थः । यथा पुष्करपलाश आपो न श्लिष्यन्त इति श्रुतावपि पापानुत्पत्तिरेवार्थ इत्यर्थः । नच श्रौतदृष्टान्तानुरोधाल्लिङ्गशरीरे उत्पन्नस्य जीवे असम्बन्ध इत्येवार्थो युक्तो न पूर्वोक्त इति शङ्क्यम् । तेन भवत्यसङ्गो ह्ययं पुरुष इति श्रुतेस्तस्य सदैवाऽसङ्गत्वेनैवं विदीतिविशेषणवैयर्थ्यप्रसङ्गात् । नच लिङ्ग उत्पन्नं लिङ्ग एव न श्लिष्यत इत्यपि युक्तम् । दृष्टान्तवैषम्यस्यात्रापि तुल्यत्वात् । अतः पापस्यासम्बन्धमात्रमेव श्रुतौ विवक्षितं, न तु तस्य पूर्वं सत्ताऽपीति पूर्वोक्तमनवद्यम् । मर्यादाभङ्गमाशङ्क्य समादधते । * नचैवमित्यादि * । * एवमिति * । दुष्कर्मणो दुरदृष्टानुत्पादकत्वे । * तथा सम्पत्तेरिति * । कर्मासम्बन्धसम्पत्तेः । तथाचेयमपि मर्यादैवेति न तद्भङ्ग इत्यर्थः । * अत एवेति * । मर्यादाभङ्गाभावादेव । तद् यथेषीकातूलमिति श्रुतिस्तु छान्दोग्ये वैश्वानरविद्यायां द्रष्टव्या । नाभुक्तं क्षीयते कर्मेति नियमवादे श्रुतिविरोधरूपं दूषणान्तरमाहुः । * सर्वमित्यादि * । * एतेनेति * । अश्वमेधरूपानिर्वेशादभुक्तस्यापि दुष्कर्मणः क्षयश्रावणेन । अन्योन्याश्रयं परिहरन्ति । * नचान्ये-

वासनात्मिका हि सा । सा च गुरूपसत्तिश्रवणमननविध्युपासनादिरूपया ज्ञानसामग्र्यैव, नाश्यते । अविद्या परं ज्ञानेन नाश्यत इति क्व तत्प्रसङ्गः । ज्ञानसामग्र्या बलिष्ठत्वात्कर्मणो दुर्बलत्वान्न तत्प्रतिबन्धकत्वमिति ज्ञाननाश्यत्वबोधकश्रुतिस्मृतिमता त्वयाऽप्युररीकार्यम् । इममेव हेतुमाहाचार्यस्तद्व्यपदेशादिति ॥ १३ ॥

इतरस्याऽप्येवमसंश्लेषः पाते तु ॥ १४ ॥

पापस्य शास्त्रविरोधित्वेन शास्त्रीयज्ञानेन समं विरोधो भवतु

———

त्यादि * । * सेति * चित्ताशुद्धिः * क्व तत्प्रसङ्ग इति * अन्योन्याधीनोत्पत्तिकत्वे ह्यन्योन्याश्रयः । इह तु श्रवणादिरूपसामग्र्या ज्ञानोदयस्तयैव च चित्ताशुद्धिनाश इति नान्याधीनोत्पत्तिकत्वमतः क्वाऽन्योन्याश्रयप्रसङ्गः । ननु तथाप्यभुक्तेन कर्मणा ज्ञानसामग्रीबन्धो भवत्विति चेत्तत्राहुः * ज्ञानसामग्र्या इत्यादि * । यदि हि कर्ममात्रमभुक्तं न क्षीयेत तदा प्रायश्चित्तविधिरनर्थकः स्यात् । यदि चाक्षीयमाणं स्वसजातीयसन्तानमुत्पादयेत् तदा ज्ञानसाधने प्रवृत्त्यनुपपत्त्या ज्ञानसामग्रीविधिरानर्थक्यमापद्यते । अतस्तदभावाय प्रारब्धस्यैवाभुक्तस्याक्षयः क्रियमाणसंचितयोस्तु प्रायश्चित्तादिना क्षय इत्यवश्यमङ्गीकार्यम् । एवं सति प्रारब्धं भुञ्जानस्यापि क्रियमाणसञ्चितयोः क्षये ज्ञानसामग्र्या बलिष्ठत्वात्तयैव चित्ताशुद्धिनिवृत्तौ तत्पोषकस्य कर्मणो निरालम्बनतया दुर्बलत्वान्न सामग्रीप्रतिबन्धकत्वमिति त्वयाऽपि श्रौतवादिनाङ्गीकार्यम् । इममेव हेतुं पूर्वपक्षिबोधनाय, तद्व्यपदेशादिति पदेनाह । तस्मान्न कोऽपि दोष इत्यर्थः ।

अश्लेषश्रुतिस्तु, यथा पुष्करपलाश आपो न श्लिष्यन्त इति छान्दोग्ये उपकोसलविद्यास्था बोध्या। साऽत्र न लिखिता। सहकारित्वसूत्रे ज्ञानस्य कर्मस्वभावनाशकताया व्युत्पादिततया तत एव निर्वाहादिति ॥ १३ ॥

इतरस्याऽप्येवमसंश्लेषः पाते तु॥सूत्रमवतारयन्ति । * पापस्येत्यादि

नाम । धर्मस्यातथात्वेनाविरोध एवेत्याशङ्कानिरासाय पूर्वन्याया-
तिदेशमाह । इतरस्य पुण्यस्याप्येवं, पूर्वस्य नाश उत्तरस्याश्लेष इ-
त्यर्थः । अतिदेशाद्धेतुरपि स एव ज्ञेयः । तथाहि । उभे उ हैवैष
एते तरति । क्षीयन्तेचास्य कार्माणीति सामान्यवचनाज्ज्ञानाग्निः
सर्वकर्माणीति स्मृतौ सर्वशब्दाच्च तथा । अथेदं शङ्क्यते । मर्यादा-
मार्गीयत्वाज्ज्ञानानन्तरं भरतवत् सङ्गदोषेण भगवद्भावाच्च्युतौ
सङ्गजदोषोत्पत्तिवदग्रे विहितनिषिद्धकर्मणोरप्युत्पत्तिर्वक्तुं शक्ये-
ति ज्ञानस्य न सर्वात्मना कर्मविरोधित्वमिति । तत्र निर्णयमाह ।
पाते । भक्तिमार्गे भगवद्भावाच्च्युतिः पात इत्युच्यते । तुरप्यर्थे ।
अपिशब्दे वाच्ये व्यवच्छेदार्थकतुशब्दोक्त्याऽस्मिन्मार्गे पापस्य
व्यवच्छेद एव । न कर्हिचिन्मत्पराइति वाक्यात् । परन्तु मर्यादा-
मार्गीयत्वात् प्रारब्धभोगार्थं प्रभुश्चेत्तथा करोति तद्भावे पूर्णे सति
तद्भोगोऽसम्भावित इति तदैवं भवतीति व्यासाभिप्रायो ज्ञायते ।

इत्याशङ्कानिरासायेति * । इति हेतोः पूर्वपुण्यस्यानाश उत्तरस्य
च संश्लेषो भवत्विति शङ्कानिरासाय ।
ननु हेतोरकथनात् कथं पुण्यस्य तथात्वं ज्ञेयमित्यत आहुः * अति-
देशादित्यादि * । उभे ह्येवैष इति श्रुतिस्तु शारीरब्राह्मणस्था । उभे
ह्येवैष एते तरत्यऽमृतः साध्वसाधुनी इत्यादि । द्वितीया तु मुण्ड-
कस्था । सूत्रशेषमवतारयन्ति । * अथेदमित्यादि * । * सङ्गज-
दोषोत्पत्तिवदिति * । ज्ञानानन्तरं यथा सङ्गजदोषोत्पत्तिस्तथेत्य-
र्थः । * अग्र इति * । ज्ञानानन्तरम् । व्याकुर्वन्ति । * भक्त्या-
दि * । वाक्यं तु तृतीयस्कन्धे कापिलेय" न कर्हिचिन्मत्पराः शा-
न्तरूपे नङ्क्ष्यन्ति नोऽनिमिषो लेढि हेतिः । येषामहं प्रिय आत्मा सु-
तश्च सखा गुरुः सुहृदो दैवमिष्टम्" इति । अत्र मत्परा न नङ्क्ष्यतीति
कथनात् पातव्यवच्छेदलाभः । * तथा करोतीति * । भक्तिभावं
प्रतिबध्नाति । तदर्थं प्रतिबन्धकरणे हेतुः * तद्भाव इत्यादि * ।
* तदैवं भवतीति * । यदा भक्ति[illegible]वप्रतिबन्धस्तदा भरतवदन्या-

तथाच तस्मिन् सत्यप्युत्तरस्य कर्मणोऽसंश्लेष एवेत्यर्थः । पूर्वसूत्र एवमेवाश्लेषशब्दस्य व्युत्पत्तेः । अतिदेशस्यैवम्पदेनैव प्राप्तेः सर्वं सूत्रं तत्परत्वेन न व्याख्येयम् । पातशब्दस्य देहपातं तुशब्दस्यावधारणमर्थमुक्त्वा देहपाते मुक्तेरावश्यकत्वावधारणं वाक्यार्थ इति चोक्तिर्न साधीयसी । मुक्तिप्रापकपदाभावाद्, भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यत इत्यग्रे वक्तव्यत्वाच्च ॥ १४ ॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

ननु देहस्य कर्मजन्यत्वात्तन्नाशे तन्नाशस्यावश्यकत्वाच्च ब्रह्मविदः प्रवचनानुपपत्तिः।एवं सति ब्रह्मजिज्ञासोर्गुरूपसत्त्यादि-

---

सत्त्यादिर्भवति । * असंश्लेष एवेति * । तदुपाख्याने, स च तदा पितृसन्निधावेवासध्रीचीनमिव स्म करोतीति वाक्येन तादृशकर्मबाधनादग्रे च जीवन्मुक्तत्वबोधनादसंश्लेषः । * एवमेवेति * । अनुत्पत्तिरूपतया ।
ननु सर्वस्य सूत्रस्यातिदेशपरत्वे को दोषो, येन एवं विभज्य व्याख्यायत इत्यत आहुः । * अतिदेशस्येत्यादि * । * तत्परत्वेनेति * अतिदेशपरत्वेन । तथाच शेषवैयर्थ्यमेव दोष इत्यर्थः।एवं मर्यादामार्गेऽपि ब्रह्मज्ञानोत्तरं भक्तौ यदा प्रतिबन्धस्तदापि प्रारब्धमात्रस्यैव भोगो, न तु क्रियमाणसञ्चिताभ्यां दुरदृष्टोत्पत्तिरित्यर्थः सिद्धः । अत्रान्येषां व्याख्यानं पातशब्दस्येत्यादिनाऽनूद्य दूषयन्ति । * उक्तिर्न साधीयसीत्यादि * । ननु सूत्रे मुक्तिप्रापकपदाभावेऽपि फलप्रकरणत्वात्तदनुरोधेन तथा कल्पने को दोष इत्यत आहुः । * भोगेनेत्यादि * । तथाच तैः सम्पद्यत इत्यस्य मुच्यत इति व्याख्यानात्तस्या मुक्तेरत्र सिद्धौ तन्मतेऽग्रिमसूत्रान्तरे भोगेन कर्मक्षपणानन्तरं ब्रह्मसम्पत्तिरूपमुक्तेरेव व्याख्यानात्तद्वैयर्थ्यमेव दोष इत्यर्थः ॥ १४ ॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । * तन्नाशे तन्नाशस्येति * कर्मनाशे देहनाशस्य । * एवं सतीति * ब्रह्मविदो देहनाशे सति * ।

साधनाऽसम्भवः । आचार्यवान् पुरुषो वेदेति श्रुतेस्तदभावेन ज्ञानमार्गोच्छेदेन भक्त्युच्छेदप्रसङ्ग इत्याशङ्क्य समाधत्ते।पूर्वे पूर्वसूत्राभ्यां ज्ञाननाश्यत्वेन ये मोक्ते पापपुण्ये ते नाशेषे, किन्त्वनारब्धं भोगायतनलक्षणं कार्यं याभ्यां ते एवेत्यर्थः । नन्वितरनिरपेक्षं हि ज्ञानं स्वशक्त्यैवाग्निरेध इव कर्माणि दहतीति पूर्वमुक्तं, तथा सत्यशेषमेव तद्दहतीति वक्तुं युक्तं, न तु सशेषम् । शक्तेरविशिष्टत्वात् । नच कर्मनाशेऽपि संस्कारवशात् कुलालचक्रभ्रमिवत्तद्वासनावशाद्देहादिसत्तया प्रवचनाद्युपपत्तिरिति वाच्यम् । ज्ञानस्य सर्वतो बलवत्त्वात् सवासनस्य तस्य नाशनात् । न हि महाशिलानिष्पाते चक्रभ्रमिरनुवर्त्तितुं शक्नोतीत्याशङ्क्यारब्धकार्यादहने हेतुमाह—तदवधेः।तज्ज्ञानेनारब्धकार्याऽदहनं यत् तदखिलकारणकारणत्वेन अखिलस्य पूर्वावधिरूपभगवदिच्छालक्षणाद्धेतोरित्यर्थः । यत्र तस्याऽपि दहनेच्छा तत्र तथैवेति निगूढाशयः । अत एवाग्रे तथा

तदभावेनेति * आचार्याऽभावेन । * भक्त्युच्छेदप्रसङ्ग इति * । निरुपधिस्नेहात्मिका हि भक्तिरात्मत्वेन ज्ञाने सति भवति । आत्मत्वेन ज्ञानं च परम्परया आचार्याधीनमतस्तदभावे तत्प्रसङ्ग इत्यर्थः। मुक्त्युच्छेदप्रसङ्ग इति वा पाठः ।

व्याकुर्वन्ति । * पूर्वेत्यादि * । * नाशेषे इति । न यावत्तावच्छिन्ने नश्येते इति शेषः । * ते एवेति * । दह्यंत इति शेषः । तथाचापरोक्षेणापि ज्ञानेनारब्धकार्यमेव कर्म दह्यत इति शरीरारम्भकस्य कर्मणः सत्त्वेन शरीरस्यापि सत्वान्न प्रवचनाद्यनुपपत्तिरित्यर्थः । हेतुं व्याख्यातुं सूत्रशेषमवतारयन्ति । * नन्वित्यादि * । न तु सशेषमिति*न तु प्रारब्धकर्मरूपं शेषं स्थापयित्वा । हेतुं व्याकुर्वन्ति । * तदित्यादि * । * तत्र तथैवेति * । तादृशस्थले प्रारब्धकर्मणोऽपि दाह एव । अत्र गमकमाहुः । * अत एवाग्रे तथा वक्ष्यत इति * अतोऽन्यापीति सूत्रे वक्ष्यत इत्यर्थः । मर्यादामार्गे

वक्ष्यते । अत एव श्रीभागवते मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशित इति, उपभोगेन कर्मारब्धं व्यपनयन्निति च भरतं प्रति वचनं गीयते । एवं सति मणिमन्त्रादिप्रतिबद्धशक्तेरग्नेरिव ज्ञानस्याप्यदाहकत्वे न काचिद्धानिरिति सर्वमनवद्यम् । इच्छाप्रतिबद्धतादशायां न प्राचीना दशास्तीति तद्व्यवच्छेदज्ञापनाय तुशब्दः । एतेन भगवद्भावस्य सर्वतो बलवत्त्वात् कथं तस्य पात इति शङ्का निरस्ता । भगवदिच्छाया मूलकारणत्वेनोक्तेस्तस्याः सर्वतो बलिष्ठत्वात् । तथेच्छा च स्वकृतमर्यादापालनाय पुष्टावङ्गीकृतेन तथेति सर्वमनवद्यम् ॥ १५ ॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

ननु प्रारब्धं हि प्राचीनं, तन्नाशाय तद्भोग एव कर्त्तव्यो ब्रह्मविदा, न तु विहितमन्यदप्यग्निहोत्रादि । प्रयोजनाभावात् । दृश्यते च तादृशानां तत्करणमत उत्तरस्य कर्मणः संश्लेष आवश्यक इत्याशङ्क्य तत्प्रयोजनमाह । तुशब्दः शङ्काव्युदासकः ।

प्रारब्धकर्मसत्तायां मानमाहुः । * अत एवेत्यादि * । * भरतं प्रतीति * प्रतिर्लक्षणे । भरतं लक्षीकृत्य । अदाहकत्वे इति भिन्नं पदम् । तथेच्छेति प्रारब्धस्य भोगेनापनयनेच्छा । * न तथेति * । न तस्य भोगेनापनयेच्छा ॥

अन्ये तु–तदवधेरित्यस्य, तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति प्रारब्धस्य शरीरपातावधिश्रुतेरित्यर्थमाहुः । तत्रापि प्रवृत्तफलस्य कर्मणोऽनाशे हेतुस्तु मृग्यः । सोऽत्र सिद्धान्ते विवृत इति तन्मतेऽपि नातो विशेष इति बोध्यम् ॥ १५ ॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ सूत्रमवतार्य विवृण्वन्ति । * तुशब्द इत्यादि * । केचिदित्यादिना परमतमुपाक्षिप्य

अग्निहोत्रादिविहितकर्मकरणं तत्कार्यायैव भोगकार्याय प्रारब्धनाशायैवेत्यर्थः । येषामग्निहोत्रादिकारकं प्रारब्धमस्ति तैरेव तन्नाशाय भोगवत्तदपि क्रियते, न त्वतादृशैरत एव न सनकादीनां तथात्वम् । कुत एतत् ? तद्दर्शनात् । यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति श्रुतिः पूर्वकर्मणोऽग्रिमकर्महेतुत्वं दर्शयतीति नानुपपत्तिः काचित् । केचित्तु ज्ञानस्य यत्कार्यं तदेवाग्निहोत्रादेरिति तत्कार्यायेति पदस्यार्थं वदन्ति । स न साधुः । तदधिगम इत्युपक्रमाद् ब्रह्मविदः प्रारब्धात्मकप्रतिबन्धनाशे मोक्षस्य पूर्वज्ञानेनैव सम्पत्तेः कर्मणो वैयर्थ्यापातात् । तमेतं वेदानुवचनेनेत्यादिश्रुतिदर्शनं दर्शनपदार्थ इत्यपि पूर्वविरोधादुपेक्ष्यः ॥ १६ ॥

अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

तदेवं पूर्वसूत्रचतुष्टयेन मर्यादामार्गीयभक्तस्य मर्यादयैव मुक्तिप्रतिबन्धसम्भवस्तयैव तन्नाशश्चेति निरूपितम् । अथ पुष्टिमार्गीयस्य विनैव भोगं प्रारब्धं नश्यति न वेति विचार्यते । तत्र

दूषयन्ति । * स नेत्यादि * । *प्रारब्धात्मकप्रतिबन्धनाशे इति * । तस्य तावदेव चिरमिति श्रुतेस्तस्य नाशे । * पूर्वविरोधादिति *एतस्माद्वाक्यात्, पूर्वं मनसैवाप्तव्यं, मनसैवानुद्रष्टव्यमित्यवधारणश्रावणेन सूत्रकृतापि तदधिगमसूत्रे ज्ञानादेव कर्मनिवृत्तिकथनेन उक्तश्रुतौ च यज्ञादेर्विविदिषाफलकत्वस्य ज्ञानपर्यन्तत्वस्य वा बोधनेन तद्विरोधात् । नच सहकारित्वसूत्रविरोधः । प्रारब्धनाशकत्वेनापि तदुपपत्तेरविरोधात् ॥ १६ ॥ ६ ॥

अतोऽन्यापि ह्येकेषामुभयोः ॥ एतस्याधिकरणस्य न पूर्वशेषत्वमिति बोधनाय पूर्वोक्तमनुवदन्त एतदवतारयन्ति । * तदेवमित्यादि * । * अथेत्यादि च * । पूर्वपक्षमाहुः । * तत्रेत्यादि * ।

भोगैकनाश्यस्वभावत्वात्तस्य न तं विनाऽस्यापि तन्नश्यतीति प्राप्ते निर्णयमाह । एकेषां पुष्टिमार्गीयाणां भक्तानामुभयोः प्रारब्धाप्रारब्धयोर्भोगं विनैव नाशो भवति । कुत एतत्? तत्राह । अतः । श्रुतेः कर्मणो ज्ञाननाश्यत्वनिरूपिकायाः । ब्रह्मविद एव प्रवचनादिनिरूपणेन तदनाश्यप्रारब्धाख्यकर्माक्षेपकश्रुतेश्च । अन्यापि श्रुतिः । पठ्यते । तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां, द्विषन्तः पापकृत्यामिति । ज्ञानभोगाभ्यां कर्मनाशनिरूपकश्रुत्याऽस्याः श्रुतेर्विरोधपरिहारायावश्यं विषयभेदो वाच्यः । नच काम्यकर्मविषयेयं श्रुतिरिति वाच्यम् । तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशाविति सूत्रेणेतरस्याप्येवमितिसूत्रावयवेन चाऽविशेषेणारब्धातिरिक्तकर्म-

---

* तस्येति * । प्रारब्धस्य * । तं विनेति * । भोगं विना । * अस्यापीति * । पुष्टिमार्गीयस्यापि । व्याकुर्वन्ति । * एकेषामित्यादि * । * तदनाश्येति * । ज्ञानानाश्येत्यर्थः । तस्य पुत्रा इति श्रुतिस्तु शाट्यायनिनामस्ति ॥

ननु सूत्रे, एकेषामिति पदेन पुष्टिमार्गीया एव विवक्ष्यन्त इत्यत्र किं गमकमित्याकाङ्क्षायामन्यथानुपपत्तिं तथात्वेनोपपादयन्ति * ज्ञानभोगाभ्यामित्यादि * । अर्थस्तु प्रकटः ॥ अन्येतु, अतोऽग्निहोत्रादेर्नित्यात्मकर्मणोऽन्याऽप्यस्ति साधुकृत्या या फलमभिसन्धाय क्रियते । तस्या एष विनियोग उक्त इति व्याकुर्वन्ति । तथा सत्येवं नित्यकाम्यकर्मभेदेन श्रुत्योर्विषयभेदे सिद्धे विरोधाभावात् सूत्रे चैकेषामिति पदेन शाखिनां परामर्शादुभयोरित्यनेन जैमिनिबादरायणयोराचार्ययोः परामर्शाच्छ्रुतौ सूत्रे चानुपपत्त्यभावात् कथमधिकारिकृतविषयभेदावगमः, कथं च प्रारब्धकर्मणोऽत्र विषयत्वावगम इत्याकाङ्क्षायां तद् दूषयितुमाहुः । नचेत्यादि * । तथाचैवं नित्याग्निहोत्रादेरस्या विषये भेदितेऽपि, तदधिगमादिसूत्राद्विषयो न भिद्यत इति, तद्यथेषीकातूलं यथा पुष्करपलाश आपः, उभे ह्येवैष एते इत्येताभ्यो विषयभेदाभावात्तासां विरोधो दुष्परिहरः । नच

णोरखिलयोर्नाशनिरूपणात् । पापकृत्यायां काम्यत्वाऽसम्भवाच्च । तस्मादत्यनुग्रहभाजनस्य भक्तस्य स्वप्राप्तिविलम्बमसहिष्णुर्भगवान् अस्य प्रारब्धमेतत्सम्बन्धिगतं कृत्वा तस्य तेन भोगं कारयति । प्रारब्धं भोगैकनाश्यमिति स्वकृतमर्यादापालनाय न नाशयति । नच तयोरमूर्त्तत्वेनाकृताभ्यागमप्रसङ्गेन च नैवं वक्तुमुचितमिति वाच्यम् । ईश्वरत्वेनाऽन्यथापि करणसम्भवात् । मर्यादाविपरीतस्वरूपत्वात् पुष्टिमार्गस्य न काचनात्राऽनुपपत्तिर्भावनीया । तस्या अत्र भूषणत्वात् । अत एवैकेषामिति दुर्लभाधिकारः सूचितः ॥ १७ ॥

यदेव विद्ययेति हि ॥ १८ ॥

ननु यदेव विद्यया करोतीति श्रुत्या विद्यापूर्वकं कर्मकरणे

येषामश्लेषो व्याख्यातस्तेषां विद्यमानत्वादयं तेषां विनियोग इति विषयभेदात् सुपरिहर इति वाच्यम् । विद्यमानाश्लेषस्य प्रागेव दूषितत्वात् । ज्ञानोत्तरं स्वर्गादिलौकिककामनोत्पत्त्यसम्भवेन काम्यायाः साधुकृत्याया उत्पत्तेर्वक्तुमशक्यत्वाच्च । श्रुतौ पापकृत्याविनियोगस्याप्युक्तत्वेन तस्यां च फलाभिसन्धानासम्भवेन काम्यत्वासम्भवाच्च विषयश्रुतिविरोधोऽपि दुष्परिहरः । अतस्तदभावायावश्यमधिकारिभेदः प्रारब्धात्मककर्मविनियोगश्चाऽत्राभ्युपेयः । उभयपदे आचार्यद्वयग्रहणमप्यसङ्गतम् । सन्निधौ जैमिनेरश्रुतत्वात् । सामान्यशब्दस्य चोपस्थितार्थकत्वनियमेन बाधकं विना तत्त्यागायोगात् । अत उक्तरीत्यैव मन्तव्यमित्यर्थः । तदेतच्चतुर्थस्कन्धीये तत्त्वदीपप्रकाशे सम्यग् व्युत्पादितमिति प्रभुचरणैर्नात्रोक्तम् । सिद्धमाहुः । * तस्मादित्यादि * । पुनः किञ्चिदाशङ्क्य परिहरन्ति । * नच तयोरित्यादि * । तथाचेदं तवापि तुल्यमतः परिहारसाम्यान्न पर्यनुयोग उचित इत्यर्थः ॥ १७ ॥

यदेव विद्ययेति हि ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * ।

वीर्यातिशयः फलं श्रूयते। अतो ब्रह्मविद्यावतोऽपि तथात्वस्योचितत्वात् तदुत्तरस्याश्लेष इति यदुक्तं तन्नोपपद्यत इति प्राप्ते, आह। यदेवेति । हि यस्माद्धेतोस्त्वया यदेव विद्यया करोति श्रद्धयोपनिषदेति श्रुतिरेव ब्रह्मविदोऽपि कर्मोत्पत्तिप्रसञ्जिकात्वेनोदाहृता। सा तु न तत्समर्था । तथाहि । ओमित्येतदक्षरमुद्गीथमुपासीतेत्युपक्रम्य तस्य रसतमत्वं मिथुनरूपत्वमनुज्ञाक्षरत्वं त्रयीप्रवृत्तिहेतुत्वं च निरूप्यैतदग्रे यदेव विद्ययेत्याद्युक्त्वा, इति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवतीत्युपसंहारादुद्गीथोपासनाविषयमेव, यदेव विद्ययेति वाक्यमिति ज्ञायते । तेनोक्तरसतमत्वादिप्रकारकोपासनानां मध्ये यदेव विद्यया करोति तदेव वीर्यवत्तरं भवतीति तदर्थ इति न ब्रह्मविद्यागन्धोऽपीति न सा शङ्काऽत्र सम्भवतीत्यर्थः । यद्वा । उक्ताशङ्कानिरासायैवाह । यदेवेति । ब्रह्मविद्धि प्रारब्धक्षयायैव कर्म कुरुते तत्त्वन्यकृतात् कर्मणः सकाशात् सवासनतन्नाशनाद्

---

* तथात्वस्येति * । कर्मणो वीर्यवत्त्वस्य । तथाच यदि ब्रह्मविद्यावतः कर्मसंसर्गो न स्यात्तदेयं श्रुतिर्विद्यया वीर्यवत्तां कर्मणो न श्रावयेत् । अतस्तदन्यथाऽनुपपत्त्या अश्लेषादिवाक्यानां विद्यास्तावकत्वमेवाङ्गीकार्यमिति पूर्वोक्तं नोपपद्यत इत्यर्थः । परिहारं वक्तुं सूत्रं व्याकुर्वन्ति । * हीत्यादि * । * तेनेति * । वाक्यस्य प्रकरणावरुद्धत्वेन । तथाचानुपपत्त्यभावान्नैतेषां स्तावकत्वं शक्यवचनमतः पूर्वोक्तं साध्वेवेत्यर्थः । अस्मिन् पक्षे सूत्रयोजना तु, यदेव विद्ययेति वाक्यं हि यतो हेतोः, इति प्रकरणावरुद्धं, तथाच न ब्रह्मविद्यावतः कर्मप्रसञ्जिकामित्यर्थः। श्रद्धोपनिषदोः साधारणत्वात् तत्समभिव्याहृताया विद्याया अपि साधारण्यमेवोचितं, न तु सङ्कोचनमिति कश्चिच्छङ्केत, तदर्थं प्रकारान्तरेणार्थमाहुः । *यद्वा उक्ताशङ्केत्यादि* । * सवासनतन्नाशनादिति * । सवासनप्रारब्धनाशनात् । तथाच सङ्कोचाभावेऽपि पूर्वोक्तार्थसिद्धिरप्रत्यूहेति न तेषां स्तावकत्वमि-

वीर्यवत्तरं भवत्येवेति नानुपपत्तिः काचिदित्यर्थः। यद्वा। ननु पुष्टिमार्गीयस्य प्रारब्धस्यापि भोगं विनैव नाश इति श्रुत्वाऽसम्भावनां कुर्वाणं प्रति कैमुतिकन्यायेन तत्परिहारमाह। यदेवेत्यादि। जीवनिष्ठा विद्या हि भगवज्ज्ञानशक्तेरंशभूता। एवं सति यत्र धर्मसम्बन्धिसम्बन्धादन्येभ्योऽतिशयं कर्मणि वदति श्रुतिस्तत्र साक्षाद्धर्मिसम्बन्धेऽतिशयितकार्यसम्पत्तौ कथमसम्भावना कर्त्तुमुचितेति निगूढाशयः। अत एव हेतुवाची हिशब्दः॥ १८॥

भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते॥ १९॥

पुष्टिमार्गीयफलप्राप्तौ प्रतिबन्धाभावं सोपपत्तिकमुक्त्वा तत्प्राप्तिप्रकारमाह। इतरे। अग्रे प्राप्यालौकिकदेहाद्भिन्ने स्थूललिङ्गशरीरे क्षपयित्वा दूरीकृत्य, अथ भगवल्लीलोपयोगिदेहप्राप्त्यनन्तरं भोगेन सम्पद्यते। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति श्रुत्युक्तेन भोगेन सम्पद्यत इत्यर्थः। श्रुत्यर्थस्त्वानन्दमयाऽधिकरणे निरूपितः। अलौकिकत्वं विनोक्तदेहं विना चोक्तफलप्राप्त्यव्यवच्छेदकस्तुशब्दः॥ १९॥

इति श्रीवेदव्यासमतवर्त्तिश्रीवल्लभाचार्यविरचिते
ब्रह्मसूत्राऽणुभाष्ये चतुर्थाऽध्यायस्य
प्रथम पादः॥ ४॥ १॥

त्यर्थः। एतेन जन्मादिसूत्रभाष्ये व्युत्पादितं पूर्वोत्तरकाण्डयोः परस्पराङ्गत्वमपि समर्थितं ज्ञेयम्। पूर्वोक्तमर्थं सगृह्णन्त एतत्सूत्रस्य तात्पर्यान्तरमाहुः। * यद्वा नन्वित्यादि *॥ १८॥

भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते॥ भाष्यमत्रातिरोहितार्थम्। अत्र क्षपणं च कुरुक्षेत्रप्रसङ्गे व्रजभक्तानां जीवकोशध्वंस-

रूपम् । भोगश्च तदनन्तरदर्शनादिरूपो जीवद्दशायामेव भवतीत्य-वान्तरफलपरिममार्गिरिति मम प्रतिभाति । अत्यन्तानुग्रहे तु स्थूल-स्य लोकवत् क्षपणं, सूक्ष्मस्य, वाङ् मनसीतिवक्ष्यमाणरीत्या तनस्त-दव्यवहितमेवालौकिकदेहप्राप्त्या भोगसम्पत्तिरिति ज्ञेयम् । अत्र मतान्तरीयव्याख्यानस्यादूषणात् तदपि ज्ञानमार्गीयमर्यादाभक्तिमा-र्गीयपरतया संग्राह्यमिति सूचितं ज्ञेयम् ॥ १९ ॥ ७ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य
श्रीपीताम्बरात्मजस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे
चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

अथ चतुर्थाध्यायस्य द्वितीयः पादः ।

वाङ् मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

पूर्वपादे लौकिकशरीरे क्षपयित्वा अलौकिकं तत्प्राप्य फलेन सम्पद्यत इति निरूपितम् । अथात्रेदं चिन्त्यते । भक्तस्य सूक्ष्मशरीरस्य क्षपणं नाम किं तत्स्वरूपनाशनमुत मणिस्पर्शादयश्चामीकरत्वमिव तस्यैवालौकिकत्वसम्पादनं भगवदनुग्रहादिति । अत्रोत्तर एव पक्षः साधीयानिति भाति । तथाहि । यथा पूर्वं संसारिण एव जीवस्य तदनुग्रहात् पूर्वावस्थापगमो मुक्त्यवस्था चोच्यते तथात्राऽपि वक्तुमुचितत्वात् । न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्त इति श्रुतिस्तु जीवस्य सायुज्यमुक्तिकाले तत्प्राणादीनामपि तथैवाहात एवाग्रे ब्रह्मैव सन् ब्रह्माप्येतीत्युच्यते ।

वाङ् मनसि दर्शनाच्छब्दाच्च ॥ अथ द्वितीयपादं व्याचिख्यासवः पदार्थानां तत्सङ्गतेश्च पूर्वं कारिकाभिर्निरूपितत्वादिहाऽधिकरणसङ्गतिं वक्तुम्, अतीतपदान्ते यन्निरूपितं तदनुवदन्ति * पूर्वपाद इत्यादि * । * अलौकिकं तत् प्राप्येति * । अलौकिकं देहं लब्ध्वा । अलौकिकदेहस्वरूपं त्वग्रे वक्तव्यम्, ब्राह्मेण जैमिनिरित्यादिभिः । प्रकृतं वक्तुमाहुः । * अथेत्यादि * । तदनन्तरमवसरसङ्गत्या एतत्पादारम्भे प्रकृतं वक्तुं तदुपोद्घाततया इदं वक्ष्यमाणं विचार्यत इत्यर्थः । तदाहुः * भक्तेत्यादि * । एवं संशयमुक्त्वा पूर्वपक्षमाहुः । * अत्रेत्यादि * । * तथात्रापि वक्तुमुचितत्वादिति * । सूक्ष्मालिङ्गशरीरात्मके प्राणे इन्द्रियादिष्वपि द्वितीयस्य चतुर्थपादे तथा प्राण इत्यत्र जीवातिदेशेन जीववन्नित्यत्वाद्यङ्गीकारालौकिकावस्थापगमस्याऽलौकिकावस्थाप्राप्तेश्च वक्तुमुचितत्वात् । * तथैवाहेति * । कारणभूते सति लयमाह । तथाच पुष्टिमार्गे तेषाम-

पुष्टिमार्गीयस्योक्तमुक्त्यभावान्नेयं तद्विषयिणीति प्राप्ते प्रतिवदामः। ब्रह्मांशत्वेन जीवस्यानन्दात्मकत्वान्निर्दोषस्वरूपत्वान्नित्यत्वाच्च दोषाणां चागन्तुकत्वात्तदपगमे तस्य तथात्वमुचितम् । प्राणादयस्तु न तादृशा इति तदृष्टान्तेनात्रापि तथात्वं न वक्तुं शक्यम् । देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनामिति श्रीभागवतवाक्याच्च ।

ऽलौकिकत्वापादनपक्ष एव साधीयानित्यर्थः । सिद्धान्तमाहुः * ब्रह्मांशत्वेनेत्यादि * । अयमर्थः । श्रुतौ हि त्रिविधा सृष्टिरभिप्रेतेति ज्ञायते । ब्रह्मवित्प्रपाठके आनन्दमयस्य ब्रह्मत्वपरिचायनार्थं, तस्माद्वा एतस्मादित्यादिना, स आत्मानꣳ स्वयमकुरुतेति वारत्रयं कथनात् । श्वेतकेतूपाख्याने च कार्यस्य कारणानन्यत्वे, मृत्पिण्डनखनिकृन्तनलोहमण्यात्मकदृष्टान्तत्रयकथनाच्च तासु विधासूच्चनीचभावोऽपि मृदपेक्षया, अयसस्तदपेक्षया लोहस्योत्कृष्टतायाः सर्वजनीनत्वात् । ब्रह्मवित्प्रपाठकेऽपि सोऽकामयतेत्यादिना पूर्वमुक्तायाः सृष्टेरसद्वा इदमग्र आसीदित्यनेनासत्त्वकथनपूर्वकं तदात्मानꣳ स्वयमकुरुतेति सृष्टेः सुकृतत्वश्रावणाच्च । तदेतत्सृष्टित्रयं तदुत्कर्षादिकं च पुष्टिप्रवाहमर्यादाग्रन्थे आचार्यचरणैरिच्छामात्रेण मनसेत्यत्र सूचितम् । तत्प्रपञ्चश्चास्मत्पितृचरणकृतात्तद्विवरणादवगन्तव्यः । एवं सति यत्र पुष्टिमार्गीया जीवा मार्यादिकसृष्टिपातिनस्तत्र ब्रह्मांशत्वेन जीवस्यातिरोहितानन्दत्वं तत्र स्वानन्दात्मकत्वान्निर्दोषस्वरूपत्वाच्च जीवस्य तथात्वं युक्तम् । प्राणादयस्तु सृष्ट्यन्तरस्थाः असद्वा इदमग्र आसीत्तदाहुः किं तदसदासीदित्यृषयो वा व तेऽग्रे असदासीत्तदाहुः के ते ऋषय इति प्राणा वा ऋषय इति वाजिनां श्रुतौ प्राणा असत्पदेनासाधुतया श्राविता इति पुष्टिसृष्टिस्थत्वाभावान्न तादृशाः । धर्मान्तरैर्जीवतौल्येऽपि स्वरूपतो न जीववन्निर्दुष्टा इति जीवदृष्टान्तेन प्राणादिरूपे सूक्ष्मशरीरे लौकिकत्वापगमेनालौकिकत्वं न वक्तुं शक्यम् । अयं च पक्षो, देहेन्द्रियासुहीनानामिति सप्तमस्कन्धवाक्येनोपष्टभ्यते । अतस्तत्त्यागपक्ष एव साधीयानित्यर्थः ।

नच लौकिकत्वविशिष्टदेहादिरत्र निषिद्ध्यत इति वाच्यम् । सामान्यनिषेधे बाधकाभावात् । नच तदनुभव एव बाधक इति वाच्यम् । भगवत इव तदीयानामपि तेषां तथात्वे बाधकाभावात् । नन्वागन्तुकत्वमेव बाधकमिति चेन्नैवम् । यथा व्यापिवैकुण्ठस्याऽक्षरात्मकत्वेनाऽनागन्तुकत्वेन नैसर्गिकतद्गताऽखिलवस्तुरूपत्वेन सामीप्यादिमुक्तिं प्राप्नुवतां भक्तानां देहेन्द्रियादिरूपमप्यनागन्तुकमेव वैकुण्ठप्राप्तिमात्रेण शुद्धजीवानां सम्पद्यते । तदीयत्वेन तत् फलतीति यावत् । तथा पुरुषोत्तमलालीया अपि पुरुषोत्तमात्मकत्वात्तत्राङ्गीकारमात्रेण प्राचीनाशेषप्रावाहिकधर्मनिवृत्तौ शुद्धजीवस्य पुरुषोत्तमलीलात्मकदेहादिरपि तदीयत्वेन सम्पद्यत इति नाऽनुपपन्नं किञ्चिदित्यवहितोऽवेहि । अयमेवार्थो वाजसनेयिशाखायामथाकामयमान इत्युपक्रम्यात्मकाम आप्तकामो भवति, न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येती-

---

उक्तवाक्ये एव किञ्चिदाशङ्क्य परिहरन्ति । * नच लौकिकेत्यादि * । * अत्रेति * । एतद्वाक्ये । * तदनुभव इति * । देहाद्यनुभवः । * तथात्व इति * । ब्रह्मात्मकत्वे । पुनः किञ्चिदाशङ्क्य परिहरन्ति । * नन्वित्यादि * । * नैवमित्याद्यवेहीत्यन्तं च । * अनागन्तुकमेवेति * । यथा लौकिकेषु देहादिषु प्रकृतिर्मूलकारणतयाऽनुसीव्यति, एवं जीवेऽक्षरमन्वेति । यथा प्रदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपा इति, यदक्षरं परमं प्रजा इति च श्रुतेः । तच्च सर्वत्र सर्वात्मकमिति जीवांशिभूतस्य तस्य आकारो जीवरूपेऽशे नैसर्गिक एवेत्यनागन्तुकम् । * तदीयत्वेन तत्फलतीति * । अग्रे, ब्राह्मेण जैमिनिरित्यत्राङ्गीकरिष्यमाणत्वादावरणभूतलौकिकापगमे भगवद्दत्तस्तदीयत्वेन फलतीत्यर्थः । दार्ष्टान्तिके तु बादरायणसूत्रोक्तः पुरुषोत्तमात्मकस्तदीयत्वेन सम्पद्यत इति ज्ञेयम् । एतं पक्षं श्रुत्योपष्टम्भन्ति । * अयमेवेत्यादि * । श्रुतिं व्याकुर्वन्ति ।

स्न्तेन वाक्येन निगद्यते । अत्र प्राणशब्देन प्राणाः सर्वेन्द्रियाणि चोच्यन्ते । आत्मकामशब्देन भगवद्वाचकात्मपदग्रहणेन भक्तस्य स्नेहातिशयजनितप्रभुदिदृक्षात्त्र्यतिशयस्तादृशो येन मरणमेव सम्पद्येत, यदि प्रभुप्राकट्ये क्षणमपि विलम्बः स्यात् । अतो भगवत्प्राकट्येनैवात्मस्थितिरिति ध्वन्यते । भक्तिमार्गे प्राकट्यस्यैव परमफलत्वेन तद्दर्शनेनाऽऽप्तकामो भवति । ततः साक्षादाश्लेषादिकामनायां प्राचीनदेहप्राणादेस्तदयोग्यत्वात्ते तत्रैव लीना भवन्तीति । बहिःप्रकटस्यैवाऽन्तरपि प्राकट्यादुत्क्रमणाभाव उच्यते । आत्मातिरिक्तस्य गतिमुक्त्वा तस्य तामाह—ब्रह्मैव सन् ब्रह्माप्येतीत्यनेन । उक्तरीत्या पुरुषोत्तमात्मकतल्लीलोपयोगिदेहेन्द्रियादिसम्पत्त्या ब्रह्मैव सन्न तु ब्रह्मातिरिक्तदेहादिमानपि तादृशः सन् ब्रह्म बृहत्वाद् बृंहणत्वात् पुरुषोत्तमस्वरूपं प्राप्तो भवतीत्यर्थः । अन्यथा जीवस्य ब्रह्मांशत्वेनानन्दांशाविर्भावेन च ब्रह्मत्वे प्राणादिलयोक्त्या ब्रह्म. तदितरव्यवच्छेदे चानुक्तसिद्धे सति ब्रह्मैव सन्निति वा न वदेत् । अत एवैतदग्रे श्लोकोक्तिः—अथ मर्त्योऽमृतो

---

* अत्र प्राणेत्यादि * । * ध्वन्यत इति * । तात्पर्यवृत्त्या बोध्यते । तात्पर्यवृत्तिस्तु मया प्रस्थानरत्नाकरे व्युत्पादिता ततो ज्ञेया । * अत्रैव लीना भवन्तीति * । अन्तःप्रकटे पुरुषोत्तम एव लीना भवन्ति । ननु पुरुषोत्तमात्मकलीलोपयोगिदेहप्राप्त्या ब्रह्मभाव एव श्रुत्यभिप्रेत इत्यत्र किं गमकमित्यत आहुः । * अन्यथेत्यादि * । तथाच ब्रह्मैव सन्नित्यस्यान्यथावैयर्थ्यापत्तिरेव गमिकेत्यर्थः । उक्तोपष्टम्भाय गमकान्तरमाहुः । * अत एवेत्यादि * । तथाच ब्रह्मभूतः प्रसन्नात्मेत्युक्तरीतिको ब्रह्मभावो यदि ब्रह्मैव सन्नित्यत्राभिप्रेतः स्यात्तदाऽस्मिन् श्लोके, अथ मर्त्योऽमृतो भवतीत्येतावदेव वदेन्न तु तुरीयं पादम् । अतो यथोक्त एव श्रुत्यर्थ इत्यर्थः । एवमुपोद्घातेन पुष्टिमार्गीयस्य लौकिकदेहक्षपणं नाम प्राणादीनां ब्रह्मणि लय इति सिद्धम् । तदेतत्पूर्वपादान्तसूत्रे एव विचारणीयम् । त-

भवस्तत्र ब्रह्म समश्नुत इति। मृतिधर्मवच्छरीरं हि मर्त्यं, तद्वत्त्वेन जीवोऽपि तथोच्यते। तथाचायं पूर्वं तादृश एव, अथ पुष्टिलीलाप्रवेशानन्तरममृत उक्तरूपशरीरवान् भवति, ततोऽत्र अस्मिन्नेव शरीरे ब्रह्म सम्यगश्नुते। भगवता क्रियमाणलीलारसमनुभवतीत्यर्थः। भगवान् बादरायण इमामेव श्रुतिं विपयीकृत्य तत्रोक्तप्राणानां लय एकदैवोत क्रमनियमोऽस्तीति संशये निर्णयमाह। वाङ् मनसीति। तत्र हेतुर्दर्शनादिति। एतदुक्तं भवति। भक्तेः स्नेहात्मकत्वात्तस्य प्रभुप्राकट्यफलकत्वात्तदौत्कण्ठये तस्यावश्यकत्वादयं मां पश्यत्विति प्रभिच्छया तस्मिन् सम्पन्ने चक्षुर्भ्यां मनसा च तद्रूपाऽमृतमनुभवतः स कोऽप्युत्कृष्टो भावः समजनि येन प्रभुणा सह सर्वेन्द्रियव्यापारकृतीच्छा समभूत्। तत्र तेषामसामर्थ्याद् भगवदानन्दसम्बन्धिमनःसम्बन्धेन तं प्राप्स्याम इति तत्रैव सङ्गताः तेनानन्देन सम्पन्ना जाताः। अयमेवार्थोऽनेन सूत्रेणाग्रिमेण चात एव सर्वाण्यन्विति सूत्रेण निरूप्यते। दर्शनानन्तरमादौ सह सम्भाषणेच्छैव जन्यत इति, वाङ्मनसि सम्पद्यत इति छान्दोग्ये स्फुटोक्ते सम्मता चादौ सैवोक्ता। एवं सति वाङ्मनसि सङ्गता

थाप्येतत्सूत्रप्रणयनं प्रति तस्य हेतुत्वं न स्फुटं भवेदिति तत्रानुक्त्वा अत्र विचारितमिति ज्ञेयम्। तदेतद् हृदि कृत्वाऽऽचार्यः प्रकृतं विचारयतीत्याशयेन सूत्रमवतारयन्ति। * भगवानित्यादि *। * निर्णयमाहेति *। उक्तश्रुतौ सामान्यतो लयश्रावणाल्लयो युगपदेव युक्त इति पूर्वपक्षनिरासाय निर्णयमाहेत्यर्थः। सूत्रं व्याकुर्वन्तः क्रमनियमे दर्शनस्य कथं हेतुत्वमित्यतो व्युत्पादयन्ति। * एतदित्यादि *। * तदौत्कण्ठ्यइति *। भक्तस्यौत्कण्ठायाम्। तदात्कस्य इति पाठे तु स्नेहौत्कट्य इत्यर्थो बोध्यः।

* तत्रैव सङ्गता इति *। मनस्येव सर्वे प्राणाः समागताः।

सती भगवदानन्देन सम्पद्यत इति सूत्रार्थः सम्पद्यते । दर्शनाभावेऽपि वेण्वादिशब्दादपि तथा सम्पद्यत इति हेत्वन्तरमाह—शब्दाच्चेति ॥ १ ॥

अत एव सर्वाण्यनु ॥ २ ॥

अत एव दर्शनाच्छब्दाच्च हेतोः सर्वाणीन्द्रियाणि, अनु सान्निध्याद् वाचः पश्चान्मनसि सङ्गतानि भगवदानन्देन सम्पद्यन्त इत्यर्थः । केचित्त्वत्र छान्दोग्यस्थं, वाङ् मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति वाक्यं विषयत्वेन उक्त्वा सूत्रे वाक्पदस्य तद्वृत्तिपरत्वं वदन्ति सम्पत्तिं तन्नाशं च । तन्न साधीयः । तथाहि । वाक्पदस्य वृत्तिपरत्वं चेच्छ्रुत्यभिमतं स्यात् सूत्रकारस्तदा तथैव वदेन्न तु तत्स्वरूपमेव वाक्यम् । तन्निर्णयार्थमेव प्रवृत्तेः । मुख्यार्थत्यागो लक्षणापत्तिश्च ।

शेषं स्फुटम् ॥ १ ॥

अत एव सर्वाण्यनु ॥ एतेन श्रुतौ वाक्पदमिन्द्रियान्तराणामप्युपलक्षकमिति बोधितम् । भाष्यमत्र स्फुटार्थम् ॥

ननु या छान्दोग्यश्रुतिरत्र सम्मतित्वेन दर्शिता सैवात्र सर्वोऽऽहृतत्वाद्विषयवाक्यत्वेनादरणीया, ततश्च कथं भवदुक्तस्यार्थस्याभिसंहितत्वमित्याकाङ्क्षायामन्यमते तेषां बोधयितुं मतान्तरमनुवदन्ति * केचिदित्यादि * ते हि हिरण्यगर्भादिविद्यास्वपरासु च विद्यासु फलप्राप्तये देवयानं पन्थानमवतारयिष्यन्तो यथाशास्त्रमुत्क्रान्तिक्रमकथनं विद्वदविदुषोरुत्क्रान्तौ प्रकारसाम्यं च व्यासाभिमतमङ्गीकुर्वन्त उक्तरीत्या वदन्तीत्यर्थः । तन्न तथेति बोधनाय दूषयन्ति । * तन्नेत्यादि * । ननु सत्यमस्तीदं दूषणत्रयं तथाप्यग्रेऽविभागो वचनादित्यनेन तत्त्वप्रलयस्य वक्ष्यमाणत्वादत्र वृत्तिप्रलय आद्रियत इति व्यासाशयस्य तैर्बोधनाददोष इत्यत आहुः ।

किञ्चैवं मनसीति पदवैयर्थ्यं स्याद्, विषयवाक्योक्तक्रमत्यागानुपपत्तिश्चेति ॥ २ ॥

---

* किञ्चेत्यादि * । यद्यपि तत्सूत्रमन्यार्थं तथापि स्वोक्तसमर्थनाय तथार्थादरेऽपि सम्पत्तिपदस्य वृत्त्युपसंहारार्थकतया वृत्तिनाशनार्थत्वमेवाभिप्रेतं, यथाङ्गिरग्नेः । तथा सति निरन्वयो वृत्तिध्वंस इति ध्वंसकसंसर्गमात्रस्यैवापेक्षणेन ध्वंसकस्य तत्राधिकरणताऽनपेक्षणान्मनसीत्यधिकरणबोधकपदवैयर्थ्यम् । नन्वधिकरणत्वेऽनपेक्षितेऽप्यग्नेरप्सु प्रक्षेपे वृत्तिनाशस्य दर्शनान्न मनसीत्यस्य वैयर्थ्यमित्यतो दूषणान्तरमाहुः । * विषयेत्यादि * । स्याद्वैयर्थ्यं यदि विषयवाक्यत्वमस्य स्यात् । तदेव तु न । यत एतस्य विषयवाक्यत्वे सूत्रकृता तेजस्त्यागेन प्राणस्य करणाऽध्यक्षे जीवे लयकथनाद्यः क्रमत्यागस्तदनुपपत्तिश्चेत्यतो व्यासानभिप्रेतत्वावगमादनेकदोषग्रस्तं तथा व्याख्यानम् अयुक्तमित्यर्थः । यत्तु दर्शनादित्यस्य व्याख्यानम्—दृश्यते हि वाग्वृत्तेर्मनोवृत्ताववस्थितायां पूर्वोपसंहार इति । तदपि न युक्तम् । परमनोवृत्तेर्वाग्वृत्तिद्वारैव गोचरतायाः प्रत्यक्षसिद्धत्वेन वाग्वृत्त्यभावे तदवस्थित्यवगतेरशक्यवचनत्वात् । तथा विद्वदविदुषोरुत्क्रान्तिप्रकारसाम्याङ्गीकारेऽपीन्द्रियवृत्त्युपसंहारो न युक्तः । प्रश्नोपनिषदि, इन्द्रियैर्मनसि सम्पद्यमानैरित्यत्रापि लक्षणापत्त्या सम्पत्तिपदस्य नाशार्थाङ्गीकारे च बृहदारण्यकीयशारीरकब्राह्मणस्थायाम्, एकीभवति न पश्यतीत्याहुरित्यादिरूपायां च श्रुतौ लक्षणापत्त्या श्रुतिपीडाया दुर्वारत्वापत्तेः । अत एतेषु सूत्रेपूत्क्रमिष्यदूव्यवस्थामात्रकथनमयुक्तम् । किन्तु मुख्यतया सद्योमुच्यमानव्यवस्थायामिन्द्रियलयक्रमः प्रासङ्गिकस्तूत्क्रमिष्यद्वृत्तान्तः । ओकोग्रज्वलनसूत्रादिभिस्तस्यापि वक्ष्यमाणत्वादिति ।

यदपि भामतीनिबन्धे, वाचस्तूपसंहारमदृष्टं नागमोऽपि गमयितुमर्हति । आगमप्रभवयुक्तिविरोधात् । आगमो हि दृष्टानुसारतः प्रकृतौ विकाराणां लयमाहेत्युक्तम् । तदपि व्याख्येयग्रन्थपूजामात्रम् । आगमस्य सर्वत्र दृष्टानुसारित्वादर्शनेन युक्तेः शिथिलत्वादि-

तन्मनः प्राण उत्तरात् ॥ ३ ॥

पूर्वोक्तसर्वेन्द्रियवैशिष्ट्यवन्मनः प्राणे सम्पद्यते, न तु केवलम् । तत्र हेतुः । उत्तरादिति । स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सौम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयत इत्युक्त्वा तत्र हेतुमुत्तरेण वाक्येनाह—प्राणबन्धनं हि सौम्य मन इति । तस्माद्धेतोस्तथेत्यर्थः ॥ ३ ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

सर्वेन्द्रियविशिष्टमनोविशिष्टः प्राणोऽध्यक्षे पुरो हृदि वा प्रकटे भगवति सम्पद्यत इत्यर्थः । अत्र हेतुः । उपगमादिभ्य इति । उपगमोऽभ्युपगमः पुष्टिमार्गेऽङ्गीकार इति यावत् । ततस्तथेत्यर्थः । आदिपदाद् भगवद्वशीकरणसमर्थः स्नेहः प्रभ्वानिङ्गितार्थत्यागस्तदनुरूपं भजनं च । अभ्युपगमे सिद्धे स्नेहादयोऽवश्यं भवन्त्येवेत्याशयेन, तदादित्वमुक्तम् । नोद्देशः कृतः । मर्यादामार्गे-

---

ति । तस्मादेतस्य विषयवाक्यत्वमयुक्तमेवेति पूर्वोक्तमेव विषयवाक्यं, तथैवार्थश्चाभिप्रेत इति ध्येयम् ॥ २ ॥

तन्मनः प्राण उत्तरात् ॥ अत्र भाष्यमुत्तानार्थम् । श्रुतिस्तु छान्दोग्ये श्वेतकेतूपाख्यानस्था ॥ ३ ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥

अत्रापि भाष्यमुत्तानार्थम् ॥ अत्रेदमर्थात् सम्पद्यते । अत्यनुग्रहभाजनस्य पुष्टिमार्गीयस्योक्तप्रकारेण वागादिप्राणान्तानां लये तदानीमेव पुरुषोत्तमात्मकदेहप्राप्त्या लीलात्मकभोगसम्पत्तिः । ततो न्यूनस्य तस्य तु पुरुषोत्तमे लयस्ततः सम्पद्याविर्भावाधिकरणोक्तरीत्या भगवता तस्य स्वरूपान्निष्कासने पुरुषोत्तमात्मकदेहसम्पत्त्या लीलानुभव इति बोध्यम् ॥

ऽङ्गीकृतानां तु मुक्तिपर्यवसायित्वेन मुमुक्षुत्वादुत्कटस्नेहासम्भवेन प्रभुप्राकट्यासम्भवात् स्वप्रकृतौ सङ्घातलये शुद्धजीवस्य भगवदऽनुग्रहेण श्रवणादिरूपया तथाविधस्नेहरूपया च भक्त्या मुक्तिः सम्पद्यत इति बह्वेव तारतम्यमिति निगूढाशयेनेदमुक्तम् । अभ्युपगमादयस्तु मुण्डकोपनिषत्सु पठ्यन्ते । नायमात्मेत्युपक्रम्य यमेवैषवृणु ते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम् । नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाऽथ लिङ्गात् । एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधामेति ॥ ४ ॥

उक्तं निगूढमाशयं प्रकटयन्ति ।

भूतेषु तच्छ्रुतेः ॥ ५ ॥

ननु मार्यादामार्गीयाणामप्येवमेव वागादिलय ? उतान्यथेति संशये निर्णयमाह । तेषां ते भूतेषु लीयन्ते, न तूक्तरीत्या भगवति । अत्र प्रमाणमाह । तच्छ्रुतेः । यत्रास्य पुरुषस्य मृ-

---

अन्ये तु—अध्यक्षपदे करणाध्यक्षं जीवम्, उपगमादिपदे च ज्योतिर्ब्राह्मणे एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्तीत्यनेनोक्तमुपगमनं, शारीरब्राह्मणे तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीत्युक्तमनुगमनं, स विज्ञानो भवतीत्यनेनोक्तमवस्थानं च व्याकुर्वन्ति । तदा छान्दोग्यस्य कस्याप्यर्थस्यानङ्गीकारात् कथं तस्य विषयवाक्यत्वमित्यपि ध्येयम् ॥ ४ ॥ १ ॥

भूतेषु तच्छ्रुतेः ॥ अधिकरणमवतारयन्ति ।* नन्वित्यादि* । * इति संशये निर्णयमाहेति * । एवं संशये भगवन्मार्गत्वस्याविशिष्टत्वेनात्रापि पूर्ववदेव वागादिलय इति पूर्वपक्षावतारान्निर्णयमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति* तेषामित्यादि* । हेतुबोधिकां श्रुतिमुदाहरन्ति । * यत्रास्येत्यादि * । एतेन सूत्रस्थं भूतेष्विति पदं देवताया

तस्याग्नि वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयत इति श्रुतेः ।
नचाविद्वद्विषयिणीयं श्रुतिरिति वाच्यम् । याज्ञवल्क्येति होवाच यत्राऽयं पुरुषो म्रियत उदस्मात् प्राणाः क्रामन्त्याहो नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेत इति पूर्ववाक्यात् । न ह्यविदुषः प्राणानामनुत्क्रमः । तमुत्क्रामन्तं प्राणोऽनूत्क्रामन्तीत्यादिश्रुतेः । ननु यत्रास्य पुरुषस्येत्युपक्रम्य रेतश्च निधीयत इत्यन्ता श्रुतिरविद्वद्विषयिणीति मन्तव्यम् । यत एतदग्रे, काऽयं तदा पुरुषो भवतीति प्रश्ने याज्ञवल्क्यार्त्तभागाभ्यां विचारितमुत्तरमुच्यते । तौ ह यदूचतुः कर्म हैव तदूचतुरथ ह यत् प्रशशंसतुः कर्म हैव तत् प्रशशंसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति । एतेन कर्माश्रयस्तिष्ठतीति निर्णयः सम्पद्यते । एवं सति प्राणानुत्क्रमणोक्त्या सम्पातलयोक्त्या च विद्वद्विषयत्वमत्रावसीयते यतस्तस्यैवोक्तं द्वयं सम्भवति । अग्रिमश्रुत्युक्तकर्माश्रयत्वं च तस्मिन् विरुद्धमतः

———

अप्युपलक्षकमिति बोधितम् । श्रुतिस्तु बृहदारण्यक आर्त्तभागब्राह्मणेऽस्ति । इयं श्रुतिरन्यैरविद्वद्विषयत्वेन व्याख्यातेति तन्निषेधन्ति । * नचेत्यादि * । तथाचैतः पूर्वस्मिन् ग्रन्थे प्राणानुत्क्रमणरूपस्य मुक्तिलिङ्गश्रावणान्नाविद्वद्विषयत्वं तस्या वक्तुं शक्यमित्यर्थः । एवमस्याः श्रुतेरविद्वद्विषयतायां बाधके दर्शिते पुनरविद्वद्विषयतां साधयितुं पूर्वोत्तरश्रुत्योर्विरोधेन सन्देहमुत्थापयन् विद्वद्विषयतां प्रतिक्षिपति । * नन्वित्यादि * । * एतेनेति * । विचारितनिर्द्धारकवाक्येन । * एवं सतीति * । उक्तप्रकारके विरुद्धवाक्यद्वये एकस्मिन् प्रकरणे श्रूयमाणे सति । * विरुद्धमिति * । अवसीयत इति शेषः ।

पूर्वोत्तरविरोधाद्विषयानिश्चये प्राप्ते प्रतिवदामः । मर्यादामार्गीयविद्वद्विषयिण्येवेयं श्रुतिरिति । अत एव प्रश्ने, क्व तदा पुरुषो भवतीत्येतावतैव चारितार्थ्येऽपि साधारणपुरुषव्यावृत्त्या मर्यादामार्गीयतत्प्रापकम् अयामिति पदम् । तस्यैवोपक्रान्तत्वात् । तथा तदग्रिमविचारितोऽर्थोऽपि तद्विषयक एवेति बुद्ध्यस्व । ननूक्तं बाधकमितिचेत् । हन्त श्रुतिशिरःसमाकलितमाकलय । मर्यादामार्गे हि विधिप्राधान्यात्तथैव तन्निर्माणात् । तत्र ह्येवं कृत एवं फलं दास्ये, न त्वऽकृतेऽपीति भगवदिच्छा, अतः कर्म प्रधानम् । एवं सत्यार्त्तभागस्याऽयमाशयः—वागादिरेतोऽन्तलयेन प्रारब्धस्यापि तदा नाशाच्छुद्धं जीवं विध्यविषयं कदाचित् पुष्टौ प्रवेशयति, न वेति संशयेन तदाऽपि किं मर्यादामार्ग एवोत पुष्टावपि प्रवेशितो भवतीति प्रश्नः । तदाऽस्यार्थस्येश्वरेच्छारीतिमविदुषा दुर्ज्ञेयत्वं जानन्ती स्वयमेव

एवं पूर्वपक्षमुत्थाप्य समादधते । * प्रतिवदाम इत्यादि * । * तस्यैवोपक्रान्तत्वादिति * । प्राणानुत्क्रमालिङ्गेन विषय एवोपक्रान्तत्वात् । * तदग्रिमविचारितार्थ इति * । उपक्रमानुरोधिप्रश्नोत्तररूपत्वात् तौ ह यदूचतुरित्यादिना विचारितोऽर्थः । अग्रिमविचारितार्थे पुनः शङ्कते—

नन्वित्यादि * । * उक्तं बाधकमिति * । कर्माश्रयेणावस्थानरूपं विद्वत्ताबाधकम् । तथाच विद्वद्विषयत्वे बाधकस्य विद्यमानत्वादविद्वद्विषयैवेयं श्रुतिरित्यर्थः । अत्र समादधानाः पूर्वपक्षिणो भ्रान्तत्वं बोधयितुमुपालभन्ते । * हन्तेत्यादि * । श्रुतिशिरःसमाकलितमिति * । वेदान्ततात्पर्यबोधितम् । * एवं सतीत्यादि * । * उक्तरीत्या मर्यादामार्गे कर्मप्राधान्ये सति आर्त्तभागस्य वक्ष्यमाण आशयः । वक्ष्यमाणरीतिकसंशयेन तदा, क्व शुद्धत्वदशायाम्, विधिनियतो जीवः, क्व वैषयिकाधिकरणे सप्तमी । कस्मिन् मार्गे, किं मर्यादामार्ग एव तिष्ठत्युत पुष्टौ प्रविष्टो भवतीति प्रश्ने इत्यर्थः । एवं प्रश्नस्य विद्वद्विषयत्वं प्रतिपाद्योत्तरस्य प्रतिपादयन्ति । * तदेत्यादि * ।

यदवधारितवती तदपि रहस्यमिति स्फुटमनुक्त्वा श्रुतिः पर्यव-सितमर्थमुक्तवती, तौ हेत्यादिना । अत्र कर्मपदं मर्यादामार्गपरम् । तथाच मर्यादामार्ग एव तस्य स्थितिरित्यर्थः सम्पद्यते, मुक्त एव भवतीति यावत् । अत एव तत्प्रशंसापि । यत ईश्वरत्वेन सर्वकरणसमर्थोऽपि तद्दाने तदपेक्षते । अत्र हेतुत्वेन मर्यादामार्गस्वरूपमुक्तम्—पुण्यो वा इत्यादिना ॥ ५ ॥

ननु मर्यादामार्गीयो, भक्तो ज्ञानी च भवतः । उक्तनिर्णयस्तु ज्ञानमार्गीयविषय एव । भक्तं तु तादृशमपि कदाचित् पुष्टावपि प्रवेशयतीत्याशङ्क्य तन्निर्णयमाह ।

नैकस्मिन् दर्शयतो हि ॥ ६ ॥

ईश्वरेच्छारीतिमविदुषः पुंसः प्रति अस्यार्थस्य दुर्ज्ञेयत्वमिति योजना । * अत्रेत्यादि * । श्रुतिवाक्ये कर्मपदं मत्वर्थलक्षणया तन्मार्गपरम् । ननु मर्यादामार्गस्य विद्वदविद्वत्साधारणत्वादत्र विद्वद्व्यवस्थैवोच्यत इत्यत्र किं गमकमित्यपेक्षायामाहुः । *अत एवेत्यादि* । तथाच निवृत्तिमार्गीयकर्मणोऽपि तत्र विद्यमानत्वात्तदादाय तत्प्रशंसात्र मुख्यं विद्वद्विषयत्वगमकमित्यर्थः । प्रशंसायां बीजमाहुः । * यत इत्यादि * । * तद्दाने तदपेक्षत इति * । मुक्तिदाने ज्ञानसमुच्चितं कर्मापेक्षते । ननु यद्यस्य विद्वद्विषयत्वं स्यात्तदाऽत्र, पुण्यो वा पुण्येनेत्यादि न वदेदित्यत आहुः । * अत्रेत्यादि * । * अत्र हेतुत्वेनेति * । फलदाने हेतुत्वेन । तथाच, एष उ वेति श्रुतेः फलदाने कर्मकारणमेव हेतुर्मर्यादामार्ग इति बोधनाय, पुण्यो वेत्यादिना तत्स्वरूपमुक्तम् । तावता न अविद्वद्विषयकत्वं वक्तुं शक्यमिति विद्वद्व्यवस्थैवात्रोच्यत इत्यर्थः ॥ ५ ॥

नैकस्मिन् दर्शयतो हि ॥ सूत्रमवतारयन्ति । *नन्वित्यादि*। *भक्तं तु तादृशमपि कदाचित् पुष्टौ प्रवेशयतीति * तृतीयस्कन्धे, जीवाः श्रेष्ठा ह्यजीवानामित्यादिना शेषपूजायामुत्कृष्टबोधने, "मय्य-

एकस्मिन् ज्ञानिनि भक्ते वा मर्यादानियमो न, किन्तूभयोरपि । तत्र हेतुः—दर्शयत इति। यतो याज्ञवल्क्यार्त्तभागौ ज्ञानिभक्तसाधारण्येन मर्यादानियमं दर्शयत उक्तरीत्या, तौ हेत्यादिना । अन्यथा अप्राकृताङ्गीकृतिरन्यथा भवेदित्युपपत्तिर्हिशब्देन सूच्यत । पूर्वोक्तपूर्वोत्तरश्रुतिविरोधपरिहाराऽन्यथाऽनुपपत्तिरत्र मूलमिति ज्ञेयम् । केचित्तूपसंहृतेषु वागादिषु शरीरान्तरप्रेप्सासामयिको जीवः, क्वाऽयं तदा पुरुष इति प्रश्नविषय इति वदन्ति । तन्न साधीयः । तमुत्क्रामन्तं प्राणोनूत्क्रामति प्राणमनू-

---

र्पितात्मनः पुंसो मयि सन्न्यकर्मणः । न पश्यापि परं भूतमकर्त्तुः समदर्शनादि"ति कपिलदेववाक्ये मर्यादाभक्ते उत्कर्षविश्रान्तेः कथनेन तादृशं पुष्टौ प्रवेशयतीत्येवं सम्भावयितुं शक्यत्वात्तं प्रवेशयन्ति । व्याकुर्वन्ति । * एकस्मिन्नित्यादि * ।* ज्ञानिभक्तसाधारण्येनेऽति * । विशेषानिर्देशात् । अयं पुरुष इति सामान्यनिर्देशात् कर्मोक्तिकर्मप्रशंसाभ्यां मर्यादामार्गस्यैव विषयीकरणाच्च । तथाच यद्यवान्तरो ज्ञानभक्तिकृतो विशेषो विवक्षितः स्यात्तदा समान्येन न वदेताम् । अतस्तथेत्यर्थः । ननु पुष्टिमर्यादाभक्तयोर्भक्तिमत्त्वे तुल्येऽपि कुतोऽयं विशेषो यन्मर्यादामार्गीयवागादीनां भूतेष्वेव लयो न भगवतीत्याकाङ्क्षायां गूढाभिसन्धिमाहुः । * अन्यथेत्यादि * । यदि तद्वागादिलयो भगवत्यङ्गीक्रियेत, तदा अप्राकृतानां सर्वभावप्रपत्त्या प्रकृतिसम्बन्धरहितानां या अङ्गीकृतिः स्वीयत्वेन वरणं, सा अन्यथा भवेद् इतरतुल्यतां प्राप्नुवती वरणश्रुत्युक्तमसाधारण्यं विरुन्ध्यादित्यर्थोपपत्तिर्हिशब्देन सूच्यते । तथाच ताभ्यां ज्ञानिभक्तसाधारण्येन यन्निरूपितं तत्रेदं बीजमित्यर्थः । नन्वस्याः श्रुतेरेवं तात्पर्यकल्पने किं बीजमत आहुः । * पूर्वोक्तेत्यादि * । पूर्वोत्तरश्रुतिस्तु, न तस्मात् प्राणा उत्क्रामन्तीत्यादिरूपा बोध्या । तथाचैतद् बीजमित्यर्थः । एतदेव दृढीकर्त्तुं, दूषणाय मतान्तरमुपक्षिपन्ति । * केचिदित्यादि * । दूषयन्ति । * तन्नेत्यादि * । अत्रायमर्थः । अ-

त्रैव समवनीयन्त इति वाक्येन प्राणानुत्क्रमणमुभयत्रोक्तम् । तत्र शारीरब्राह्मणे, अथाकामयमान इति निष्कामं पुरुषमुपक्रम्योक्तम् । अन्ते च, ब्रह्मैव सन् ब्रह्माप्येतीति तस्य ब्रह्मप्राप्तिरुक्ता । आर्त्तभागब्राह्मणे तु, यत्राऽयं पुरुषो म्रियत इति सामान्यतो म्रियमाणमुपक्रम्योक्तम् । अन्ते च, स उत्श्वयत्याध्मायत्याध्मातो मृतः शेत इत्येतावदुक्तम् । तत्र सामान्यस्य विशेषेण निर्णय इति ब्रह्मात्ययवाक्यस्यात्र निर्णायकत्वादस्य मुक्तिलिङ्गत्वमेवोचितम् । तथाऽप्याध्मातो मृतः शेत इत्यनेनोक्तावस्था ब्रह्मविच्छरीरस्यानुचिता । लौकिकस्य पुण्यकृतोऽपि प्रायस्तादृशावस्थाया अदर्शनात् । अतः पुनः प्रश्नः—यत्रास्य पुरुषस्येत्यारभ्य, क्वायं तदा पुरुषो भवतीत्यन्तः । अमुच्यमानस्य हि प्राणोत्क्रमस्तमुत्क्रामन्तमित्यादिश्रुत्योक्तः । अयं शरीरदुरवस्थावानुक्तस्तस्य चदग्निं वागप्येतीत्युक्तप्रकारेणेन्द्रियाणामनुत्क्रान्तानां तत्तद्योग्येषु भूतेषु इन्द्रियाधिष्ठातृदेवतायां च लयस्तदा तस्य साधनाभावान्न मुक्तिर्वक्तुं शक्या । इन्द्रियाणां लये मनसोऽपि चन्द्रे लयात् । तदेव स तत्सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्येति श्रावितस्य जीवगमनस्यापि वक्तुमशक्यतया शरीरान्तरप्राप्त्यावश्यकत्वे वागादिलयवैयर्थ्यापत्त्या, देहस्य मृतत्वात्तत्र स्थितेर्वक्तुमशक्यतया तस्य जीवस्य कुत्र स्थितिरिति तत्राशयो भाति । एतदुत्तरे तु, कर्माश्रयस्तिष्ठतीति । यथा बाणो वा पाषाणशकलो वा चेतनेन क्षिप्त आकाशे गच्छति, तस्य गमनक्रियैवाश्रयो, न त्वन्यस्तथा जीवोऽपि, एष उ इति श्रुत्युक्तकर्माश्रयस्तिष्ठतीति सिध्यति । तत्र जीवस्य स्वतः क्रियाराहित्याल्लिङ्गस्य च लीनत्वान्न्यायादिमतवददृष्टस्यात्मधर्मतया अत्रानङ्गीकाराज्जीवाधिष्ठानभूतं कर्म किमीयमिति शङ्का नापैति । तेन शरीरान्तरप्रेप्सासामयिको जीवः, क्वायं तदेति प्रश्नविषय इत्यसङ्गतम् । लीनकरणग्रामस्य प्रेप्साया व्यापारस्य च वक्तुमशक्यत्वात् । प्रेप्साङ्गीकारे च तमुत्क्रामन्तमिति श्रुत्या लिङ्गसाहित्यस्यावश्यकत्वाद्वागादिलयोऽप्यसम्भवदुक्तिकः । अत्रैवेति मुक्तिलिङ्गश्रुतिविरोधाच्च । अतो देहान्तरप्रेप्सावतः प्रश्नविषयताया वक्तुमशक्यत्वाद् अस्मदुक्त एव मार्गः, सदसत्कर्मप्रधानो मर्यादामार्ग एव कर्मपद आदर्त्तव्यः । अन्यथा केवलकर्मणः संसारजनकत्वात् प्रशंसावैयर्थ्यापत्तेः । मार्गादरे तु तस्य प्रवृत्तिनिवृत्ति-

त्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति श्रुतिर्भाविदेहान्तरजीवस्य प्राणानामिन्द्रियाणां च सहैवोत्क्रमणं वदतीति वागादिलयस्य तत्रासम्भवान्नोक्तस्य प्रश्नविषयत्वं वक्तुं शक्यम् । पूर्ववाक्येऽत्रैव समवलीयन्त इत्युक्तत्वाच्चातोऽस्मदुक्त एव मार्गोऽनुसर्त्तव्यः । एतेन नायं परविद्यावान् यतः, अमृतत्वमेव तत्फलमिति । तच्च देशान्तरानायत्तमित्युत्क्रमणापेक्षा कर्माश्रयत्वं च न स्यात्, किन्त्वपरविद्यावान् । तस्यास्तु ब्रह्मलोकावधि फलमिति कर्माश्रयत्वोत्क्रमणादिकं सम्भवतीत्यपि निरस्तं वेदितव्यम् ॥ ६ ॥

कर्मात्मकत्वान्निवृत्तं कर्माऽऽदाय प्रशंसोपपत्तेः । दुष्टंकर्माऽऽदाय शरीराध्यानाद्युपपत्तेश्च । एतद् बोधनायैव, पुण्यो वा पुण्येनेति मार्गस्वरूपमुक्तम् । एवं सतीदमत्र सिध्यति । यः सद्यो मुच्यते तस्य प्राणानामत्रैव समवनयनम् । यश्चान्धन्तमो विशति तस्यापि प्राणानामत्रैव समवनयनम् । शरीरदुरवस्थालिङ्गात् । अन्यथा तदुक्तिवैयर्थ्यापत्तेः । ये पुनः क्रममुक्तिगामिनस्तत्प्राणानां सहोत्क्रमः । अणुः पन्था विततः पुराण इत्यादिश्रुतेः । यदि प्रयास्यन्नृप पारमेष्ठ्यमित्यादिस्मृतेश्च । ऊर्द्ध्वगामिनां च तथा । तदेव तत्सह कर्मणैतीत्यादिश्रुतेः, मनः कर्ममयं नृणामित्यादिस्मृतेश्च । सुबोधिन्यां तु धृतराष्ट्रं प्रत्यक्रूरवाक्ये, अकृतार्थं प्रहिण्वन्ति प्राणा राय इत्युक्त्वा उपसंहारे, मृतोऽन्धं विशते तम इति कथनादन्धन्तम एव प्रकृतमिति श्रौतं मुक्तिलिङ्गं न विचारितम् । इह तु मुक्तेरेव फलत्वेन प्रकृतत्वात् तमोलिङ्गं न विचारितम् । अतोऽन्धतमसोऽप्यासुरमुक्तित्वान्न भाष्यसुबोधिन्योर्विरोध इति ज्ञेयम् । उभयथापि शरीरान्तरप्रेप्साया अलाभान्मतान्तरदूषणं तूभयथापि निष्प्रत्यूहमिति च । एवं परोक्तं प्रश्नाशयं दूषयित्वा तदुक्तं सिद्धान्ताशयं दूषयन्ति । * एतेनेत्यादि *।* एतेनेति *। जीवस्यात्र देहान्तरप्रेप्सासामयिकत्वासङ्गतिव्युत्पादनेन ।* इत्यपि निरस्तमिति * इति एवमर्थकं यद्, भूतेषु तच्छ्रुतेरित्यत्र, भूतेष्वतः श्रुतेरिति पाठमङ्गीकृत्य स प्राणोऽध्यक्षस्तेजः

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

मर्यादापुष्ट्योर्न कदाचिदन्यथाभाव इति यदुक्तं तत्र हेत्वपेक्षायां वस्तुस्वरूपमेव तथेति बोधयितुमाह । समानेत्यादि ।

अत्रायमाशयः । साधनक्रमेण मोचनेच्छा हि मर्यादामार्गीया मर्यादा । विहितसाधनं विनैव मोचनेच्छा पुष्टिमार्गमर्यादा । तथा सति सदैकरूपत्वं तयोर्युक्तमिति । एतदेवाह । सृतिः संसृतिः । जीवानां स्वस्मात् पृथक्कृतानाम् अविद्यया अहन्ताममतास्पदीकरणम् । तदुपक्रम आरम्भस्तं मर्यादीकृत्य मुक्तिपर्यन्तमुक्त-

---

सह चरितेषु देहबीजभूतेषु सूक्ष्मेष्ववतिष्ठते । कुतः? । अतः श्रुतेः प्राणस्तेजसीत्यतः श्रुतेरिति व्याख्यानं, नैकस्मिन्निति सूत्रे च शरीरान्तरप्रेप्सावेलायां नैकस्मिन्नेव तेजसि जीवोऽवतिष्ठते । कार्यस्य शरीरस्य पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमय इति श्रुतिरण्व्यो मात्रा ऽविनाशिन्य इत्यादिस्मृतिश्चैतमर्थं दर्शयत इति व्याख्यानमुक्तं तदपि निरस्तम् । तद्रीत्योत्क्रमाङ्गीकारे पूर्वेन्द्रियलयप्राणानुत्क्रमणवैयर्थ्यप्रसङ्गेन आर्त्तभागब्राह्मणेऽनुक्तायाः शरीरान्तरप्रेप्साया नूतनेन्द्रियापेक्षायाश्च कल्पनापत्त्या लक्षणाप्रसङ्गेन श्रुतिसूत्रव्याकुलीभावापत्त्या च निरस्तमित्यर्थः ॥

अत्रावसरगर्भः प्रसङ्गोऽधिकरणसङ्गतिः ॥ ६ ॥ २ ॥

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ एवमधिकरणद्वयेन पुष्टिमर्यादास्थयोः क्रमेण वागादिलयं व्युत्पाद्य पुष्टिमर्यादास्थयोः कुत एवं विशेष इत्याकाङ्क्षायां मार्गस्वरूपविशेषादेव विशेष इति वक्तुम्, इत आरभ्य नवभिः सूत्रैरुपोद्धातेन तद्वाक्यार्थे तास्ता आशङ्का निवारयन्तीत्याशयेन काञ्चिदाशङ्कामनुवदन्तः सूत्रमवतारयन्ति । * मर्यादेत्यादि * । व्याकुर्वन्ति । * साधनेत्यादि * । अविद्यया अहन्ताममतास्पदीकरणमिति * विद्ययाऽविद्ययेति श्लोकोक्तया स्वीयया मूलशक्त्या अहंममेत्यसद्ग्राहात्मकजीवाविद्याश्रयत्वसम्पादनम् । * मुक्तिपर्यन्तमिति * । इदमुत्तरावधिकथनमा-

रूपा मर्यादा समाना सदैकरूपा मध्ये नान्यथा भवतीत्यर्थः । एवमेवानुपोष्य, व्रतमकृत्वा अमृतत्वमपि पुष्टिमार्गे समानमित्यर्थः । अत्रोपोषणपदमशेषमुक्तिसाधनोपलक्षकम् ॥ ७ ॥

एवं प्रासङ्गिकमुक्त्वा प्रकृतं परामृश्यते । सोऽध्यक्ष इति सूत्रेण पुष्टिमार्गीयभक्तसङ्घातस्य भगवत्येव लय इत्युक्तम् । अग्रिमेण तेन मर्यादामार्गीयभक्तसङ्घातस्य भूतेषु लयमुक्त्वा प्रश्नाऽनन्तरं शुद्धजीवस्य तस्य मुक्तिरेव भवतीति वक्तव्ये सति, आहर सौम्य हस्तमित्यादिना स्वाशयमन्येष्वप्रकटयन्तौ कर्म यन्निरूपितवन्तौ तत्कुत इत्याशङ्क्य तयोराशयं निगूढं प्रकटयति ।

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

र्थिकं ज्ञेयम् । संसारस्य तदधीनत्वादिति । * मध्ये नान्यथा भवतीति * । एष उ वेति श्रुत्युक्ताया इच्छाया इव मुमोचयिषाया अप्यऽप्रतिहतविषयत्वस्य न्याय्यत्वात् तथा । * पुष्टिमार्गे समानमिति * । ते नाधीतश्रुतिगणा इत्यादिभगवद्वाक्यात् तथा । सूत्रे तु प्रथमश्चकारोऽवधारणे, द्वितीयश्चोऽप्यर्थे बोध्यः ॥ भूतेष्वित्यतीताधिकरणे मार्यादिकव्यवस्थाया उक्तत्वादव्यवधानेनात्र मर्यादास्मृतेर्मर्यादोल्लेखः । व्यवहितत्वेन पश्चात् पुष्टेरित्यपि ज्ञेयम् । तादृशतादृशेच्छायां लीलाया लोकतुल्यत्वस्यैव हेतुत्वादिति ॥ ७ ॥

तदाऽपीतेः संसारव्यपदेशात् ॥ सूत्रमवतारयन्ति । * एवं प्रासङ्गिकमित्यादि * । यथा एकनगरप्रापकयोर्मार्गयोस्तत्प्रापकत्वे च समानेऽपि कस्यचित्केवलपान्थप्रापकत्वं, कस्यचित् सपरिकरपान्थप्रापकत्वमिति तन्मार्गस्वरूपकृत एव भेदस्तथा मर्यादापुष्ट्योरपीत्येतत्प्रासङ्गिकं तत्तन्मार्गस्वरूपबोधनायोक्त्वा प्रकृतम् आर्त्तभागब्राह्मणस्थं प्रमेयं परामृश्यते = विचार्यते इत्यर्थः । ननु तत्र किमवशिष्टं येन पुनर्विचार्यते इत्याकाङ्क्षायामाहुः । * सोऽध्यक्ष इत्यादि * । * अग्रिमेणेति * । भूतेषु तच्छ्रुतेरिति सूत्रेण ।

तदा नित्यलीलान्तःपातलक्षणपुष्टिमार्गीयमुक्तिदशायां मर्यादामार्गीयाया अपीतेर्मुक्तेः संसारत्वाभावेऽपि पुरुषोत्तमभजनानन्दानुभवाभावात् संसार इत्येव पुष्टिमार्गे व्यपदेशो यतः क्रियते अतस्तदभिसन्धाय तया रीत्या निरूपणम् । अत एव श्रीभागवते श्रीशिववचनं गीयते—"नारायणपराः सर्वे न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन" इति । श्रीभगवद्गीतास्वपि—देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपीति वाक्येन । मर्यादामार्गीयभक्तमुक्तेरितरसाधारण्यमुच्यते ॥ ८ ॥

ननु संसारवन्मुक्तेरपि हेयत्वं यत्र तादृशं चेत् पुष्टिमार्गीयतत्त्वं तदा मुक्तेः पुरुषार्थत्वबोधिकायाः श्रुतेः प्रतारकत्वमापततीति तद्बोधकप्रमाणानां तत्स्तुतिमात्रपरत्वमेवेति प्राप्त आह ।

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

फक्किकायोजना तु—एवं लयमुक्त्वा प्रश्नानन्तरमित्याद्युक्तरीत्या निरूपणं कुत इत्याशङ्क्य तथा प्रगटयन्तीति बोध्या। तथाच यदि न तत्तन्मार्गीयमुक्तौ तारतम्यं तदा वागादिलयस्य भिन्नप्रकारकत्वविचारः काकदन्तविचारतुल्यः स्यादिति तन्निवृत्त्यर्थं तयोरेकान्तगमनाद्याशयं वक्तीत्यर्थः । सूत्रं व्याकुर्वन्ति । * तदेत्यादि * । * तया रीत्या निरूपणमिति * । पुष्टिमार्गीयमुक्त्यपेक्षया मर्यादामार्गीयमुक्तेः साधनसाध्याया न्यूनत्वबोधनाय मुक्तिहेतुत्वेन प्रशंसनीयस्यापि मार्गरूपस्य कर्मण एकान्ते गत्वा जीवाश्रयत्वेन निरूपणम् । तथाच तस्य सद्योमुक्तिप्रकारत्वदृढीकरणार्थं पुष्टिमार्गीयापेक्षया न्यूनत्वज्ञापनार्थं च पुनर्विचार इत्यर्थः । इदं चोपबृंहणाभावे मनसि न विशतीत्यतस्तदाहुः । * अत एवेत्यादि * । तथाचात्र मुक्तेरितरसाधारण्यकथनात्तथेत्यर्थः ॥ ८ ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ सूत्रमवतारयन्ति * नन्वित्यादि * । * तद्बोधकप्रमाणानामिति * । भजनानन्दोत्कर्षप्र-

पुष्टिमार्गीयं तत्त्वं सूक्ष्मं दुर्ज्ञेयमित्यर्थः । अत्रायमाशयः । पुष्टिमर्यादामप्यतिक्रम्य पुष्टिपुष्टौ प्रवेशे तत्तत्त्वमनुभवविषयो भवति नान्यथा । तत्र प्रवेशस्त्वतिदुरापोऽतिशयिताऽनुग्रहेतराऽसाध्यत्वादत उक्तेतराऽज्ञेयमेव तद्भवति । तेषां तु मुक्तिरेव फलम् । तस्या एवेष्टत्वाद् रागिणां स्वर्गादिवत् । इष्टफलाप्राप्तौ हि प्रतारकत्वमन्यथा प्रवृत्तिमार्गीयफलबोधिकाया अपि श्रुतेः प्रतारकत्वं स्यात् । इच्छा चाधिकारानुसारिणीति नानुपपन्नं किञ्चिदिति । नन्वेवं विधार्थाऽस्तित्वे किं मानमित्याकाङ्क्षायामाह । प्रमाणत इत्यादि । प्रमाणं श्रुतिः । सा तु, यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति । एतं ह वा व न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति ।

अत्र पूर्वार्द्धेन दुर्ज्ञेयत्वम्, उत्तरार्द्धेन तत्सत्ता च बोध्यते । अन्यथा मनसोऽप्यप्राप्यस्य वेदनकथनं विरुद्धं स्यादतो दुर्ज्ञेयत्वेनैव धर्मिग्राहकमानसिद्धं तदित्यर्थः । चकारात्तादृशानामनुभवः

माणानाम् । सूत्रं व्याकुर्वन्ति । * पुष्टीत्यादि * । ननु पुष्टितत्त्वस्य दुर्ज्ञेयत्वे श्रुतेः प्रतारकत्वं कथं निवर्त्ततामित्यतस्तदाशयमाहुः *अत्रायमित्यादि * । * तत्त्वमिति * । पुष्टिमार्गीयतत्त्वम् । * उक्तेतराऽज्ञेयमिति * । अतिशयितानुग्रहभाजनातिरिक्ताऽज्ञेयम् * तेषामिति * । अतिशयितानुग्रहभाजनातिरिक्तानां भक्तानां शुष्कज्ञानिनां च । * इच्छेति * । स्वर्गादिविषयिणी मोक्षविषयिणी च । * इति नानुपपन्नं किञ्चिदिति * । इति हेतोः, यथा स्वर्गादिकामिनः प्रतिनिवृत्तिमार्गतत्त्वं दुर्ज्ञेयमधिकारराहित्यादेवं मोक्षकामिनः प्रति पुष्टिमार्गतत्त्वमपीति तत्तच्छ्रुतीनां तं तं प्रति फलबाधकत्वान्न प्रतारकत्वमतो हेतोर्य उत्कृष्टाधिकारिणस्तान् प्रति भजनानन्दोत्कर्षबोधकतया न स्तुतिमात्रत्वमतः पूर्वोक्तं सूपपन्नमित्यर्थः । सूत्रशेषमवतारयन्ति । * नन्वेवमित्यादि * । * एवं विधार्थास्तित्व इति * ।

परिगृह्यते ॥ ९ ॥

तर्हि ब्रह्मविदामिव तादृशानां भक्तानामपि स्वमार्गोपदेशनं क्वचिच्छ्रूयेत, न चैवम्, अतः पूर्वोक्तं न साधीय इति भातीत्यु-त्सूत्रमाशङ्क्य तत्र हेतुमाह ॥

नोपमर्देनाऽतः ॥ १० ॥

उपदेशनं तदा स्याद् यदि ब्रह्मविदामिव तेषां स्वास्थ्यं स्याद् यतस्तेषां विरहदशा प्रियसङ्गमदशा चेति दशाद्वयमेव भवति नान्या । पूर्वस्यास्तस्यास्त्वतिदुःसहत्वेन सर्वेषां भावानामु-पमर्देन तिरोधानेनोपदेशो न भवतीत्यर्थः । सङ्गमे तु, अतः पुरः प्रकटपरमानन्दस्वरूपाद्भगवत एव हेतोरुपदेशोऽन्यस्मै न भवती-त्यर्थः । न हि भगवदग्रे स सम्भवतीति भावः ॥ १० ॥

ननु रसो वै सः रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवतीत्युपक्र-म्यैष ह्येवानन्दयातीति श्रुतेरुक्तरूपानन्दप्राप्तौ दुःसहविरहतापो-ऽशक्यवचनः । आनन्दातिरोधान एव तत्सम्भवात् । तद्धेतोरस-म्भवात्, सम्भवे तु तत्प्राप्तिरेव न स्यादिति प्राप्ते, उत्तरं पठति ।

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

अतादृशसर्वदुर्ज्ञेयार्थसद्भावे । शेषं स्फुटम् ॥ ९ ॥

नोपमर्देनाऽतः ॥ सूत्रमवतारयन्ति । * तर्हीत्यादि * । * त-त्रेति * । तादृशमार्गाऽनुपदेशे । सूत्रं व्याकुर्वन्ति । * उपदेशन-मित्यादि * । अर्थस्तु स्फुटः ॥ १० ॥

अस्यैव चोपपत्तेरूष्मा ॥ उपमर्दे प्रत्यवस्थानं वारयितुमग्रिम-सूत्रमवतारयन्ति । * ननु रस इत्यादि * । * तद्धेतोरित्यादि * । तद्धेतोरानन्दातिरोधायकहेतोरविद्याकामकर्मरूपस्य उत्कटभक्तिभावे सत्यसम्भवाद् उत्कटभक्तिदशायामप्यविद्यादिसम्भवे तु तत्प्राप्ति-र्भगवत्प्राप्तिरेव न स्यात् । सा च तेषामस्ति । अत उपमर्दासम्भवा-

आनन्दात्मकरसात्मकस्यास्यैव भगवत एव धर्म ऊष्मा विरहताप इत्यर्थः । विरोधपरिहारायाह । उपपत्तेरिति । इदमुक्तं भवति । भगवद्विरहस्य सर्वसाधारणत्वेऽपि स्थायिभावात्मकरसरूपभगवत्प्रादुर्भावो यस्य हृदि भवति तस्यैव तदप्राप्तिजस्तापस्तदनन्तरं नियमतस्तत्प्राप्तिश्च भवति, न त्वतथाभूतस्येत्यन्वयव्यतिरेकाभ्यामुक्तरसस्यैवैष धर्म इति निश्चीयते । तस्य वस्तुन एव तथात्वात् स तापोऽपि रसात्मक एव ॥ ११ ॥

प्रतिषेधादितिचेन्न शारीरात् ॥ १२ ॥

ननु न पश्यो मृत्युं पश्यति न रोगं नोत दुःखमित्यादिश्रुत्या दुःखप्रतिषेधस्तादृशे भक्ते क्रियत इति तस्य दुःखित्वं न वक्तुं शक्यमित्याशङ्क्य प्रतिषेधति । नेति । कुतः । शारीरात् । शरीरसम्बन्धिनो हेतोर्यद् दुःखं कर्मजनितमिति यावत् तस्यैव श्रुतौ प्रति-

---

दनुपदेशोऽसङ्गत इति प्राप्ते । सूत्रं व्याकुर्वन्ति । * आनन्देत्यादि * । तथाचाऽन्तःप्राप्तिबाह्याप्राप्तिभ्यामानन्दानुभवविरहतापाविति द्वयमप्युपपद्यत इत्यर्थः ॥ ११ ॥

प्रतिषेधादितिचेन्न शारीरात् ॥ अत्र पूर्वपक्षसिद्धान्तयोर्दुरूहत्वात् पूर्वपक्षे, उपमर्दसूत्रान्नशब्दं, तस्यैवेतिसूत्रात्तस्यैवोष्मेति पदत्रयं चानुवर्त्य, सिद्धान्ते चोपपत्तेरिति पदमनुवर्त्यैदं व्याख्यायत इत्याशयेन पूर्वभागं व्याकुर्वन्ति । * नन्वित्यादि * । * तस्य दुःखित्वं न वक्तुं शक्यमिति * । तस्य भगवत्स्वरूपलाभवतो भक्तस्य दुःखित्वं तस्यैवोष्मेत्यनेनोक्तो विरहतापो न वक्तुं शक्यः । *प्रतिषेधतीति * । प्रतिषेध्यस्य कर्मजन्यत्वं बोधयंस्तत्कथनाशक्यत्वं प्रतिषेधन्तः सिद्धान्तभागं व्याकुर्वन्ति । * नेत्यादि * । * तस्यैवेति * । शरीरसम्बन्धिनोर्मृत्युरोगयोरनन्तरं तत्प्रायपाठे पठितस्य तादृशस्यैव दुःखभावस्य पूर्वसूत्रोक्तहेतोः संग्रहं सूचयन्ति—

षेधान्मात्रानुपपत्तिरित्यर्थः । एतेन दुःखत्वेन कर्मजन्यत्वानुमानमपि निरस्तं वेदितव्यम् । लौकिक एव दुःखे तज्जन्यत्वनियमात् ॥१२॥

स्पष्टो ह्येकेषाम् ॥ १३ ॥

एकेषां शाखिनां भगवत्स्वरूपलाभानन्तरं दुःखतन्निवर्त्तनलक्षणोऽर्थः स्पष्टः पठ्यते । तथाहि । रसो वै सः, रसꣳ ह्येवाऽयं लब्ध्वाऽऽनन्दी भवति, को ह्येवाऽन्यात् कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाति । अत्र रसात्मकभगवत्स्वरूपलाभे सत्यानन्दवत्त्वमुक्त्वा तस्यैव जीवनहेतुत्वं परमानन्दहेतुत्वं चोच्यते । मरणहेतूपस्थित्यभावे जीवनहेतुत्वं न वदेत् । स रसस्तु संयोगविप्रयोगभावाभ्यामेव पूर्णो भवत्यनुभूतो नैकतरेण । तत्र विरहतापस्यात्युपमर्दित्वेन तदा प्राणस्थितिरपि न स्याद् यदि रसात्मको भगवान् हृदि न स्यादित्याशयेनाह, को ह्येवान्यादिति । यद् यदि एष हृदि स्फुरद्रूप आकाशो भगवान्न स्यात् कस्तदाऽन्याद्, अन प्राणने, को वा जीवयेन्न कोऽपीत्यर्थः तादृशस्य भगवत्स्वरूपातिरिक्तान्न जीवनमिति ज्ञापनाय सामान्यपदम् ।

एतेनेत्यादि * एतेनेति * । सिद्धान्तभागेन । तथाच भगवद्विरहदुःखं कर्मजन्यं दुःखत्वाद् दुःखान्तरवदिति साधने, सुखत्वेन हेतुना मोक्षसुखस्यापि तथात्वापत्तेस्तत्परिहाराय तत्र लौकिकत्वस्योपाधित्वं वाच्यम । तच्चात्रापि तुल्यमिति लौकिक एव दुःखे कर्मजन्यत्वनियमाद् उपपत्तेरेव निरस्तमित्यर्थः ॥ १२ ॥

स्पष्टो ह्येकेषाम ॥ पुष्टिमार्गीयस्य भगवद्विरहजं यद्दुःखं तन्न कर्मजन्यमित्यत्र प्रमाणापेक्षायां तद्बोधनायेदं सूत्रमित्याशयेन सूत्रं पठित्वा व्याचक्षते । * एकेषामित्यादि * । * शाखिनामिति * तैत्तिरीयाणाम । श्रुतिमुपन्यस्य तदर्थं व्याख्यातुं गृह्णन्ति । * अत्रेत्यादि * । विभजन्ते । * स रस इत्यादि * । * तत्रेति* पूर्णरसानुभावनेच्छया भगवताऽनुभाव्यमाने विप्रयोगे । * सामान्यपद-

ब्रह्मानन्दाधिकपूर्णानन्दविरहासन्नमरणनिवारणाऽसामर्थ्यमतादृश-स्योचितमेवेति ज्ञापनाय हि शब्दः ।

तादृशस्य जीवनसम्पादनं प्रभोरावश्यकमिति ज्ञापनाय एवकारः । तापात्मकस्याप्यानन्दात्मकत्वमेवेति ज्ञापनायानन्द-पदम् । तदा प्रलापगुणगानाऽऽदयो ये भवन्ति तेऽपि तद्धर्मा एव नीलाम्बुदश्यामोऽतिक्लेशवशाद् हृदयादपगच्छत्विति भावेऽपि हृदयान्नापसारयितुं शक्य इति ज्ञापनाय चाकाशत्वमुक्तम् । तदन-न्तरं प्रकटीभूय तदन्यः को वा प्रकर्षेण दर्शनस्पर्शाश्लेषभाषणा-दिभिः स्वरूपानन्ददानेनाऽन्यात् पूर्वतापनिवृत्तिपूर्वकमानन्दपूर्णं कुर्यादित्यर्थः । रस२ ह्येवायं लब्ध्वाऽऽनन्दीभवतीति पूर्ववाक्येनैवा-न्यव्यवच्छेदपूर्वकं भगवत्प्राप्तेरानन्दहेतुत्वप्राप्तावपि यत्पुनराह त-त्रापि व्यतिरेकमुखेन, तत्रापि जीवनहेतुत्वं तदपि सामान्यवि-शेषाभ्यां वारद्वयं तेन विरहसामयिकोक्तरूप एवार्थः श्रुतेरभिप्रे-त इति निश्चीयते । अन्यथा मरणहेत्वनुपस्थितौ जीवनहेतुत्वं

मिति * क इति पदम् । * ब्रह्माऽऽनन्दाधिकपूर्णानन्दविरहासन्नमर-णनिवारणासामर्थ्यमिति * अक्षरानन्दादधिको यः पूर्णानन्दो भगवाँ-स्तद्विरहेणासन्नं यन्मरणं तन्निवारणे असामर्थ्यम् । * तद्धर्मा इति * विप्रयोगरसात्मकस्य भगवत एव धर्माः । आकाशपदस्य ब्रह्मवाच-कत्वेऽपि व्यापकत्वरूपं धर्ममादाय तस्य तात्पर्यान्तरमाहुः * नी-लाऽम्बुदेत्यादि * अतिक्लेशवशादित्यस्य, इति भावेऽपीत्यनेन सम्ब-न्धः । प्राण्यादिति पदस्यार्थमाहुः * तदनन्तरमित्यादि * अस्याः श्रुतेरयमेवार्थ इत्यत्र किं गमकमित्यपेक्षायां तदाहुः । * रसमित्या-दि * । * यत्पुनराहेति * को ह्येवान्यादित्यादिना आनन्दनं यत्पुन-राह । * अन्यथेति * विरहावस्थाया अनभिप्रेतत्वे । अत्रान्यात् प्रा-ण्यादित्यत्रान्यतरेणैव जीवनसम्पादनसिद्धौ सामान्यविशेषभावो

न वदेदित्युक्तम् । तदवस्थापन्नः को वा पुरुषो जीवेदिति वार्थः ॥ १३ ॥

स्मर्यते च ॥ १४ ॥

भगवद्भावस्य मरणहेतुत्वं तेनैव च जीवनं तस्य ब्रह्मादिदुरापत्वं च श्रीभागवते स्मर्यते । ता मन्मनस्का मत्प्राणा मदर्थे सक्तदैहिकाः । ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहमित्युपक्रम्य, धारयन्त्यथ कृच्छ्रेण प्रायः प्राणान् कथञ्चनेत्यादि श्रीप्रभुवचनं, श्रीमदुद्धववचनं च—एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एव निखिलात्मनि रूढभावाः । वाञ्छन्ति यं भवभियो मुनयो वयं च किं ब्रह्मजन्मनिरनन्तकथारसस्य" इत्यादि । तेन भगवत एव जीवनहेतुत्वं भावस्य च परमपुरुषार्थत्वं दुरापत्वं च स्फुटमवगम्यते ॥ १४ ॥

नातीवोपयुज्यत इत्यरुच्या प्राण्यादित्यस्य व्याख्यानान्तरमाहुः * तदवस्थेत्यादि * । तथाच माऽस्तु सामान्यविशेषभावस्तथाऽप्युक्तव्याख्यानेन दोषनिवृत्तेर्भगवद्विप्रयोगदुःखस्य कर्माजन्यत्वे उक्तश्रुतिबोधितं भगवत्कर्तृकजीवनसम्पादनरूपमासन्नमरणलिङ्गमेव प्रमाणमित्यर्थः । अस्मिन् सूत्रे. एकेषां स्पष्ट इत्युक्त्या शाखान्तरेऽस्पष्ट इति बोधितम् । तेन भूमविद्यायाम्, आत्मतः प्राण इत्यादिकथने आत्मन एवाविर्भावतिरोभावावित्यपि कथनेन व्यापारतया विरहदुःखस्यापि स्मरणादिति । एतेनापि, न पश्यो मृत्युं पश्यतीति श्लोकोक्तस्य दुःखस्य कर्मजन्यत्वं दृढीभवति । अदर्शनकथनेन तस्यैवाप्राप्तस्य बाधबोधनादिति बोध्यम् ॥ १३ ॥

स्मर्यते च ॥ यद्यपि रसात्मकमेव ब्रह्म प्रकृत्येयं श्रुतिः प्रवृत्तेति नास्मिन्नर्थे सन्देहस्तथापि काश्चिदेतदर्थं सामान्यजीवनपरतया शङ्कतेति तद्वारणायैनमर्थं स्मृत्योपष्टम्भयतीत्याशयेन सूत्रं पठित्वा व्याचक्षते । * भगवद्भावस्येत्यादि * ॥ १४ ॥

तानि परे तथा ह्याह ॥ १५ ॥

ननु हृदि बहिश्च रसात्मकभगवत्प्राकट्यं, तद्दर्शनजनितो विरहभावस्तज्जनितस्तापस्तेन मरणोपस्थितिस्तन्निवर्त्तनं तदौत्कट्यं, तदा प्राकट्यं, ततः पूर्णस्वरूपानन्ददानादिकं लोके क्वचिदपि न दृष्टं श्रुतं वा वैकुण्ठेऽपीति कुत ? इत्याशङ्कायामाह । तानि । उक्तानि वस्तूनि परे प्रकृतिकालाद्यतीते वैकुण्ठादप्युत्कृष्टे श्रीगोकुल एव सन्तीति शेषः । तत्र प्रमाणमाह । तथा ह्याह श्रुतिः । ऋग्वेदे पठ्यते—ता वाँ वास्तून्युष्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि । ता तानि वां भगवत्तदन्तरङ्गभक्तयोः सम्बन्धीनि वास्तूनि वस्तूनि गमध्यै प्राप्तुमुष्मसि कामयामहे । तानि कानीत्याकाङ्क्षायां गूढाभिसन्धिमुद्घाटयति, यत्र श्रीगोकुले गावो भूरिशृङ्गा बहुशृङ्गा रुरुप्रभृतयो मृगाश्च वसन्तीति शेषः । अयासः शुभावहाः । तत उक्तगुणविशिष्टम् उरु गीयत इत्युरुगायस्तस्य । गोप्यो हि सततं तं गायन्ति । अत एव तदादिभक्तेषु कामान् वर्षतीति वृषा तस्य परमं प्रकृतिकालाद्यतीतं पदं स्थानं भगवतो वैकुण्ठं भवति, तत्रैतादृशलीलाऽभावेन तस्मादपि परममुत्कृष्टम् । अत्र भूमाववभाति प्रकाशत इत्यर्थः । तथापि स्वदृग्गोचरो न भवतीति खेदेन अत्राहेत्याह श्रुतिः । उरु गीयते परं सर्वत्र कामवर्षणं भक्तेष्वत्रैवेति तात्पर्येण वा विशेषणद्वयमुक्तम् । यमुनापुलिनतदुपवननिकुञ्जगह्वरप्रदेशाद्रिसान्वाद्यात्मकत्वेन भूरि बहुरूपम् । त-

---

तानि परे तथा ह्याह ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । * न दृष्टं श्रुतं वेति * । फलकोटौ न दृष्टं श्रुतं वा । * इति कुत इति * । इति हेतोः कुत एवमुच्यत इत्यर्थः । * आहेति * । तस्य

थाचैतादृशं यत्र परमपदमवभाति तत्सम्बन्धीनि वास्तूनि कामया-मह इति वाक्यार्थः सम्पद्यते । ते पदार्था इति वक्तव्ये सति तानीत्युक्तिर्या सा विषयवाक्यानुरोधादिति ज्ञेयम् ।

पुरुषोत्तमसम्बन्ध्यर्थानां तत्प्राकट्यस्थान एव प्राकट्यं युक्त-मिति हिशब्देनाऽऽह ॥ १५ ॥

अविभागो वचनात् ॥ १६ ॥

ननु लीलाया नित्यत्वेन तन्मध्यपातिनां तद्दर्शनं यथा नि-त्यं तथा तादृक्साधनाभावेऽपि निजानुकम्पया कदाचित् कमपि भक्तं तत्र नयति चेत्तदा कञ्चित्कालं स्थापयित्वा ततस्तं वियो-जयति, न वेति संशयः । तोषस्य कादाचित्कत्वात् तत्साध्या तत्र स्थितिरपि तथैवेति वियोजयतीति पूर्वः पक्षः । तत्र सिद्धा-न्तमाह । तत्र प्रवेशिनस्य तस्मादविभाग एव । कुतः । वचनात् । तैत्तिरीयक उक्तर्गनन्तरमेव, विष्णोः कर्माणि पश्यतेत्यृचा तत्र

स्थानं, तत्र प्रमाणं चाऽऽह । सूत्रस्य श्रुतेश्च व्याख्यानम् अतिरोहि-तार्थम् ॥ १५ ॥ ३ ॥

अविभागो वचनात् ॥ एवं नवभिः सूत्रैस्तत्तदाशङ्कानिराकर-णेन वागादिलयप्रकारभेदावश्यकत्वं दृढीकृत्य पुष्टिमार्गविषय एव किञ्चिद्विचारयतीत्याशयेनाधिकरणमवतारयन्ति । * ननु लीलाया इत्यादि * । अत्र यदि वियोजयति तदापि कृपाविषयत्वात् संसारे न पातयति, किन्तु मुक्तिमेव ददातीति प्रथमकोटेराशयः । द्वितीय-कोटिस्तु कादाचित्कत्वादनुपपन्नेति सन्देहबीजशेषोऽत्र । भाष्यमति-रोहितार्थम् । अयं च विचारः प्रासङ्गिक इति बोध्यम् । तस्य स्थानस्य परिच्छिन्नत्वाद् भक्तानां च नानादेशत्वेन तत्र तत्र मरणे ततो नि-र्गत्यात्रागमनस्यावश्यकत्वात् सद्योमुक्तिप्रसङ्ग एतद्विचारो न युक्त इति शङ्क्यम् । दहराधिकरणन्यायेन तन्नित्यत्वस्य परिच्छिन्नत्वेऽपि

कृतानि कर्माण्युक्त्वा तदग्रे वदति—तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इति । पुरुषोत्तमस्वरूपवित्त्वं सूरित्वम् । तच्च भक्त्यैवेति सूरयो भक्ता एव । तेषां सदा दर्शनमुच्यते । अन्यथा लीलानित्यत्वेनैव पूर्वगर्भ्यां तत्र स्थितगवादीनां प्रभुकर्मविषयाणां च भक्तानां सदा तद्दर्शनस्य प्राप्तत्वादिदं न वदेत् तस्मादविभाग एव । एतेनापि लीलानित्यत्वं सिद्ध्यति । एतद् यथा तथा विद्वन्मण्डने प्रपञ्चितम् ॥ १६ ॥

व्यापकत्वस्य, एतस्य व्रजस्य तद्वृत्तिलाभस्थानतायाश्च व्युत्पादितत्वात् तादृशभक्तस्य यत्र क्वचन मरणेऽपि तदानीं लीलादिसहितस्य भगवतो हृदि वा बहिर्वा प्राकट्येन तत्स्थानादेरपि तत्रैव प्राकट्येन तत्रैव तस्य तत्प्राप्तेर्विद्वन्मण्डन एवोपपादितत्वेन सद्योमुक्तिविचार एतद्विचारस्य युक्तत्वादिति ॥ अन्येस्तु समानाचासृत्युपक्रमादित्यादिषु दशसु सूत्रेष्वपि प्रथमे, मूर्द्धन्यनाडीद्वारा देवयानमार्गे गमनात् पूर्वं विद्वदविदुषोरुत्क्रान्तिसाम्यं व्याख्यातं, तद् ओकोग्रसूत्रोक्तज्वलनादेव स्मर्यमाणतया गतार्थम् । यत्पुनरग्रे विद्यादिक्लेशानदग्ध्वा आपेक्षिकमृतत्वं व्याख्यातम् । तत्त्वग्रिमपादे गमनस्य प्रारब्धभोगार्थत्वाद्यदैव प्रारब्धनिवृत्तिस्तदैव मोक्ष इति व्युत्पादनेन दूषयिष्यते । यत्पुनर्द्वितीये, तेजः परस्यां देवतायामित्युक्तायाः साध्यक्षप्राणसकरणग्रामसभूतान्तरस्य तेजसः परदेवतायां सम्पत्तेः सौषुप्तिकसम्पत्तिवत् संसारबीजभावयुक्तत्वं व्याख्यातं, तत्त्वुत्क्रान्तिसामर्थ्यादेवार्थात् सिद्ध्यतीत्यविचार्यम् । यत् तृतीये पूर्वोक्ततेजसो निष्क्रमणवेलायां दुर्ज्ञेयत्वे, चतुर्थे च स्थूलशरीरदाहादिना लिङ्गशरीरस्य सूक्ष्मत्वादनुपमर्दे, पञ्चमे च देहौष्ण्यरूपस्योष्मणः सूक्ष्मशरीरधर्मत्वं, व्याख्यातं तत्प्रयोजनाभावादनर्थकम् । षष्ठे च, न तस्य प्राणा उत्क्रामन्तीति शारीरब्राह्मणीयवाक्ये या षष्ठी सा आर्त्तभागब्राह्मणीये । न तस्मात् प्राणा उत्क्रामन्तीति वाक्ये या पञ्चमी तया सम्बन्धसामान्ये व्यवस्थाप्यमाना पञ्चम्यर्थमेवाभिधत्ते इति परविद्यावतोऽपि जीवान्न प्राणानामुत्क्रमः, किन्तु सहैव प्राणैः

एवं पुष्टिमार्गीयभक्तवृत्तान्तमुक्त्वा ज्ञानमार्गीयस्य तमाह ।

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्या-
सामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दा-
ऽनुगृहीतः शताधिकया ॥ १७ ॥

पूर्वं, भूतेषु तच्छ्रुतेरित्यादिना मर्यादामार्गीयस्य वागादि-लय उक्तोऽधुना तस्य जीवात्मन उत्क्रमणप्रकार उच्यते । स ए-

———

स्थितिरिति पूर्वपक्षः । सप्तमाष्टमयोस्तु परविद्यावतः शरीरादेव प्राणाननुत्क्रम इति परविद्यावान् केवल एव मुच्यत इति सिद्धान्तः । नवमे च परविद्यावतः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परे ब्रह्मण्येव सम्पद्यत इति । दशमे च, परविद्यावतो यः प्राणादीनां परब्रह्मणि लयः स नान्यप्राणलयवत् सविशेषः किन्त्वात्यन्तिक इति सिद्धान्तयन्ति । तत्र षष्ठं प्रतिषेधादिसूत्रमारभ्य सूत्रपञ्चके यत् प्रतिपादितं तदत्र पूर्वपक्षांशं विहाय शेषं, वाङ् मनसीति प्रथमाधिकरण एव हेतूक्तिपूर्वकं पुष्टिमार्गीयभक्तेन्द्रियाणां प्रतिपादितम् । ततो मर्यादामार्गीयाणां भक्तानां ज्ञानिनां च यत्तो वैलक्षण्यं तदपि भूतेषु तच्छ्रुतेरिति द्वितीये प्रतिपादितम् । तावता सद्योमुक्तिप्रकारः सर्वोऽपि विचारित इति तेनैव गतार्थम् । यानि पुनस्तैरपरविद्यावदविद्वत्साधारण्येन तत्परतया व्याख्यायन्ते तान्यत्र विरोधाभावात् पूर्वोक्तदूषणेनैव विरुद्धांशदूषणस्य जातत्वादुपेक्षितानि ॥ १६ ॥ ४ ॥

अतः परं क्रममुक्तिप्रकारः पितृयानेन भ्रमतां च प्रकारो विचारणीय इति तं वक्तुं सूत्रमवतारयन्ति । * एवमित्यादि * ॥

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ तत्र को वृत्तान्त इत्याकाङ्क्षायामाहुः । * पूर्वमित्यादि * मर्यादामार्गीयाणां सद्योमुक्तिर्द्विधा, हृदय एव साधनप्राबल्ये ब्रह्म प्राप्नोतीत्येकः । तदभावे ब्रह्माण्डमध्ये दशमद्वारान्निर्गतस्य तत्रैवेत्यन्यः । क्रममुक्तिब्रह्माण्डभे-

तास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति श्रुतेस्तस्यात्मन ओक आयतनं हृदयं तदग्रं पूर्वं प्रज्वलति, पूर्वं तथाऽप्रकाशमानमपि तदा प्रकाशत इति यावत् । तदा तत्प्रकाशितं द्वारं निर्गमनमार्गो यस्य तादृश उत्क्रामति । यतः श्रुतिस्तथाह । तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्द्ध्नो वेत्यादि । यद्यप्येतावत् सर्वजीवसाधारणं तथापि विद्वांस्तु नेतरवदितरनाड्या निष्क्रामति, किन्तु, शताधिकया

दनोऽपरं ततो बहिः । तत्राद्यायां जीवस्य नोत्क्रमणम् । द्वितीयतृतीययोस्तदपेक्षासत्त्वात् तत्प्रकार उच्यत इत्यर्थः । एवं वृत्तान्तस्वरूपमुक्त्वा सूत्रं व्याकुर्वन्ति । * स इत्यादि * । * प्रकाशत इति * इन्द्रियरूपाभिस्तेजोमात्राभिः प्रकाशते । सूत्रशेषं पूरयन्ति । * तादृश उत्क्रामतीति * श्रुतिस्तु बृहदारण्यके शारीरब्राह्मणे । स वा अयम् आत्मा अबल्यं नीत्य संमोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति, स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्त्ततेऽथारूपज्ञो भवत्येकीभवति न पश्यतीत्याहुः । एवं न जिघ्रति, न शृणोति, न मनुते, न विजानातीत्याहुरित्युक्तम् । ततः, तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्द्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीत्यादिना इति तु कामयमान इत्यन्तम् । अर्थस्तु, यः पूर्वब्राह्मणे तेभ्योऽङ्गेभ्यः सम्प्रमुच्येत्यादिना म्रियमाणावस्थ उक्तः सोऽयं शारीर आत्मा जीवो यत्र यस्यां म्रियमाणावस्थायाम्, अबल्यं नीत्य अबलभावं नितरां प्राप्य, संमोहमिव न्येति सम्मोहः संमूढता विवेकराहित्यं तन्नितरां प्राप्नोति, अथ तदा एनं करणस्वामिनम्, एते प्राणा वागादयोऽभिसमायन्ति आभिमुख्येन निकट आयान्ति । स एतास्तेजोमात्रा विषयप्रकाशकानीन्द्रियाणि चक्षुरादीनि समभ्याददानः सम्यगाभिमुख्येन गृह्णान उपसंहरमाणो हृदयं

एकशततम्या नाड्या मूर्द्धन्या निष्क्रामति । शतं चैका हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिस्सृतैका तयोर्ध्वमायन्नऽमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति यतः श्रुतिराह । अत्र हेतुमाह । हार्दानुगृहीत इति हेत्वन्तर्गर्भं विशेषणम् । गुहां प्रविष्टौ परमे परार्द्धे इति श्रुतेर्हृदयाकाशसम्बन्धी यः परमात्मा तदनुग्रहात् तथैव भवतीत्यर्थः । अनुग्रहे हेतुर्विद्यासामर्थ्यादिति । तस्या विद्यायाः शेषभूताङ्गभूता या गतिः प्रव्रजनरूपा तच्छेषभूतैव या भगवत्स्मृतिपरम्परा च ताभ्यां च यो भगवदनुग्रहस्तेन तथेत्यर्थः ॥ १७॥

स्वायतनमेवावक्रामति तल्लक्ष्यीकृत्य आयाति, स यत्र वर्त्तते तत्र एष चाक्षुषः पुरुष आदित्यांशश्चक्षुर्देवतारूपः पराङ् पर्यावर्त्तते स्वकार्याद्विमुखो भवति । अथ तदा स एष इत्यनेनोक्तश्चक्षुराधिष्ठाता अरूपज्ञो भवत्येकीभवति करणग्रामेण । तदा न पश्यतीत्याहुः । पार्श्वस्था न पश्यतीत्याहुः । एवमग्रेऽपि । तदुत्तरावस्थामाह । तस्येत्यादि। तस्य लिङ्गोपाधिकस्य ह एतस्य मुमूर्षोर्हृदयस्य एतत्स्थानस्य अग्रं नाडीमुखं प्रद्योतते पूर्वमप्रकाशमपि तदानीं प्रकाशते । तेन प्रद्योतेन एष आत्मा शरीरान्निष्क्रामति निर्गच्छति । चक्षुराद्यन्यतमेभ्यः शरीरदेशेभ्यः । तदुत्तरव्यवस्थामाह । तमुत्क्रामन्तमित्यादि । तं जीवाऽऽत्मानम् । प्राण आसन्यः प्राणा इन्द्रियाणि । अयं च निष्क्रमणप्रकारो यमगतिरहितानाम् । यमगतिनां तु, अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादित्यादिवाक्यात् पिण्डितकरणग्रामस्य जीवस्य बलान्निष्क्रामणम् । एवं सति यद्यप्येतावद् ओकोग्रज्वलनादिकं यमगतिरहितचर्षणीजीवानां विदुषां च साधारणं, तथापि, विद्वांस्तु नेतरवदितरनाड्या निष्क्रामति, किन्तु शताधिकयेत्याद्युक्तमार्गेण । श्रुतिस्तु छान्दोग्ये दहरविद्यास्था । शेषं स्फुटम् । तथाच स यदाऽस्माच्छरीरान्निष्क्रामतीति श्रुत्युक्तो निष्क्रमणप्रकारो विद्वदविदुषोस्तुल्यो वा विशेषवान् वेति सन्देहे कामयमानताया उभयोस्तुल्यत्वेन शारीरब्राह्मणोक्तरीत्या तुल्य एवेति प्राप्ते हृदयाग्रप्र-

रश्म्यनुसारी ॥ १८ ॥

अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल इत्युपक्रम्याग्रे पठ्यते । तमभित आसीना आहुर्ज्जानासि मां जानासि मामिति । स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानात्यथ यत्रैतदस्माच्छरीदुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रामत

द्योतनपर्यन्तं विद्वदविदुषोस्तुल्यो निर्गमनमार्गः । प्रकारश्च विदुषोऽतिरिक्त इति सिद्धान्तो बोधितो ज्ञेयः ॥ एवमेतेन क्रममुक्तिप्राप्तॄणां जीवस्य शरीरान्निर्गमनप्रकार उक्तः । तत्र ये मूर्ध्नो निष्क्रामन्ति ते दशमद्वारं भित्वा तत्रैव सद्यो ब्रह्मणि लीयन्ते । तथा सति करणग्रामो भूतेष्वेव लीयत इत्यर्थादायाति ॥ १७ ॥

रश्म्यनुसारी ॥ एवं ब्रह्माण्डमध्ये सद्योमुक्तस्य व्यवस्थामुक्त्वा क्रमेण मुच्यमानस्य व्यवस्थां वदतीत्याशयेन प्रासङ्गिकमेतस्याधिकरणस्य विषयादिकमाहुः * अथ या एता इत्यादि * । श्रुतिस्तु छान्दोग्यस्थदहरविद्यायाम् । अर्थस्तु—यो हृदयपुण्डरीकगतयथोक्तगुणविशिष्टब्रह्मोपासकः स या एता हृदयस्य पुण्डरीकाकारस्य ब्रह्मोपासनस्थानस्य सम्बन्धिन्यो नाड्यो हृदयमांसपिण्डात् सर्वतो विनिःसृता आदित्यमण्डलाद्रश्मय इव ता एताः पिङ्गलस्य वर्णविशिष्टस्याणिम्नः सूक्ष्मरसस्य पूर्णा इति सर्वत्राध्याहारः । तिष्ठन्ति । शुक्लस्य नीलस्य पीतस्य लोहितस्य सौरं तेज एवं शरीरे पित्तं तत्पार्थिवेन कफेन न्यूनाधिकभेदादनुविद्धं सत् शरीरस्थं रसं पाचयत्तत्तद्वर्णं करोति । तत्रादित्यसम्बन्ध एव कारणम् । पित्तरूपेण तेजसा आदित्यस्य तत्र सत्त्वात् । तदाह श्रुतिः । असौ वा आदित्यः पिङ्गल एष शुक्ल इत्यादि । तथाचादित्यमण्डलस्य पञ्चवर्णत्वात्तदंशभूतं पित्तमपि तादृशमपि स्वपाचितं शारीरं रसमुपरञ्जयाति तदा तत्तन्नाडीस्थो रसस्तथा भवतीत्यर्थः । तदेतदुपक्रम्य ततो महापथदृष्टान्तेन आदित्यरश्मीना-

इति । अत्र तमभित इत्याद्युक्तेः सर्वसाधारण्युत्क्रान्तिः प्राप्यते । पूर्वमादित्यत्वेनोक्तस्य पिङ्गलस्य रश्मिभिरूर्ध्वाक्रमणं च तथा । अत्र संशयः । ओकोग्रज्वलनादेरितरसाधारण्येऽपि यथा हार्दानुग्रहादिलक्षणा गतिर्विदुष उक्ता तथा रश्म्यनुसारित्वमपीतरसाधारणमुतास्मिन्नेवेति । तत्रावधारणमाह । रश्म्यनुसारी । निष्क्रामत्ययमेवेति ॥ १८ ॥

मुभयलोकसंसर्गिकत्वमुक्त्वा तासां नाडीनामादित्यरश्मिसंसृष्टत्वं चोक्त्वा तासु नाडीषु सृतस्य सुषुप्तिं चोक्त्वा ततो मरणावस्थां बोधयन्ती श्रुतिः पठ्यते । * तमभित इत्यादि * । तदर्थस्तु स्फुटः । एवं श्रुतिमुपन्यस्यात्र संशयजनकं विषयमाहुः । * अत्रेत्यादि * । उत्क्रान्तिः शरीरान्निर्गमनम् । * पिङ्गलस्येति * । वर्णविशिष्टस्याऽऽदित्यांशभूतस्य पित्तस्य । संशयस्तु स्फुटः । पूर्वपक्षस्तु, ओकोग्रज्वलनादीनां साधारण्याद्रश्म्यनुसारित्वमपि तत्प्रवाहपातात्साधारणमिति । सिद्धान्तमाहुः । * तत्रेत्यादि * । अत्र प्रमाणं तु, अथैतैरेव रश्मिभिरूर्ध्व आक्रमत इत्येतदनन्तरं, स ओमिति चाहोद्वा मीयते स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषामिति तदग्रिमा श्रुतिः। तत्र हि स विद्वान् ओंकारेण परमात्मानं ध्यायन् ओमिति चाह, यथा पूर्वं वदन्ति, उत ऊर्ध्वं वा मीयते गच्छति । स विद्वान् यावन्मनः क्षिप्येद् यावता कालेन मनोव्यापारं कुर्यात्तावता कालेनादित्यं गच्छति प्राप्नोति । एतद्वै आदित्यरूपं खलु निश्चितं लोकद्वारं ब्रह्मलोकप्रवेशमार्गः । विदुषां प्रपदनं प्राप्तिकरणभूतं, निरोधोऽविदुषां, ये अविद्वांसस्तेषां नेजसा निरोधजनकमिति तस्या अर्थात् । अतो विदुष एव रश्म्यनुसारित्वावऽधारणमित्यर्थः ॥ अयं च करणग्रामसहितो गच्छति । "यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारम् । अष्टाधिपत्यं गुणसन्निवायं सहैव गच्छन्मनसेन्द्रियैश्च" इति श्रीभागवतोक्तन्यायस्यात्रापि शक्यवचनत्वात् । एतस्य करणग्रामलयस्तु

निशि नेतिचेन्न सम्बन्धस्य यावद्देहभावित्वा-
द्दर्शयति च ॥ १९ ॥

विदुष उत्क्रमणे हार्दानुग्रहकृतो यथा विशेषस्तथा कालविशेष-कृतोऽपि विशेषो भविष्यतीत्याशङ्क्य तन्निरासमाह । तत्राहोरात्र-कृतोऽयनकृतो वा स भवेत् । तत्राद्यकृतो नास्तीत्याह । नेति । तत्र हेतुः । सम्बन्धस्येत्यादि । अनुग्रहहेतुभूतो यः पूर्वोक्तो रश्म्यनु-स्मृतिसम्बन्धस्तस्य यावद्देहभावित्वात् तत्कार्यस्यानुग्रहस्यापि तथा-त्वात् कालस्याऽप्रयोजकत्वमित्यर्थः । अत्र प्रमाणमाह । दर्शयति यतः श्रुतिः । तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमी-प्सन्तः प्रव्रजन्तीति ॥ १९ ॥

प्रारब्धसमाप्तौ मुक्तिदशायां भूतेष्वेव बोध्यः । तथैवोपक्रान्तत्वा-दिति ॥ १८ ॥

निशि नेतिचेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ * इत्याशङ्क्याह * । एवं, निशि नेत्यनेनाशङ्क्य । तथाच निशीति पदं मुक्तिप्रतिबन्धककालविशेषोपलक्षकम् । तत्र न आदित्यद्वारेण गमनम् । अतो ज्ञानिना मुक्त्यर्थं योगादिना कालः प्रतीक्षणीय इ-त्याशङ्कयेत्यर्थः । सिद्धान्तं व्याकुर्वन्ति । * अत्रेत्यादि * । अर्थस्तु स्फुटः ॥

अन्ये तु—सम्बन्धस्य यावद्देहभावित्वादित्यत्र नाडीसम्बन्ध-स्य तथात्वं व्याकुर्वन्ति । दर्शयतीत्यत्र, अमुष्मादादित्यात् प्रताय-न्ते ता आसु नाडीषु सृप्ता इति छान्दोग्यश्रुतिं दर्शयति । तत्र यद्य-पि पूर्वसूत्रोक्तं रश्म्यनुसारित्वमेव, निशि नेत्यनेनाक्षिप्यत इति प्र-तीयते, न तु कालविशेषनिषेधः । कालान्तरस्य सहकारित्वापादनं वा । तथाप्यध्ययनसूत्रे रश्म्यभावशङ्कानुदयेन तत्रैतत्सूत्रोक्तस्य त-त्परिहारहेतोरसङ्गत्या, अतश्चेत्यतिदेशासंङ्गतिरिति तत्र उदीक्षा-नुपपत्तेर्विद्यया अपाक्षिकफलत्वस्य मृत्योरनियतकालत्वस्य चेति

हार्दानुग्रहस्य मुक्तिहेतोर्विद्यमानत्वादयनविशेषोऽप्यप्रयोजक इत्याह ।

अतश्चायनेऽपि दक्षिणे ॥ २० ॥

स्पष्टार्थमिदम् ॥ २० ॥

ननु यत्र काले त्वनावृत्तिमिति कालप्राधान्येनोपक्रम्याग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना इति भगवद्वाक्याद् ब्रह्मविदोऽप्युक्तकालाऽपेक्षास्तीत्याशङ्क्य विषयभेदेन समाधत्ते ।

योगिनः प्रति स्मर्यते स्मार्त्ते चैते ॥ २१ ॥

ज्ञानमार्गाद् योगमार्गो हि भिन्नः । तथाच योगिनमुद्दिश्यैव कालविशेषस्य गतिविशेषहेतुत्वं स्मर्यते, न तु, ज्ञानमार्गीयस्य श्रौतस्य । इतरानिरपेक्षत्वात् । नच योगसांख्ये अपि श्रौते एवेति वाच्यम् । यतः स्मार्त्ते एते । चो हेत्वर्थे । एते योगसांख्ये, अग्निर्ज्योतिर्धूमो

कल्पितहेत्वन्तराध्याहारापेक्षया अतिदेशसामञ्जस्याय सम्बन्धपदे हार्दानुग्रहजनकगत्यनुस्मृतिसम्बन्धग्रहणस्यैव युक्तत्वाच्चिन्त्यम् । तथाच, रश्म्यनुसारिसूत्रेऽपि स हेतुर्बोध्यः ॥ १९ ॥

अतश्चायनेऽपि दक्षिणे ॥ * स्पष्टार्थमिति * । चोऽवधारणे नेति चेन्नेति पूर्वसूत्रादनुवर्त्तते । तथाच दक्षिणेऽयने नेतिचेन्नेति पूर्वपक्षस्य, अतश्चेत्यनेनातिदिष्टस्य तत्परिहारहेतोश्च स्फुटत्वात्तथेत्यर्थः ॥ २० ॥

योगिनः प्रति स्मर्यते स्मार्त्ते चैते ॥ व्याकुर्वन्ति । * ज्ञानमार्गादित्यादि * । तथाच मार्गभेदान्न कालविशेषापेक्षेत्यर्थः । सांख्यस्य स्मृत्युक्तत्वेऽपि योगस्य, न तथात्वम् । योगतत्त्वोपनिषदादौ तस्योक्तत्वात् । सूत्रे च योगिपदमात्रम् । अत, एते इति पदे सांख्यनिवेशनं न युक्तमित्यरुच्या पक्षान्तरमाहुः । * अग्निरित्यादि * ।

रात्रिरिति वाक्यद्वयोक्तगती वा । इदं तु श्रुत्युक्तदेवयानपितृयानाति-रिक्तमार्गमभिप्रेत्य समाहितम् । ते एव चेदत्राप्युच्येते शब्दभेदेन तदा न विरोधः ॥ २१ ॥

इति श्रीवेदव्यासमतवर्त्तिश्रीवल्लभाचार्यविरचिते
ब्रह्मसूत्राऽणुभाष्ये चतुर्थाध्यायस्य द्वितीयः
पादः ॥ ४ ॥ २ ॥

नन्वेतयोर्गत्योरपि स्मार्त्तत्वं न युक्तं, किञ्चिच्छब्दभेदेऽपि छान्दोग्योक्तदेवयानपितृयानयोरेव प्रत्यभिज्ञानात् । अतः कथमिदं समाधानमित्यत आहुः । * इदं त्वित्यादि * । तस्मिन् कालद्वारा तत्तदभिमानिन्य आतिवाहिक्यो वा देवता मार्गद्वयगता उच्यन्ते, न तु काल इति तस्यात्राकथनाच्छ्रुतिस्मृत्योर्न विरोधः । तथाच यदि तत्र काल उच्यते तदा तत्र योगिन उपक्रान्तत्वाद् विषयभेदेनाविरोधो, यदि चैकविषयत्वं तदा अर्चिरादिश्रुताविवात्राप्यग्न्यादिशब्दैस्तत्तद्देवतालोकविशिष्टौ तावेव मार्गावुच्येते इत्युभयथाऽपि न श्रुतिस्मृत्योर्विरोध इत्यर्थः । तेन विद्यावतो नान्यापेक्षेति सिद्धम् ॥ २१ ॥ ६ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य
श्रीपीताम्बरात्मजस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे
चतुर्थाऽध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥

अथ चतुर्थाध्यायस्य तृतीयः पादः ।

आर्चिरादिना तत्प्रथितेः ॥ १ ॥

ननु ज्ञानमार्गीयस्येव मर्यादामार्गीयभक्तस्याप्यर्चिरादिमार्गेणैव गमनम् ? उत सद्योमुक्तिरेव भवतीति संशयः । तत्र यथा ज्ञानिनो नियमाभावस्तथाऽत्रापीति प्राप्ते आह । अर्चिरादिमार्गेण तस्य ज्ञानमार्गीयस्यैवोत्कर्षकथनात् स एव तेन मार्गेण गच्छति, न तु भक्तोऽपीत्यर्थः । तथाहि । पञ्चाऽग्निविद्याप्रकरणे तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह आपूर्यमाणपक्षमित्यत्र उपक्रमे भक्तातिरिक्तानेव अधिकृत्य तथा गतिरुच्यते । स्मृतावप्याग्निर्ज्योतिरहः शुक्ल इत्यत्र, ब्रह्मविदो

अर्चिरादिना तत्प्रथितेः ॥

पूर्वस्मिन् पादे प्रथमतः पुष्टिमार्गीयस्य ततो मार्यादामार्गीयस्य सद्योमुक्तिप्रकारो दर्शितः । तदनु, क्रममुक्तौ निर्गमनद्वारादिकं च दर्शितम् । इह तु ततो निर्गतस्य यो ब्रह्मप्राप्तिमार्गो ब्रह्मलोकस्तत्प्रकारश्च प्रदर्श्यते तत्राऽधिकरणमवतारयितुं संशयादिकमाहुः । * नन्वित्यादि * । अत्र मर्यादायाः स्वकृतत्वात् तत्पालनं भक्तेर्ज्ञानादुत्कृष्टत्वं च सन्देहबीजम् । * नियमाभाव इति * । साधनसामर्थ्यतारतम्यनियमाभावः । सिद्धान्तं वक्तुं सूत्रं विवृण्वन्ति * अर्चिरादीति * । * तस्येत्यादि * प्रथ प्रख्याने, प्रथनं प्रथितिः । प्रसिद्धिः । सा श्रुतिषु तस्यैव ज्ञानमार्गीयस्यैवेति तस्यैव तथेत्यर्थः। ज्ञानिन एव प्रसिद्धिरिति यदुक्तं तद् व्युत्पादयन्ति * तथाहीत्यादि * । *भक्तातिरिक्तानेवाधिकृत्येति * इत्थं विदुरित्यादिना क्रियाविषयस्य क्रियायाश्च श्रावणाद्य इत्यनेन तानेवाधिकृत्य । तथाच मर्यादामार्गीयाणामपि भक्तानां प्रायशः सद्योमुक्तिरेव । ज्ञानमार्गी-

जना इति वचनेन ज्ञानमार्गीयस्यैव स पन्था इत्युच्यते । अथेदं चिन्त्यते सामोपनिषत्सु पठ्यते। अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल इत्युपक्रम्यादित्यरूपस्य पिङ्गलस्य रश्मिरूपत्वं नाडीनामुक्त्वाऽग्रे वदत्यऽथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रामत इति नाडीरश्मिसम्बन्धेनैका परलोकगतिः श्रूयते । अर्चिरादिका चाऽन्या, तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरित्यादिश्रुत्युक्ता । स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छतीति चापरा । स यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छतीति चेतरा। सूर्यद्वारेण ते विरजाः प्रयान्तीति चान्या। एवमनेकेषु मार्गेषु सत्स्वर्चिरादेरेवोक्तिः कुत इति । तत्र सर्वेषां पारिभा-

---

षस्यैवानियम इत्यर्थः । ननु भवत्वर्चिरादिमार्गेण ज्ञानमार्गीयस्य गतिस्तथापि मर्यादाभक्तस्य प्रायशः सद्यामुक्तिरेवेति न नियन्तुं शक्यते । श्रुतावर्चिरादिमार्गातिरिक्तानामपि मुक्तिमार्गाणां श्रावणात् तथा बहूनां सत्त्वेऽपि सूत्रकृताऽर्चिरादिमार्ग एव कस्मादुक्त इति चाशङ्कायामाहुः । * अथेदमित्यादि * तान् मार्गान् विषयीकृत्य तेषां भेदोऽस्ति परस्परमुत नेति चिन्त्यत इत्यर्थः । एवं प्रतिज्ञाय मार्गबोधिकाः श्रुतीरुदाहरन्ति । * सामेत्यादि * । * पठ्यत इति * विद्याभेदेन गतिभेदः पठ्यते । * श्रूयत इति * दहरविद्यायां श्रूयते । * अन्येति * पञ्चाग्निविद्यास्था । * अपरेति * कौशीतकिब्राह्मणे पर्यङ्कविद्यास्था । * इतरेति * बृहदारण्यकेऽनात्मोपासनगतिफलकथने । एवमन्यापि पञ्चमी प्रथममुण्डकसमाप्तौ द्रष्टव्या । एवं मार्गभेदबोधिकाः श्रुतीरुपन्यस्य सूत्रेऽर्चिरादेरेवोक्तौ हेतुं निश्चेतुं पृच्छति । * एवमित्यादि * स्वयं हेतुं कल्पयित्वा वास्तवैकत्वस्य हेतुत्वं दूषयन्ति । * तत्रेत्यादि * अर्चिराद्युक्तिहेतुविचारे । सर्वेषां मार्गाणामर्चिरादित्वं पारिभाषिकं, मुक्तिमार्गा अर्चिरादिपदेन व्यव-

षिकमर्चिरादित्वमत एवार्थैतयोः पथोर्न कतरेण च नेति मार्गद्वय-भ्रष्टानामतिकष्टं जायस्व म्रियस्वेति तृतीयं स्थानमित्युक्तमन्यथाऽनेकेषां मार्गाणामुक्तानां श्रूयमाणत्वादस्य तृतीयत्वं नोच्येताऽतः प्रकरणभेदाद्भिन्नोपासनशेषत्वान्मिथोऽनपेक्षा भिन्ना एवैते मार्गा ब्रह्मप्रापका इति मन्तव्यमिति चेत्तत्रोच्यते । न हीयं परिभाषा सर्वेषु श्रुतास्ति यतस्तथोच्येत । अतो लाघवादनेकपर्वविशिष्ट एक एव मार्ग इति मन्तव्यं, न तु पर्वभेदेन मार्गभेद इति । गौरवप्रसङ्गात् । नचैवमथैतैरेव रश्मिभिरित्यवधारणानुपपत्तिरिति वाच्यम् । तस्याः श्रुतेरुत्क्रमणमात्रमार्गनिरूपकत्वात् । तथाहि । तत्रोपक्रमे ह्यथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमत इत्यु-

———

हर्त्तव्या इति साङ्केतिकानियमसिद्धं, न तु वास्तवम् । अतः पारिभाषिकत्वादेव हेतोरथैतयोः पथोरिति द्वित्वं, जायस्वेत्यस्य तृतीयस्थानत्वं च श्रुतावुक्तम् । अन्यथा वास्तवेऽर्चिरादित्वे बहूनामुक्तानां मार्गाणां ब्रह्मप्रापकतया श्रूयमाणत्वादस्य तृतीयत्वं पथोरितिद्वित्वं च नोच्येत । अतस्तृतीयत्वादिपीडारूपाद्धेतोस्तेष्वर्चिरादित्वं पारिभाषिकमङ्गीकृत्योक्तहेतुद्वयाद् ब्रह्मप्रापका मार्गा बहव एवेति मन्तव्यमित्यर्थः । एवं पूर्वपक्षी स्वमतमुक्त्वा तत्रैकदेशिकृतं समाधिं प्रतिक्षेप्तुमुपक्षिपति । * तत्रोच्यत इत्यादि * । * तथोच्येतेति * पारिभाषिकत्वमुच्यते । * अतो लाघवादिति * पारिभाषिकत्वेनार्चिरादित्वस्य वक्तुमशक्यत्वात् पर्वप्रत्यभिज्ञानलिङ्गेन मार्गैक्याङ्गीकारे लाघवात् । * गौरवप्रसङ्गादिति * । मार्गाणामनेकत्वं तेषु पर्वन्यूनाधिक्येन कस्यचिन्निकटत्वं, कस्य चिद् दूरत्वं निकटमार्गत्यागेन दूरमार्गगमने उपपत्तिकल्पनं निकटत्यागे चोपपत्तिकल्पनमित्येवं तथात्वादित्यर्थः । पुनर्मार्गानेकत्वमाशङ्क्य निषेधति * नचैवमित्यादि * । एवमिति * । मुक्तिमार्गस्यैकत्वे । निषेधे हेतुः । तस्या इत्यादि * । * तत्रेति * । रश्मिवाक्ये । हिर्हेतौ । * इत्यु-

च्यते । एतस्मात् पुरस्तादथ या एता हृदयस्य नाड्य इत्युपक्रम्य पिङ्गलस्यादित्यत्वमुक्त्वा तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चाऽमुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चाऽमुं चामुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ता इत्यन्तेन वाक्येन नाडीषु रश्मिप्रचारमुक्त्वाग्रे, अथ यत्रैतदस्मादित्याद्युक्तम् । उपसंहारे च शतं चैका हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका, तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति । एवमुपक्रमोपसंहाराभ्यामुत्क्रमणमात्रमार्गनिरूपकत्वं, न तु ब्रह्मप्रापकमार्गस्यातस्तदनुपपत्तिपरिहारोऽनर्थकः । नन्वनेकपर्वविशिष्टत्वेन मार्गस्यैकत्वे तं निरूपयन्ती श्रुतिः क्वचित् किञ्चित् पर्व निरूपयति, क्वचिन्नेति कथम् । उपसंहारेण प्राप्स्यत इति तात्पर्येण तथेति चेद् ब्रवीषि तदा शाखान्तरमविदुषस्तदसम्भवेन तं प्रति श्रुतेर्न्यूनतापातः । न हि सर्वशाखाविदं प्रत्येव कथनमिति वक्तुमुचितम् । तस्याऽसम्भवादतः स्वस्वशाखाज्ञानवन्तं प्रत्येव तथा ।

च्यत इति * । शरीरादुत्क्रम उच्यते । नन्वेतस्मात् पूर्वं रश्मिनाडीप्रचारकथने महापथदृष्टान्तेन तासां मार्गत्वमपि बोध्यत इति नैवं वक्तुं युक्तमित्याशङ्कायामाह । * एतस्मात् पुरस्तादित्यादि * । तथाच महापथदृष्टान्तेऽप्यन्ते, एतस्मादित्यादिनोत्क्रान्तिरेवोक्तेति तन्मार्गत्वमेव तासां युक्तमित्यर्थः । युक्त्यन्तरमाह । * उपसंहारे चेत्यादि * । एतदेव निगमयति * एवमुपक्रमेत्यादि * । * तदनुपपत्तिपरिहार इति * । ब्रह्मप्रापकमार्गत्वाऽनुपपत्तिपरिहारः । एवमेकमार्गत्वे साधिते तद् दूषयितुं पर्वोक्तिप्रकारे पृच्छति * नन्वित्यादि * । समाधिमुद्भाव्य दूषयति । * उपसंहारेणेत्यादि * । * तस्यासम्भवादिति * । वेदानामनन्तत्वेनेदानीं कलिकृतबुद्धिह्रासेन च सर्वशाखाऽस्तित्वस्यासम्भवात् । एतदुपष्टम्भायाह ।

अध्ययनविधेरपि तावन्मात्रपरत्वात् । शाखान्तरसंवादिपर्वकथनानुपपत्तिश्च । उपसंहारेणैव तस्यापि प्राप्तिसम्भवादतो विरुद्धदिक्कानां स्वस्वमार्गेणैकग्रामप्राप्तिवदिहापि भवितुमर्हति स्वातन्त्र्येण सर्वैर्मार्गैर्ब्रह्मप्राप्तिः । नचैवमथैतयोः पथोरिति द्विवचनानुपपत्तिर्जायस्व म्रियस्वेत्यस्य तृतीयत्वं चाऽनुपपन्नमिति वाच्यम्। अर्चिरादिकमुक्त्वोपसंहरत्येष देवयानः पन्था इति श्रुत्यन्तरे च, स एनं देवयानं पन्थानमापद्याग्निलोकमागच्छतीति । तथाच ब्रह्मप्रापकाः सर्वे मार्गा देवयाना इत्युच्यन्ते । दैवी सम्पद्विमोक्षायेति भगवद्वाक्याद्दैव्यां सम्पदि ये जातास्ते देवा इत्युच्यन्ते तेषां यानं गमनं यत्रेति ते सर्वेऽपि मार्गा देवयानशब्देनोच्यन्ते । द्वितीयस्त्वविशिष्टः । एवं द्वित्वं त्रित्वं चोपपद्यते । नचोक्तरीत्या लाघवादेक एव स मन्तव्यः । स्वतःप्रमाणभूता हि श्रुतिः । सा येन यदा या श्रुता तदर्थाऽवधारणे द्वितीयस्या अनुपस्थितत्वान्न लाघवगौरवतद्विचारावसरः। क्वचिदुपस्थितौ चोक्तबाधकैरुपसंहा-

---

* अध्ययनेत्यादि * । स्वस्यासाधारणत्वेन पितृपितामहादिपरम्पराप्राप्ता शाखा स्वाध्याय इति योगस्य सर्वैराहतत्वेन शाखाप्रणयनस्य च तदर्थत्वेन तथात्वात् । उपसंहारेणैव तस्यापि प्राप्तिसम्भवादिति । उपसंहारे हि प्रयोजको वस्त्वभेदः, प्रयोजनाभेदश्च । तस्याभयसत्त्वया कृते उपसंहारे तेनैवानुक्तपर्वप्राप्तिसम्भवात् । एवं तदुक्तं दूषयित्वा स्वमतं स्थापयति । * अतो विरुद्धदिक्केत्यादि * । द्विवचनाद्यनुपपत्तिं परिहरति । * नचेत्यादि * । * उपपद्यत इत्यन्तम् * । लाघवं दूषयति । * नचोक्तेत्यादि * । * येनेति * यच्छाखाध्यायिना । बहुशाखाध्यायिनोऽनेकमार्गोपस्थितौ दोषतादवस्थ्यमाशङ्क्य परिहरति । * क्वचिदित्यादि * । * उक्तबाधकैरिति * । अध्ययनविधेः स्वशाखाध्ययनमात्रपरत्वं तदध्येतुस्तावन्मात्रकरणे सर्वशास्त्रार्थकरणपूर्त्तिः, शाखान्तरसंवादिपर्वकथ-

रानवकाशः। अपरं च। ब्रह्मविदः क्रममुक्तौ गन्तव्यो मार्गो ह्ययमुपदिश्यते। तत्तल्लोके तदाऽनन्दानुभवश्चावश्यकः। तथाचोपासनभेदात् फलभेदस्यावश्यकत्वान्मार्गभेदोऽपि तथेति सर्वेष्वेकरूपफलप्रजनक उपसंहारो न युक्तः। किञ्च। उपासने कर्मणि चोपसंहारः सम्मतः। मार्गस्तु नान्यतररूपोऽतो यस्योपासकस्य येन मार्गेण गमनं स मार्ग उपदिश्यत इति नोपसंहारो युक्तः। अविधेयत्वादपि तथा। एतद् यथा तथा पुरस्तान्निरूपितम्, उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने चेत्यत्र। एवं सत्यर्चिपशब्देनार्चिरुपलक्षितो मार्ग उच्यते। आदिपदेनान्ये सर्वे मार्गाः संगृह्यन्ते इति नाऽनुपपत्तिः काचिदितिचेद् अत्र वदामः।

नानुपपत्तिश्चेत्येवंरूपैः। एवं परोक्तं परिहृत्य स्वोक्तौ युक्तिमाह। * अपरं चेत्यादि *। * आवश्यक इति *। तदर्थमेव तत्कथनात् पुराणे तथा प्रसिद्धेश्चावश्यकः। * तथेति *। आवश्यकः। एवं स्वमतं स्थापयित्वा उपसंहारपक्षे बाधकमप्याह। * किञ्चेत्यादि *। ननूपासने फलभेदजनकः प्रकारभेद उपसंहारप्रयोजकः कर्मणि च वाक्यसार्थक्यम्। न तूपासनत्वं कर्मत्वं वा। अतो मार्गस्य तदन्यतररूपत्वाभावेऽपि ब्रह्मप्राप्तिरूपप्रयोजनैक्यात् कुतो न युक्त उपसंहार इत्यत आह। * अविधेयत्वादपि तथेति *। नन्वविधेयत्वस्योपसंहारबाधकत्वं कसिद्धमित्यतः पूर्वोक्तं स्मारयति। * एतद्यथेत्यादि *। तत्र हि समाने योऽर्थाभेदादुपसंहारः स, विधिशेषो, येऽग्निहोत्रादयस्तद्वदित्युक्तम्। तेऽग्निहोत्रादयः सर्वेषां समाना अपि येषां शाखिनां यथोक्तास्तेषामेव ते तथा विधेया, नेतरेषाम्। तथाऽविधेयत्वात्। एवमत्रापि यदुपासनशेषे यत्पर्वको मार्ग उक्तस्तं प्रति स एव विधेयो, न त्वन्यं प्रति। अतोऽन्यान् प्रत्यविधेयत्वादपि न मार्गोपसंहारो युक्त इत्यर्थः। एवमुपपाद्य सिद्धमाह। * एवं सतीत्यादि *। पूर्वपक्षमुपपाद्य सिद्धान्तमाहुः। * अत्र वदाम इत्यादि *। तथाच नानाग्रामयुक्तमार्गैक्येऽपि कस्यचित् कस्मिंश्चिद्

अर्चिरादिभ्य इत्युक्तं भवेत् त्वद्रीतिरेव चेद् अभिप्रेता भवेत्तस्मान्नैवमित्यवधार्यते । अर्चिरादिनेत्येकवचनाऽन्यथानुपपत्त्या मार्गस्यैकत्वमवश्यमूरीकार्यमेवं सति श्रुतिषु यावन्ति पर्वाण्युक्तानि तानि सर्वाण्येकस्मिन्नेवार्चिरादिमार्गे वर्त्तमानान्यपि यस्योपासकस्य यावत्पर्वभोगो भावी तं प्रति तावत्पर्वोक्तिर्यस्य यावतां तेषां स न भावी तं प्रति न तदुक्तिस्तद्भोगाभावादिति नानुपपन्नं किञ्चित् । ननु त्वयाऽप्यनुक्तानां पर्वणां तत्र स्थितिं वदतोपसंहार एवोक्तो भवति प्रापकत्वेनेति चेत्, स्यादेतदेवं यदि तस्यैव गन्तुर्भोगाय तदपि पर्व तत्रोच्येत । न त्वेवं, किन्त्वेकवचनानुरोधान्मार्गैक्ये निश्चिते यं प्रति यत् पर्वोच्यते तत्तत्र कण्ठोक्तमेवेति नोपसंहारापेक्षा । अग्रेऽन्यत्रोक्तानां पर्वणामुक्तस्थले सन्निवेशोक्त्याऽपि सूत्रकाराभिमत एक एव मार्ग इति ज्ञायते । श्रुतौ सर्वत्र पूर्वपरामर्शादपि तथा ॥ १ ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

ग्रामेऽवान्तरनिवासोऽन्यस्याऽन्यत्र तथेहापीत्यर्थः । अत्रोपसंहारस्य पर्वप्रापकत्वमाशङ्कते । * नन्वित्यादि * । तत्परिहरन्ति । * स्यादेतदित्यादि * । * नोपसंहारापेक्षेति * । अन्यभोगाभावान्नोपसंहारापेक्षा । ननु मार्गभेदे को दोषो येन क्लिष्टादरः क्रियत इत्यत आहुः । * अग्र इत्यादि * । * अग्र इति * । अग्रिमसूत्रेषु । * पूर्वपरामर्शादिति * । अर्चिषोऽहरह्नः पूर्वपक्ष इत्यादिरूपात्तस्मात् । तथाच मार्गान्तरस्याभावादेतस्य च ज्ञानिनः प्रत्येवोक्तत्वाज्ज्ञानिनामिव क्रममुक्तिः । मर्यादाभक्तानां तु पूर्वोक्तरीत्या सद्योमुक्तिरेवेति सिद्धम् ॥ १ ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ ननु मार्गैक्यं न युक्तमनुक्तपर्वस्थलस्य वक्तुमशक्यत्वादित्याशङ्क्य तद्विनिगमनायामिमं पठ-

छान्दोग्ये वायुर्न पठ्यते । कौशीतकिश्रुतौ तु, स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमिति वाय्वादयः श्रूयन्ते । तत्रार्चिषोऽग्नेश्चाभेदान्न विचारणीयमस्ति । वायुलोकं कस्माल्लोकाद् गच्छतीत्याकाङ्क्षायामाह । वायुमब्दादिति । अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासाँस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमित्यत्र संवत्सरलोकात् परस्ताद्वायुलोको निवेशयितव्यस्तथाच संवत्सरलोकाद्वायुलोकं गच्छतीत्यर्थः । तत्र विनिगमकमाह । अविशेषविशेषाभ्यामिति ।

अत्रेदं ज्ञेयम् । अग्निहोत्राऽऽदिकर्मभिश्चित्तशुद्धावुपासनाभिर्ज्ञानोदये क्रममुक्त्यधिकारी हि तत्तल्लोकं गत्वा भुक्त्वाऽन्ते ब्रह्म प्राप्नोति । कर्म त्वग्निसाध्यं भूलोक एव च भवत्यत आदौ तत्रत्यो भोगस्ततस्तदुपरितनलोकानां पृथिवीदीक्षा तयाऽग्निदीक्षया दीक्षितः । यथा पृथिव्यऽग्निगर्भेत्यादिश्रुतिभ्यो भूरऽग्निप्रधाना भवत्यतोऽर्चिराख्यमग्निलोकमादौ गच्छति ।
ततः कर्मोपायनयोरहरादिसंवत्सरान्ते काले विहितत्वात्तत्र तत्र गत्वा भुङ्क्ते । तथाच संवत्सरान्तानां भूसम्बन्धित्वेनाविशेषात् तन्मध्ये वायोर्न प्रवेशः । भूलोकादुपर्यन्तरिक्षलोकस्तदुपरि द्युलोकस्तथाच वायुरन्तरिक्षस्याधिपतिरिति श्रुतेः, सूर्यो दिवोऽधिपतिरिति श्रु-

---

तीत्याशयेन सूत्रमवतारयन्ति । * छान्दोग्य इत्यादि * । * आहेति * संवत्सरलोकाद्वायुलोकं गच्छतीति विनिगमकपूर्वकमाहेत्यर्थः । अविशेषौ कतरावित्यपेक्षायां हेतुं व्याकुर्वन्ति * अत्रेदमित्यादि * तथाचार्चिरादिसंवत्सरान्तानां भूसम्बन्धित्वमविशेषः । वाय्वादित्ययोर्नीचोच्चलोकाधिपत्येन तथात्वात्तयोः पौर्वापर्यं विशेष इति ताभ्यां तथेत्यर्थः । अत्र, नन्वित्यादिना छान्दोग्यश्रुतिविरोधमाश-

तेस्तयोः पौर्वापर्ये विशेषो हेतुरस्तीत्यादित्यलोकात् पूर्वमुक्तरीत्या भूलोकमध्यपातिसंवत्सरस्य परस्ताच्च वायुर्निवेशयितव्य इत्यर्थः । ननु तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरित्यादिश्रुतिरुक्तमुक्तमनूद्यानूद्यापादानत्वं वदन्ती पूर्वोत्तरयोरव्यवधानं सूचयतीति नोक्तमादरणीयमिति चेत् । सत्यम् । यस्योपासकस्य न वायुलोकभोगस्तं प्रति सोक्तिर्यस्य तु तद्भोगस्तस्योक्तरीतिर्मार्गक्रमे न इत्यादिति नाऽनुपपत्तिः काचित् । केचित्तु, स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति, स वायुलोकं स वरुणलोकमित्यविशेषेण वायुरुपदिश्यते । मिथः पौर्वापर्यप्रापकपदाभावात् । यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छतीति श्रुत्याऽऽदित्यात् पूर्वो वायुर्विशेषेणोपदिश्यत इत्यब्दादित्ययोर-

---

ब्लृप्य समादधते * सत्यमित्यादि * । * सोक्तिरिति * छान्दोग्योक्ताऽव्यवधानोक्तिः । * उक्तरीतिरिति * व्यासोक्तरीतिः । तथाच भोक्तृविशेषेणाऽव्यवधानव्यवधानसम्भवान्न श्रुतिविरोधरूपानुपपत्तिरित्यर्थः । एवं स्वमतेन व्याख्यायाऽत्र शाङ्करादिमतमुपक्षिपन्ति । * केचित्त्वित्यादि * । * मिथःपौर्वापर्यप्रापकपदाभावादिति * । तादृशपञ्चम्यन्तपदाभावात् । तथाच सोऽत्राविशेषपदार्थः । यदा वै पुरुष इत्युक्तं तेनोर्ध्वाक्रमणमादित्ये गमनं च यदुच्यते स विशेषपदार्थः । ताभ्यामब्दादित्ययोरन्तराले वायुनिवेशं वदन्तीत्यर्थः। श्रुत्यर्थस्तु—यदा यस्मिन् वै निश्चयेन पुरुषो ब्रह्मविद् अस्माल्लोकाच्छरीरात् प्रैति लोकान्तरं गच्छति, तदा स पुरुषो वायुमागच्छति प्राप्नोति । तस्मै आगताय, स वायुः, तत्र तदागमनस्थले विजिहीते पूर्वं स्तिमितोऽपि तदानीं स्वावयवान् विगमयति तस्य गमनार्थम् । विगमनस्थलपरिमाणमाह, यथा रथचक्रस्य खम् । यावत्परिमाणं रथचक्रस्य छिद्रम् । तेन मार्गेण स पुरुष ऊर्ध्व आक्रमते स आदित्य-

न्तराले निवेशयितव्य इत्यर्थं वदन्ति । स चिन्त्यते । यथा तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छतीति विशेषोपदेश इत्युच्यते तथा स वरुणलोकमित्यत्राऽपि वक्तुं शक्यम् । नच, स आदित्यमागच्छतीत्यत्र तच्छब्दस्य पूर्वपरामर्शित्वाद्वायुलोकगतस्यैव पूर्वत्वात् तथेति वाच्यम् । अग्निलोकमागच्छति स वायुलोकं स वरुणलोकमित्यत्रापि तुल्यत्वात् । किञ्चैवमग्निलोकानन्तरं वायुलोक इत्यपि वक्तुं शक्यमतो विद्वद्भिरुपेक्ष्योऽयम् । वाजसनेयिनस्तु, मासेभ्यो देवलोकं देवलोकादादित्यमिति पठन्ति । तत्राप्यादित्यात् पूर्वो देवलोकात् परो वायुर्ज्ञेयः । एकत्रादित्यात् पूर्वत्वे सिद्धे मार्गैक्यादन्यत्रापि तथात्वस्य न्यायप्राप्तत्वात् सूत्रकारेण तु छन्दोगश्रुत्यपेक्षयोक्तं, वायुमब्दादिति । एवं सति मासेभ्यः पर-

---

मागच्छति प्राप्नोतीति । एवं तद्व्याख्यातमर्थमनूद्य तदुक्तस्य विशेषस्य विशेषत्वं युज्यते, न वेति विचारयन्ति । * स चिन्त्यत इत्यादि * । * इत्यत्रापि वक्तुं शक्यमिति * ऊर्ध्वाक्रमणस्यार्थसिद्धत्वात्तच्छब्दस्य तत्रापि सत्त्वाद्वक्तुं शक्यम् । तथाचोर्ध्वाक्रमणतच्छब्दोक्तपूर्वपरामर्शयोर्विशेषपदार्थत्वाङ्गीकारे वाजसनेयिभिर्वायुलोकानन्तरमादित्यवत्कौशीतकिभिर्वायुलोकानन्तरं वरुणलोकस्य पठ्यमानत्वेन भवदुक्तविशेषस्य तत्रापि शक्यवचनत्वादुक्तहेतोरर्थान्तरसाधकतया प्रकृतासिद्धिरित्यर्थः । तर्हि वायुलोकगतपुरुषीयं पूर्ववर्तित्वं परामृशतस्तच्छब्दस्य तथात्वमस्त्वित्यत आहुः । * नचेत्यादि * तथाचाद्ये पक्षे व्याख्येयसूत्रविरोधो द्वितीये च वरुणसूत्रस्येत्युभयमप्ययुक्तमित्यर्थः । दूषणान्तरमाहुः । * किञ्चेत्यादि * । * एवमिति * ऊर्ध्वाक्रमणपूर्ववर्तित्वयोर्विशेषपदार्थत्वे । तथाचाब्दानन्तर्यमपि न सिद्ध्येदित्यर्थः । एवं सूत्रव्याख्यानांऽशे तन्मतमपास्य बृहदारण्यकश्रुतिविरोधांऽशेऽपि तन्मतं परिहर्त्तुमाहुः । * वाजसनेयिन इत्यारभ्याब्दादितीत्यन्तम् * । परिहरन्ति । * एवं सती-

स्तादब्दनिवेशनं कार्यम् । नच वायुमब्दादिति सूत्रान्मार्गभेदापत्तिः। देवलोकस्यादित्याधिष्ठेयत्वेनादित्यमध्यपातित्वमभिप्रेत्य छन्दोगश्रुतिस्तथोक्तवती । तदनुसारेण व्यासोऽप्यतो नानुपपत्तिः ॥२॥

तडितोऽधि वरुणः सम्बन्धात् ॥ ३ ॥

आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतमित्यत्र पठितविद्युल्लोकात् परतो वरुणलोको निवेशनीयः । तत्र हेतुः—सम्बन्धात् । तडितोऽप्सम्बन्धित्वाद्वरुणस्य तत्पतित्वात् तथा ॥ ३ ॥

त्यादि*एवं सतीति * देवलोकनिवेशेऽवश्यं कर्त्तव्ये सति । * तथोक्तवतीति * संवत्सराब्दादादित्यमित्युक्तवती । तथाच स्थानापेक्षया सूर्यो दिवोऽधिपतिरित्युक्तलिङ्गस्य बलिष्ठत्वाद् देवलोकात् पूर्वमेव वायुनिवेशो युक्तो, न तु ततः परमित्यर्थः ॥ २ ॥

रामानुजाचार्यास्तु—देवलोकशब्दं वायुलोकपरमेवाङ्गीकुर्वन्ति । यद्देवलोकशब्दे अविशेषेणोक्तं तदेव वायुलोकशब्दे विशेषेणोच्यत इत्यविशेषविशेषाभ्यामित्येव तत्रापि हेतुः । वाजसनेयिनां स वायुमागच्छतीति श्रावणात् कौशीतकिनां वायुलोकशब्दे वायुश्चासौ लोकश्चेति कर्मधारयमङ्गीकुर्वन्तो वायोर्देवलोकत्वाय, योऽयं पवन एष देवानां गृहा इति श्रुतिं चाहुः । तत्राप्येकत्र कर्मधारयाङ्गीकारे प्रायपाठविरोधः । सर्वत्र तदङ्गीकारे तु लोकपदप्रयोगवैयर्थ्यम् । स वायुमागच्छतीत्यत्र केवलवायुप्रयोगस्तु द्वारत्वाभिप्रायेण । आदित्यसन्निधानात् । आदित्ये लोकद्वारत्वस्य, एतद्वै खलु लोकद्वारमिति छान्दोग्ये श्रावणादिति । अतश्चिन्त्यम् ॥ ३ ॥

तडितोऽधि वरुणः सम्बन्धात् ॥ ननु भवतु संवत्सरादुपरि देवलोकादर्वाग्वायुलोकनिवेशस्तथापि वरुणलोकः क निवेशनीयः । न हि तत्र विशेषादिरूपं किमपि नियामकमन्तराले निवेशने लभ्यते । अतो मार्गभेदपक्ष एव युक्त इत्याशङ्कानिरासायेदमित्याशयेन व्याकुर्वन्ति * आदित्यादित्यादि * । * तडितोऽप्सम्बन्धित्वादिति * । विशाला हि विद्युतो नृत्यन्ति तीव्रस्तनितनिर्घोषा

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । येर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ५ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड २)	५	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्ड २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्ड २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम् । श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा । श्रीमदन्नंभट्टप्रणीता खण्डानि १०	१०	०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख०	१०	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्विरचिता खण्डे २	२	०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३	३	०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्यव्याख्या समेतम् खण्डानि १४	१४	०
तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा—तत्त्वत्रयचुलुकसंग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः ।	१	०
श्रीभाष्यवार्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्रतिपादनपरम् ।	१	०

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस

Registered under Act XXV. of 1867. (All Rights Reserved.)

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, Ph. D.
No. 129.

श्रीमदणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितभाष्य-
प्रकाशाख्यव्याख्यासमेतम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितम् ।

ANU BHÂSHYA,

On Brahmasûtra by Srî Vallabhâchârya,
With the Commentary called Bhâshya Prakâsa,
By Goswâmi Srî Purushottamjee Mahârâj.
Edited by Ratna Gopâl Bhatta.

Fasciculus XV.

BENARES:
Published by the Proprietors Messrs. Braj *B. Das & Co.,*
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book *Depot.*

Printed at the Vidyâ Vilâs Press,
Benares.

1907.

सूचीपत्रम् ।

गणपाठः	०	५	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०

वरुणाच्चाधीन्द्रप्रजापती ॥ ४ ॥

स्पष्टमिदम् । अर्चिरादिपाठे विद्युदनन्तरं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीति पठ्यते । तत्र यस्योपासकस्य वरुणादिलोकगमनापेक्षा नास्ति तमपेक्ष्येति ज्ञेयम् ।मार्गैक्यनियममभिप्रेत्य सूत्रकारोऽन्यत्रोक्तानामन्येषामपि लोकानां तत्रैव निवेशनमाह ॥ ४ ॥

आतिवाहिकास्तल्लिङ्गात् ॥ ५ ॥

विद्युदनन्तरं स तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीत्यत्र भवति संशयः । उक्तश्रुतेर्गमयित्रैव ब्रह्मप्राप्तिरिति निश्चीयते । स च विद्युदनन्तरमेव पठ्यते । एवं सति यस्य वरुणादिलोकगमनं तस्य वचनाभावेन गमयित्रप्राप्तेर्ब्रह्मप्राप्तिर्भवति, न वेति।

———

जीमूतोदरेषु नृत्यन्ति अथापः प्रपतन्ति विद्योतते स्तनयति वर्षिष्यति वेति ब्राह्मणात् तथा । तथाचाप्सम्बन्धरूपस्य नियामकस्य विद्यमानत्वात् तन्निवेशसिद्धेर्न मार्गैक्यबाध इत्यर्थः ॥ ४ ॥

वरुणाच्चाधीन्द्रप्रजापती ॥ * स्पष्टमिति * । पाठसामर्थ्यादेव तन्निवेशस्थानं स्पष्टमिति न पूर्ववदाशङ्कावकाश इत्यर्थः । तडिदनन्तरं वरुणादिलोकनिवेशेऽर्चिरादिश्रुतिविरोधमाशङ्क्य परिहरन्ति । * अर्चिरादीत्यादि * । * तमपेक्ष्येति * । पर्यङ्कविद्युदुपासकमपेक्ष्य । मार्गैक्यानियममभिप्रेत्येति । अक्षिपुरुषविद्यापञ्चाग्निविद्ययोरिव पर्यङ्कविद्यामपि देवयानमार्गस्य प्रत्यभिज्ञानात् तयोरिवास्यामपि वैद्युतस्यातिवाहिकस्यावश्यकत्वात् तथाभिप्रेत्य । तथाचैतन्न्यायेन सर्वासु क्रमप्राप्तिबोधिकासु ब्रह्मविद्यासु वैद्युतं पुरुषं विना न ब्रह्मप्राप्तिरिति बोधनार्थं मार्गैक्यनिरूपणमित्यर्थः ॥ ५ ॥

आतिवाहिकास्तल्लिङ्गात् ॥ एतस्याधिकरणत्वाय विषयं संशयं चाहुः । * विद्युदित्यादि * । सङ्गतिस्त्ववसरः । पूर्वपक्षमा-

तत्र वाचनिकस्य यावद्वचनत्वात्तदभावेन सा न भवतीति प्राप्त आह । आतिवाहिका इति । एतदुक्तं भवति । यस्योपासकस्य यावत्फलभोगानन्तरं ब्रह्मप्राप्तिर्भाविनी तस्य तावत्तद्भोगानन्तरं ब्रह्मप्राप्तिर्भवत्यत एव कौशीतकिश्रुतौ प्रजापतिलोकानन्तरं ब्रह्मलोकः पठ्यते । अन्यथा कृतसाधनवैयर्थ्यं, तेषां ब्रह्मप्राप्तिसाधनत्वबोधकश्रुतिविरोधश्च स्यात् । तथाच यत्रातिवाहिकश्रुतिर्नास्ति तत्राप्यातिवाहिको भगवदीय एव ब्रह्म प्रापयतीति ज्ञेयम् । वस्तुतस्तु बहव एव तादृशाः सन्तीति ज्ञापनाय बहुवचनमत्रोक्तम् । तन्मध्ये कश्चनागत्यैक एव नयतीति ज्ञापनाय श्रुतावेकवचनम् । तत्र हेतुस्तल्लिङ्गात् । तत्पुरुषोऽमानव इत्यत्र ब्रह्मसम्बन्धित्वं लिङ्गमुच्यते । तेनेदं ज्ञाप्यते, यथा विद्याबलात्

हुः । * तत्रेत्यादि * । सिद्धान्तं व्युत्पादयन्ति । * एतदित्यादि * । * अन्यथा कृतसाधनवैयर्थ्यमिति * । तेनोपासनेन ब्रह्मप्राप्त्यभावे तदर्थं कृतं यदुपासनरूपं साधनं तस्य वैयर्थ्यम् । * तेषामिति * । उपासनानाम् । * आतिवाहिकश्रुतिरिति * । अतिवहनम् अतिक्रामयित्वा प्रापणम् अतिवाहः । भावे घञ् । तत्सम्बन्धी आतिवाहिकस्तद्बोधिका श्रुतिरातिवाहिकश्रुतिः । ननु यद्येवमातिवाहिकप्राप्त्यर्थमिदं सूत्रं स्यात् तदैकवचनमेव प्रयुज्येत । श्रुतावमानवः पुरुष इत्येकवचनात् । अतो नैवमित्यत आहुः । * वस्तुत इत्यादि * । तथाच यत्रातिवाहिको न पठितस्तस्यामपि विद्यायां ब्रह्मप्राप्तेरुक्तत्वात् तदन्यथानुपपत्त्या स कल्प्योऽतः प्राप्यबहुत्वात् प्रापकबहुत्वबोधाय तद्वचनमित्यर्थः । श्रौतस्यैकवचनस्य तात्पर्यमाहुः । * तन्मध्य इत्यादि * । * तत्र हेतुरिति * । बहुत्वे हेतुः । एतमर्थं हेतुव्याख्यामुखेन स्फुटीकुर्वन्ति * तत्पुरुष इत्यादि * । * उच्यत इति * । * अमानव इत्यादिना वाक्येनोच्यते * । * तेनेति * । श्रौतेन लिङ्गेन । तथाचैतल्लिङ्गेनैव

तत्तल्लोकप्राप्तिस्तथैव ब्रह्मप्राप्तिरपीति न, किन्तु भगवदीयपुरुषाऽनुग्रहेणैवेति । नच पूर्वपूर्वलोकाधिष्ठातृदेवा उत्तरोत्तरलोकं प्रत्यातिवाहिका यथा तथा ब्रह्मप्राप्त्यव्यवहितपूर्वलोकदेवा एव ब्रह्मप्रापका इति तत्पदेन स लोक एवोच्यत इति वाच्यम् । तदेतरलोकेषु तदकथनं यथा तथाऽत्रापि न कथयेत् । लोकाधिष्ठातृदेवानामातिवाहिकत्वोक्तावर्चिर्लोकप्रापकाऽऽतिवाहिकस्याभावात् तत्प्राप्तिर्न स्यात् । तथा सति देवयानमार्ग एवोच्छिद्येत । अतो यथा विद्याबलेनैवार्चिषः प्राप्तिस्तथेतरेषामपीति बुध्यस्व । कस्य-

---

तेषां बहुत्वसिद्धिरित्यर्थः । अत्रान्ये एवं व्याकुर्वन्ति । अर्चिषोहरह्न आपूर्यमाणपक्षमित्यादौ किमेतेऽर्चिरादयो देवयानमार्गस्य चिह्नानि । यथा अमुकं नगरं प्रति गच्छतोऽमुकः पर्वतोऽमुका नदी, एते ग्रामा इति । अथवा अवान्तरभोगभूमयो, यथा दूरतरं नगरं गच्छतोऽवान्तरनिवासग्रामाः । उताऽऽतिवाहिका देवताविशेषा इति सन्देहे । आतिवाहिका एवैते । कुतः । तल्लिङ्गात् । आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीति सिद्धवद्गमयितृत्वदर्शनरूपाल्लिङ्गात् । अमानव इति विशेषणं तु पूर्वोक्तमानवत्वनिवृत्त्यर्थमिति । तदेतन्निषेधन्ति * नचेत्यादि *तत्पदेनेति * । श्रौतेन लुप्तापादानपञ्चमीकेन । तन्निषेधहेतुं व्युत्पादयन्ति * तदेतरेत्यादि * । यदि तत्पदेन विद्युल्लोकः परामृश्येत तदाऽन्येषु लोकेषु यथा गमयितुरकथनं तथात्रापि गमयितारं न कथयेत् । देवानामातिवाहिकत्वस्य लोकसम्बन्धादेव प्राप्तत्वात् । नन्वत्र तत्पदस्य लोकबोधकत्वेऽपि देवानां लोकस्थत्वान्नातिवाहिकत्वकल्पनं, किन्तूपसंहारस्थं सिद्धवद् गमयितृत्वदर्शनमेव देवानाम् आतिवाहिकत्वे लिङ्गमतस्तत्प्रापणार्थं तत्कथनमिति चेत्तत्राहुः । * लोकेत्यादि * । तथाचात्र यद् गमयितृकथनं तद्विद्युल्लोकात् पूर्वेषु लोकेषु गमयित्रपेक्षाभावं बोधयति, न तु गमयितारं प्रापयतीत्यर्थः । ननु यदि विद्याबलेनैव विद्युदन्तलोकप्राप्तिः स्यात् तदा

चिदल्पलोकगमनानन्तरमेव ब्रह्मप्राप्तिः । कस्यचिद् बहुलोकगमनान्तरं सोच्यत इति । भोगभूमित्वमेव तेषामवगन्तव्यम् । सर्वेषां सर्वत्र गमने देवयानं पन्थानं वदन्त्याः श्रुतेः सामितत्कथनमनुपपन्नं स्यादत उपासनाभेदेन फलभेदं ज्ञापयन्ती तथा वदतीति युक्तमुत्पश्यामः ॥ ९ ॥

ननु तेषामिह न पुनरावृत्तिरस्तीत्यादिश्रुतिभ्यो देवयानपन्थानं प्राप्तानां पुंसां ब्रह्मवित्त्वमवश्यं वाच्यम् । तेन सद्योमुक्तौ सम्भवन्त्यां सत्यां क्षयिष्णुत्वेन क्षुद्रानन्दत्वेन च हेयानां परमफलप्राप्तिविलम्बहेतूनामर्चिरादिलोकानां कामना कुतो, यतस्तद्धेतुभूतोपासनाः सम्भवन्ति । किञ्च । अर्चिरादिना तत्प्रथितेरित्यत्र यदुक्तं ज्ञानमार्गीयस्यैवार्चिरादिप्राप्तिर्न भक्तिमार्गीयस्येति तदप्यनुपपन्नम् । यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यदित्युपक्रम्य, सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा, स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छतीति भगवद्वाक्याद्भक्तस्याप्येतद्वाञ्छाफले सम्भवतः अन्यथा प्रभुर्न वदेत् । एवं सति भक्तिसुखं हित्वाऽन्यत्र कामनायां हेतुर्वाच्य इत्याकाङ्क्षायां तमाह ।

सर्वासु विद्यासु सर्वलोका उच्येरन्, तत्तु नोच्यतेऽतो न विद्याबलेन तत्प्राप्तिः, किन्तु गमयित्रैवेति श्रुतेस्तात्पर्यमितिचेत्तत्राहुः । ✱ कस्यचिदित्यादि ✱ । तथाच देवयाने मार्गेऽग्न्याद्युत्तरं सर्वत्र लोकशब्दोपबन्धात्तस्य च श्रुतिरूपतया लिङ्गापेक्षया बलीयस्त्वात्तेषां भोगभूमित्वमेव युक्तं, न त्वातिवाहिकत्वम् । किञ्च । कस्यचित् प्रापणार्थम् अर्चिरादिदेवतायां गतायां तस्मिन्नवसरेऽन्यस्यार्चिःप्राप्तिर्न स्यात् । तथाच तेऽर्चिषमभिसम्भवन्तीतिश्रुतिबाधप्रसङ्गः । अतस्तद्भावाय तेषां लोकत्वमवश्यमङ्गीकार्यम् । किञ्च । विद्याया अर्चिषः पूर्वमुक्तत्वेऽपि तस्या गन्त्रा सहानुवर्त्तमानत्वात्तयैव तत्तल्लोकप्रा-

उभयव्यामोहात् तत्सिद्धेः ॥ ६ ॥

अत्रेदं ज्ञेयम् । देवयानः पन्था अपि भगवतैव सृष्टोऽस्ति । तथाचोक्तहेतुभिस्तत्र कस्यापि कामनाभावे तत्सृष्टिर्व्यर्था स्यादतो भगवानेव काँश्च व्यामोहयति ज्ञानिनो मर्यादामार्गीयभक्ताँश्चातस्त-त्कामनासिद्धेस्तत्फलभोग इति । यत्त्वर्चिरादिमार्गगन्तॄणां देहावियोगेन सम्पिण्डितकरणग्रामत्वेनास्वातन्त्र्यं व्यामोहः । अर्चिरादीनां चाऽचेतनत्वेनास्वातन्त्र्यं व्यामोहः। कार्यकरणासामर्थ्यमिति यावत्। तेनार्चिराद्यधिष्ठातृदेवैरातिवाहिकत्वमिति सिद्धमिति व्याख्यानम् । तन्न साधीयः। व्यामोहशब्दस्यान्यथाज्ञानवाचकत्वेनाऽसामर्थ्यावाचकत्वात् । तथा सत्यर्चिर्लोकमपि न प्राप्नुयात्, प्रापकाभावादित्युक्तम् ॥ ६ ॥

स्तिरित्येव युक्तम् । अतो यथैकदेशीयानेकग्रामवासिनामेकस्मिन् देशे गन्तव्ये तन्मार्गेणैकेन तं प्रतिगच्छतां मध्ये मार्गमनेकनगरग्रामादिसद्भावेऽपि यस्य यत्र किञ्चित्कार्यं स एव तत्र विरम्याऽग्रे गच्छत्यन्यस्त्वन्यत्र, न तु सर्वः सर्वत्र तथेत्यर्थः ॥ ५ ॥

उभयव्यामोहात्तत्सिद्धेः ॥ सूत्रमवतारयन्ति । * ननु तेषामित्यादि * । अर्थस्त्ववतारणस्य सूत्रव्याख्यानस्य च स्फुटः । तथाच, स वै नैव रेमे इत्यादिश्रुतेः । कृतप्रयत्नापेक्ष इति न्यायाच्च काँश्चन व्यामोहयन् लीलां करोतीति तदर्थं तथेत्यर्थः । पूर्वसूत्रोक्तं हेतुमर्चिरादिदेवानामातिवाहिकत्वसिद्धावपर्याप्तं मन्वानैस्तदर्थं यद्यत्रान्यैर्व्याख्यातं तद्दूषणायोपक्षिपन्ति च । * यत्त्वित्यादि * । * तन्नेत्यादि च * । * तथा सतीति * । गन्तॄणां पिण्डितकरणग्रामत्वेनास्वातन्त्र्ये सति । तथाचानया रीत्या व्यामोहेनार्चिरादीनामातिवाहिकत्वसाधनमसङ्गतमेवेत्यर्थः । किञ्च । यदनवस्थितत्वादर्चिरादीनां न मार्गलक्षणत्वमिति । तदपि तथा । तेषां लोकत्वस्य स्वयमभ्युपगतत्वेनाऽऽप्रलयं तत्स्थितेस्तदभावात् । नापि रात्रौ प्रेतस्याहःसम्बन्धानुपपत्तिः । तेषां लोकतयास्थिरत्वेन विद्ययैव त-

ननु विद्युतो वरुणादिलोकप्राप्त्यनन्तरं यस्य ब्रह्मप्राप्तिस्तस्य तल्लोकसम्बन्धी ब्रह्मप्रापकः पुरुषोऽस्त्युत स एवत एव तत्प्राप्नोतीति संशय उत्तरं पठति ।

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ७ ॥

न हि ब्रह्मप्राप्तिर्विद्युल्लोकसम्बन्धिपुरुषसामर्थ्येनोच्यते, किन्तु ब्रह्मसम्बन्धितत्सामर्थ्येन। तथाच यत एव लोकात् तत्प्राप्तिस्ततो ब्रह्मसम्बन्धिपुरुषादेव । एवं सति विद्युल्लोकात्तत्प्राप्तौ यो ब्रह्मसम्बन्धी पुरुषः प्रापक उक्तस्तेनैव ततो वरुणादिलोकेभ्योऽपि ब्रह्मप्राप्तिस्तत्र हेतुमाह । तच्छ्रुतेः । तान् वैतद्युत् पुरुषो मानस एस ब्रह्मलोकानामयतीति श्रुतेः । अत्र, एसेति वचनाद्यत एव लोकाद् ब्रह्मप्राप्तिर्भवित्री तत्रैवागत्य ब्रह्म प्रापयतीति गम्यते । श्रुतौ वैद्युतं लोकमागत्य तस्माद् ब्रह्मलोकानामयतीत्युक्तमिति स पुरुषो वैद्युत इत्युच्यते, न तु तल्लोकवासित्वेन । तथा सत्येसेति न वदेत् तत एव ब्रह्मप्रापणे ।

त्प्राप्त्युपपत्तेः। अहोरात्रेषु ते लोकेषु सज्जन्त इति ब्राह्मणस्य स्वयमेव पूर्वं लिखनात् । तेनाहोरात्रन्यायात् समानप्रकरणे लोकपदोपबन्धाच्च गन्तृविशेषभोगभूमित्वमेव युक्तम् । अतः पूर्वसूत्रव्याख्याने श्रौतानामर्चिरादिपदानां स्वार्थत्यागः । अन्यगतलिङ्गेनान्येषामातिवाहिकत्वसाधनम् । लोकपदोपबन्धवैयर्थ्यम् । अत्र सौत्रपदस्य स्वार्थत्याग इति तदुभयव्याख्यानमप्यसङ्गतमित्यर्थः ॥ ६ ॥

वैद्युतेनैव ततस्तच्छ्रुतेः। सूत्रमवतारयन्ति । * ननु विद्युत इत्यादि * । * तल्लोकसम्बन्धीति * । विद्युल्लोकसम्बन्धी । * तत्प्राप्नोतीति * । ब्रह्म प्राप्नोति । सूत्रं व्याकुर्वन्ति । * न हीत्यादि * । इति श्रुतेरिति * । पञ्चाग्निविद्यास्थवाजसनेयिश्रुतेः । श्रुतौ वैद्युतादित्यस्य गमयतीत्यनेन सम्बन्धाद्योऽर्थः सिद्ध्यति तमाहुः * अत्रेत्यादि * । तथा सत्येसेति न वदेदिति * तस्य विद्युल्लोकवासित्वे

अत एव मानस इत्युक्तः । यदैवं भगवन्मनसि भवत्यथैनं मां प्रापयत्विति तदैव प्रापयतीति तथा ।

छान्दोग्ये त्वमानव इति पठ्यते । तच्चालौकिकत्वं तदप्युक्तरूपमेवेति न कश्चिद्विशेषः । वाजसनेयके ब्रह्मलोकानामयतीति पठ्यते । छान्दोग्ये तु ब्रह्मेति । तत्रायं भावः । भक्तं तु वैकुण्ठलोकं नयति, ते बहुविधा इति ब्रह्मलोकानित्युक्तम् । ज्ञानमार्गीयं त्वक्षरं ब्रह्म प्रापयतीति ब्रह्मेत्युक्तम् । अत एवोभयव्यामोह उक्त आचार्येण ॥ ७ ॥

अत्र सिद्धान्तदार्ढ्यार्थमुक्तमर्थं हस्तापिहितमिव कृत्वा बादरिमतं पूर्वपक्षत्वेनाह ।

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ८ ॥

स एतान् ब्रह्म गमयतीत्यत्र ब्रह्मपदेनाविकृतं परमेव ब्रह्मोच्यते ? उत कार्यरूपो ब्रह्मलोक ? इति भवति संशयः । परस्य व्यापकत्वेन देशविशेषगमयित्रोरनपेक्षितयोरुक्तेः कार्यरूप एव स ब्रह्मपदेनोच्यत इति बादरिराचार्यो मन्यते । कुतः । अस्य गत्युपपत्तेः ।

सति विद्युताद् ब्रह्मलोकान् गमयतीत्येतावतैव विवक्षितार्थसिद्धेरेत्येति न वदेदित्यर्थः । * अत एवेति * । तद्वासित्वादेव । शेषं स्फुटम् ॥ ७ ॥ २ ॥

कार्यं बादरिरस्य गत्युपपत्तेः ॥ क्रममुक्तौ मार्गं विचार्य तत्फलं विचारयतीत्याशयेन सूत्रमवतारयन्ति । * अत्र सिद्धान्तेत्यादि * क्रममुक्तौ परब्रह्मैव प्राप्यमिति सिद्धान्तस्य दार्ढ्यार्थम् उक्तमर्थम् अर्चिरादिमार्गो जघन्याधिकारिणां परप्राप्तिसाधनम् इत्येतमर्थं हस्तापिहितमिव कृत्वा अग्रे स्थापनीयत्वादिदानीमनुक्त्वा तथेत्यर्थः । सूत्रं व्याख्यातुमधिकरणत्वाय विषयसंशयावाहुः । * स एतानित्यादि * तथाच ब्रह्मपदश्रुतेर्गतिश्रुतेश्च संशय इत्यर्थः । पूर्वपक्षमाहुः । * परस्येत्यादि * । * स इति * ब्रह्मलोकः

तस्य परिच्छिन्नत्वेन तत्स्थितिदेशं प्रत्यस्य गन्तुर्गतेरुपपत्तेरित्यर्थः ॥ ८ ॥

विशेषितत्वाच्च ॥ ९ ॥

ब्रह्मलोकानामयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्तीति श्रुतौ बहुत्वेन वासाधिकरणत्वेन च विशेषिता लोकाः । गन्तारश्च दूरदेशगत्या विशेषिता इति न परं ब्रह्म तत्, किन्तु कार्यमेवेत्यर्थः । लोकपदं तज्जन्यभोगपरम् । तेन तस्यैकत्वेऽपि विविधभोगज्ञापनाय बहुवचनं घटते । तत्र ब्रह्मशब्दप्रयोगे हेतुमाह ॥९॥

सामीप्यात्तु तद्व्यपदेशः ॥ १० ॥

तल्लोकस्थितानां नान्यलोकव्यवधानं परमाप्तौ, किन्तु तत एवेति परब्रह्मसामीप्याद् ब्रह्मत्वेन व्यपदेशः कृतः । तुशब्दस्तु वस्तुतो ब्रह्मत्वं व्यवच्छिनत्ति ॥ १० ॥

नन्वाब्रह्मभवनाल्लोकाः पुनरावर्त्तिनोऽर्जुनेति वाक्यात्ततः पुनरावर्त्तते । अत्र तेषामिह न पुनरावृत्तिरस्तीति पठ्यत इति परमेवात्र ब्रह्मशब्देनोच्यत इति माप्ते, उत्तरं पठति ।

---

* तस्येति * कार्यस्य ब्रह्मलोकस्य ॥ ८ ॥

विशेषितत्वाच्च ॥ तस्य कार्यत्वाय हेत्वन्तरं दर्शयतीत्याशयेन सूत्रं व्याकुर्वन्ति । * ब्रह्मलोकानित्यादि * । * विशेषिता इति * अत्र श्रुतौ पूर्वं तानिति गन्तृविशेषणे दूरदेशगन्तारः परामृश्यन्ते । बहुत्वं चोच्यत इति गन्तारस्तथा विशेषिताः । पराः परावतो वसन्तीति प्रकृष्टाः गन्तारः प्रकृष्टान् ब्रह्ममानमितान् संवत्सरान् वसन्तीति श्रावणाच्च ब्रह्मलोका विशेषिताः । * तदिति * ब्रह्म गमयतीत्यत्र प्राप्यत्वेनोक्तम् । ननु ब्रह्मपदस्य कार्यब्रह्मपरत्वे श्रुत्यन्तरोक्तलोकपदाविरोध इत्यत आह । लोकपदमित्यादि ॥ ९ ॥

सामीप्यात्तु तद्व्यपदेशः ॥ भाष्यमत्राऽतिरोहितार्थम् ॥ १० ॥

कार्यात्यये तदध्यक्षेण सहातः परम-
ऽभिधानात् ॥ ११ ॥

कल्पसमाप्तौ कार्यस्य ब्रह्मलोकस्य नाशे सति तदध्यक्षेण चतुर्मुखेन ब्रह्मणा सहाऽतो ब्रह्मणः सकाशात् परमीश्वरं प्राप्नोत्यतोऽपुनरावृत्तिश्रुतिर्न विरुध्यते । अत्र प्रमाणमाह । अभिधानादिति । श्रुतौ तथाऽभिधानादित्यर्थः । सा तु वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासंयोगाद् यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले पराऽमृतात् परिमुच्यन्ति सर्वे इति । परान्तकाल इत्यत्र परशब्देन ब्रह्मणः पूर्णमायुरुच्यते ॥ ११ ॥

उक्तेऽर्थे श्रुतिं प्रमाणत्वेनोक्त्वा स्मृतिमप्याह ।

स्मृतेश्च ॥ १२ ॥

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृताऽऽत्मानः प्रविशन्ति परं पदमिति स्मृत्यापि स एवार्थः प्रतिपाद्यते ॥ १२ ॥

अत्र सिद्धान्तमाह ।

परं जैमिनिर्मुख्यत्वात् ॥ १३ ॥

स एतान् ब्रह्म गमयतीत्यत्र ब्रह्मपदेन परमेव ब्रह्मोच्यते

कार्यात्यये तदध्यक्षेण सहाऽतः परमभिधानात् ॥ प्राप्यस्य ब्रह्मसामीप्याद् ब्रह्मत्ववाद इत्यङ्गीकारे विषयश्रुतिविरोधमाशङ्क्य समाधत्त इत्याशयेन सूत्रमवतारयन्ति । * नन्वित्यादि * । व्याकुर्वन्ति । * कल्पेत्यादि * । * ब्रह्मण * इति चतुर्मुखात् ॥ ११ ॥

स्मृतेश्च ॥ उत्तानार्थम् ॥ १२ ॥

परं जैमिनिर्मुख्यत्वात् ॥ सूत्रमवतारयन्ति । * अत्रेत्यादि * ।

इति जैमिनिराचार्यो मनुते । कुतः । मुख्यत्वात् । बृहत्त्वादिधर्मविशिष्टं हि ब्रह्मपदेनोच्यते । तादृक्परमेव ब्रह्म भवतीति मुख्या वृत्तिर्ब्रह्मपदस्य परस्मिन्नेवान्यत्र गौणी । तथाच मुख्यगौणयोर्मध्ये मुख्यस्यैव बलिष्ठत्वात् तथा ॥ १३ ॥

दर्शनाच्च ॥ १४ ॥

स एनं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमिति कौशीतकिश्रुतेरग्न्यादिलोकप्राप्तिवदविशेषेणैव प्रजापतिलोकप्राप्त्यनन्तरं ब्रह्मलोकप्राप्तिं दर्शयति । न हि तत्र ब्रह्मलोकशब्देन कार्यः स उच्यत इति वक्तुं शक्यम् । पार्थक्येन प्रजापति-

---

पञ्चभिः सूत्रैर्बादरिमतोपक्षेपमुखेन पूर्वपक्षमुक्त्वाऽस्मिन् सूत्रे जैमिनिमतोपन्यासमुखेन स्वसिद्धान्तमाहेत्यर्थः । सूत्रव्याख्यानं तूत्तानार्थम् ॥ १३ ॥

दर्शनाच्च ॥ अविद्यादिदोषाणामभावेऽपि कामनायाः सत्त्वात्तन्मात्रेणाधिकारजाघन्याद् गत्युपपत्तौ लोकाऽङ्गीकारेण विशेषितत्वस्य चोपपत्तौ सामीप्यनिबन्धनाया गौण्या अप्रयोजकत्वान्निवृत्तिरिति पूर्वसूत्रे मुख्यत्वेन हेतुनैव सिद्धमिति कार्यात्ययादिसूत्रद्वयोक्तमवशिष्यते । तदनेन वदतीत्याशयेन सूत्रं व्याकुर्वन्ति । * स एनं देवयानमित्यादि * । ननु तैत्तिरीयभाष्ये आनन्दमीमांसायां, विराट् त्रैलोक्यशरीरो ब्रह्मा समष्टिव्यष्टिरूपः संसारमण्डलव्यापी प्रजापतिशब्देनोच्यते । यत्रैते शतं प्राजापत्यानन्दा एकतां गच्छन्ति धर्मश्च तन्निमित्तं ज्ञानं चैतद्विषयम् अकामहतत्वं च निरतिशयं यत्र स एष हिरण्यगर्भ इति शङ्कराचार्यैर्व्याख्यातत्वात्तस्य हिरण्यगर्भस्य यो लोकः स कौशीतकिवाक्ये ब्रह्मलोकपदेन पठ्यते हिरण्यगर्भश्च जन्यः । हिरण्यगर्भं जनयामास पूर्वमिति श्वेताश्वतरे हिरण्यगर्भं पश्यति जायमानमिति तैत्तिरीये च श्रावणात् । अतस्त-

लोकस्योक्तत्वात् । अपरं च, ये चेमेऽरण्ये श्रद्धा तप इत्युपासते त-

---

स्यात्र परामर्शो कार्यता कुतो न वक्तुं शक्यतेतिचेत् । उच्यते । प्रजापत्यतिरिक्तस्य हिरण्यगर्भस्य वक्तुमशक्यत्वात् । वेदात्मनाय विद्महे, हिरण्यगर्भाय धीमहि, तन्नो ब्रह्म प्रचोदयादिति तैत्तिरीयमन्त्रे हिरण्यगर्भो वेदानामित्येकादशीयविभूत्यध्यायवाक्यं च तस्य वेदात्मकतयैव सिद्धत्वात् । वेदात्मकत्वं च प्रजापतावेव सिद्धम् । "शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः। ब्रह्मावभाति वितती नानाशक्त्युपबृंहित"इति तृतीयस्कन्धे प्रजापतिं प्रकृत्यैव वाक्यात् । पर्यङ्कस्थे ब्रह्मणि हिरण्यगर्भपदस्य वेदात्मकत्वादिबोधकस्य वाक्यस्य चाभावात् । नच 'यजूदरः सामशिरा असावृङ्मूर्त्तिरव्ययः । स ब्रह्मेति विज्ञेय ऋषिर्ब्रह्ममयो महानिति' मन्त्रे तस्य वेदात्मकत्वमुक्तमेवेति शङ्क्यम् । तत्र एतावदिदं सर्वमित्यनेन सत्यपदार्थे निगमिते इदं सर्वमस्मीत्येवैनं तदाहेत्यनेन एनम् उपासके तत् पर्यङ्कस्थं ब्रह्म इत्येवाहेति तदुक्तस्य याथार्थ्यं बोधयित्वा तदेतच्छ्लोकेनाभ्युक्तमिति वाक्ये श्रुतिरुक्त्वा श्लोकमाह । यजूदर इति । तत्र यजूदरादिविशिष्टोऽसौ ब्रह्ममयो महानृषिः स ब्रह्म ब्रह्मसहितो विज्ञेय इति वचनव्यक्त्या ब्रह्मविद एव वेदात्मकत्वबोधनात् । नचतः पूर्ववाक्ये तं ब्रह्मा पृच्छतीति पुंल्लिङ्गस्य प्रष्टरि ब्रह्मणि निर्देशादत्र यजूदरत्वादिकं प्रष्टृपरमेवेति शङ्क्यम् । तत्र ब्रह्म आपृच्छतीति पदच्छेदात् । नचात्रैवं पदच्छेदे किं मानमिति शङ्क्यम् । ततः पूर्ववाक्ये स ब्रह्मालङ्कारेणालङ्कृतो ब्रह्म विद्वान् ब्रह्माभिप्रैतीति । विसुकृतो विदुष्कृतो ब्रह्म विद्वान् ब्रह्मैवाभिप्रैतीति अभिप्रायकर्मणि ब्रह्मणि नपुंसकप्रयोगस्यैव मानत्वात् । तस्मादत्र ब्रह्मलोकपदेन नित्य एव लोको ग्राह्यः । तथाच पूर्वोक्तश्रुतिस्मृत्योः प्रलयविषयत्वेन विषयभेदान्न ताभ्यामत्र निर्णयो युज्यत इति तन्मतमयुक्तमित्यर्थः । ननु यदीदं स्वस्याभिप्रेतं तदाऽऽचार्येण स्वनामैव गृहीतं स्यान्न तु जैमिनेरतो नैवं सिद्धान्त इति शङ्कायां तन्नामोक्तितात्पर्यमाहुः । * अपरं चेत्यादि * ज्ञायते इत्यन्तेन * ।

ऽर्चिषमभिसम्भवन्तीति छान्दोग्यश्रुतिं विषयीकृत्य, ह्यर्चिरादिना तत्प्रथितेरित्युपक्रम आचार्येण कृतोऽन्यत्रार्चिःशब्दस्याभावात् । तत्र चान्ते, ब्रह्म गमयतीत्युच्यते । तथाच छान्दोग्येऽनुक्तानामन्यत्रोक्तानां लोकानां मार्गैक्यसिद्ध्यर्थं तत्रैव सन्निवेशो, वायुमब्दात्, तडितोऽधिवरुणो, वरुणाच्चाधीन्द्रप्रजापती इत्यन्तेनोक्तः । एवं सत्यादावर्च्चिषं, ततोऽहस्ततः सितपक्षं, तत उदगयनं, ततः संवत्सरं, ततो वायुं, ततो देवलोकं, तत आदित्यं, ततश्चन्द्रमसं, ततो विद्युतं, ततो वरुणं, तत इन्द्रं, ततः प्रजापतिं, ततश्चाऽमानवेन पुरुषेण ब्रह्मप्राप्तिरिति निर्णयः सम्पद्यते । एवं सति प्रजापतिलोकादन्यस्य कार्यब्रह्मलोकस्यासम्भवात् तच्छङ्कापि भवितुं नार्हति यद्यपि तथापि व्यासोक्तमार्गैक्यममन्वानस्तथाऽवददिति ज्ञायते । परन्तु वेदार्थनिर्णयार्थमेव प्रवृत्तत्वाद् भगवदवतारत्वाच्च तदुक्त एव शास्त्रार्थ इति मन्तव्यम् । किञ्च । स प्रजापतिलोकं स ब्रह्मलोकमित्यत्र ब्रह्मपदस्य परवाचकत्वं तेनापि वाच्यं चेत् तद्दृष्टान्तेनान्यत्रापि तथैव वाच्यम् । बाधकाभावात् ।

---

* तथाऽवददिति * । जैमिनिरवदत् । तथाच फलांशे सिद्धान्तभेदाभावेऽपि मार्गांशे भेद इति ज्ञापनार्थं तदुक्तिरित्यर्थः । तर्हि मार्गभेद एव कुतो नाद्रियत इत्यत आहुः । * परं त्वित्यादि * । ननु व्यासेन स्वनाम्नः कुत्राप्यनुक्तत्वान्मतद्वयमपि पारक्यमित्येव प्रतीयते । तथा सति जैमिनिमतस्यादरणीयत्वे किं बीजमित्यत आहुः । * किञ्चेत्यादि * । * तेनेति * । बादरिणा । * अन्यत्रेति * । अक्षिपुरुषविद्यायां पञ्चाग्निविद्यायां च । * बाधकाभावादिति * । गत्युपपत्त्यादिदूषणानां परिहृतत्वेनान्येषां चाभावेन तथात्वात् । तथाच श्रुतिसामञ्जस्यमेव बीजमित्यर्थः । अत्र बादरिमतमुपपन्नं मन्वानाः शङ्कराचार्या एवमाहुः । आकाशवत् सर्वतगतश्च नित्य

इति श्रुतेः परस्य ब्रह्मणो व्यापकत्वं, य आत्मा सर्वान्तर इति श्रुतेः सर्वान्तरत्वम्, आत्मैवेदं सर्वं, ब्रह्मैवेदं विश्वमिदं वरिष्ठमिति श्रुतेः सर्वात्मकत्वं च निर्द्धारितम् । तत्र व्यापकस्य ब्रह्मणो गन्तृदेशे विद्यमानत्वेन गतृन्तैवेति तस्य गन्तव्यता नोपपद्यते । नच भूमिष्ठं प्रति गताया एव पृथिव्या देशान्तरद्वारेण गन्तव्यतावदत्राप्युपपद्यत इति वाच्यम् । सर्वात्मकत्वस्यापि गन्तव्यताबाधकत्वात् । अन्य एव ह्यन्यद् गच्छतीति लोके दर्शनात् । नच बालस्य वार्द्धकवद्नन्यत्वेऽपि गन्तव्यतोपपद्यत इति वाच्यम् । निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम, अस्थूलमनणु, स एष नेति नेत्यात्मेत्यादिश्रुतिस्मृतिन्यायेभ्यो ब्रह्मणः सर्वविशेषशून्यतया सिद्धत्वेन तत्र देशकालविशेषयोगस्याशक्यवचनतया दृष्टान्तविरोधेन तन्न्यायस्यात्र वक्तुमशक्यत्वात् । नच जगदुत्पत्तिप्रलयहेतुत्वश्रुतेर्ब्रह्मणोऽनेकशक्तित्वान्न दोष इति वाच्यम् । विशेषनिषेधकश्रुतीनामनन्यार्थत्वात् । नचोत्पत्त्यादिहेतुत्वबोधकश्रुतीनामपि ब्रह्मपरत्वात् समानमनन्यार्थत्वमिति वाच्यम् । तासामेकत्वप्रतिपादनपरत्वात् । तत्र मृदादिदृष्टान्तवाक्येषु मृत्तिकेत्येव सत्यमित्युपसंहारे एकस्य कारणस्यैव सत्यत्वकथनेन विकाराऽनृतत्वप्रतिपादने तद्धर्माणामुत्पत्त्यादीनामपि तथात्वेन शास्त्रस्य तत्परताया वक्तुमर्हतया तासां विशेषनिराकरणश्रुतिशेषताया एव युक्तत्वात् । नचोत्पत्त्यादिश्रुतिशेषत्वं निर्विशेषश्रुतीनामेवास्त्विति शङ्क्यम् । विशेषनिषेधश्रुतीनां निराकाङ्क्षार्थत्वात् । आत्मन एकत्वनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः कदाचिदप्याकाङ्क्षान्तरानुदयेन तत्र पुरुषार्थसमाप्तिबुद्ध्युत्पत्तेः । नचात्र मानाभावः शङ्क्यः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः । अभयं वै जनक प्राप्तोऽसि, विद्वान्न बिभेति कुतश्चन, एतꣳ ह वाव न तपति किमहꣳ साधु नाकरवमित्यादिश्रुतिभ्यस्तथैव विदुषस्तुष्ट्यनुभवादिदर्शनस्य च मानत्वात्, तथा विकारानृताभिसन्ध्यपवादाच्च, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति भेददृष्ट्यपवादाच्च । न विशेषनिषेधश्रुतीनामन्यार्थत्वं शक्यवचनम् । उत्पत्त्यादिश्रुतीनां तु नैवं निराकाङ्क्षार्थप्रतिपादनसामर्थ्यमस्ति, येन तच्छेषत्वं विशेषनिषेधश्रुतीनां वक्तुं शक्येत । तत्र हि, यत्रैतच्छुङ्गमुत्पतितं तं सोम्य विजानीहि नेदममूलं भविष्यतीत्युपन्यस्य तदुद्-

ननु परस्य व्यापकत्वान्निर्विशेषत्वाच्च न गन्तव्यतोपपद्यते ।

र्के सत एवैकस्य जगन्मूलस्य विज्ञेयत्वदर्शनात् । एवं, यतो वा इमानीत्यादिश्रुतावपि ज्ञेयम् । अतस्तासां सर्वासामैकात्म्यावगमपरत्वान्नानेकशक्तियोगो ब्रह्मण इति । अत्र च ब्रह्मणो व्यापकत्वं निर्विशेषत्वं च गन्तव्यताबाधकत्वेन सिद्धमिति संग्रहेण तदनुवदन्ति । * ननु परस्येत्यादि * उपपद्यत इत्यन्तम् । अथ यत्तैर्जीवस्वरूपविचारेणाऽगन्तव्यत्वं साधितं–जीवो नाम किं ब्रह्मणोऽवयवो वा, विकारो वाऽन्यो वा । नाद्यः । एकदेशत्वे एकदेशिनो नित्यप्राप्तत्वाद्गन्तव्यत्वानुपपत्तेर्ब्रह्मणो निरवयवत्वप्रसिद्धेरेकदेशित्वकल्पनस्याऽनुपपन्नत्वाच्च । न द्वितीयः । विकारेणाऽपि विकारिणो नित्यप्राप्तत्वात् । परित्यागेऽभावप्राप्तेः । पक्षद्वयेऽपि ब्रह्मणः स्थिरत्वेन जीवस्य संसाराभावप्रसक्तेश्च । अथ तृतीयः पक्षश्चेत् तत्राऽपि किं जीवोऽणुर्व्यापको मध्यमपरिमाणो वा । आद्ये सर्वशरीरवेदनोपलम्भानुपपत्तिः । द्वितीये गमनानुपपत्तिः । तृतीये अनित्यत्वप्रसङ्गः । अन्यत्वे, तत्त्वमस्यादिशास्त्रबाधप्रसङ्गः । विकारावयवपक्षयोरपि मुख्यैकत्वानुपपत्तिः । सर्वेषु चैतेषु पक्षेषु संसारित्वानतिवृत्तेरनिर्मोक्षप्रसङ्गः । अनिवृत्तौ वा स्वरूपनाशप्रसङ्गो ब्रह्माऽऽत्मत्वानभ्युपगमाद् इत्येवं जीवविषये मतत्रयं निराकृत्य, ततो भिन्नजीवपक्षे काम्यनिषिद्धकर्मपरिहारपूर्वकं नित्यनैमित्तिककर्मणां करणमात्रेणैव स्वरूपावस्थानरूपो मोक्षोऽपि भविष्यतीति मतमुपक्षिप्य तद् दूषयित्वा संसार्यात्मनः कर्तृत्वभोक्तृत्वभावस्य विद्यागम्यब्रह्माऽऽत्मत्वावगतिमन्तरेण मोक्षप्रत्याशाभावाद्, नान्यः पन्था विद्यतेऽयनायेति श्रुत्या मोक्षे ज्ञानातिरिक्तसाधननिषेधाच्च तस्य मतस्यासङ्गतत्वं स्थापयित्वा, जीवस्य परस्मादन्यत्वे सर्वव्यवहारलोपप्रसङ्गः, प्रत्यक्षादिप्रमाणाप्रवृत्तिश्चेत्याशङ्क्य प्राक् प्रबोधात् स्वप्नव्यवहारवत् तदुभयोपपत्तिमुक्त्वा यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिश्रुत्या अप्रबुद्धविषये प्रत्यक्षादिव्यवहारश्रावणात् प्रबुद्धविषये च यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येदित्यादिना तदभावश्रावणात् । परब्रह्मविदो गन्तव्यत्वादिविज्ञानस्य बाधितत्वेन न कथमपि गतिरुपपाद-

जीवस्याप्यविद्योपाध्यवच्छिन्नतादशायां परब्रह्मणि गन्तृत्वासम्भवात् तन्नाशे च वस्तुतोऽभिन्नत्वात् स्वरूपेणावऽस्थानमेव भवतीति न गन्तृत्वमप्युपपद्यते । तस्यैवाभावात् ।

———

यितुं शक्येत्यन्तेन । तदेतत् संगृह्यानुवदन्ति । * जीवस्योपाध्यवच्छिन्नत्वदशायामित्यादि * । * तस्यैवाभावादिति * जीवस्यैवाभावात् । एवं परब्रह्मविदो गत्यभावमुपपाद्य गतिविषयं यत्तैरुक्तं— गतिविषयाः श्रुतयः सगुणब्रह्मविषया भविष्यन्ति । तथाहि । क्वचित् पञ्चाग्निविद्यां प्रस्तुत्य गतिरुच्यते, क्वचित् पर्यङ्कविद्यां, क्वचिद्वैश्वानरविद्याम् । यत्रापि ब्रह्मविद्यां प्रस्तुत्य गतिरुच्यते, प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म, अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मेत्यादौ, तत्रापि वामनीत्वादिभिः सत्यकामत्वादिभिर्गुणैः सगुणस्योपास्यत्वात् सम्भवति गतिः । न क्वचित् परब्रह्मविषया गतिः श्राव्यते । गतिप्रतिषेधस्तु, न तस्मात् प्राणा उत्क्रामन्तीति श्राव्यते । यः पुनर्ब्रह्मविदाप्नोति परमित्यत्र गत्यर्थ आप्नोतिस्तत्रापि पूर्वोक्तेन न्यायेन देशान्तरप्राप्त्यसम्भवात् स्वरूपप्रतिपत्तिरेवेयम्, अविद्याऽध्यारोपितं नामरूपप्रविलयापेक्षयाऽभिधीयते । ब्रह्मैव सन् ब्रह्माप्येतीतिवदिति द्रष्टव्यम् । किञ्च । परब्रह्मविषया गतिः किं ब्रह्मविदः प्ररोचनाय किं वाऽनुचिन्तनाय । नाद्यः । स्वसंवेद्यनैवाऽव्यवहितेन विद्यासमर्पितेन स्वास्थ्येन तत्सिद्धेः । न द्वितीयः । नित्यसिद्धनिःश्रेयसे वेदनस्याऽसाध्यफलस्य विज्ञानस्य गत्यनुचिन्तनापेक्षाया अभावात् । तस्मादपरब्रह्मविषयैव गतिः सा परस्मिन् ब्रह्मणि नोपपद्यत इति परापरब्रह्मविवेकानवधारणेनापरस्मिन् ब्रह्मणि वर्त्तमाना गतिश्रुतयः परस्मिन्नध्यारोप्यन्ते । नच परापरभावेन द्वे ब्रह्मणी न स्त इति शङ्क्यम् । एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कार इत्यादिश्रुतिदर्शनात् । किं पुनः परं ब्रह्म किमपरमिति चेद् उच्यते । यत्राविद्याकृतनामरूपनिषेधेनास्थूलादिशब्दैर्ब्रह्मोपदिश्यते तत्परम् । तदेव यत्र नामरूपादिविशेषाणां केनचिद्विशिष्टमुपासनायोपदिश्यते, मनोमयः प्राणशरीरो भारूप इत्यादिशब्दैस्तदपरम् । नन्वेवमद्वितीयश्रुत्युपरोधः शङ्क्यः । अविद्याकृतनामरूपतया परिहृतत्वात् । तस्य चापरब्रह्मो-

जीवत्वदशायां तूपाध्यवच्छेदाद्गन्तृत्वं जीवस्यापरस्य ब्रह्मणश्चावि-द्यकरूपनामवत्त्वेनगन्तव्यता चोपपद्यते।उपासनाफलत्वादस्यगमनस्य उपास्यस्य च सगुणत्वेन तत्प्राप्तेरेवोचित्वाच्च निर्गुणब्रह्मविद्यावतो गन्तृत्वाऽसम्भव इत्युक्तमतो बादरिमतमेव साधीयः।नच ब्रह्मपदस्य मुख्यार्थत्वमुक्तरीत्याऽत्र सम्भवत्यतोऽत्राऽमुख्यार्थत्वमेवाऽनुसर्त्तव्य-मितिचेत्। स्यादेतदेवं यद्यौपाधिकमुपास्यरूपं जीवत्वं वा स्याद्, न त्वेवम्। प्रकृतैतावत्त्वं हि प्रतिषेधतीत्यादिभिस्तद्गुणसारत्वाच्च

पासनस्य तत्सन्निधौ श्रूयमाणं, स यदि पितृलोककामो भवतीत्या-दिजगदैश्वर्यलक्षणं संसारगोचरमेव फलं भवति । अनिवर्त्तित-त्वादविद्यायाः । तस्य फलस्य देशविशेषाऽवबद्धत्वात् तत्प्राप्त्यर्थे गमनमविरुद्धम् । आत्मनः सर्वगतत्वेऽप्याकाशस्य घटादिगमनेनेव बुद्ध्याद्युपाधिगमनेन गमनप्रसिद्धिरित्यवादिष्म, तद्गुणसारत्वादित्य-त्र । तस्मात् कार्यं बादरिरित्येव स्थितः पक्षः । परं जैमिनिरिति तु पक्षान्तरप्रतिभानमात्रप्रदर्शनं बुद्धिविकासनायेति द्रष्टव्यमिति । त-दनुवदन्ति * जीवत्वेत्यादिना * चेदित्यन्तेन । एवं सर्वं तन्मतं संग्र-हणानूद्य यत्तैर्गतिश्रुत्युपपादनार्थं पश्चादुक्तं तदेव प्रथमतो दूषय-न्ति * स्यादेतदेवमित्यारभ्य, निरस्तत्वादित्यन्तम् * । अत्रायमर्थः । यत्तावत् परब्रह्मणो निर्विशेषमात्रत्वोपपादनाय, सदेव सोम्येति, यतो वा इमानीत्यादीनां जगदुत्पत्त्यादिबोधकश्रुतीनामेकत्वप्रतिपा-दनपरत्वमुक्तम्, तत्किमुपादानतयैकत्वप्रतिपादनार्थम्? उत तटस्थ-तयैकत्वप्रतिपादनार्थम् ? । आद्ये तासामुपादानतादिबोधकत्वेन स्वार्थेऽपि तात्पर्यात् सिद्धमनेकशक्तित्वम् । द्वितीये तु, न प्रमाणमु-पलभामहे । तत्र ताटस्थ्यबोधकपदाभावात् । नच मृदादिदृष्टान्त-वाक्ये विकारस्य वाचारम्भणमात्रत्वकथनेन तन्मिथ्यात्वस्य मृत्ति-केत्येव सत्यमिति कारणसत्त्वस्य च बोधनात् तदेव मानमिति वाच्यम् । तत्र तथार्थाभावात् । तत्र विकारस्य वाचारम्भणत्वोक्त्या

तस्य कारणानन्यताया एव सिद्धेस्तावता तटस्थैक्यस्य साधयितुमशक्यत्वात् । वाचारम्भणस्य नामधेयत्वविधानेन तथा निश्चयात् । अन्यथा, वाचारम्भणनामधेयपदयोरन्यतरप्रयोगमात्रेण विकारमिथ्यात्वसिद्धावन्यतरवैयर्थ्यापत्तेर्दुर्वारत्वात् । अतो घटशरावादयो यथा मृद एव नामान्तरं तथा प्रपञ्चरूपो विकारोऽपि ब्रह्मण एव नामान्तरमिति तत्र कारणाऽनन्यतायामेव तात्पर्यात् । भगवता सूत्रकारेणापि तथैव सूत्रितत्वात् । अन्यथा तन्मिथ्यात्वमारम्भणशब्दादिभ्य इत्येव वदेत् ।

यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य ।

तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वदित्येकादशस्कन्धीयभगवद्वाक्याच्च । अतस्तासां कारणैक्य एव तात्पर्यं, न तु तटस्थैक्ये । एवं कारणसत्यत्वावधारणादपि न तटस्थैक्यसिद्धिः । कारणत्वेनैव सत्यत्वावधारणात् । ननु कारणत्वेनापि कारणसत्यत्वावधारणे कार्यस्य मिथ्यात्वासिद्धौ तादस्थ्येनैव कारणतेति त[illegible]थैक्यस्यैव सिद्धिरिति वाच्यम् । आत्मैवेदं सर्वं, ब्रह्मैवेदं विश्वमिदं वरिष्ठमित्यादिभिस्तदुक्तश्रुतिभिरेव कार्यस्य ब्रह्मत्वावधारणे तन्मिथ्यात्वस्यैव वक्तुमशक्यत्वात् तटस्थकारणताया एवासिद्धेः । अतः, सन्मूलाः सोम्येमाः इत्यादिश्रुतेः मूलतूला कार्यलक्षणमुखेनैव ब्रह्मजिज्ञासाप्रतिज्ञानादन्यथा जगद्व्यापारवर्जमित्यादिदोषप्रसङ्गाच्च उपादानत्वेनैवैकत्वसिद्धिरित्युत्पत्त्यादिहेतुत्वबोधकश्रुतीनां स्वार्थेऽपि तात्पर्यस्य दुरपोहत्वात् तासां निर्विशेषत्वबोधकश्रुतिशेषताया एवायुक्तत्वात् । अनन्तशक्तित्वेनैव ब्रह्मणः सिद्धिरिति न विशेषनिषेधश्रुतीनां निराकाङ्क्षार्थत्वम् । तावता ब्रह्मज्ञानस्याऽपूर्तेः । नाप्यात्मन एकत्वनित्यत्वशुद्धत्वाद्यवगत्या पुरुषार्थसमाप्त्यवगतिः । भूमविद्यायां भूमैव विजिज्ञासितव्य इत्यादिना नित्यनिरवधिसुखात्मकब्रह्मज्ञानादेव पुरुषार्थबुद्धिसमाप्तिबोधनात् । जीवब्रह्मैक्यस्यापि तादात्म्यरूपत्वमेव, न तु सर्वात्मनोऽभेदरूपत्वम् । तत्त्वमसीत्यादौ तस्य भावस्तत्त्वमिति व्युत्पत्त्या तथैव सिद्धत्वात् । सर्वात्मनाऽभेदस्य भागत्यागलक्षणादोषग्रस्तत्वेनाग्रहमात्रत्वात् । एतच्च, तद्गुणसारत्वात्तु तद्व्यपदेश इत्यत्र व्युत्पादितम् । तदनन्यत्वाधिकरणे च । तत्र, को मोहः कः शोक एकत्वमनुपश्यत इति

ईशाऽऽचास्यवाक्येऽपि, यस्मिन् सर्वाणि भूतान्यात्मैव स्याद् विजानत इति पूर्वार्द्धेन ज्ञानिनः सर्वात्मभावो वामदेववत्तस्यामवस्थायामुच्यते इति तादृशीनां श्रुतीनामपि पूर्वकक्षाविश्रान्तत्वमेव। अत एव आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति श्रुतावपि मनोवागगोचरनिरवध्यानन्दज्ञानादेव भयाऽभावकथनं युज्यते । एतेनैव विदुषस्तुष्ट्यनुभवादिदर्शनमपि व्याख्यातम् । तस्य यथाधिकारत्वाद् विकारसत्यत्वमेव बोधयति । अन्यथा तेनात्मान्तर्धानानुपपत्तेः । आत्मान्तर्धानानन्तर्धानयोर्वस्तुधर्मत्वात् । अन्यथाऽनृतेनात्मानमन्तर्धायेति श्रुतिविरोधापत्तेः । मृत्योः स मृत्युमाप्नोतीति भेददृष्ट्यपवादस्तु परब्रह्मस्वरूपगतभेददृष्टिविषयः । काठके पराञ्चि खानीत्यादिना परमात्मन एवोपक्रान्तत्वात् । उपसंहारेऽप्यङ्गुष्ठमात्रः पुरुष इति मन्त्रद्वये तस्यैवोक्तत्वात् । अग्रे च, यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमेति मुक्तिदशायामपि साम्यमात्रबोधनाच्च । तेन चक्षुषश्चक्षुरित्यादिना परस्य ब्रह्मण एवोपक्रान्तत्वाद्यथा बृहदारण्यकेऽर्थस्तथात्रापीति● तेनापि विकारस्य मिथ्यात्वसिद्धिः । यत्रेनच्छुक्रमुत्पतितमिति श्रुत्यापि जगन्मूलत्वेनैकत्वमुक्तं प्रतिपाद्यते, न तु तादात्म्येन । एवं, यतो वेत्यादावपि ज्ञेयम् । अतः सर्वासां श्रुतीनामुपादानकरणकात्म्यावगमपरत्वाद् विशेषनिषेधश्रुतीनां च लौकिकविशेषनिषेधपरत्वात् तासां परस्परसाकाङ्क्षत्वं । शेषशेषिभावस्तु यथाधिकारं प्रकरणबलादृनियत इति ब्रह्मणैकशाक्ययोगो निराबाध एव ।

तेन यत्तः प्रश्नोपनिषद्वाक्यात् परापरे द्वे ब्रह्मणी अङ्गीकृत्य, यदविद्याकृतनामरूपादिविशेषप्रतिषेधनास्थूलादिशब्दैर्ब्रह्मोपदिश्यते तत् परम् । यत्पुनर्नामरूपविशेषाणां केन चिद्विशिष्टमुपासनायोपदिश्यते मनोमयः प्राणशरीर इत्यादिशब्दैस्तदपरमिति प्रतिपादितम् । तत्र किं मानम् । न तावदस्थूलादिवाक्यम्, मनोमयादिवाक्यं च । तत्र परापरशब्दयोरश्रवणात् । आद्ये अक्षरशब्देनैव लक्ष्यनिर्देशात् । यदि च मुण्डके, अथ परा यया तदक्षरमधिगम्यत इत्यक्षरविद्यायां परत्वश्रावणात् तद्विद्यस्याक्षरस्य परत्वमिष्यते । बाढम् । तदा पुरुषस्य ततोऽपि परत्वमेव द्रष्टव्यम् । दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः, अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः पर इति त-

नैव श्रावणात् । नच तस्य यावद्विशेषशून्यत्वम् । तदग्रे, एतस्माज्जायते प्राण इति मन्त्रेण तत एव सृष्टेः श्रावणात् । अग्निर्मूर्धेत्यादिभिस्तद्रूपोपन्यासाच्च । नाप्यक्षरस्य तथात्वम् । अस्थूलादिश्रावणात्तरं प्रशासनस्य वेद्यत्वद्रष्टृत्वादीनाम् आकाशोपादानत्वस्य च श्रावणेन, मुण्डकेऽपि, यत्तदद्रेश्यमित्याद्युक्त्वा, यद् भूतयोनिं परिपश्यन्तीत्यादिजगदुपादानत्वसर्वज्ञत्वादीनां श्रावणेन यावद्विशेषशून्यतायाः वक्तुमशक्यत्वात् । एवं वाक्यान्तरेष्वपि द्रष्टव्यम् । सर्वत्र एकस्यैव ब्रह्मणः प्रतिपाद्यत्वात् । अत एव श्वेताश्वतरेऽपि प्रधानक्षेत्रज्ञपतिर्गुणेश , यो ब्रह्माणं विदधाति पूर्वमित्यादीन् नानाधर्मबोधकानेव मन्त्रानुक्त्वा निष्कलं निष्क्रियमित्युक्तम् । स वा एष महानज आत्मेत्यत्रापि शारीरब्राह्मणे, अन्नादो वसुदान इति सर्वस्य वशी सर्वस्येशान इत्यादयो धर्मा उक्ताः । स वा एष नेति नेत्युक्त्वा, अगृह्यो न हि गृह्यते, अशीर्यो न हि शीर्यते असङ्गोऽसितो न सज्जते न व्यथत इत्येवं निषेधो विवृतो, न तु यावद्धर्मपरत्वेनेति द्रष्टव्यम् । अतो यत्रोत्कर्षस्य विश्रान्तिः । अक्षराद्वा यदुत्कृष्टं तदेव परमिति मन्तव्यम् । उक्तमुण्डकश्रुतेः । अव्यक्तात् पुरुषः, पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरिति काठकश्रुतेः । अभयत्पारं इत्युपक्रम्य, अतः परं नान्यदणीयसं हि परात् परं यन्महतो महान्तमिति तैत्तिरीयश्रुतेश्च । पुरुषस्य च विरुद्धधर्माश्रयत्वमेकस्यैव प्रतिपादितम् । एतदेव परत्वम् । गीतासु च 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम । पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्ययेति । द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति तदुपबृंहणात् । अत एव, न तत्समश्चाभ्यधिकश्च दृश्यते इत्यादिषु तस्य समाभ्यधिकनिषेधोऽपि युज्यते । नच पुरुषोत्तमाक्षरयोः परापरभावाङ्गीकारे अद्वैतश्रुतिविरोधः । गणितागणितानन्दत्वधर्मभेदेऽपि वस्त्वभेदेन द्वैताभावे तदभावात् । अग्निस्फुलिङ्गादिवदद्वैताविरुद्धसम्पद्रूपत्वेनाभेदस्य तादात्म्यात्मकत्वात् । अथवा शब्दब्रह्मैवेद्यं परं, शब्दब्रह्मैवाऽपरम् । एतदुक्त-

न्धे चित्रकेतुं प्रति, शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू इति भगवद्वाक्यस्य 'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीत्यादिवाक्यस्य च स्वारस्यात् । एतद्वै सत्यकाम परं च ब्रह्मेति वाक्यविचारेऽप्योङ्कारस्य, एतद्वै यजुस्त्रयीं विद्यां प्रतीति श्रुतेः सर्ववेदमूलत्वेन वाच्याभिन्नत्वेन चोभयरूपत्वं प्रतिज्ञाय तदभिध्यानफलकथने एकद्वित्रिमात्राध्यानेनर्ग्यजुःसामभिर्मनुष्यलोकसोमलोकसूर्यलोकेषु यथायथं महिमानुभवं फलमुक्त्वाऽर्द्धचतुर्थमात्रेणोङ्कारेण ध्याने, अथर्वभिर्ब्रह्मलोकप्राप्तिं चोक्त्वा, स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षत इति फलमुक्तम् । शङ्कराचार्यमतेऽत्र त्रिमात्र एवोङ्कारोऽङ्गीकृतः । स पाठो यद्यपीदानीन्तनेभ्यः पुस्तकेभ्यः, पाठिभिः पठ्यमानात् पाठाच्च विरुध्यते, तथापि त्रिमात्रध्यानेऽपि, ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि परं सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्त इत्येतावतो ग्रन्थस्य स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्षत इति ग्रन्थस्याग्रिमश्लोकद्वयस्य च वर्तमानत्वेन शब्दब्रह्म अपरं मृत्युमन्मात्राप्रतिपाद्यं वाऽपरं जीवघनरूपो यो हिरण्यगर्भः क्षरः पुरुषस्तस्मात् परमक्षरं ब्रह्म । परं ततोऽपि यः परः पुरिशयोऽन्तर्यामी उक्तः श्लोकेऽपि तमोङ्कारेणैवाऽयनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं परायणं चेत्युक्तः स एव पर इति सिद्ध्यति । तथाच्चात्र परायणं चेति चकारादक्षरात् परः पुरुषोऽपि परं परायणं यस्येति योगादक्षरधामवासी बोधितः । तेन मुण्डकतैत्तिरीयाद्यर्थः । अपरं तु ब्रह्म वेदात्मकं हिरण्यगर्भस्य शब्दब्रह्मात्मकत्वात् । किञ्च, नृसिंहोत्तरतापनीये, सैषा विद्या जगत् सर्वामिति सर्वस्य जगतोऽविद्यात्वश्रावणेऽपि न सर्वस्य जगतस्तथात्वम् । उपसंहारे, तस्मादात्मन एव त्रैविध्यं योनित्वमपीति निगमनात् । इदं यथा तथोपपादितं द्वितीयस्य प्रथमे पादे, दृश्यते त्विति सूत्रे । मुण्डके, यथोर्णनाभिः सृजते गृह्णते चेत्यादिना अक्षरात् सृष्टिमुपक्रम्य तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते तदेतत्सत्यमिति निगमनात् । तदेतद् ऋषिः पश्यन् वामदेवः प्रतिपेद इत्यादिश्रुत्युक्ताऽबाधितब्रह्मवित्प्रत्यक्षविषयत्वात् । व्यावहारिको नामरूपप्रपञ्चः, स्वोत्कृष्टसत्ताकतत्प्रपञ्चपूर्वकः, मायिकप्रपञ्चत्वादैन्द्रजालिकादिप्रपञ्च-

वदित्यत्र साध्यविशेषणत्वेनानुमितिविषयत्वाच्च । अतो नामरूपादीनामपि न सर्वेषामाविद्यकत्वमिति सिद्ध्यति । एवं सति मनोमयः प्राणशरीरो भारूपः । अयमात्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इत्यादिषु शाण्डिल्यदहरभूमविद्याप्रभृतिवाक्येष्वपहतपाप्मसत्यकामादिशब्दैस्तद्विशेषणविशिष्टं यदुपासनायोपदिश्यते तस्याविद्याकृतनामरूपविशेषविशिष्टत्वं कुतोऽवधारितं येन तस्यापरब्रह्मत्वमुच्यते । न तावदुपासनाविषयत्वात् । उपासनाविषये तथात्वनियमस्य काप्यसिद्धत्वेन प्रमाणशून्यत्वात् । नच, यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इत्यादितलवकारश्रुतेरिति युक्तम् । तत्र तथार्थाभावात् । नेदमित्यनेन मनोवागादिनिषेधोत्तरम्, इदं ब्रह्म विद्धि यदुपासत इत्यर्थात् । अन्यथा द्वितीयेदङ्कारप्रयोगवैयर्थ्यप्रसङ्गादित्येवं प्रागेवोपपादितत्वात् । तदेव ब्रह्म त्वं विद्धीति विधीयमानज्ञानविषयस्य ब्रह्मणः पूर्वं, न तत्र चक्षुर्गच्छतीत्यादिना यावत्करणागम्यताया उक्तत्वात्तस्य ज्ञानस्य प्रत्यक्षादिरूपताया वक्तुमशक्यत्वादुपासनारूपत्व एव पर्यवसानेन तद्विषयस्य परस्याप्यपरत्वापत्तेश्च । नाप्युपशान्तत्वाभावात् । सर्वत्र परस्य ब्रह्मण एकत्वेन तस्य च विरुद्धधर्माधारताया उपपादितत्वेन तदभावस्यैवाभावात् । एतेनैव, अवचनेनैव प्रोवाचेत्यनेनापि प्रत्यवस्थानमयुक्तम् । तत्राप्युपशान्तत्वस्यैवोक्तत्वात् । लौकिकयावद्धर्मराहित्येनैव तत्सिद्धेश्च । एवमिन्द्रो मायाभिरित्यादिवाक्यानामप्युभयलिङ्गाद्यधिकरणविचार एव विचारितत्वान्न तैरपि प्रत्यवस्थानावकाशः । अतः परविद्यासूक्तानामन्यत्राप्युक्तानां परब्रह्मधर्माणामनाविद्यकत्वादलौकिकैर्नानागुणैर्युक्तमप्युपास्यरूपं नापरब्रह्मरूपमिति नौपाधिकम् । एवं जीवत्वमपि नौपाधिकम् । अंशो नानाव्यपदेशादित्यत्र जीवस्यांशत्वेनैव निर्द्धारितत्वात् । श्वेताश्वतरे, मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगदिति कण्ठतोऽवयवत्वोक्तेश्च । 'घटसंवृतमाकाशं लीयमाने घटे यथा । घटो लीयेत नाकाशं तद्वज्जीवो नभोपम' इति बिन्दुश्लोकश्रुतौ नभोपम इति दृष्टान्तोऽपि लयाभाव एव, न त्वनंशत्वे । इतः पूर्वस्मिन्, 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्र-

तद्व्यपदेश इत्याद्यधिकरणैः श्रुत्यर्थनिर्णयेन ब्रह्मणि विशेषाणामौपाधिकत्वस्य जीवपुरुषोत्तमाभेदस्य च पुरस्तादेव निरस्तत्वात् । नच व्यापकत्वं गन्तव्यत्वे बाधकम् । प्रारब्धभोगं विना तत्प्राप्त्यसम्भवाद् यदा यत्र तद्भोगसमाप्तिस्तदा तत्र तत्प्राप्तेर्निष्प्रत्यूहत्वात् ।

यदि'ति मन्त्रे जलचन्द्रदृष्टान्तेनांशप्रवेशङ्काराकायाः सर्वभूताधिकरणकस्थितेर्बोधितत्वान्निष्कलश्रुतेस्तु नांशत्वबाधकत्वम् । स विश्वकृद्विश्वविदात्मयोनिरित्यादिभिः पूर्वमन्त्रैर्नानाधर्माणां क्रियाणां च बोधनेन जीवानामवयवरूपतायाश्च पूर्वमुक्तत्वेन, नित्यो नित्यानां चेतनश्चेतनानामिति भेदस्य बोधनेन ब्रह्मणो विरुद्धधर्माधारत्व एव तत्तात्पर्यावगमात् । अविद्यया विस्मृतस्वस्वरूपं ब्रह्मैव जीव इति पक्षस्यापि, तत्त्वमसीति वाक्यविचारे लक्षणादोषग्रासेनैव निरस्तत्वात् । ब्रह्मणि प्रदेशानङ्गीकारेण निष्प्रदेशे तस्मिन्नविद्यासम्बन्धाऽङ्गीकारे सर्वस्य जीवतापत्तेश्च तस्याप्यप्रयोजकत्वात् ।

विकारप्रतिबिम्बाभासपक्षाणामपि, नाऽऽत्माऽश्रुतेरित्यादिसूत्रविचारे एव निरस्तत्वात् । जीवे ब्रह्मत्वव्यपदेशस्य सुषुप्तिसाक्षिभूतप्राज्ञदृष्टान्तेन गौणतायास्तद्गुणसारत्वाधिकरण एव साधितत्वाच्च । नस्माज्जीवेऽंशत्वमपि दुरपोहम् । तदेतदुक्तं, स्यादित्यारभ्य * निस्तरत्वादित्यन्तेन * तथाच अपरस्य ब्रह्मणो गन्तव्यत्वमविद्यावतश्च गन्तृत्वं विद्याकृतं तदा स्याद्यदि भगवदुपदर्शितो ब्रह्मणः परापरविभागो वा जीवस्य सर्वात्मना ब्रह्माभेदो वा श्रुतिस्मृतिसूत्रतात्पर्यगोचरः स्यात् । स एव तु नास्तीति वृथा बादरिमताग्रहाडम्बर इत्यर्थः । ननु न वृथा, ब्रह्मणो व्यापकत्वरूपस्य गन्तव्यताबाधकस्यापरिहृतत्वादित्यत आहुः । * न चेत्यादि * तथाच प्रतिबन्धकाभावस्य सहकारितायास्त्वयाऽभ्युपगतत्वाद् यत्रैव प्रारब्धरूपस्य प्रतिबन्धकस्य यथा यदाभावस्तत्रैव ब्रह्मप्राप्तिरिति गमनस्य प्रारब्धनिवारणार्थत्वाद् ब्रह्मणो गतत्वेऽपि न गन्तव्यत्वानुपपत्तिरित्यर्थः । ननु भवत्वेवं परब्रह्मणो गन्तव्यत्वानुपपत्तिपरिहारस्तथापि गतिश्रुतीनां

किञ्च। उपास्यरूपाणां सर्वेषां निर्गुणत्वमेव उपासकस्य, परं सगुणत्वेन तत्तारतम्यात् फलतारतम्यम्। यस्तु भगवदनुग्रहेण प्राकृतगुणरहितोऽभूत् स निर्गुणब्रह्मविद्यावानित्युच्यते। तादृशस्यैव मुक्तिप्रकारद्वयमुक्तं, सद्योमुक्तिक्रममुक्तिभेदेन। न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येतीत्यादिश्रुतिस्तु प्रारब्धरहितविषया। निर्गुणब्रह्मविद्यावतोऽपि प्रारब्धभोगस्तु त्वयाऽपि वाच्योऽन्यथा प्रवचनासम्भवेन ज्ञानमार्ग एवोच्छिद्येत। ते ब्रह्मलोके तु परान्तकाल इति श्रुतिरपि परान्तकाल एव येषां प्रारब्धभोगसमाप्तिस्तद्विषयिणीति मन्तव्यम्। अन्यथा वेदान्तविज्ञानेत्याद्युक्तधर्मविशिष्टानां मुक्तौ विलम्बो नोपपद्यते इति दिक्॥ १४॥

पञ्चाग्न्यादिविद्यास्वपि दर्शनात्तासां परविद्याङ्गत्वं नासाधारणम्। अपरविद्यासु च विषयः सगुण एव। अतस्तदुपासने तत्क्रतुन्यायात् सगुणमेव फलं युक्तम्। तथा सति तत्र गन्तव्ये प्रयुक्तं ब्रह्मपदं सामीप्य एव नेतव्यम्। एवं यत्र लोकपदसमभिव्याहृतं ब्रह्मपदं, तत्रापि लोकविशेषणभूतम्। लोकत्वं च कार्यत्वनियतमिति तत्रापि कार्यस्यैव गन्तव्यता। एवं बहुषु स्थलेषु कार्यत्वे गन्तव्यस्य सिद्धे परविद्यास्वपि तथाङ्गीकार्यमित्याशयेन यत्तैः क्वचित् पञ्चाग्निविद्यामित्यादिनोक्तं तत्रोत्तरमाहुः * किञ्चेत्यादि * पञ्चाग्निविद्यादिष्वप्युपास्यरूपाणां प्राकृतगुणरहितत्वमेव। शब्द इति चेन्नातः प्रभवादित्यत्र वैदिकपदार्थानां सर्वेषामाधिदैविकत्वेन भगवदवयवरूपत्वस्थापनात्। तत एव लोकेष्वपि नित्यत्वम्। एवमन्येष्वप्युपास्यरूपेषु द्रष्टव्यम्। नचापरासु पुरुषयज्ञादिविद्यासु जघन्यफलोक्तिविरोधः। उपासकस्य सगुणत्वेन तस्य जघन्यफलमेव काममितीमिति तदर्थं तत्र तत्कथनात्। एवं परविद्यास्वपि बोध्यम्। अत उपासकाधिकारतारतम्यादेव फलतारतम्यं फलविलम्बश्च। नचोपास्यरूपाणां सर्वेषां निर्गुणत्वे विद्यानामपि तथात्वात् सगुणब्रह्मविद्यावान्निर्गुणब्रह्मविद्यावा-

नच कार्ये प्रतिपत्त्यभिसन्धिः ॥ १५ ॥

निति व्यवहारभेदलोपप्रसङ्गः शङ्कनीयः । यस्तु भगवदनुग्रहेण प्राकृतगुणरहितोऽभूत् स निर्गुणब्रह्मविद्यावानित्युच्यते । यस्तद्भिन्नः स सगुणविद्यावानित्युपपत्तेः । एवं सति य आद्यस्तादृशस्यैव सद्योमुक्तिक्रममुक्तिभेदभिन्नं प्रकारद्वयम् । तत्र प्रारब्धरहितस्य सद्योमुक्तिप्रकारो, न तस्मात्प्राणा उत्क्रामन्तीत्यादिनोच्यते । तद्वतः क्रममुक्तिप्रकारस्तु शतं चैका च पुरुषस्य नाड्यः, तेऽर्चिरभिसम्भवन्तीत्यादिभिः । नच निर्गुणब्रह्मविद्यावतः सर्वस्य प्रारब्धशून्यत्वमिति वक्तुं शक्यम् । तथा सति तस्य शरीरराहित्यप्रसङ्गेन प्रपञ्चनाद्यनुपपत्त्या ज्ञानमार्गोच्छेदापत्तेः । नच चरमवृत्त्यभावाच्छरीरस्थितिरिति युक्तम् । शब्दादपरोक्षवादिनः साक्षात्कारोत्तरं प्रारब्धातिरिक्तस्य वृत्त्यारम्भहेतोर्वक्तुमशक्यत्वात् । अतस्तेनैव गत्युपपत्तिस्तन्निवृत्तिप्रकारबोधनार्थमत्र गतिश्रुतिः । अतः परविद्यासु सा प्ररोचनार्था वा, अनुचिन्तनार्था वेति विकल्प्य तद्दूषणमप्यसङ्गतमेव । नच, ते ब्रह्मलोके त्विति श्रुतिव्याकोपः । येषां परान्तकाल एव प्रारब्धभोगसमाप्तिस्तेषामेव तत्र सर्वेरिति परामर्शात् । तत्र सगुणविद्यावत्परामर्शाङ्गीकारे तु तेषां वेदान्तार्थानभिज्ञत्वादविद्यावत्त्वेनाशुद्धसत्त्वत्वाच्च न पूर्वार्द्धोक्तस्य वेदान्तविज्ञानेत्यादिविशेषणद्वयस्य बाधः स्यात् । अतो यदत्र तैः प्रतिपादितं तत् सर्वं श्रुतिविरुद्धत्वादसङ्गतम् । किञ्च तैरपि क्वचिद्गौणः शब्दो दृष्ट इति नैतावता शब्दप्रमाणकेऽर्थे गौणी कल्पना न्याय्या । सर्वत्रानाश्वासप्रसङ्गादिति, तन्निष्ठस्य मोक्षोपदेशादिति सूत्रव्याख्याने यदुक्तं तदपि विस्मृतम् । अथवा । ईक्षतिसूत्रावतारणे वेदान्तवाक्येभ्य एव युक्त्याभासवाक्याभासावष्टम्भाः सांख्यादिवादिन उत्तिष्ठन्ते । तत्र पदवाक्यप्रमाणज्ञेन आचार्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्त इति कथनाल्लक्षणां विरहय्य वेदान्तव्याख्यानमाचार्यस्यैव संमतं, नास्माकमिति बोधितमिति प्रभुचरणैर्दिक्पदप्रयोगेण ज्ञापितम् ॥ १४ ॥

नच कार्ये प्रतिपत्त्यभिसन्धिः ॥ एवं प्रासङ्गिकमतान्तरपरि-

अपिचाब्रह्मविदाप्नोति परमिति सङ्क्षेपेणोक्त्वा, तदेषाऽभ्युक्तेति तद्विवरिकामृचं प्रस्तुत्य सोक्ता, सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति । अत्रोपक्रमानुरोधेन परेणैव ब्रह्मणा सह सर्वकामभोगलक्षणा प्रतिपत्तिरुच्यत इति कार्यरूपे वस्तुमात्रे प्रतिपत्तिर्न क्वापि श्रुतेरभिप्रेताऽतोऽत्रापि परमेव ब्रह्मपदेनोच्यते । ऋगर्थस्त्वानन्दमयाधिकरणे प्रपञ्चित इति नात्रोक्तः ॥ १९ ॥

द्वारेण जैमिनिमतस्यैव सिद्धान्तत्वमिति दृढीकृत्य प्रकृतं सूत्रं पठित्वा व्याचक्षते । * अपिचेत्यादि * । * सोक्तेति * । ऋगुक्ता । * उपक्रमानुरोधेनेति * आप्नोति परमित्युपक्रमानुरोधेन । तथाच ब्रह्मगमयतीत्यत्र परब्रह्म प्रापयतीत्येवार्थः । यतः परब्रह्मप्राप्तिमेव परमफलत्वेन ब्रह्मविदाप्नोति परमित्यत्र श्रावयित्वा, सत्यं ज्ञानमिति तद्विवरणर्चि परेण ब्रह्मणा सह सर्वकामभोगलक्षणा प्रतिपत्तिरुच्यते इति । अतो हेतोः कार्यरूपे वस्तुमात्रे प्रतिपत्तिः । पद् गतौ, पदनं पत्तिः संसारगतिप्रतिकूला पत्तिर्गतिर्न क्वापि कार्ये श्रुतेरभिप्रेता,प्रजापतेः सभां वेश्म प्रपद्य इत्यत्रापि पूर्वमश्व इवेति मन्त्रे ब्रह्मलोकस्याकृतत्वं श्रावयित्वा, आकाशो वै नामेत्यत्र तद् ब्रह्म तदमृतं स आत्मेति नित्यस्यैव ब्रह्मणः श्रावणात् पूर्वकाण्डेऽपि, यन्न दुःखेन सम्भिन्नमित्यत्रात्मसुखस्यैव स्वर्गत्वेन श्रावणादतोऽत्रापि ब्रह्मपदेनाक्षरं परब्रह्मैव गन्तव्यत्वेनोच्यत इत्यर्थः । इदमेव च मतं व्यासचरणानां सिद्धान्तीयत्वेनाभिप्रेतम् । एतदव्यवहितमेवाप्रतीकालम्बननयनविचारात् । अन्यथा तु वैपरीत्येन मतद्वयमुक्त्वा तत्र नयनं विचारयेदिति ।

अन्ये तु । प्रजापतेः सभां वेश्म प्रपद्ये, यशोऽहं भवामि ब्राह्मणानां यशो राज्ञामिति छान्दोग्यसमाप्तिस्थां श्रुतिमुदाहृत्य, नायं कार्यविषयः प्रतिपत्त्यभिसन्धिः सम्प्राप्तिसङ्कल्पः । आकाशो ह वै

नामरूपयोर्निर्वहितेति परब्रह्मण एव प्रकृतत्वात् । यशोऽहं भवामीति सर्वात्मत्वानुक्रमणात् । न तस्य प्रतिमा अस्ति यस्य नाम महद्यश इति ब्रह्मनामनिर्देशाच्चेति व्याकुर्वन्ति ।

भास्कराचार्यास्तु—सगुणब्रह्मविद्याविषयैव गतिर्निर्गुणब्रह्मविदो गतिर्नोपपद्यते । परस्य सर्वगतत्वेन प्राप्तत्वात् । न हि गतविषया गतिरुपपद्यत इत्येवं शाङ्करं मतमनूद्य तदेवं दूषयन्ति । तथाहि । यदि निर्गुणविद्यासु गतिरनुपपन्ना तर्हि सगुणास्वप्यनुपपत्तिस्तुल्या । तत्रापि सर्वगतस्यैव ब्रह्मण उपास्यत्वात् सर्वगतगुणानामाकाशीयपरममहत्परिमाणपृथक्त्वादिवत् सर्वगतत्वात् । किञ्चापहतपाप्मत्वादयः संसारविनिवृत्तिहेतवो यस्य गुणाः स परमात्मेत्युच्यते । यस्यैते न सन्ति स संसारीति तद्भिन्नस्य परमात्मनः पराभिन्नत्वात् । अथ सत्त्वादिगुणयोगादमी गुणा आरोपिता, न तु स्वाभाविकास्तदापि तद्रूपतयोपास्यमानं सगुणं ब्रह्म तु नाऽब्रह्म भवति । न ह्यारोपितलौहित्यगुणयोगे स्फटिकोऽस्फटिको भवति । न वा स्वाभाविकस्य प्रकाशस्य प्रत्याख्यानेऽग्निरनग्निर्भवति । न वा द्रव्यप्रत्याख्याने गुणा नास्ति । वस्तुन उभयात्मकत्वात् । विज्ञानमानन्दं ब्रह्म, आनन्दो ब्रह्मेति श्रुतेः । शतगुणितोत्तरक्रमेणानन्दप्रतिपादनात् । यदि चैतन्यमात्रं ब्रह्म, तदा आनन्दगुणोपदेशोऽनर्थकः स्यात् । नचाकस्मादर्थवादत्वकल्पना युक्ता । यथाश्रुतग्रहणेऽनुपपत्त्यभावात् । अस्थूलादिश्रुतिस्तु प्रपञ्चनिराकरणपरा । स एको ब्रह्मण आनन्द इति त्वसाधारणो गुणोत्कर्षोऽपकर्षरहितो व्यपदिष्ट इति । यदि च श्रुतं नाद्रियते, तदा अपवर्गोऽप्यर्थवादः किं न भवति । अत एव सर्वशक्तित्वं सर्वज्ञत्वमित्यादयः परस्याऽसाधारणा गुणा न केनचित् प्रतिषेद्धुं शक्यन्ते । गुणकृतं कार्यकृतं च नानात्वं यद्दर्शितं तदस्माकं न दोषाय, प्रत्युताऽलङ्काराय । भिन्नाभिन्नात्मकवस्तुरूपोपगमात् । अतः सगुणनिर्गुणयोर्भेदस्यानुपपन्नत्वाद् ब्रह्मैकमेवाति सगुणविद्यावतोऽपि गतिरनुपपन्ना । तस्यापि तद्भावापत्तेः । न हि प्राप्तमेव प्राप्तव्यं भवतीति त्वदुक्तेनैव हेतुना गतिश्रुतयो रूपे प्रवेशयितव्याः । किञ्च । संसारिणोऽपि स्वरूपतो गतिर्नोपपद्यते । तस्याऽपि लिङ्गशरीरगमनादेव गमनात् ।

ननु संसारी जीवो नाम परमात्मन आभास इति तस्य परिच्छिन्नत्वाद्

गतिरुपपद्यत इति चेत्, कोऽयमाभासो नाम ?। किं वस्तुभूतोऽथाऽवस्तुभूतः ? यदि तावद् अवस्तुभूतस्तदा तस्य स्वर्गापवर्गयोरधिकाराभावः शशविषाणवत्।अथ वस्तुभूतः सर्वगतश्चेत्यभावः।अणुपरिमाणत्वं मध्यमपरिमाणत्वं च भवता नेष्यते, यच्चाणुत्वं तदप्यौपचारिकमिति लिङ्गगमनादेव गमनं पूर्वोक्तमभ्युपगन्तव्यम्। नचास्माभिरियं गतिः कल्पिता। श्रुतयोऽत्र प्रमाणम्। परविद्यासु च गतयो लभ्यन्ते। एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्त इति। तद्येह वै तदिष्टापूर्त्ते कृतमित्युपासते ते चान्द्रमसमेव लोकमभिजायन्ते। ते एव पुनरावर्त्तन्ते तथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्यमभिजायन्ते, एतद्वै प्राणानामायतनमेतदमृतमभयमेतत् परायणमेतस्मान्न पुनर्वर्त्तन्त इति प्रश्ने, मुण्डके च, सूर्यद्वारेण ते विरजाः प्रयान्तीति। कठवल्लीषु च परविद्याप्रकरणे, शतं चैका च हृदयस्य नाड्य इति। परविद्यायामेव चैतरेयके श्रूयते। अस्माल्लोकादुत्क्रम्याऽमुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवदिति। एवं तत्र गीतासु चावृत्त्यनावृत्ती विभागेनोक्ते। अमृतत्वं हि भेजिर इति पुराणेषु च। ननु गतिश्रुतौ वाजसनेयके इहेति विशेषणादिह कल्पेऽनावृत्तिः कल्पान्तरेऽस्यावृत्तिरितिचेत्। न। श्वोभूत इति वदनुवादात्। यथा राजसूये ब्रह्मणो गृह महिष्या गृह इत्येवमादिना द्वादश हवींषि प्रत्येकं कर्त्तव्यानीति विधाय श्वोभूतः निर्वपेदित्युक्तम्। तत्रैकस्मिन् कृते पुनरपि श्वोभूत इत्युपतिष्ठते तद्वत्। इह कल्प इह कल्प इति सर्वकल्पव्याप्तिराकृतिनिर्देशात्। अपिचेह युगेऽवान्तरे कल्पे अन्यस्मिन् वेत्यनध्यवसानाद् आकृतिवादो युक्तः। अर्थवादसमाम्नातानां ग्रहैकत्ववद् वाक्यभेदात् पदानावृत्तिर्विधीयते युगपत् सर्वकल्पानावृत्तिरेवावतिष्ठते। तत्रास्मिन्नेव कल्पे न कल्पान्तर इति अपरस्मिन्नर्थे विधीयमाने वाक्यभेदो दुर्निवारः। यथा ग्रहं सम्मार्ष्टीति सम्मार्गे विधीयमाने सर्वग्रहेषु प्राप्तिः। तत्रैकस्येति पुनर्विधीयमाने वाक्यभेदस्तद्वदत्रापि अनावृत्तिर्न विधीयते। तदानीमिहेति पदं किं विशेषणं स्यात्। तस्मादिहपदमनुवादोऽत एव काण्वानामिहपदं न पठ्यते। तस्मादर्चिरादिना गत्वा परमात्मनि लिङ्गप्रलयो न प्रागिति श्रुतिसामर्थ्या-

अप्रतीलम्बनान्नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च ॥ १६ ॥

क्रममुक्त्यधिकारिणः प्रारब्धं भुक्त्वाऽमानवेन पुरुषेण प्रापिताः परमेव ब्रह्म प्राप्नुवन्तीति सिद्धम् । तत्रेदं सन्दिह्यतेऽर्चिरादिलोकप्राप्तिर्ह्युपासनाविशेषफलम् । एवं सत्यऽमानवः पुरुषस्तान् सर्वान् ब्रह्म प्रापयत्युत कांश्चिदेवेति । किमत्र युक्तम् । सर्वानेवेति । यतोऽर्चिरादिमार्गगतानामन्ते ब्रह्मप्रापणार्थमेव स नियुक्तस्ततोऽन्यथा करणे हेत्वभावात्तथैव स कर्त्तेति प्राप्ते, उच्यते । श्रुतौ ब्रह्मत्वेनैव

निश्चीयते । विद्याकर्माक्षिप्ता च गतिः संसारतरणी युज्यते ।

सत्यलोकमतिक्रम्य कारणे ब्रह्मणि सूक्ष्मशरीरस्य कारणाऽऽत्मना विलयः । तथाचाह, परेऽव्यये सर्व एकीभवन्तीति । पुरुषायणाः पुरुषं प्राप्यास्तं यन्तीति । यदुक्तं ब्रह्मलोकेष्विति बहुवचनं नावकल्पत इति । तन्नायं ब्रह्मणि संख्याभावान्न । एकत्वे बहुत्वं च पाशबहुत्ववदेव द्रष्टव्यम् । अदितिः पाशान् प्रमुमोक्तेतानिति । तत्रैकस्मिन् पाशे बहुवचनं साधुत्वार्थं प्रयुज्यते । विभक्तेर्हि द्वावर्थौ, संख्या, कर्म्मादयश्च । तत्राऽविवक्षितायामपि संख्यायां सप्तमी निमित्तमात्रविवक्षयाऽवकल्पते । ब्रह्म सर्वभोगनिमित्तं सर्वप्रपञ्चनिमित्तमिति निमित्तसप्तम्यैवेत्यदोष इति । एवं भास्कराचार्यमतेऽपि भोगजनकप्रारब्धेनैव गमनम् । ब्रह्मणि भोगस्तु ब्रह्मेच्छयैवेति फलति । तेन सिद्धान्तवदेवार्थः । गन्तृविचारे तु तन्मते जीवस्य व्यापकत्वादुपाधिगमनादेव गमनमितिभेदः ॥१५॥३॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च । पूर्वाधिकरणसिद्धमनुवदन्तः प्रस्तूयमानमवतारयन्ति * क्रमेत्यादि * । * तत्रेति * । सिद्धे परप्राप्तिरूपेऽर्थे । * सर्वानिति * । तदुपासनावतः । पूर्वपक्षग्रन्थः स्पष्टः । सिद्धान्तं व्युत्पादयन्तः सूत्रं व्याकुर्वन्ति । * उच्यत इत्यादि * । अतथात्वं ज्ञात्वेत्य-

सर्वत्रोपासनाया उक्तत्वादुपास्येषु भगवद्विभूतिरूपत्वेन शुद्धब्रह्मरूपेष्वप्यतथात्वं ज्ञात्वा श्रुतिर्ब्रह्मत्वोपासनायाः फलसाधनत्वं वदति, न तूपास्ये ब्रह्मतामपीति मन्वाना य उपासते ते प्रतीकालम्बना इत्युच्यन्ते। तथाच सत्यपि वेदविहितत्वेनोपासनायाः कृतत्वेन सफलत्वात् तत्फलत्वेनोपासकानामर्चिरादिलोकप्राप्तावपि तानऽमानवः पुरुषो ब्रह्म न प्रापयति, किन्तु शुद्धब्रह्मत्वं ज्ञात्वा य उपासते तानेव ब्रह्म प्रापयतीति बादरायण आचार्यो मन्यते। तत्र हेतुमाह। उभयथा दोषादिति। वस्तुतो यद्ब्रह्मरूपं तत्राऽब्रह्मत्वनिश्चय उपासनार्थं च ब्रह्मत्वेन भावनमेवमुभयथा करणे दोषः सम्पद्यत इति तस्य न ब्रह्मप्राप्तावधिकारोऽस्तीति युक्तं तदनयनमित्यर्थः। तथाच श्रुतिः। असन्नेव स भवति, असद् ब्रह्मेति वेद चेदिति, योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते, किं तेन न कृतं पापं चोरेणात्मापहारिणेति। एवं ज्ञानमार्गीयव्यवस्थामुक्त्वा भक्तिमार्गीयस्यापि तामाह। तत्क्रतुश्चेति। सर्वं

स्यैवार्थः-श्रुतिर्ब्रह्मत्वेनेत्यारभ्य, मन्वाना इत्यन्तम्। तथाचातस्मिंस्तत्त्वेनोपासनं प्रतीकमिति पूर्वं, न प्रतीक इति सूत्रे उक्तमतो ये तथोपासते तथा*तथाच सत्यपीति*प्रतीकालम्बनत्वे तेषां सत्यपि।तथाच यथा पूर्वकाण्डतात्पर्यं ब्रह्मणीत्यज्ञात्वा कर्मण्येव तात्पर्यमवधार्य तात्पर्यभ्रमेण यजतां स्वर्गाद्यनन्तरं पुनरावृत्तिस्तथा अत्रापि प्रतीकालम्बनानां तात्पर्यभ्रमेण तथोपासनात्तत्तल्लोकभोगोत्तरम् आवृत्तिरथवा कार्यात्ययावधि तत्र वासो, न तु विद्याबलात् ततः पूर्वं मुक्तिरिति भगवत आचार्यस्याशय इत्यर्थः। हेतुं व्याकुर्वन्ति। * वस्तुत इत्यादि *। एतयोर्दोषत्वे मानत्वेन यथायथं श्रुतिद्वयमुदाहरन्ति। * तथाचेत्यादि *। तेनात्रैतावेव दोषावभिप्रेतावित्यर्थः। सूत्रशेषं व्याकर्त्तुमवतारयन्ति। * एवं ज्ञानेत्यादि *। व्याकुर्वन्ति। * सर्वमित्यादि *। अस्मिन् पक्षे लकारार्थव्यत्यय

मद्भक्तियोगेनेति वाक्यान्न तस्योपासनापेक्षेति न प्रतीकादिसम्भावना । तत्र कथञ्चिद् यदि वाञ्छतीति वाक्यादिच्छामात्रेण तद्भोगकरणानन्तरं प्राचीनभगवद्भजनलक्षणक्रतुश्च नीयते इत्यर्थः । वस्तुतस्तु भक्तस्याऽमानवपुमपेक्षाभावात् स्वयमेव ब्रह्मलोकान् प्राप्नोतीति ज्ञापनाय प्रथमान्त उक्तः । ननु ब्रह्मणोऽधिकं न किञ्चिदस्ति । न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुतेः । एवं सति छान्दोग्ये सनत्कुमारनारदसंवादे स यो नाम ब्रह्मेत्युपास्त इत्यादिना नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानादीनां ब्रह्मत्वेनोपासनमुत्तरोत्तरं पूर्वस्मात् पूर्वस्माद् भूयस्त्वं चोच्यतेऽतो न ब्रह्मत्वं सर्वेषामुपास्यानां वक्तुं शक्यमितिचेत् । मैवम् । विभूति-

---

इत्यरुच्या प्रकारान्तरमाहुः । * वस्तुत इत्यादि * । तथाच सूत्रे नयतीति कर्त्तरि लट्प्रयोगात् तत्क्रतुरिति प्रथमान्तप्रयोगाच्चैवं ज्ञायते । यो ब्रह्मत्वेनाङ्गोपासनकर्त्ता स तत्क्रतुर्भक्तः सन् स्वयमेव स्वात्मानं भक्तिबलेन नयतीति न प्रयोगव्यत्ययोऽपीति । एतेन निबन्धे, सूर्यादिरूपधृग्ब्रह्मेत्यस्य प्रकाशे भक्तिद्वारा ज्ञानाङ्गत्वं यदङ्गोपासनस्योक्तं तत्समर्थितं ज्ञेयम् । उपास्यरूपाणामसत्त्वेन ज्ञानस्य तेष्वब्रह्मज्ञानस्य च यद्दोषत्वमुक्तं तत्र शङ्कते । * ननु ब्रह्मण इत्यादि * । * अतो न ब्रह्मत्वं सर्वेषामुपास्यानामिति * । न्यूनत्वरूपाद् बाधकाद् न ब्रह्मत्वं भूमव्यतिरिक्तानामुपास्यानाम् । तथाच तेषां ब्रह्मत्वस्य बाधितत्वात्तेष्वसत्त्वाऽब्रह्मत्वज्ञानयोर्न दोषत्वमिति पूर्वोक्तः सूत्रार्थोऽसङ्गत इत्यर्थः । समादधते * मैवमित्यादि * तथाच यदेकमव्यक्तमनन्तरूपमिति श्रुत्या ब्रह्मणोऽनन्तरूपत्वान्नामादिषु लीलार्थमिच्छया न्यूनाधिकगुणप्राकट्येन न्यूनाधिकभावेऽपि ब्रह्माभिन्नत्वाद् ब्रह्मणश्चैकत्वात्तै रूपैर्न ब्रह्मणः समाभ्यधिकराहित्यहानिर्यथा विस्फुलिङ्गानां न्यूनाधिकभावेन नाग्नेः, यथा च विस्फुलिङ्गानां तथात्वेऽपि तेषां नाग्नित्वहानिस्तथेति तेषां ब्रह्मत्वाऽनापयात्तेष्वतथात्वज्ञानयोर्दोषत्वमक्षुण्णमिति पूर्वोक्तं सूत्रव्याख्यानं साध्वेवेत्यर्थः ।ननु

रूपाणां नियतफलदातृत्वाद् येन रूपेणाल्पफलदानं तत्राधिकगुणप्राकट्ये प्रयोजनाभावात् तावन्मात्रगुणप्रकटनं येन रूपेण ततोऽधिकफलदानं तत्र ततोऽधिकगुणप्रकटनमिति पूर्वस्मादाधिक्यमुच्यते। एवमेव सर्वत्र । नियतफलदानं तु स्वतन्त्रेच्छत्वाल्लीलारूपमिति नाऽनुपपन्नं किञ्चित् । प्रतिमादिष्वावाहनेन सन्निहिते विभूतिरूपे तद्भावनं पूजामार्गे तु भक्त्या तत्र प्रकटे तथा । गुरौ तु, शाब्दे परे च निष्णातं ब्रह्मणीति विशेषणवत्त्वेन भगवदावेशात् तत्र तद्भावनमिति सर्वमवदातम् । अपिच बादरिजैमिनिमतोक्त्यनन्तरं स्वमतोक्त्या तत्समानविषयत्वमत्रापीत्यवगम्यते । तत्र च कार्यब्रह्मलोकप्राप्तिपरब्रह्मप्राप्तिविषयत्वमुक्तं पूर्वोत्तरपक्षभेदेन। बादरिमते सविशेषस्यैवोपास्यत्वाद्विशेषाणां चाविग्रहत्वादुपासनानां सर्वासां प्रतीकतद्रूपत्वमेव सिद्ध्यति । एवं सत्यऽप्रतीकालम्बनान्नयतीति वदता व्यासेन बादरिमतानुसारिण उपासकस्य

तेषु किमिति ब्रह्मरूपत्वाग्रहः क्रियते । यथा प्रतिमायां शालग्रामे गुरौ च देवबुद्धिमात्रेण पूजया फलसिद्धिः शास्त्रप्रामाण्यात्तथोपास्यरूपेष्विति कुतो नाद्रियत इत्यत आहुः । * प्रतिमादिष्वित्यादि * अत्रादिपदेन सूर्योऽग्निर्ब्राह्मणा गाव इत्याद्युक्तानां पूजापदानां संग्रहः । आवाहनेन सान्निध्यानं च अप्स्वग्नौ हृदये सूर्ये इत्याद्युक्तस्य नित्यसान्निधानस्याऽप्युपलक्षकम् । तथाच प्रतिमादिष्वपि शास्त्रप्रामाण्यात् कथञ्चन तत्तद्रूपसंन्निधानमेव तत्तत्फलदानादिप्रयोजकं, न तु बुद्धिमात्रमतः शास्त्रादेव तथा आग्रह इत्यर्थः । अत्रर्षिद्वयमतोक्त्यनन्तरं स्वमतकथनस्य तात्पर्यं स्फुटीकुर्वन्ति । * अपिचेत्यादि * * प्रतीकतद्रूपत्वमिति * प्रतीकोपासनरूपत्वम् । * एवं सतीत्यादि * ब्रह्मणः प्रतीकालम्बनाप्राप्यत्वे अङ्गरूपालम्बनप्राप्यत्वे च सति । अप्रतीकालम्बननयनकथनं परप्राप्तावेवोपोद्बलकत्वेन सिद्ध्यतीति सैव तथेत्यर्थः ।

न कस्यापि ब्रह्मप्राप्तिरिति ज्ञाप्यते । वस्तुतस्तूपासनायामुपास्य स्वरूपज्ञानस्याप्यङ्गत्वात्तन्मतीयानामुक्तरीत्या तदभावेन निरङ्गत्वादर्चिरादिप्राप्तिरपि न सम्भवति, किं पुनर्ब्रह्मण इति निगूढाशयो व्यासस्य । एवं सति परप्राप्त्यैवोपोद्बलकमुक्तं भवतीति सैव व्यासाभिमतेति सिद्धम् । ये तु प्रतीकेष्वब्रह्मक्रतुत्वं वदन्तः पञ्चाग्निविद्यायास्तथात्वेऽपि वचनबलात्तद्वतो ब्रह्मप्राप्तिरिति वदन्ति । तत्रेदमुच्यते । वचनं तु वस्तुसतः पदार्थस्य बोधकं, न तु

अत्र शाङ्करमतमनुवदन्ति * ये त्वित्यादि * । * तद्वत इति * पञ्चाग्न्युपासकस्य । तद् दूषयन्ति । * तत्रेत्यादि * तस्मिन्मते वक्ष्यमाणं दूषणमुच्यते । विधिभिन्नं वचनं वस्तुसतः पदार्थस्य बोधकम् । यथा ब्रह्मविदाप्नोति परमित्यादिवाक्यम् । न तु कारकम् । यथा ज्योतिष्टोमादिवाक्यम् । अतस्तत्पञ्चाग्निविद्यास्थमातिवाहिकवाक्यं चेत् ब्रह्मप्राप्तिं बाधयति तदैतद्व्यासोक्त्यविरोधाय पञ्चाग्निविद्यायामपि, मूर्द्धैव सुतेजा इत्यादिश्रुतेर्लोकादीनां ब्रह्माङ्गत्वादादित्यादिमतिसूत्रव्याख्यातरीत्याङ्गविद्यात्वेनाप्रतीकत्वमुरीकार्यम् । अन्यथैतां श्रुतिं पश्यन् व्यास एवं न वदेत् । नच बाधकापनोद्यस्य नियमस्योत्सर्गत्वेन तत्क्रतुन्याये तं पक्षमाश्रित्य व्यासेनाप्रतीकालम्बननयनमुक्तमित्यपोद्यपक्षबाधकत्वान्न तद्विरोध इति वाच्यम् । औत्सर्गिकपक्षस्य बाधकापनोद्यत्वात् । प्रकृते च तत्क्रतुवाक्यस्य सामान्यतः क्रतुप्रकारफलप्रकारतौल्यनियमबोधकतया पञ्चाग्निवचनस्यापि ब्रह्माङ्गद्वारा ब्रह्मणो ब्रह्मप्राप्तेश्च बोधकत्वाद् विधिभिन्नवचनान्तरन्यायेन तत्क्रतुविशेषरूपतया ब्राह्मणश्रमणन्यायेनाबाधकत्वात् । नच विधिभिन्नवाक्यस्थले बाध्यबाधकभावानादरणे वाक्ययोर्बाध्यबाधकभावप्रसिद्धिविरोधप्रसङ्ग इति शङ्क्यम् । यत्र वचनस्य बाधकत्वमुच्यते तत्र बाधबोधकत्वमेव, न तु बाधकत्वम् । विधिभिन्नवाक्यस्य कारकत्वाभावात् । नचानिवृत्त्यप्रसङ्गः । बाधबोधादेव तत्सिद्धेः । तस्मात्तन्मते तत्क्रतुश्रुतिबाधकल्पनं, तत्क्रतुपञ्चाग्निवाक्ययोर्बाध्यबाधकभावकल्पनं, व्यासे तच्छ्रुत्यविचारापादनं पुनरौत्स-

कारकमतस्तच्चेद् बोधयति तदाऽप्रतीकालम्बनान्नयतीति व्यासोक्त्यविरोधाय तत्राप्यप्रतीकत्वमूरीकार्यम्। अन्यथा पञ्चाग्निविद्यानिरूपिकां श्रुतिं पश्यन्नेवं स न वदेत्। नचौत्सर्गिकं पक्षमाश्रित्य तथोक्तमिति वाच्यम्। तस्य बाधकापनोद्यत्वाद्वचनस्य चोक्तन्यायेनाबाधकत्वात्। यत्र वचनस्य बाधकत्वमुच्यते तत्र बाधबोधकत्वमेव, न तु तथात्वमित्युपेक्षणायास्ते। ननु मनःप्रभृतीनां शुद्धब्रह्मत्वे मनो ब्रह्मोपास्त इति वदेन्न तु प्रकारवाचीतिशब्दशिरस्कं ब्रह्मपदमत उपासनाप्रकारावच्छेदकत्वमेव ब्रह्मपदस्य, न तु स्वरूपनिरूपकत्वमितिचेद्, हन्तेदं शब्दार्थानवगमविजृम्भितमेव, यतो, मन उपासीतेत्युक्त्वा तदुपासनाफलं यावन्मनोगतं तत्रास्य कामचारो भवतीति वदिष्यँस्तदुपासनाया एतत्फलसाधकत्वे प्रयोजकरूपाकाङ्क्षायामाह, मनो ब्रह्मेति। इतिशब्दोऽत्र हेतुत्ववाची। तथाच यतो मनो ब्रह्माऽतो हेतोस्तदुपासनं तादृक्फलसाधकमित्यर्थः। अत एव, मनो हि ब्रह्म मन उपास्वेति पूर्वमुक्तम्। सर्वत्रैवमेव ज्ञेयम् ॥ १९ ॥

र्गिकपक्षबोधकतया तद्विचारकल्पनमिति चतस्रः कल्पनाः। अस्मन्मते तु तत्क्रतुपञ्चाग्निवाक्ययोः सामान्यविशेषभावेन समानविषयत्वमात्रं कल्पनीयमिति लाघवम्, अतस्तन्मतं गुरुत्वादुपेक्षणीयमित्यर्थः। पञ्चाग्न्यादिविद्यानां ब्रह्मविद्यात्वे शङ्कते। * ननु मन इत्यादि *। तदूषयन्ति। * हन्तेदमित्यादि *। पूर्वमुक्तमिति *। इतिशब्दशिरस्कवाक्यकथनात् पूर्वमुक्तम्। * सर्वत्रेति *। अन्यत्ववाक्यान्तरे प्रकरणान्तरीयवाक्ये च। तथाच तैत्तिरीये, येऽन्नं ब्रह्मोपासते, ये प्राणं ब्रह्मोपासते, आनन्दं ब्रह्मणो विद्वान्, विज्ञानं ब्रह्म चेद्वेदेति वाक्येषु इतिशब्दशिरस्कताया अदर्शनान्मनो ब्रह्मेत्युपासीतेत्यादाविंतिशब्दस्य हेत्वर्थतैव युक्तेत्यर्थः। ननु मनआद्युपासनासु ब्रह्मक्रतुत्वमसङ्गतम्। बृहदारण्यकोपान्तभागे, अन्नं ब्रह्मेत्ये-

विशेषञ्च दर्शयति ॥ १७ ॥

क आहुः । तन्न तथा पूयति वा अन्नम् ऋते प्राणात् प्राणो ब्रह्मेत्येक आहुः । तन्न तथा शुष्यति प्राण ऋतेऽन्नादेते ह वै देवते एकधाभूयं भूत्वा परमतां गच्छत इति तयोर्ब्रह्मत्वनिराकरणात् । पञ्चाग्निविद्यायामपि पुरुषयोषयोर्लौकिकयोरेवाग्नित्वकल्पनात् । एवं छान्दोग्ये मनसोऽप्यन्नमयत्वश्रावणात् तेषु भगवद्विभूतित्वस्य वक्तुमशक्यत्वादितिचेत् । मैवम् । बृहदारण्यकवाक्ये भौतिकयोरेवान्नप्राणयोः पूयीभावशोषणात्मकदोषदर्शनेन ब्रह्मता निराक्रियते, न तु श्रुत्योपास्यत्वेनोक्तयोः । तत्रैतयोर्दोषयोः क्वाप्यसिद्धत्वात् । प्रत्युत तैत्तिरीयके, अद्यतेऽत्ति च भूतानीत्यन्नप्रशंसाश्लोके प्रसिद्धविरुद्धस्यात्तृत्वस्य प्राणश्लोके, तस्मात् सर्वायुषमुच्यत इति सर्वायुष्ट्वस्य, मनःश्लोके, आनन्दं ब्रह्मणो विद्वानिति ब्रह्मानन्दरूपत्वस्य च धर्मस्य श्रावणेन बृहदारण्यकीये. तन्न तथेति वाक्ये तद् अन्नप्राणयोर्ब्रह्मत्वं न तथा, न तदुक्तप्रकारेण, किन्तु श्रुत्युक्तप्रकारेणेत्यर्थस्य लभ्यमानत्वाच्च । एवं पञ्चाग्निविद्यास्थयोर्योषापुरुषयोरपि भगवद्विभूतिरूपयोरेवोपास्यत्वं ज्ञेयम् । सर्वयोनिषु कौन्तेय मूर्त्तयः प्रभवन्ति याः । तासां ब्रह्म महद्योनिरहं वीजप्रदः पितेति'गीतावाक्ये तासां तत्तदनुरूपाणां मूर्त्तानां तत्तत्कारणभावापन्नयोः प्रकृतिपुरुषयोर्मातापितृभावेन कथनात् । देवकृतरेतोऽन्नहोमस्य तत्रैव युक्तत्वाच्च । तदभिध्यानादेव तु तल्लिङ्गात् स इति सूत्रे तथैव सिद्धत्वात् । अन्तर्यामिब्राह्मणे, यः सर्वेषु भूतेषु तिष्ठन्नित्यादिश्रावणाच्चेति । तस्मान्नासङ्गतिलेश इति दिक् । तेन यत्रोपास्यविशेषणतया ब्रह्मपदमुच्यते, यत्र वा ब्रह्मप्राप्तिरूपं फलम्, अन्यद्वा ब्रह्मप्राप्तिरूपं फलम्, अन्यद्वा ब्रह्मत्वगमकं तात्पर्यलिङ्गं लभ्यते तत्र तस्या उपासनायाअप्रतीकत्वमिति वोध्यम् ॥

एवमत्र चतुर्भिरधिकरणैः सप्रकारा गच्छदूब्रह्मविद्व्यवस्थोक्ता । अग्रे तु प्रासङ्गिकमुच्यते । ज्ञानिभक्तयोर्गमने प्रकारविशेषदर्शनेनाकाङ्क्षाविशेषोदयादिति ॥ १६ ॥ ४ ॥

विशेषं च दर्शयति ॥ पूर्वाधिकरणसिद्धमनुवदन्तः प्रस्तुत-

सर्वाण्युपास्यानि रूपाणि ब्रह्मरूपाण्येवेति तदुपासकानां परमाप्तिरेवेति सिद्धम् । तत्रेदं चिन्त्यते । ज्ञानमार्गीयाणां भक्तिमार्गीयाणां चाविशेषणैव परमाप्तिरुत कश्चिद्विशेषोऽस्तीति ? । तत्र उभयोरपि ब्रह्मोपासकत्वेनाविशेषेणैव फलं भवतीति प्राप्ते प्रत्याह । विशेषश्च श्रुतिर्दर्शयति । तैत्तिरीयके पठ्यते । ब्रह्मविदाप्नोति परमिति । गूढाभिसन्धिना सामान्यत एतावदुक्त्वा गूढं तमुद्घाटयन्त्यतिगोप्यत्वमस्मिन्नर्थेऽनुभवैकवेद्यत्वं च ज्ञापयन्त्याह । तदेषाऽभ्युक्ता सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति । तत् पूर्वोक्तं प्रतिपाद्यत्वेनाभिमुखीकृत्यैषर्गुक्ता, तदनुभवकर्तृभिरिति शेषः । ब्रह्मविदक्षरब्रह्मविदाप्नोति सान्निध्यादक्षरमेवाप्नोति । एतावान् अर्थो, यो वेदेत्यन्तयर्चोक्तः । अथ, परमाप्नोतीत्यस्यार्थ उच्यते, निहितमित्यादिना । अत एव मध्ये क्रियापदमुभयसम्ब-

———

मवतारयन्ति । * सर्वाणीत्यादि * । * सर्वाणीति * । मनआदीनि विभूतरूपाणि । * परप्राप्तिरिति *। यया कयाचित्परम्परया परंप्राप्तिः । * तत्रेति * । परप्राप्तौ । पूर्वपक्षार्थस्तु स्फुटः । सिद्धान्तं व्याकर्त्तुं विशेषदर्शिकां श्रुतिमुपन्यस्य व्याकुर्वन्ति । * तैत्तिरीयक इत्यादि * । * सान्निध्यादिति * । वेदनसान्निध्यात् । यद् वेद तदेव प्राप्नोति । वेदनशेषं च, सत्यं ज्ञानमनन्तं ब्रह्मेत्यनेनोक्तम् । यस्तादृशमक्षरं ब्रह्म वेद, सान्निध्यात् तदाप्नोतीत्यर्थः । ननु पूर्वोक्तरीत्याऽर्थोक्तौ परमिति द्वितीयान्तस्य कुत्रान्वय इत्यत आहुः । *अथेत्यादि * । तथाच मध्ये उक्ताया आप्नोतीति क्रियायाः कर्मणाऽप्यन्वयात् तस्याऽप्यर्थ उच्यते । नन्वेवं व्याख्याने किं बीजमत आहुः । * अत एवेत्यादि * । यत आप्नोतीति क्रियापदं मध्ये उक्तमतो देहलीदीपन्यायेन तस्योभयसम्बन्धित्वमेव बीजमित्यर्थः ।

नन्वेवं व्याख्याने आकाङ्क्षाया अपूरणाद् भिन्नवाक्यत्वापत्तेः, आ-

न्धित्वज्ञापकमुक्तम् । तत्प्राप्तिश्च मर्यादापुष्टिभेदेन द्वेधा । तत्रादौ मर्यादायामुच्यते । इहायमाशयो ज्ञेयः । नायमात्मा प्रवचनेनेति श्रुत्या भगवद्वरणातिरिक्तसाधननिरासः क्रियते पुरुषोत्तमप्राप्तौ । एवं सत्यक्षरब्रह्मज्ञानस्य तत्साधनत्वे उच्यमाने तद्विरोधः स्यात् तेनैवमेतदर्थो निरूप्यते । ज्ञानमार्गीयाणामक्षरज्ञानेनाक्षरप्राप्तिस्तेषां तदेकपर्यवसायित्वात्, भक्तानामेव पुरुषोत्तमपर्यवसायित्वात् । तदुक्तं भगवद्गीतासु, एवं सततयुक्ता य इति प्रश्ने, मय्यावेश्य मनो ये मां, ये त्वक्षरमनिर्देश्यम् । श्रीभागवते च, भक्त्याऽहमेकया ग्राह्यः, तस्मान्मद्भक्तियुक्तस्येत्युपक्रम्य, न ज्ञानं न च वैराग्यं

प्नोतीति पदावृत्तेश्चापत्तया क्लिष्टं किमित्याद्रियत इत्यत आहुः । * तत्प्राप्तिरित्यादि * । * आदाविति * । ब्रह्मविदित्यनेन मर्यादामार्गीयस्योपक्रान्तत्वादादौ मर्यादायामङ्गीकृतस्य, यो वेदेत्यनेन ग्रन्थेन व्यवस्थोच्यते । तदेव विवृण्वन्ति । * इहायमाशय इत्यादि * । * इहेति * । अस्मिन् व्याख्यानपक्षे । * नायमात्मेत्यादि * । अत्र प्रवचनपदं वेदे रूढं, तदत्र वाच्यतासम्बन्धेन तदुक्तसाधनान्युपलक्षयति । मेधा धारणावती बुद्धिः, सा च पुरुषनिष्ठस्वाभाविकसाधनानि श्रुतं चागान्तुकानि । एवं भगवद्वरणातिरिक्तसाधननिरासः क्रियत इत्यर्थः । * एवं सतीति * । पुरुषोत्तमप्राप्तेर्वरणैकलभ्यत्वे सति । * उच्यमाने इति * । प्राञ्जलतयोच्यमाने । * तद्विरोधः स्यादिति * । नायमात्मेति श्रुतिविरोधः स्यात् । नन्वस्त्वेवं निरूपणं तथापि पूर्वोक्तदोषाणां तु न परिहार इत्यत आहुः । * ज्ञानेत्यादि * । * तदेकपर्यवसायित्वादिति * । मुण्डके धनुर्गृहित्वेति मन्त्रे, लक्ष्यं तदेवाक्षरं सोम्य विद्धीति श्रावणात् तत्क्रतुन्यायेन तेषां तदेकपर्यवसानात् । तथाच वाक्यभेदपदावृत्तिश्च नात्र दूषणमित्यर्थः । नन्वेवमक्षरप्राप्तावपि अक्षरस्य पुरुषोत्तमप्रत्यासन्नत्वात् तत्प्राप्तिरपि कुतो नाद्रियत इत्यत आहुः । * भक्तानामित्यादि * । ननु भवत्वेवं तथापि कर्त्रपेक्षादोषः कथं परिहार्य इत्य-

प्रायः श्रेयो भवेदित्यादिना । तथाच ब्रह्मविदं वेद भगवान् वृणुते तदा भक्तिरुदेति । तत्प्रचुरभावे सति स्वयं तद्धृदि प्रकटीभविष्णुः स्वस्थानभूतं व्यापिवैकुण्ठं तद्गुहायां हृदयाकाशे प्रकटीकरोति तत् परमव्योमशब्देनोच्यते । अलौकिकप्रयोगेण तस्यालौकिकत्वं ज्ञाप्यते । यथा स्वस्थापितं वस्त्ववश्यं दर्शनयोग्यं भवति तथात्र भगवानपीति ज्ञापनाय निहितमित्युक्तम् । तथाच परमाप्नोतीति पदविवृतिरूपत्वादस्य गुहायां परमे व्योम्नि निहितं यो वेद स, नास्य प्राणा उत्क्रामन्तीहैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येतीति श्रुत्युक्तरीत्या परमाप्नोतीत्यर्थः सम्पद्यते । अथ शुद्धपुष्टिमार्गेऽङ्गीकृतस्य व्यवस्थामाह, सोऽश्नुत इत्यादिना । अत्राऽयमभिसन्धिः । यथा स्वयंप्रकटीभूय लोके लीलां करोति

त आहुः । * तथाचेत्यादि * । तस्येति * । परमव्योमरूपस्याक्षरस्य । * अस्येति * । निहितमित्यादिवाक्यस्य । तथाच यः पूर्वं कर्त्ता उक्तस्तस्यैव वरणेन भक्तिप्राप्तौ भगवद्धामत्वेनाक्षराविर्भावे पुरुषोत्तमप्राप्तिर्भवतीति तेनैव कर्त्राकाङ्क्षापूर्त्तिरिति न कोऽपि दोष इत्यर्थः । तथाचैवं विहितं यो वेद सोऽश्नुते अर्थात्तमेवाश्नुते प्राप्नोति । नन्वेतावता व्याख्येयस्य यजुषो विवरणे सिद्धे सर्वान् कामानिति शेषस्य किं प्रयोजनमित्यत आहुः । * अथेत्यादि * । तथाचाऽस्मिन् पक्षे सोऽश्नुत इति क्रियापदस्य सम्बन्ध इति बोधनाऽर्थमवतारणे सोऽश्नुत इत्यपि संगृहीतम् । तथाचायं शेषः पुष्टिमार्गीयफलबोधनार्थः । तथा सत्येवं श्रुतियोजना । अत्राऽश्नुते इति क्रियापदं संयोगपृथक्त्वेन त्रिधा सम्बध्यते । सत्यं ज्ञानमनन्तं ब्रह्म यो वेद, सोऽश्नुते । साम्निध्यात्तादृशमक्षरं ब्रह्मैव प्राप्नोतीत्यर्थः । यः पुनर्वरणसहकृतो गुहायां परमे व्योमन् निहितं परं ब्रह्म पुरुषोत्तमं वेद सोऽश्नुते अर्थात्तं पुरुषोत्तममेवाऽश्नुते । ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतिबलात् पुरुषोत्तमसायुज्यं प्राप्नोतीत्यर्थः । यः पुनः पूर्व-

तथाऽप्यनुग्रहवशात् स्वान्तःस्थितमपि भक्तं प्रकटीकृत्य तत्स्नेहातिशयेन तद्वशः सन् स्वलीलारसानुभवं कारयतीति स भक्तो ब्रह्मणा परब्रह्मणा पुरुषोत्तमेन सह सर्वान् कामानश्नुत इति । चकारादुक्ता श्रुतिः स्मृतयश्च संगृह्यन्ते । एवं सति ज्ञानमार्गीयाणामक्षरप्राप्तिरेव, भक्तानामेव पुरुषोत्तमप्राप्तिरिति सिद्धम् ॥ १७ ॥

इति श्रीवेदव्यासमतवर्त्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राऽणुभाष्ये चतुर्थाऽध्यायस्य तृतीयः पादः समाप्तः ॥ ४ ॥ ३ ॥

मक्षरब्रह्मवित् ततस्तन्निहितपुरुषोत्तमवित् पुरुषोत्तमे लीनोऽसम्भावितलीलारसानुभवः स चेदतिकृपया शुद्धपुष्टिमार्गे वृतः सन् विपश्चिता ब्रह्मणा पुरुषोत्तमेन सह सर्वान् कामानश्नुते । तथाचात्र ब्रह्मविदस्ततो वरणसहकृतस्य ततो भक्तिसहकृतस्य क्रमिकैव व्यवस्था बोध्यते । सौत्रस्य चकारस्य प्रयोजनमाहुः । * चकारादित्यादि * । अतो ज्ञानभक्तिमार्गीययोरुक्तविशेषस्य श्रुत्यैव दर्शनान्नैका व्यवस्था, किन्तूक्तरीतिकविशेषदर्शनाद् विशेषवत्येव सत्यर्थः सिद्धः ॥ एतेनाऽहंग्रहोपासकानां सायुज्यं, पृथग्ग्रहोपासकानां भक्तानामेव परप्राप्तिस्तत्क्रतुन्यायादिति सिद्धं ज्ञेयम् ॥

अन्ये तु–अप्रतीकालम्बनसूत्रशेषत्वेनेदं सूत्रमङ्गीकुर्वन्ति । अप्रतीकालम्बनसूत्रस्य चैवमर्थमाहुः—

तत्र प्रतीकालम्बनान् वर्जयित्वा ब्रह्मक्रतूनब्रह्मक्रतूंश्च सर्वानन्यान् विकारालम्बनान्नयतीति बादरायण आचार्यो मन्यते । उभयथा अदोषात् । अनियमः सर्वेषामिति तार्तीयीके सूत्रे श्रुतिस्मृतिभ्यां सर्वेषामेव ब्रह्मलोकगत्युपपादनात् । तत्क्रतुश्च । अस्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः । यो हि ब्रह्मक्रतुः स ब्राह्मैश्वर्यमासीदेदितीष्यते तं यथायथोपासते तदेव भवतीति श्रुतेः पञ्चाग्निविद्यायां ब्रह्मप्राप्तिश्रावणं त्वाहत्यवादत्वाद् उत्सर्गबाधकम् । अतस्तदभावे औत्सर्गिकेन तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिर्नेतरेषामिति शाङ्करमतं

तदसङ्गतमिति प्रागेवोक्तम्॥ भास्कराचार्यास्तु, मनआद्युपासनानां प्रतीकत्वमेवाङ्गीकृत्य तदालम्बनव्यतिरिक्तान् कार्यब्रह्मणो हिरण्यगर्भस्योपासकान् परब्रह्मोपासकांश्च नयति। तत्र हेतुः। उभयथा दोषात् तत्रापि हेतुः। तत्क्रतुश्चेति। तथाचैकत्वभावनया आत्मक्रतुः परमात्मानं प्रति। द्वैतक्रतुश्च कार्यं ब्रह्मेति। नच द्वैतोपासकानां कथं कार्यब्रह्मप्राप्तिरिति शङ्क्यम्। पञ्चाग्निविद्यायां, शुद्धः पूतः पुण्यलोको भवतीति श्रुतेः। नच, परं जैमिनिरिति सूत्रे परब्रह्मण एव ब्रह्मपदार्थत्वेन निश्चितत्वाद् द्वैतोपासनायां तदनङ्गीकारे पूर्वापरविरोध इति शङ्क्यम्। क्रममुक्तिसद्योमुक्तिभेदेन मुक्तेर्द्वैविध्याद् द्वैतोपासकानां हिरण्यगर्भप्राप्त्यनन्तरं बहुकालेनोदये परप्राप्तिः, साक्षाद्ब्रह्मोपासकानां तु शीघ्रं तत्प्राप्तिरित्यविरोधादित्याहुः। अत्र मनआद्युपासनानां प्रतीकत्वमनुपादेयम्॥

रामानुजाचार्यास्तु—इतः पूर्वसूत्रे, अश्व इव रोमाणि विधूय पापं चन्द्र इव राहुमुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामीति श्रुत्या सम्भाव्यब्रह्मलोकस्य अकृतत्वश्रावणात् सर्वबन्धविनिर्मोकस्य च साक्षाच्छ्रावणात् परब्रह्मलोकस्य नित्यत्वमङ्गीकृत्याऽस्मिन् सूत्रे उभयथा चेति पाठमङ्गीकृत्य मनआद्युपासनानां पूर्ववदेव प्रतीकत्वं चाङ्गीकृत्य, अप्रतीकालम्बननयनप्रतिज्ञायां हेतुमुभयथादोषमेवं व्याकुर्वते। कार्यब्रह्मोपासकनयनमात्रनियमे, अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्येत्यादिकाः श्रुतयः कुप्येयुः। परब्रह्मोपासकनयनमात्रनियमे च पञ्चाग्निविदो नयनश्रुतिः कुप्येदित्युभयस्मिन् पक्षे दोषः स्यात्। तस्मादुभयविधान्नयतीति। तत्क्रतुश्चेति भागस्य च, तत्क्रतुस्तथोपासीनस्तथैव प्राप्नोतीत्यर्थं इत्याहुः। तेन तन्मतेऽपि मनआद्युपासनानां प्रतीकत्वमात्रमेवानुपादेयम्॥

तन्मतचौरस्तु तद्वदेव सूत्रं व्याख्याय, विष्णुद्वेषाद्, ऋतं सत्यं परं ब्रह्मेति महानारायणोपनिषन्मन्त्रं, परात् परतरो ब्रह्मा तत्परात् परतरो हरिः। तत्परात् परतरो हीश इति शिवसङ्कल्पसूक्तमन्त्रं, नारायणं परं ब्रह्मेति च महोपनिषन्मन्त्रं, विश्वाधिको रुद्र इति श्वेताश्वतरमन्त्रञ्चोपन्यस्य, त्रिलोचननीलकण्ठादिविशिष्टमुमया शबलितमेव परमेश्वररूपमुवाद। तदसङ्गतम्। महानारायणोपनिषदि अ-

णोरणीयानित्यनुवाके महिमानमीशमित्युक्त्या ईशस्य परमेश्वरविभूतित्वेनैव सिद्धत्वात् । ऋतं सत्यमिति मन्त्रस्य नारायणानुवाकोक्तोपासनप्रकारबोधनाय रासलीलास्थभगवत्स्वरूपनिरूपकत्वेन नारायणपरं ब्रह्मेति मन्त्रस्य च प्रथमान्तनारायणपदप्रायपाठसंदृष्टत्वेन, परात्परतर इति मन्त्रस्य च सूक्तारम्भे, येनेदं भूतं भुवनं भविष्यत्परिगृहीतेन सर्वं, येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्त्विति मनसस्तथात्वं प्रक्रम्य पठिततया तन्माहात्म्यबोधकत्वेन मनसश्चानन्दवल्ल्यां ब्रह्मानन्दात्मकत्वेन सिद्धतया तत्र शिवमाहात्म्यबोधकताया अशक्यवचनत्वेन, विश्वाधिक इति श्वेताश्वतरतृतीयाध्यायमन्त्रस्य च केवलब्रह्मस्वरूपमुपक्रम्य पठितत्वेन त्रिलोचनादिवैशिष्ट्यस्यानुक्तत्वेन तदभिमतरूपाबोधकत्वेन तदुक्तानां सर्वेषामेव मन्त्राणां तदुक्तार्थानुपष्टम्भकत्वात् । इदं यथा तथा प्रहस्तेऽस्माभिर्निपुणतरमुपपादितमिति नात्र प्रपञ्च्यते ॥

माध्वास्तु—प्रतीके देह उद्दिष्टो येषां तत्रैव दर्शनम् । न तु व्याप्ततया क्वापि प्रतीकालम्बनास्तु ते । अप्रतीका देवतास्तु ऋषीणां शतमेव च । राज्ञां च शतमुद्दिष्टं गन्धर्वादिशतं तथा । एतेऽधिकारिणो व्याप्तिदर्शनेऽन्ये न तु क्वचित् । अयोग्यदर्शने यत्नाङ्कुशः पूर्वस्य चापि तु । अप्रतीकाश्रया ये हि ते यान्ति परमेव तु । स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद् ब्रह्मसलोकताम् । ब्रह्मणा सह सम्प्राप्ते संहारे परमं पदमिति गारुडवाक्यान्युपन्यस्य काँश्चित् कार्ये काँश्चित् परं नयति । उभयपक्षोक्तदोषात् । परप्राप्तिपक्षे गत्यनुपपत्त्यादिदोषस्योक्तत्वात् । कार्यप्राप्तिपक्षे च ब्रह्मशब्दाऽमुख्यत्वादिदोषाणामुक्तत्वादित्येवमाहुः । तत्र गत्यनुपपत्त्यादिदोषाणामदृष्टादिना भाष्ये एव परिहृतत्वादुदासीना वयम् ।

विशेषदर्शनसूत्रे च, यावन्नाम्नो गतं तत्रास्य कामचारो भवतीत्यादिश्रुतिर्नामादिप्राणपर्यन्तेषु प्रतीकोपासनेषु फलविशेषं च दर्शयतीति प्रतीकालम्बनान् वर्जयित्वा नयतीति सिद्धमिति शङ्करभास्कररामानुजाचार्या आहुः । तत्तु मनोनामाद्युपासनानां प्रतीकतानिराकरणेन फलविशेषभवनस्य च भगवदिच्छया भगवद्विभूतित्वात् साधनेनैव निरस्तम् । यत्तु शैवो, विष्णुलोकापेक्षया शिवलोके विशेषं दर्शयतीत्याह । तदपि प्रहस्ते निपुणतया दूषितमिति ततोऽवधेयम् ।

माध्वास्तु—अन्तःप्रकाशाः बहिःप्रकाशाः सर्वप्रकाशाः देवा धा सर्वप्रकाशा ऋषयोऽन्तःप्रकाशाः मानुषा एव बहिःप्रकाशा इति काश्चिच्चतुर्वेदशिखाश्रुतिर्विशेषं दर्शयतीत्याहुः । तत्रापि श्रुतेरप्रसिद्धत्वादुदासीना वयम् ॥ १७ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य
श्रीपीताम्बरात्मजस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे
चतुर्थाध्यायस्य तृतीयः पादः ॥ ४ ॥ ३ ॥

अथ चतुर्थाध्यायस्य चतुर्थः पादः ।

सम्पद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

ब्रह्मविदाप्नोति परमित्युपक्रम्य सोऽश्नुते सर्वान् कमान् सह ब्रह्मणा विपश्चितेति तैत्तिरीयके पठ्यते । तत्रेदं सन्दिह्यते—किमन्तःस्थित एवाश्नुते, उत पुनर्ज्जन्म प्राप्येति । तत्राऽन्त्यस्त्वनुपपन्नः । न स पुनरावर्त्तते । तेषामिह न पुनरावृत्तिरस्तीत्यादिश्रुतिविरोधात् कर्माभावच्चेति प्राप्ते प्रतिवदति । सम्पद्य ब्रह्म सम्पद्यापि स्थितस्य जीवस्य प्रभोरत्यनुग्रहवशात् स्वरूपात्मकभजनानन्ददि-

---

सम्पद्याविर्भावः स्वेन शब्दात् ॥ द्वितीये पादे सद्योमुक्तिक्रममुक्त्योः प्रकारो दर्शितस्तदनु तृतीये क्रममुक्तौ प्राप्यस्वरूपं प्राप्तिप्रकारं च दर्शयित्वा समाप्तौ ज्ञानमार्गीययोः सद्योमुक्तावप्यक्षरप्राप्तिपुरुषोत्तमप्राप्तिरूपः फले विशेषोऽस्तीति दर्शितम् । इदानीं तत्पुरुषोत्तमप्राप्तिरूपं फलं कथमनुभवतीत्यतस्तत्प्रकारः, कीदृशं च पुरुषोत्तमस्य स्वरूपमित्यतस्तत्प्रकारश्चेत्येतदस्मिन् पादे विचार्यत इत्याशयेन सूत्रमुपन्यस्य विचारमारभन्ते । * ब्रह्मविदित्यादि * । * तत्रेदं सन्दिह्यत इति * । यद्यन्तःस्थितोऽश्नुते तदा स इति भोगस्वातन्त्र्यबोधकप्रथमाविभक्त्यनुपपत्तिः । ब्रह्मणि लये भेदाऽभावात् । यदि बहिर्भूत्वा तदा आवृत्त्यापत्त्या परप्राप्तेर्मुक्तित्वभङ्ग इत्युभयथाऽपि दोषादश्नुत इति विवरणं सन्दिह्यत इत्यर्थः ।

पूर्वपक्षमाहुः । * तत्रेत्यादि * । तथाच ब्रह्मलोकसम्पत्तौ यत्र पुनरावृत्त्यभावस्तत्र साक्षाद्ब्रह्मप्राप्तानां कुतस्तत्सम्भावनेत्यपुनरावृत्तिश्रुतिविरोधापेक्षया विभक्त्यर्थमात्रबाधस्य स्वल्पदोषत्वादन्तरित्येव युक्तमिति प्राप्ते तथेत्यर्थः । सिद्धान्तं व्याकुर्वन्ति । * संपद्येत्यादि * । * ब्रह्म सम्पद्येति * द्वितीयपादोक्तरीत्या वागादीनां

त्सायां तत्कृत आविर्भावो भवत्येव। भगवदधीनत्वज्ञापनायास्य तत्र कर्तृत्वं नोक्तम् । ननूक्तं न स पुनरावर्त्तत इत्यादिश्रुतिविरोधः कर्माभावश्च बाधक इत्यत आह । स्वेनेति । स्वशब्दोऽत्र भगवद्वाची । तथाच भगवत्स्वरूपबलेनैवाविर्भाव इत्यर्थः । एवं सत्युक्तश्रुतिर्मर्यादामार्गविषयिणीति न विरोध इति भावः । तेषामिह प्रपञ्चे न पुनरावृत्तिरस्तीति हि श्रुतिराह । लीलायाः प्रपञ्चातीतत्वात् तत्राविर्भावस्य निषेधाविषयत्वादपि न विरोधः । अत्र प्रमाणाकाङ्क्षायामाह । शब्दादिति । सोऽश्नुते सर्वान् कामान्

प्राणानां ब्रह्मणि लयोत्तरं, ब्रह्म वेद ब्रह्मैव भवति, ब्रह्मैव सन् ब्रह्माऽप्येतीति श्रुत्या ब्रह्मणा सहैकीभावं प्राप्य । * आविर्भाव इति * । स्वस्य ब्रह्माभिन्नतयाऽनुभवविषयत्वयोग्यता । * अस्य तत्र कर्त्तृत्वं नोक्तमिति * । जीवस्याविर्भावकर्त्तृत्वं नोक्तम् । स्वेनेति पदमवतार्य व्याकुर्वन्ति * नन्वित्यादि * । भगवत्स्वरूपबलेनैवाविर्भाव इति * । छान्दोग्ये भूमविद्यायां तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण इत्याद्युपक्रम्य, आत्मत आविर्भावतिरोभावावात्मतोऽन्नमित्यादिश्रावणात्तस्य ब्रह्मसम्पन्नस्यापि ब्रह्मस्वरूपबलेनैवाविर्भावः । एवं हेत्वन्तरकथनेन कर्माभावात्मकमाविर्भावबाधकं परिहृतम् । एतेनैवापुनरावृत्तिश्रुतिविरोधोऽपि परिहृत इत्याहुः । * एवं सतीत्यादि * । न विरोध इति * । विषयभेदान्न विरोधः । ननु तर्हि पुष्टिमार्गस्य मर्यादामार्गापेक्षया जघन्यत्वापत्तिरित्यत आहुः । * तेषामिहेत्यादि * । यद्यपि न स पुनरावर्त्तत इति श्रुताविह नेति विशेषो न श्रूयते तथापि पञ्चाग्निविद्यायामक्षिपुरुषविद्यायां च तेषामिह न पुनरावृत्तिरस्तीति, इमं मानवमावर्त्तं नावर्त्तन्त इति च यथायथं श्रावणादस्मिन् लौकिके प्रपञ्चे पुनरावृत्त्यभावमाह, न तु नित्यायां भगवल्लीलायामपीति श्रुतिविरोधाऽभावाच्च पुष्टिमार्गे कथमनावृत्तिसिद्धिरित्यतो हेतुं वदतीत्याशयेन अवतारयन्ति । * अत्रेत्यादि * । व्याकुर्वन्ति । * सोऽश्नुत इत्या-

सह ब्रह्मणा विपश्चितेति श्रुतिः पुरुषोत्तमेन सह सर्वकामभोगं वदति । स च न विग्रहं विना सम्भवतीति श्रुतिबलादेव तथा मन्तव्यमित्यर्थः ॥ १ ॥

हेत्वन्तरमाह ।

मुक्तः प्रतिज्ञानात् ॥ २ ॥

अत्रोपक्रमे, ब्रह्मविदाप्नोति परमिति वाक्येन परप्राप्तिलक्षणां मुक्तिं प्रतिज्ञाय हि तद्विवृतिरेव सोऽश्नुत इत्यादिना क्रियते । तेन पुष्टिमार्गीयमुक्तिरूपत्वमेव तस्याशनस्य सिद्ध्यत्यतोऽपि हेतोस्तदाविर्भावस्य न लौकिकत्वं, न चावृत्तिरूपत्वमित्यर्थः ॥२॥

दि * । तथाच पुरुषोत्तमे अक्षरापेक्षया परत्वस्य मुण्डके श्रावितत्वादक्षरे भगवद्धामत्वस्यापि तत्र श्रावणात् तैत्तिरीये प्रजारूपत्वस्याऽपि श्रावणात्तस्य लीलास्थानतायामत्रोक्तौ भोगोऽक्षरे सिद्ध्यति । भोगश्च विग्रहमन्तरेणानुपपद्यमानो विग्रहमाक्षिपतीति भोगबोधकवाक्यरूपः शब्द एवात्र तदाविर्भावे प्रमाणमित्यर्थः ॥ १ ॥

मुक्तः प्रतिज्ञानात् ॥ सूत्रमवतारयन्ति । * हेत्वन्तरमाहेति * । ननु ब्रह्मसम्पत्तिरेव मुक्तिरिति सम्पन्नो मुक्त, आविर्भावस्तु विभागे सति व्युच्चारणाद् भवति । तथा सति सृष्ट्यादाविव बन्ध एव सम्भावित इति कथमाविर्भावस्य मुक्तिकोटौ प्रवेश इत्याकाङ्क्षायाम् अत्र भगवतः सकाशाद्विभज्य यो जीवस्याविर्भावस्तस्याऽलौकिकत्वेऽनावृत्तिरूपत्वे चैतत्प्रकरणोक्तं हेत्वन्तरमाहेत्यर्थः । व्याकुर्वन्ति । * अत्रेत्यादि * । * परप्राप्तिलक्षणामिति * । ब्रह्मविदः परप्राप्तिलक्षणाम् । तथाच प्रतिज्ञानाद् उक्तवाक्ये मुक्तेः प्रतिज्ञानाद् यस्याविर्भावः प्रतिपिपादयिषितः स मुक्त इति सूत्रयोजना । तथा सति तस्याऽऽविर्भावस्य न लौकिकत्वं, नचाऽऽवृत्तिरूपत्वमित्यर्थः ॥ २ ॥

आत्मा प्रकरणात्॥ ३ ॥

ननु परस्य ब्रह्मणो निर्गुणत्वात् कामभोगस्य गुणसाध्यत्वात्सह ब्रह्मणेत्यत्र ब्रह्मपदं सगुणतत्परमतो न तस्य मुक्तिरूपत्वमित्यत आह। अत्र ब्रह्मपदेनात्मा व्यापको मायातद्गुणसम्बन्धरहितो यः स एवोच्यते। कुतः? प्रकरणात्। ब्रह्मविदाप्नोति परमित्युपक्रम्य तत्पाठाद् गुणातीतस्यैवैतत्प्रकरणमिति तदेवात्र ब्रह्मशब्देनोच्यत इत्यर्थः॥ ३॥

अविभागेन दृष्टत्वात्॥ ४ ॥

ननु ब्रह्मविदाप्नोति परमिति भिन्नं वाक्यम्, ऋग्भिन्नाऽतो नैकं प्रकरणमिति सगुणमेव तत्र ब्रह्मपदेनोच्यत इत्याशङ्क्य प्रतिवदति। पूर्ववाक्येन समविभागेनैवेयम् ऋक् पठिता, न तु विभागेन। कुतः। दृष्टत्वात्। ब्रह्मविदिति वाक्यानन्तरं तत्पूर्वोक्तमर्थं प्रतिपाद्यत्वेनाऽभिमुखीकृत्यैषर्गुक्तेति श्रुतिर्दृश्यते। तदेषाभ्युक्तेति। तेन पूर्ववाक्योक्तार्थमधिकृत्यैवर्गुच्यत इति गुणातीतमेव तदत्र वाच्यमित्यर्थः॥ ४॥

आत्मा प्रकरणात्॥ सूत्रमवतारयन्ति। * नन्वित्यादि *। * तस्येति *। ब्रह्मणा सह भोगस्य व्याकुर्वन्ति। * अत्र ब्रह्मेत्यादि *। * तदेवेति *। परपदेनोक्तं गुणातीतमेव। तथाच कार्यकथने जगत्कारणत्वेन स एव परिचाययितव्य इति व्यापकत्वेऽपि विरुद्धधर्माश्रयत्वाद्यथा सृष्ट्यादिकं स करोति, तथा तं भजनाऽऽनन्ददानायाविर्भाव्य भोगमपि कारयतीति न तेन कार्येण तस्याविर्भावस्य मुक्तिकोटिगत्वभङ्ग इत्यर्थः॥ ३॥

अविभागेन दृष्टत्वात्॥ अवतारयन्ति। * नन्वित्यादि *। * अत इति *। वाक्यर्चोः परस्परापेक्षाबोधकपदाभावात्। व्याकुर्वन्ति * पूर्ववाक्येनेत्यादि * अर्थस्तु स्पष्टः। तथाच वाक्यर्चो-

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

पूर्वेण मुक्तो जीवो भगवदनुग्रहातिशयेच्छातो बहिराविर्भूतो गुणातीतेन पुरुषोत्तमेनैव सह सर्वान् कामानश्नुत इति सिद्धम् । अथ तत्रैवेदं विचार्यते । आविर्भूतो जीवः प्राकृतेन शरीरेण भुङ्क्ते, उताप्राकृतेनेति । तत्र भोगस्य लौकिकत्वे तदायतनस्यापि तादृशेनैव भवितव्यमिति मन्वानं प्रत्याह । ब्राह्मेण ब्रह्मसम्बन्धिना ब्रह्मणा भगवतैव स्वभोगानुरूपतया सम्पादितेन सत्यज्ञानानन्दात्मकेन शरीरेण पूर्वोक्तानश्नुत इति जैमिनिराचार्यो मनुते । तत्र हेतुरुपन्यासादिभ्य इति । ब्रह्मविदाप्नोति परमिति ब्रह्मविदः परप्राप्तिं प्रतिज्ञाय तदर्थस्यैवोपन्यासोऽग्रिमयर्चा क्रियते, सोऽश्नुत इत्यादिना । तथाच परप्राप्तेर्मुक्तिरूपत्वात् पुष्टिमार्गीयायास्तस्या एवंरूपत्वादक्षरब्रह्मणः पुरुषोत्तमायतनरूपत्वात्तदात्मकमेव शरीरं

मध्ये तादृक्पदाऽभावेऽपि ऋक्प्रयोजनबोधके मध्यमवाक्येऽपेक्षाबाधकपदसत्त्वात्तथेत्यर्थः ॥ ४ ॥ १ ॥

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ अत्र पूर्वसूत्रद्वये भगवद्दत्तेन विग्रहेण जीवस्य परप्राप्तिरूपो भोगः सिद्धः । अग्रिमसूत्रद्वये भगवतश्च परमपुरुषत्वं सिद्धम् ।

तत्र पूर्वसूत्रद्वये यो विग्रहः सिद्धस्तं पूर्वं विचारयतीत्याशयेन पूर्वसूत्रद्वयसिद्धमनुवदन्तः सूत्रमवतारयन्ति । * पूर्वेणेत्यादि * । पूर्वेणेति * आद्यसूत्रद्वयेन । अथ तत्सिद्ध्युत्तरं तस्मिन्नेव वाक्यार्थे वक्ष्यमाणविचार आरभ्यते इत्यर्थः । पूर्वपक्षार्थः स्फुटः । सिद्धान्तं व्याकुर्वन्ति । * ब्राह्मेणेत्यादि * । ब्रह्मसम्बन्धिनेत्यस्य विवरणं * ब्राह्मणेत्यादि * शरीरेणेत्यन्तम् * । * उपन्यासादिभ्य इति * । उपसमीपे न्यासः कथनं विवरणमिति यावत् । स आदिर्येषाम् । तद्गुणसंविज्ञानः । ते उपन्यासादयस्तेभ्यः । तदेतद्विवृण्वन्ति । * ब्रह्मविदित्यादि * । * एवं रूपत्वादिति * । सर्वकामाशनरूप-

तस्य वक्तुमुचितं, न तु प्राकृतम्। एतद्बोधनायैवाग्रेऽन्नमयादीनि विभूतिरूपाण्युक्तानि। भक्तशरीरे प्रतीयमानानामर्थानां विभूतिरूपत्वेन ब्रह्मात्मकत्वं तेन साधितं भवति। इदमेवादिपदेन बहुवचनेन च ज्ञाप्यते। एतदानन्दमयाधिकरणे प्रपञ्चितमतो नाऽत्र

त्वात्। ननु ब्रह्मभावं विना मुक्त्यभावाज्जाते च तस्मिन् व्यापकत्वादिवदानन्दाविर्भाववच्च पूर्वसिद्धाकारस्याप्याविर्भाव उपन्यासश्रुतेरप्युपपत्तौ भोगार्थं ब्राह्मशरीरस्याङ्गीकारो न प्रामाणिक इत्यत आहुः * एतदित्यादि *। शरीरस्याक्षरात्मकत्वबाधनायैव ऋगुक्त्योपन्यासानन्तरम् अन्नमयादीनि विभूतिरूपाणि पुरुषविधत्वेन ब्रह्मत्वेन, ब्रह्मत्वेनोपास्यत्वेन चोक्तानि। तस्य फलं भक्तशरीरे प्रतीयमानानामर्थानां पृथिव्यादीनां गन्धादीनां च विभूतिरूपत्वेन ब्रह्मात्मकत्वं तेन कथनेन साधितं भवति। इदं श्रौतमुपादानमेव आदिपदबहुवचनाभ्यां ज्ञाप्यत इत्यर्थः। * प्रपञ्चितमिति *। तन्निरूपकस्यापि तत्तुल्यफलत्वमित्यनेन वर्णकान्तरेण च प्रपञ्चितम्। तथाचाग्रेऽन्नमयादिनिरूपणबलादेवमुच्यतेऽतः सृष्ट्यादौ यो भगवदाकारस्तिरोहितस्तस्यैवैवमाविर्भावेऽपि दित्सितफलानुभवयोग्यरूपेणाविर्भावादुक्तप्रकारकस्थूलरूपस्यैवाविर्भावान्नाप्रामाणिक इति भावः। इदमेव, स्वरूपेणावतारेणेति सार्द्धेन पुष्टिप्रवाहमर्यादाग्रन्थे उक्तम्। एवञ्च जीवस्य व्यापत्वादिषु भगवद्धर्मेष्वानन्दे चाविर्भूते सच्चिदानन्दात्मके देहेऽक्षरात्मके सम्पन्ने यो लीलारसानुभवः स निरुपम इति, स एव सेवाफले, महान् भोगः प्रथमे विशते सदेत्यनेनोक्त इति ज्ञेयम्। ननु मान्त्रवर्णिकसूत्रेऽन्नमयप्राणमययोर्बाह्याभ्यन्तरलौकिकव्यवहारकारणत्वेन लोकत्वं मनोमयस्य च वेदत्वं तद्भाष्ये प्रत्यपादीति विभूतित्वादिकथनं तद्विरुद्धमितिचेन्न। श्रुतौ परस्मादानन्दरूपात् सृष्टिः प्रक्रान्तेति सा सृष्टिरतिरोहितानन्दा भवति। कारणस्य समन्वयात्। कार्यत्वाच्चोपत्तिरोभावेऽपि। अन्यथा व्यवहारभङ्गेन लीलाया असिद्धेः। एवं सति तादृश्यां सृष्टौ तत्तद्व्यवहारकारणीभूतस्य विभूतिरूपस्यैवौचित्येन तल्लौकिकवैदिकव्यवहारे कारणपदेन तस्यैव सूचनाविरोधात्। मतकथनप्र-

पुनरुच्यते । यत्र कर्मवादी जैमिनिरेवं मनुते तत्रान्येषामेवमङ्गीकारे किमाश्चर्यमिति ज्ञापनाय तन्मतोपन्यासः कृतः ॥ ५ ॥

चितितन्मात्रेण तदात्मत्वादित्यौडुलोमिः ॥ ६ ॥

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन इति श्रुतौ घनपदेन ज्ञानात्मकविग्रहात्मत्वं ब्रह्मणो बोध्यते । अन्यथा न वदेत् । प्रयोजनाभावात् । तथाच तादृशेन सह भोगकर्त्रा तादृशेनैव भाव्यमिति, चिति चिद्रूपे ब्रह्मणि, तन्मात्रेण चिन्मात्रेण रूपेण कामान् भुङ्क्ते, न तु विग्रहेण । श्रुतौ जीवस्य तथात्वस्याऽनुक्तेः । पूर्णानन्दत्वाद्भगवतस्तत्सम्बन्धेन तदानन्दमनुभवतीत्यर्थः सम्पद्यते। चिदात्मत्वं जीवस्य यतो नैसर्गिकमित्यौडुलोमिराचार्यो मनुते अशरीरं वा वेतिश्रुतिरेतादृशाऽन्यविषयिणीतिज्ञेयम् ।

योजनमाहुः । * यत्रेत्यादि * ॥ ५ ॥

चिति तन्मात्रेण तदात्मत्वादित्यौडुलोमिः ॥ व्याकुर्वन्ति । * स इत्यादि * । * न वदेदिति * । घनपदं न वदेत् । * तथात्वस्येति * । विग्रहवत्त्वस्य ।

अन्ये तु चितितन्मात्रेणेत्येकं पदमङ्गीकुर्वन्तश्चिन्मात्रेणाविर्भवतीत्यर्थमाहुः । तन्मते इक्प्रत्ययान्तस्य चितिपदस्य धातौ शक्तेस्तदर्थे लाक्षणिकत्वं तत्पदव्यर्थता च ।

भास्कराचार्यास्तु—चैतन्यसन्मात्रेणेत्यर्थमाहुः । तन्मते तत्पदवैयर्थ्यं न भवतीति पूर्वापेक्षया तत्सम्यगिति बोध्यम् । नन्वशरीरस्य प्रियाप्रियभोगः श्रुत्या निषिध्यते, न तु सशरीरस्य, न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुतेस्तस्य का गतिरित्यत आहुः । * अशरीरमित्यादि * अशरीरं वा व सन्तं प्रियाप्रिये न स्पृशत इति श्रुतिस्तु प्रियपदस्याप्रियपदसमभिव्याहारादेतादृशान्यविषयणी * एतादृशाद् भगवदानन्दादन्यो यो दुःखसम्भिन्न आनन्दस्त-

मुक्तिदशायां तदनुभवस्य भगवदिच्छाविषयत्वाभावान्न तथा । तथाचैतदेतज्जातीयकानन्दानुभवोऽस्य भवत्विति भगवदिच्छैव श्रुतौ कामशब्देनोच्यते ॥ ६ ॥

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥७॥

परमाचार्यो बादरायणस्तु नैवं मनुते। ब्रह्मविदाप्नोति परमित्यस्योपन्यास एवमपि विग्रहवत्त्वेनापि कृतो यतः। तथाहि। यो वेद निहितं गुहायामित्यत्र गुहाया उक्तत्वात्तस्या विग्रह एव सम्भ-

---

द्विषयिणीति न तद्विरोध इत्यर्थः । * मुक्तीत्यादि * । * तदनुभवस्येति * दुःखसम्भिन्नसुखानुभवस्य । तर्हि सुखे वैजात्याभावात् कामानिति बहुवचनस्य का गतिरित्यत आहुः । * तथाचेत्यादि * । तथाच तादृगिच्छानुभवे तदिच्छाविषयस्यानन्दस्याऽप्यनुभवश्चिन्मात्रेणैव रूपेण, न तु तत्र विग्रहस्याप्यपेक्षेति औडुलोमिमतमित्यर्थः । एतेन, चैत्यस्य तत्त्वममलं मणिमस्य कण्ठ इत्यादि स्मारितं ज्ञेयम्॥६॥

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ सिद्धान्तं व्याकुर्वन्ति । * परमित्यादि * । * एवमिति * । औडुलोम्युक्तरीत्या, उपन्यासादिति हेतुं व्याकुर्वन्ति * । ब्रह्मेत्यादि * । तथाच यदि तन्मात्रेणोपभोगः श्रुत्याभिप्रेतः स्यात्तदा विग्रहवत्त्वेनोपन्यासो न क्रियेत । यत एवमतो न चिन्मात्रमतं साधीय इत्यर्थः । नन्वत्र विग्रहाश्रवणात्कथं तथोपन्यासोऽङ्गीक्रियत इत्यतस्तदुपपादयन्ति । * तथाहीत्यादि * । * तस्या इति * । गुहायाः । तथाचात्र ब्रह्मवित्पदेनापरोक्षब्रह्मज्ञानवानुच्यते । तस्याशरीरत्वे तद्व्याख्यानभूतर्क्पूर्वार्द्धे गुहापदं न वदेत् । नच तत्र साधनदशापन्नस्यैव विग्रह उच्यत इति वाच्यम् । यथा क्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्यैव भवतीतिवदवस्थाभेदगमकपदाद्यभावात् । वेदेत्यश्नुत इति च समानकालबोधकपदविरोधापातात् कामभोगस्य विग्रहतन्त्रत्वात्तदभावे, सोऽश्नुत इत्यादिनोक्तस्य फलस्य विरोधापत्तेश्च । अतो गुहापदव्याकोपात्तदुक्तौ भक्तविग्रहाभावपक्षोऽसङ्गत इत्यर्थः ।

त्वात् । किञ्च । प्रथमान्तोपस्थितत्वेन प्राप्नोतीत्युक्त्वा च ब्रह्मविदः परमाप्तौ स्वातन्त्र्यं ज्ञाप्यते । तदेव ब्रह्मणा सहेति पदेनोपन्यस्तम् । तेन ब्रह्मणोऽपि तत्समानक्रियावत्त्वं ज्ञाप्यते । परं त्वप्राधान्येन । तथाच भक्तस्यैव कामा वक्तुमुचितास्ते च न विग्रहं विना सम्भवन्ति । किञ्च । विपश्चितेति विशेषणेन विविधं पश्यच्चिद्रूपत्वमुच्यते । कामभोगोक्तिप्रस्तात्र एतदुक्त्वा तदुपयोग्येव सर्वं वाच्यम् । एवं सति भक्तविविधभावान् पश्यति स्वयं भोगचतुरश्चेत्युक्तं भवति । एतेनापि भक्तविग्रहः सिद्ध्यति । ननु विग्रहस्यागन्तुकत्वेन लौकिकत्वादलौकिकेन ब्रह्मणा भोगो विरुद्ध इत्यत आह । पूर्वभावादिति । भक्तप्राप्तेः पूर्वमेव भगवदिप्सितभोगानुरूपविग्रहाणां सत्त्वान्न विरोधः । किञ्च । उक्तश्रुतिसूत्रैः पुरुषोत्तमेन सह भक्तस्य कामभोगो निरूपितः । स यावतार्थेन विना नोपपद्यते तावान् स श्रुत्यभिमत इति मन्तव्यम् । तथाच ब्रह्मसम्बन्धयोग्यानि शरीराणि नित्यानि सन्त्येव । यथाऽनुग्रहो यस्मिञ्जीवे स तादृशं तदाविश्य भगवदानन्दमश्नुत इति सर्वमवदातम् ॥ ७ ॥

उत्तरार्द्धमादाय युक्त्यन्तरमाहुः * किञ्च प्रथमेत्यादि * तथाचौडुलोमिमतं कामपदव्याकोपाऽनिवृत्तेस्तदयुक्तमित्यर्थः । विपश्चित्पदेनापि तत् साधयन्ति * किञ्चेत्यादि * । * एतेनेति * भक्तविग्रहाभावेऽनुपपद्यमानेन भोगचातुर्यबोधकविपश्चित्पदेन । हेत्वन्तरमवतारयन्ति । * नन्वित्यादि * । व्याकुर्वन्ति । * भक्तेत्यादि * । * भक्तप्राप्तेरिति * । भक्तस्य भगवत्प्राप्तेः । * न विरोध इति * । आगन्तुकत्वलौकिकत्वाभ्यां कृतोऽपि चिन्मात्रत्वब्राह्मशरीरवत्त्वयोर्विरोधो न । तथाचैतैर्हेतुभिर्विग्रहवत्त्वस्याविरोधं मन्यत इत्यर्थः । सिद्धमाहुः । * किञ्चेत्यादि * । * सन्त्येवेति * । पुत्तलिकावद्भगवन्मन्दिरे भगवद्धर्मात्मकानि सन्त्येव । * आविश्येति * । अयं मम

देह इत्यभिमानं कृत्वा । तथाच श्रुतार्थापत्तिसिद्धत्वान्न सन्देह इत्यर्थः । ननु सूत्र एतद्बोधकपदाभावादेतस्यैतद्विषयवाक्यत्वं कथमवगन्तुं शक्यत इति चेत् । अर्थबलादिति वदामः । तथाहि । अस्मिन् चरणे मुक्तस्य फलानुभवप्रकार उच्यते । मुक्तिस्तु न यावद्दुःखात्यन्ताभावमात्ररूपाऽपि तु निरवधिसुखात्मकब्रह्मप्राप्तिरूपा, तल्लोकादिप्राप्तिरूपा च । तैत्तिरीयोपनिषदि ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोतीति श्रुतौ द्वयोः श्रावणात् । पुराणेऽपि सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युतेति प्रकारभेदकथनाच्च । सा च यथाधिकारं सद्यः, क्रमेण वा भवति । तत्र सद्योमुक्तावात्मकाम एवाधिकारी । अथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवति न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः । तादृशस्य ब्रह्मानुभवप्रकारश्चाग्रे । यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति श्लोक उक्तः । स्वप्रतिज्ञानुरोधाद्याज्ञवल्केन सम्यङ् न विवृतः । सोऽत्र ब्रह्मविदाप्नोतीत्यस्य विवरणार्चि व्यक्तीक्रियते । अशनप्रकारस्य विवरणात् । अतः स चेदत्र न विचार्येत तदा शास्त्रे न्यूनतैवापद्येत । विचारिते च तस्मिन् मुक्तौ निःसम्बोधताया निवृत्तः सर्वास्वपि तादृशत्वमर्थादेव सेत्स्यतीति बुद्ध्यस्व । नच निःसम्बोधा मुक्तिरिति युक्तम् । ब्रह्मैव सन् ब्रह्माप्येतीत्यत्र ब्रह्मभावोत्तरमेव मुक्तेः श्रावणात् । ब्रह्मणश्च विरुद्धधर्माश्रयताया उभयलिङ्गाद्यधिकरणेष्वेव निर्णयेन निर्विशेषवादस्य प्रागेव निरस्तत्वात् । ये पुनः प्रजापतिवाक्यस्थामेष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रुतिं विषयवाक्यत्वेन आद्रियन्ते तेषामपि तस्यास्तथात्वं सन्दिग्धमेव । सूत्र उपसम्पत्तिपदाभावात् केवलस्य सम्पद्येति पदस्य सता सोम्य तदा सम्पन्नो भवति सति सम्पद्य न विदुः सति सम्पद्यामह इति सुषुप्तिविषये श्रावणात् । अत उपसम्पत्तिवाक्यस्य विषयत्वेनादरणमर्थबलादेवेति वक्तव्यम् । तथा सति तौल्यान्न पर्यनुयोगावकाशः । किञ्च । स्वेनेति पदस्यापि ब्रह्मवाचकत्वमेव मुख्यम् । स्वमपीतो भवतीत्यादौ तथा सिद्धत्वात् । अतस्तत्रापि तथा । किञ्च नायं नियमो यद्विषयवाक्यं सौत्रपदानुरूपमेव ग्राह्यमिति । अत्ता चराचरग्रहणादित्यादौ तथा

दर्शनाभावात् । अतोऽर्थमादाय विषयवाक्यग्रहणं नानुचितमिति दिक् ॥ ७ ॥

यत्तु शङ्कराचार्याः, सम्पद्याविर्भावाधिकरणं त्रिसूत्रमङ्गीकृत्य प्रथमसूत्रे, एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति छान्दोग्ये इन्द्रप्रजापतिसंवादस्थां श्रुतिं विषयवाक्यत्वेनोपन्यस्य किं देवलोकाद्युपभोगस्थानेष्विवागन्तुकेन केनचिद्विशेषेण अभिनिष्पद्यते, उतात्ममात्रेणेति संशये मोक्षफलत्वस्याप्रसिद्धेः । अभिनिष्पद्यत इत्युत्पत्तिपर्यायभूतशब्दप्रयोगादात्मनश्च सर्वदाविद्यमानत्वेनाभिनिष्पत्तेर्वक्तुमशक्यत्वाच्चागन्तुकेनेति पूर्वपक्षमुक्त्वा केवलेनैवात्मना आविर्भवति, न धर्मान्तरेण । कुतः । स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दात् । अन्यथा स्वेनेति विशेषणस्य वैयर्थ्यप्रसङ्गात् । नचात्मीयवाची स्वशब्द इति युक्तम् । तस्य रूपान्तरेऽपि तुल्यत्वेनात्र विशेषतस्तत्कथनस्य वैयर्थ्यानपायात् । अतः स्वेनेतिविशेषणसार्थक्यार्थं केवलेनावतिष्ठत इति सिद्धान्तं व्याख्याय, पूर्वावस्थास्विह च स्वरूपानपायसाम्ये सत्यत्र को विशेष इति शङ्कायां द्वितीये सूत्रे सम्बन्धविनिर्मुक्तत्वरूपो विशेषः । पूर्वं जाग्रदाद्यवस्थासु, अन्धो भवतीति, रोदितीवेति, विनाशमेवापीतो भवतीत्यवस्थात्रयकालुष्यकथनेन बन्धाविमोकबोधनात् । तस्य मुक्तत्वं च, एतं त्वेव ते भूयोऽनुव्याख्यास्यामीत्यवस्थात्रयविहीनस्यात्मनो व्याख्येयत्वेन प्रतिज्ञातस्याशरीरत्वाद्युपन्यासपूर्वकं, स्वेन रूपेणाभिनिष्पद्यत इत्युपसंहारात् । आख्यायिकोपक्रमे चापहतपाप्मेत्यादिमुक्तात्मविषयप्रतिज्ञानादिति व्याख्याय तृतीयसूत्रे, परं ज्योतिरुपसम्पद्येत्यनेन ज्योतिःसम्पत्तेरुक्तत्वाज्ज्योतिषश्च प्राकृतत्वात् सम्पत्तौ कथमस्य मुक्तत्वमिति शङ्कायां परं ज्योतिरिति पदाभ्यां, तद्देवा ज्योतिषां ज्योतिरिति श्रुत्यन्तराज्ज्योतिःशब्देन परं ब्रह्मैवोच्यते, न तु प्राकृतमतस्तत्सम्पत्तौ न मुक्तत्वभङ्गः । आत्मन एव प्रकरणदर्शनादित्याहुः । ततोऽविभागेन दृष्टत्वादित्येकसूत्रमधिकरणान्तरमङ्गीकृत्य किं मुक्तः परमेश्वराद्भेदेनावतिष्ठत उताभेदेनेति शङ्कायामविभक्त एवावतिष्ठत इति सिद्धान्तयन्ति ।

ततो ब्राह्मेणेत्यादित्रिसूत्रमधिकरणमङ्गीकृत्य पूर्वाधिकरणे यदात्म-

रूपेण स्वेनाऽनागन्तुकेनाऽवतिष्ठत इत्युक्तं, तत् कीदृशमिति चिन्तायां जैमिनिस्तावद् यद् ब्राह्मं रूपम्, अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इत्यनेन प्रागुक्तं तथा सर्वेश्वरत्वं सर्वज्ञत्वं च तेन रूपेणाभिनिष्पद्यत इति मन्यते। तत्र हेतुरपहतपाप्मेत्यादिनोक्त उपन्यास आदिपदसंगृहीतं, स तत्र पर्येतीत्यादिनोक्तं च । औडुलोमिस्तु यद्यप्यपहतपाप्मत्वाद्योऽभेदेनैव धर्मा निर्दिश्यन्ते तथापि शब्दविकल्पजा एवैते इति पाप्मादिनिवृत्तिमात्रं तत्र गम्यते। चैतन्यमेव तस्यात्मनः स्वरूपमिति तन्मात्रेणैव रूपेणाभिनिष्पत्तिर्युक्ता । एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिश्रुत्यनुग्रहात् । सत्यकामत्वादयस्तु यद्यपि वस्तुरूपेणैव धर्मा उच्यन्ते, सत्याः कामा अस्येति। तथाप्युपाधिसम्बन्धाधीनत्वात्तेषां न चैतन्यवत् स्वरूपत्वसम्भवः । अनेकाकारत्वप्रतिषेधात् । प्रतिषिद्धं हि ब्रह्मणोऽनेकाकारत्वं, न स्थानतोऽपि परस्योभयलिङ्गमित्यत्र। अत एव जक्षणादिसङ्कीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थम् । आत्मरतिरित्यादिवत् । न हि मुख्यान्येव रतिक्रीडामिथुनान्यात्मनि नित्यानि शक्यन्ते वर्णयितुम् । द्वितीयविषयत्वात्तेषाम् । तस्मान्निरस्ताशेषप्रपञ्चेन प्रसन्नेनाव्यपदेश्येन बोधात्मनाऽभिनिष्पद्यत इति बादरायणस्त्वाचार्य एवमपि पारमार्थिके चैतन्यमात्रस्वरूपाभ्युपगमे व्यवहारापेक्षया पूर्वस्य पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्यानादविरोधं मन्यते इत्येवं व्याचख्युः । तत्रेदमवधेयम् । छान्दोग्य इन्द्रप्रजापतिसंवादे, य आत्मा वेद्यत्वेन प्रकृतः स दहरविद्योपास्य एव देवासुरैरनुबुध्यमाने प्रजापतिवाक्ये तस्यैवापहतपाप्मत्वादिगुणकस्य प्रत्यभिज्ञानात् । इन्द्रविरोचनाभ्यामपि तस्यैव विवित्सया तथानुवादात्। अतः प्रजापतिरपि तमेव सर्वेषु पर्यायेषु बोधयति। य एषोऽक्षिणि पुरुषो दृश्यत इत्यादिना । परं त्विन्द्रविरोचनौ परप्राप्तिं पुरुषार्थत्वेनावगत्य तदर्थं न प्रष्टुं प्रवृत्तौ, किन्त्वपहतपाप्मादिगुणकात्मज्ञानेन सर्वकामप्राप्त्याद्यर्थमतस्तदधिकारं हीनमवगत्य चित्तशुद्ध्यर्थं तप उपदिदेश श्लिष्टप्रयोगेण चोक्तवान्। तत्र प्रथमे पर्याये दृश्यत इत्यनेनार्षमेव दर्शनमभिप्रेतम् । तदेवोपपादितम्, अन्तर उपपत्तेरित्यत्र। परमिन्द्रेण न बुद्धम् इति देहमात्मानं बुद्ध्वा

भयं ददर्शाऽस्मिन्नन्धेऽन्धो भवतीत्यादि । एवं दृश्यस्याज्ञाने पुनस्त-प उपदिश्य द्वितीयेऽपि पर्याये, स्वप्नसृष्टिकर्त्तारमुपदिदेश, य एष स्वप्ने महीयमानश्चरतीति। अत्रापि, एतं त्वेवं भूयोऽनुव्याख्यास्यामीत्ये-तच्छब्देन स्वबुद्धिस्थस्यैव परामर्षात् । न त्विन्द्रबुद्धिस्थस्य । इन्द्रेण देहस्यैव पूर्वे बुद्धत्वादिति । परं त्विन्द्रेण द्वितीयेऽपि पर्याये स न बुद्धः, किन्तु देहाद्भिन्नो जीव एव स्वप्नद्रष्टोपदिश्यत इति बुद्धम् । स यद्यपि बाह्योपाधिदोषान्न दुष्यति तथाऽप्यान्तरदोषाद् दुष्यतीति पुनस्तृतीये पर्याये समागत्य उभयमुक्तवान् । तदा सुषुप्त्यधिकर-णभूतं तमेव यत्रैतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानाती-त्येवमुपदिदेश । तत्रापि सुषुप्त्यधिकरणभूतं परमात्मानं न ज्ञातवान् किन्तु सुषुप्त्यवस्थाकं शारीरमेव ज्ञात्वा तत्राप्यज्ञानरूपं भयं विना-शमेवापीतो भवतीत्यन्तेन प्रदर्श्येन्द्रः पुनरुपससाद । तदा प्रजाप-तिस्तमेव स्वबुद्धिस्थमुपदेष्टव्यत्वेनोपक्षिप्य इन्द्रेणावगतस्य जीवस्य सर्वकामभोगयोग्यं स्वरूपं तत्सम्पत्त्या भवतीति वक्तुं, मघवन् मर्त्यं वा इदं शरीरमित्यादिना शरीरस्य दुःखदत्वम् । अशरीराणां वा-य्वादीनां परं ज्योतिरुपसम्पन्नानां स्वरूपप्राप्तिदृष्टान्तेनास्यापि स्व-व्याख्यातं परं ज्योतिरुपसम्पन्नस्य स्वरूपाभिनिष्पत्तिम् । एवमेवैष सम्प्रसाद इत्यादिनोक्त्वा परस्य ज्योतिषः स्वरूपमाह । स उत्तमः पुरुष इति । योऽयं गीतायाम्, उत्तमः पुरुषस्त्वन्यः परमा-त्मेत्युदाहृत इत्यादिश्लोकद्वयेन कृतनिर्वचनः । अतः परमुपसम्पन्नस्य तल्लोके भोगं वक्तुं तत्र परमात्मनो भोगमाह । स तत्र पर्येतीत्यादि-ना । तथाच देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनामिति सप्तमस्क-न्धात्तादृशानां सालोक्यादिचतुष्टयं प्राप्तानां भगवत्प्रसादरूपस्तद्-क्तो भोगो निराबाधः । अत्र विद्योपक्रमे तेषां तदर्थमेवोपासनाप्रवृत्ते-रुक्तत्वात् । नन्वेवं स्वरूपं प्राप्तस्य तत्र भोगोऽपि मनसस्तु पूर्वस्यैव तत्र सत्त्वात्तेन प्राक्तनदेहस्मरणे तदीयदुःखस्यापि स्मरणात् सुख-भोगोऽपि दुःखसम्भिन्न एव स्यादित्यतस्तदभावायाह । नोपजनꣳ स्मरन्निदꣳ शरीरमिति । उप आत्मसमीपे अविद्याकामकर्मभिर्जायते कर्मभिर्जायत इत्युपजनम् इदं प्राक्तनं शरीरं न स्मरत्यतस्तदस्मर-णान्न दुःखसम्भेद इत्यर्थः । नन्वस्मरणं शरीरस्य कुतः । स्वरूप आ-कारसद्भावेऽपि भोगसाधनभूतानामिन्द्रियाणामभावाद्भोगेऽपि कथ-

मित्याशङ्काद्वयनिवृत्त्यर्थमाह । स यथा प्रयोग्य इत्यादि । अथ यत्रै-तदाकाशमित्यादि च । यथा प्रकर्षेण योग्योऽश्वादिराचरणे आस-मन्ताच्चरणसाधने रथादौ तस्य गमनादिसाधनाय युक्त एवमयं पञ्च-वृत्तिर्मुख्यः प्राणोऽस्मिन् शरीरे तद्यात्रासाधनाय युक्तः । तथाच मुक्तौ तस्य लये तद्वियुक्तस्य शरीरस्याप्रयोजकत्वादस्मरणमित्यर्थः । इन्द्रियाभावेऽपि भोगमुपपादयति । अथ यत्रेत्यादि । यत्र शरीरदेशे एतदाकाशमनुविषण्णं नेत्रकनीनिकोपलक्षितमाकाशमनुगतं चक्षुः-शब्दवाच्यम् । तत्र स चाक्षुषश्चक्षुषि विद्यमान आत्मा दर्शनाय रूपग्रहणार्थं चक्षुश्चक्षुरिन्द्रियरूपम्, एवं, यो जिघ्राणीति गन्धग्रहणाय स घ्राणम्, एवं व्याहरणाय वाक्, श्रवणाय श्रोत्रं, मननाय मन इति एतेषु अस्य जीवात्मनो दैवं चक्षुर्मनः सर्वकार्यप्रयोजकम् । तथाच मुक्तस्य देहेन्द्रियाद्यभावेऽपि मनसः सत्त्वात् तस्य दैवत्वेनापूर्वत्वा-त्तेन दैवेन चक्षुषा मनोरूपेण ब्रह्मलोकस्थान् कामान् पश्यन् रमत इति सुखेन भोगसम्पत्तिरित्यर्थः । एवं सर्वमुपपाद्यैतदुपासनाफलं निगमयन्नुपसंहरति । तं वा एतं देवा आत्मानमुपासत इत्यारभ्य प्रजापतिरुवाचेत्यन्तेन । तथाचात्र परमात्मन एव प्रकृतत्वादेवं त्वेव ते भूयोऽनुव्याख्यास्यामीति प्रतिज्ञाया अपि परमात्मपरतया तद्विरु-द्धमिन्द्रज्ञानमनुसृत्य जीवपरमात्मनोर्भेदाभावेन व्याख्यानमनुचित-म् । जीवात्मनः परमात्माभेदस्य तादात्म्यरूपत्वेनैव पूर्वं सिद्धतया-ऽभ्युपगमैकशरणत्वाच्च । तेनाख्यायिकोपक्रमेऽप्यपहतपाप्मत्वादि-रूपेण परस्यैव प्रतिज्ञानं, जीवस्तु मुक्तौ प्राप्तस्वरूपस्तथा भवतीति ब्राह्मलौकिककामभोगयोग्यत्वात्तथोच्यते । एवं सत्यविभागेन दृष्ट-त्वादिति सूत्रेऽविभागः सोऽप्यविभक्तः, भ्रातृणामिव भोगमात्रसा-म्यादेव, न त्वभेदात् । अत एव काठके यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमेति मुक्तस्वरू-पनिरूपणपरे वाक्ये तादृगिति पदेन साम्यमेवोक्तं, न त्वभेदस्तथा सति तदेवेति ब्रूयात्।एवं नदीसमुद्रनिदर्शनेऽपि भेदस्यान्याश्रयत्वा-य नदीनां नामरूपत्यागकथनं द्रष्टव्यम् । एवं, तत्त्वमस्यहं ब्रह्मा-स्मीत्यादावपि ब्रह्मणः सर्वरूपत्वादंशांशिभावेनैव तादात्म्यमभिप्रेत्य जीवस्यापि ब्रह्माभेद उच्यते, न त्वभेद इत्यभिप्रायेणेत्यवगन्तव्यम् । एवं, यत्र नान्यत् पश्यतीत्यनेनोक्तो भूमान्यदर्शनाभावोऽप्यंशांशि-

भावावगमादेवोपपन्नतरः । न तु द्वितीयमस्ति ततोऽन्यद्विभक्तमित्यत्रापि विभागाभावादेव द्वितीयदर्शनाभावो द्रष्टव्यः । इदं च तत्र तत्र बहुधोपपादितमिति नात्राधिकमुच्यते । अतो यदुक्तं भेदनिर्देशस्त्वभेदेऽप्युपचर्यते, स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नीति । आत्मरतिरात्मक्रीड इत्यादिदर्शनादित्युक्तं, तदप्यप्रयोजकम् । भेदविरुद्धसम्पदस्तादात्म्यरूपस्याभेदस्याङ्गीकारेणैव दोषनिवृत्तौ उपचारेण तत्र व्याख्यानस्यानुचितत्वात् । नचांशांशिभावेन नानात्वापत्त्या, नेह नानास्तीति विरोधः शङ्क्यः । ऐच्छिकनानात्वस्य स्वरूपैक्याद्यऽबाधकत्वादितिप्रागेवोक्तत्वादिति । एवमौडुलोमिसूत्रव्याख्यानेऽप्यसङ्गतत्वं द्रष्टव्यम् । औडुलोमिना अपहतपाप्मत्वादीनां धर्माणां शब्दविकल्पजत्वस्य कुत्राप्यनुक्तत्वेन तथापादयितुमयुक्तत्वात् । नच चैतन्यमात्रत्वकथनादेव धर्मनिवृत्तिरिति वाच्यम् । स्वरूपमात्रकथनेऽपि धर्मानिवृत्तेर्मध्यन्दिने नभोमण्डले सूर्य एवास्तीत्यादिलौकिकवाक्येऽपि प्रभा-करादिमत एव प्रतिपादनेनादर्शनात् । श्रुतावप्येवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्यत्रापि अकृत्स्नत्वबुद्ध्युत्पादकधर्माकारसत्तामात्रस्यैव तेषां धर्म्यनतिरिक्तत्वबोधनाय तस्य प्रज्ञानघनत्वकृत्स्नत्वयोर्बोधनात् । अन्यथा तयोः पदयोः सैन्धवदृष्टान्तस्य च वैयर्थ्यापत्तेर्दुर्वारत्वात् । अत एव सत्यकामादयोऽपि वास्तवा एव, नौपाधिकाः । नचानेकाकारत्वसम्भवो दोषः । न स्थानतोऽपीत्यधिकरणे ब्रह्मणो विरुद्धधर्माधारत्वस्यैव प्रतिपादनात् । अतो न स्वकृततद्व्याख्यानुसरणेनौडुलोमिसूत्रव्याख्यानं युक्तम् । तस्य व्यासमतत्वाच्चेति । एवं बादरायणसूत्रेऽपि व्यवहारापेक्षया पूर्वस्य पूर्वस्याऽभ्युपगमादिभ्योऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्यानादविरोधं मन्यते बादरायण इति व्याख्यातम् । तत्रापि व्यवहारापेक्षयेति यदुक्तं तदभ्युपगमैकशरणमेव । सूत्रे पूर्वभावपदेन प्राक्कालिकसत्तामात्रस्यैव बोधनेन व्यवहारापेक्षाया अनुपलम्भादिति । एवं सति यदौडुलोमिमतमनुसृत्य मुक्तस्य मनसा सर्वान् ब्राह्मलौकिकान् कामान् पश्यतोऽपि विभागेनादर्शनात् सुषुप्ताविवापश्यत्त्वं सर्वैकत्वाद् द्वितीयाभावेन व्याख्यातं छान्दोग्यभाष्ये, तदपि प्रकृतविरुद्धम् । रमत इति रमणस्याग्रे कथनात् । नच तत्र रमत इत्य-

स्य मुख्यार्थो नाभिप्रेत इति वाच्यम्। मानाभावात्। उपक्रमे इन्द्रादेः सर्वलोकसर्वकामप्राप्त्योरेवाभिसंहितत्वकथनेन तद्विरोधाच्च। अतोऽविभागेन दर्शनं शारीरब्राह्मणोक्तायाः सुषुप्तिश्रुतेरेवार्थो, न तु क्रममुक्तिमार्गप्राप्तब्रह्मलोकसुखप्राप्तिबोधिकाया एतच्छ्रुतेरित्यवधेयम्। नच द्वितीये मैत्रेयीब्राह्मणेऽपि, न हि द्रष्टुर्दृष्टेरित्याद्यविभक्तदर्शनश्रुतेर्विद्यमानत्वात्तस्याश्च मुक्तविषयत्वादत्र तथाङ्गीकारे को दोष इति वाच्यम्। विषयभेदात्। तत्र हि, प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति ब्रह्मणि जीवस्य लयनिरूपणेन तथा निश्चयात्। अत एव शारीरब्राह्मणे, अथाऽकामयमान इत्युपक्रम्य, अत्र ब्रह्म समश्नुत इत्यन्तेनाकामयमानस्यात्मनो ब्रह्मणि लय उक्त इति सायुज्यविषयं मैत्रेयीब्राह्मणवाक्यम्। अतस्तदादायात्र कामवत्प्रकरणे तथापादनं प्रकृतविरुद्धमेवेति दिक्॥

भास्कराचार्यास्तु—सम्पद्याविर्भावसूत्रे इन्द्रप्रजापतिसंवादस्थामेव श्रुतिं विषयत्वेनोपन्यस्य पूर्वाणि सूत्राणि पूर्ववदेव व्याख्याय जीवब्रह्मणोरौपाधिकभेदः, पारमार्थिकं त्वैक्यमिति स्वीयं सिद्धान्तं चोक्त्वा जीवस्य ब्रह्माऽविभागेन स्थितिं चाङ्गीकृत्य जैमिनीयमतं च पूर्ववदेव व्याख्याय औडुलोमिसूत्रे एवमाहुः। तथाहि। चैतन्यसन्मात्रेणाभिनिष्पद्यत इत्यौडुलोमिर्मन्यते स्म। कुतः। तदात्मकत्वात्। चैतन्यात्मकं सत्तात्मकं च ब्रह्म। तथाच श्रुतिः, एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति। तथा, सत्यं ज्ञानमनन्तं ब्रह्मेति सत्यकामादीनां तु विकल्पमात्रत्वादतत्स्वरूपतेति मन्यते। सुषुप्तवन्निःसम्बोधो मोक्ष इत्यौडुलोमेरभिप्रायः सांख्यवैशेषिकादीनामिव। इदानीन्तना अपि केचिदेतदेवं दर्शनं प्रतिपन्ना इति। बादरायणसूत्रं त्वेवं व्याकुर्वन्ति। तथाहि। एवमपि चैतन्यमात्रत्वेऽपि पूर्वस्याप्यैश्वर्यरूपस्य भावात्। कथम् उपन्यासात् पूर्वोक्तेन जैमिनीयेन हेतुना उभयेषां वेदवाक्यानां प्रामाण्याविशेषात्। असाधारणत्वाच्चापहतपाप्मादिगुणानां व्यतिरिक्ताव्यतिरिक्तस्वभावत्वादविरोधं भगवान् बादरायणः परिनिश्चिकाय। नच गुणगुणिनोरेकत्वानेकत्वविरोधः। यथाऽग्निरेकः सप्तजिह्वः प्रकाशवानूर्ध्वज्वलन उष्ण इति न नानात्वं, यथा च उद्यद्दिनकर एकं किरणजालम् अवनिमण्डले प्रथयन्ननेको भवतीति।

अत्र वैशेषिकाः प्राहुः—ससम्बोधो मोक्षो नोपपद्यते सर्वज्ञत्वादिगुणयुक्तः । दुःखनिवृत्तिमात्रं मोक्षः । आनन्दादिशब्दाश्च दुःखनिवृत्तिमात्रावलम्बनाः । यदि च सुखे रागेण प्रवर्त्तेत ततो बन्ध एव स्यात् । गुणस्य बन्धहेतुत्वात् । शरीरेन्द्रियमनसां निवृत्तौ विज्ञानोत्पत्तिहेत्वभावात् । मुक्तो निःसंज्ञः पाषाणकल्पोऽवतिष्ठते ।

सांख्याः पुनश्चैतन्यस्वभाव आत्मा, तस्य द्रष्टुः स्वरूपे चैतन्यमात्रेऽवस्थानमसम्प्रज्ञातयोगनिष्पत्तौ मोक्ष इति मन्यन्ते । तत्राऽभिधीयते । यत्तावदुक्तं रागो बन्धहेतुरिति । तदयुक्तम् । शास्त्रादयं विभागो गम्यते । यथा स्वदारगमन नाऽधर्माय, तथा विषयविषयो रागो बन्धहेतुः, निरतिशयानन्दब्रह्मविषयो मुक्तये । नचानन्दशब्दो दुःखाभाववचनः । शतगुणोत्तरोत्तरक्रमेण उत्कर्षापकर्षौ प्रतिपाद्य निरतिशयस्य ब्रह्मानन्दस्योपदेशात् । नचाऽभावस्य निरुपाख्यस्योत्कर्षापकर्षौ । लोकेऽपि दुःखतारतम्यं सुखतारतम्यं च परस्परविलक्षणं प्रत्यक्षेणानुभूयते । तस्मान्मुक्तः कारणात्मानमाप्तस्तद्वदेव सर्वज्ञः सर्वशक्तिः सर्वात्मापि भवतीति जैमिनिबादरायणयोरभिप्रायः । ततो ये वेदबाह्या वैशेषिकाः सांख्यास्तत्पक्षाऽवलम्बिनश्च ते सर्वेऽपसिद्धान्तिनस्तर्कमात्रशरणत्वादिति । यदि च विज्ञानमात्रं ब्रह्म तदाऽऽनन्दपदमनर्थकम । न हि चैतन्यमात्रमानन्दः । दुःखावस्थायामपि चैतन्यानुवृत्तिदर्शनात् । नच दुःखनिवृत्तिमात्रमानन्दशब्दार्थ इति युक्तम । तस्मात् स्वयं संविदितमेव सुखं सर्वदा मुक्तस्याऽभ्युपेयमिति ॥

अत्र पूर्वेषां सूत्राणां शङ्कराचार्यवदेतैर्योऽर्थ उक्तः स तु तदुत्तरेणैव दत्तोत्तरः । शेषं त्वविरुद्धत्वादनुमन्यामहे ।

रामानुजाचार्यास्तु—परं ब्रह्मोपासीनानामात्मानं च प्रकृतिवियुक्तब्रह्मात्मकमुपासीनानामर्चिरादिमार्गेणापुनरावृत्तिलक्षणा गतिरुक्ता । इदानीं मुक्तानामैश्वर्यप्रकारं चिन्तयितुमारभत इति पादद्वयार्थमुक्त्वा, सम्पद्याविर्भावसूत्रे छान्दोग्यस्थप्रजापतिवाक्यगां तामेव श्रुतिं विषयत्वेनोपन्यस्य पूर्वोक्तवदेव पूर्वं सिद्धान्तपर्यन्तमुक्त्वा, अविभागेन दृष्टत्वादिति द्वितीयेऽधिकरणे, किमयं प्रत्यगात्मा स्वात्मानं परमात्मनः पृथग्भूतमनुभवत्युत तत्प्रकारतया तदविभक्तमिति संशये, सोऽश्नुते सर्वान् कामान् सह

ब्रह्मणा विपश्चिता, यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिं, तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति, इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता इत्यादिश्रुतिस्मृतिभ्यां मुक्तस्य परेण साहित्यसाम्यसाधर्म्यप्रतिपादनात् पृथग्भूतमेवानुभवतीति प्राप्तेऽनेन सूत्रेण परस्माद् ब्रह्मणोऽविभागेन स्वात्मानं मुक्तोऽनुभवतीति प्रतिपाद्यते ।

तत्र हेतुर्दृष्टत्वादिति । परं ज्योतिरुपसम्पद्य निवृत्ताविद्यातिरोधानस्य याथातथ्येन स्वात्मनो दृष्टत्वात् । स्वात्मनः स्वरूपं हि, तत्त्वमसि, अयमात्मा ब्रह्म, ऐतदात्म्यमिदं सर्वं, सर्वं खल्विदं ब्रह्मेत्यादिसामानाधिकरण्यनिर्देशैर्य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरम्, अन्तः प्रविष्टः शास्ता जनानामित्यादिश्रुतिभिः परमात्मात्मकं तच्छरीरतया तत्प्रकारभूतमिति काशकृत्स्नसूत्रे सिद्धम् । अतोऽविभागेनाऽहं ब्रह्माऽस्मीत्येवानुभवास्तैर्वाक्यैः साम्यसाधर्म्यव्यपदेशो ब्रह्मप्रकारभूतस्यैव प्रत्यगात्मनः स्वरूपं तत्सममिति श्रुतिः प्रतिपादयति । सहश्रुतिस्त्वेवं भूतस्य प्रत्यगात्मनः प्रकारिणा ब्रह्मणा सह तद्गुणानुभवं प्रतिपादयतीति न कश्चिद्विरोधः । सङ्कल्पादेव तच्छ्रुतेः, अधिकं तु भेदनिर्देशादित्यादेश्च न विरोध इति ब्राह्मद्वेहेन जीवस्य तत्र भोगं परमात्मसङ्कल्पात् कर्मानधीनत्वभगवत्सृष्टपदार्थैरेव तद्भोगं स्वसृष्टपदार्थैश्च लीलारसभोगादिकमङ्गीकुर्वन्ति । तत् सिद्धान्तादविरुद्धमित्युपादेयम् ॥

शैवस्तु तन्मतस्यैव चौरः शैवीः श्रुतिस्मृतीरुपन्यस्य स्वं मतं ततो भिनत्ति । तत्र शिवपदस्य नारायणादिपदवत् परब्रह्मवाचकताया वाराहपुराणे उक्तत्वात् स्वरूपभेदकत्वाभावे कोऽपि न विरोधः । रूपभेदकत्वे तु नृसिंहपूर्वतापनीयोक्तादिरीत्या तत्रोत्कर्षविश्रान्त्यभावस्य प्रहस्ताख्ये वादे निपुणतरमुपपादितत्वान्न तस्मिन् परत्वमिति न तदर्थमधिकं किञ्चिदुच्यते ॥

माध्वास्तु—कर्मनाशाख्यं फलं प्रथमपादे देवानां मोक्ष उत्क्रान्तिश्च द्वितीयपादे फलम् । मार्गो गम्यं च तृतीये पादे फलम् । एवं त्रयं पूर्वमुक्त्वा चतुर्मुखेन सह परं ब्रह्म प्राप्तानां यस्तत्र भोगः क्रमप्राप्तस्तमत्र पादे वदतीति पादार्थमुक्त्वा, सम्पद्याविर्भाव इत्यत्र

सङ्कल्पादेव च तच्छ्रुतेः ॥ ८ ॥

एवं परमाप्तिः केषाञ्चिदेव भवति । तत्र हेत्वपेक्षायामाह । भजनानन्दं दातुं यमेव सङ्कल्पविषयं करोति स एवैवं प्राप्नोतीति भगवत्सङ्कल्प एव तत्र हेतुः । तत्र प्रमाणमाह । तच्छ्रुतेः। नायमात्मेत्युक्तस्य, यमेवैष वृणुते तेन लभ्य इति श्रुतिः श्रूयतेऽतः स एवात्र हेतुः । श्रुतौ प्रवचनादिनिषेधः कृत इत्यत्राप्येवकार उक्तः । चकारात्तज्जनितैवैतदनुरूपा परमार्त्तिः संगृह्यते ॥ ८ ॥

अत एव चानन्याधिपतिः ॥ ९ ॥

यतो हेतोः साधनं फलं चोक्तरीत्या स्वयमेव, नान्योऽतो हेतोस्तेषां हृदि साधनत्वेन फलत्वेन प्रभुरेव स्फुरति, नान्यस्तेनानन्यास्ते । तेषामेवाधिपतिः पुरुषोत्तमः । अन्यत्राधिपत्यं विभूतिरूपैः

सम्पद्याविहायेति पाठमङ्गीकुर्वन्तोऽविभागसूत्रपर्यन्तं प्रतिसूत्रमधिकरणभेदमङ्गीकुर्वन्तः प्रथमे मुक्तस्य ब्रह्मानतिक्रमेण भोगं, द्वितीये ब्रह्मप्राप्तस्य मुक्तत्वं, तृतीये मुक्तप्राप्यस्य परस्य ज्योतिषः परमात्मत्वं चतुर्थे च ब्रह्मप्राप्तिं सायुज्यादिरूपामुक्त्वा तेषां ब्रह्मभुक्तबहिष्ठभोक्तृत्वं प्रतिपादयन्ति । ब्राह्मेणेति त्रिसूत्रेऽधिकरणे च चिन्मात्रदेहानां भगवत्सायुज्यं प्राप्तानां ब्रह्माङ्गानुगृहीतैः स्वाङ्गैर्भोगं प्रतिपादयन्ति । तत्रोदासीना वयम् ॥ ७ ॥

सङ्कल्पादेव च तच्छ्रुतेः ॥ सूत्रमवतारयन्ति । * एवं परेत्यादि * । व्याकुर्वन्ति । * भजनेत्यादि * । * स एवेति * । वर्णरूपः सङ्कल्पः । * अत्रापीति * । सूत्रेऽपि ॥ ८ ॥

अत एव चानन्याधिपतिः ॥ व्याकुर्वन्ति * । * यतो हेतोः पुष्टिमार्गीयाणां वरणादिरूपं साधनं स्वस्वरूपात्मकं फलं च स्वयमेवातस्तथेत्यर्थः । सर्वस्य वशीत्यादिश्रुतिविरोधपरिहारायाहुः । * अन्यत्रेत्यादि * । शेषं स्फुटम् ॥

करोऽतः सर्वस्याधिपतिरितिश्रुतिरपि तदभिप्रायेणैवेति भावः । चकाराद्, मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपीति भगवद्वाक्यं संगृह्यते । अन्यथा सर्वज्ञस्याऽकुण्ठितज्ञानशक्तेरेवं कथनमयुक्तं स्यादतः पुष्टिमार्गोऽनुग्रहैकसाध्यः प्रमाणमार्गाद्विलक्षणस्तत्र विश्वासश्च तथेति सिद्धम् ॥ ९ ॥

अभावं बादरिराह ह्येवम् ॥ १० ॥

मुक्तोऽपि जीवः पुष्टिमार्गेऽङ्गीकृतो भगवद्दत्तं विग्रहं प्राप्य भजनानन्दं प्राप्नोतीति सिद्धम् । अत्र प्रत्यवतिष्ठते । बादरिराचार्यो मुक्तस्य देहाद्यभावं मनुते । तत्र हेतुराह ह्येवमिति । ब्रह्मविदो हि मुक्तिरुच्यते । यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्याद्युक्त्वा, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदित्यादिना द्वितीयज्ञाननिषेधमाह ब्रह्मविदः श्रुतिः । तथाच तस्य कामभोगवार्त्ता दूरतरेति, तदाक्षेप्यदेहोऽपि तथा ॥ १० ॥

भावं जैमिनिर्विकल्पाऽऽमननात् ॥ ११ ॥

---

* विश्वासस्तथेति * अनुग्रहैकसाध्यः ।

अत्रान्ये मुक्तसङ्कल्पं व्याकुर्वन्ति । अनन्याधिपतिरित्यत्र च जीवस्य स्वाधीनताम् । तद्यदि, सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरिति श्रुतिं नोपरुन्ध्यात्तदोपादेयमन्यथा तूपेक्ष्यम् ॥ ९ ॥

अभावं बादरिराह ह्येवम् ॥ * अत्रेत्यादि * । अस्मिन्नर्थे निःसम्बोधनिरानन्दमुक्तिवादी प्रत्यवतिष्ठत इत्यर्थः । तत्र हेतुः । * बादरिरित्यादि * । शेषं स्फुटम् ॥ एतन्मते कामाशनबोधकश्रुत्यादयः पूर्वकक्षाविश्रान्ताः । जैमिनिस्तु पूर्वकक्षाविश्रान्तौ मानाऽभावाद् ब्रह्मविद्वृत्तान्तकथनस्योभयत्र तुल्यत्वान्मार्गभेदेनाऽधिकारिभेदमङ्गीकृत्योभयव्यवस्थामाह ॥ १० ॥

भावं जैमिनिर्विकल्पाऽऽमननात् ॥ * विकल्पाऽऽमननादिति * ।

जैमिनिराचार्यस्तु मुक्तस्य पुंसो देहादेर्भावं सत्तां मन्यते । तत्र हेतुर्विकल्पेत्यादि । ब्रह्मविदाप्नोति परमिति श्रुत्या ब्रह्मज्ञानस्य तत्प्राप्तिसाधनत्वमुच्यते । नायमात्मेति श्रुत्या तु वरणमात्रप्राप्यत्वम् । सोऽश्नुत इत्यादिना च परप्राप्त्युपन्यासः क्रियते । इहैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माऽप्येतीति च पठ्यते। एवं सति मिथो विरोधे तदभावायोक्तव्याख्यानरीत्या ज्ञानमार्गीयस्य ब्रह्मज्ञानेनाक्षरब्रह्मप्राप्तिः पुष्टिमार्गीयभक्तस्य तु, सोऽश्नुत इत्यनेनोक्ता परप्राप्तिरिति व्यवस्थितविकल्प एव श्रुत्यभिमत इति ज्ञायते । तेन, नायमात्मेति श्रुतिः परप्राप्तिविषयिणी । इहैवेत्यादिश्रुतिस्तु मर्यादामार्गीयविषयिणीति मन्तव्यम् । एवं सति पुष्टिमार्गीयस्य भोगसाधनात्मकविग्रहवत्त्वं निष्प्रत्यूहं सिद्ध्यति । तत् केन कं पश्येदित्यादिना तु ब्रह्मज्ञानसामयिकीं व्यवस्थामाह, न तु तदुत्तरकालीनपरप्राप्तिसामयिकीमिति किमनुपपन्नम् ॥११॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

ब्रह्मणा सह सर्वकामाशनप्रयोजकं शरीरं शरीरत्वस्य भूत-

———

विरुद्धाः कल्पाः पक्षाः विकल्पाः श्रुतिषूच्यमानाः, तेषाम् आमननाद् आसमन्तान्मननाद् विचारात् । तथाच ज्ञानप्राप्यत्वविरुद्धं वरणैकलभ्यत्वं कामाशनविरुद्धश्चाप्यय इति साधनयोः फलस्वरूपयोश्च मिथो विरुद्धत्वे सति तदभावायाधिकारिभेद आस्थेय इति ज्ञानमात्रात् साधनाद् ब्रह्मभावे तत्र लयो वरणसहकृतात्तु तल्लाभः स्वाधीनतया स्वरूपानुभावात्मक इति श्रुत्याभिप्रेत्यस्य व्यवस्थितविकल्पस्य सम्यग्विचारात् तथेत्यर्थः । शेषं स्फुटम् ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ भगवान् व्यासस्तु जैमिन्युक्तव्यवस्थां बादर्युक्तं द्वैतदर्शननिषेधं चाङ्गीकृत्य जैमिन्युक्तात् कश्चिद्विशेषमाहेत्याशयेन सूत्रं व्याकुर्वन्ति । *ब्रह्मणा सहेत्या-

जन्यत्वव्याप्यत्वात्तदभावेनाऽशरीररूपं तद्भोगायतनत्वेन शरीररूपमपीति बादरायण आचार्यो मन्यते । अत्र हेतुरत इति । तथाविधश्रुतेरित्यर्थः । तथाहि । भूमैव विजिज्ञासितव्यमित्युक्त्वा तत्स्वरूपमाह । यो वै भूमा तत्सुखमित्युपक्रम्याग्र उच्यते । यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेत्यनेन केवलभावविषयत्वं पुरुषोत्तमलक्षणमुक्त्वा केवलभाववतो भक्तस्य विप्रयोगसामयिकीं व्यवस्थामाह । स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तादित्यादिना । ततः, स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्निति पूर्वावस्थामनूद्य संयोगावस्थामाह । आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्द इति वाक्येन, सोऽश्नुत इति श्रुतिसंवादिनमर्थमुक्त्वा भक्तस्वरूपमाह । तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण इत्युपक्र-

---

दि * । एवमधिकारिभेदमार्गभेदाभ्यां मुक्तस्य देहसत्तायास्तदभावस्य च प्राप्तौ यस्य शरीरं प्राप्तं तत् कीदृशमित्यपेक्षायां तच्छरीरम् उभयविधं केनचिद्धर्मेण शरीररूपं, केनचिद्धर्मान्तरेण अशरीररूपमित्येवं द्विविधमिति बादरायण आचार्यो मन्यत इत्यर्थः । हेतुबोधिका श्रुतिः कुत्राऽस्तीत्याकाङ्क्षायामाहुः । * तथाहीत्यादि * तथा तत्प्रकारकं हि यतो हेतोः, भूमैव विजिज्ञासितव्य इत्याद्युक्त्वा तस्य शरीरस्य स्वरूपमाह । तथाच छान्दोग्ये भूमविद्यायामस्तीत्यर्थः । ननु तत्र भूम्नः स्वरूपमुच्यते, न शरीरस्येत्यत आहुः । * यो वा इत्यादि * । सत्यं भूम्नः स्वरूपमुच्यते, तथापि तस्य सुखरूपत्वमुपक्रम्याग्रे सुखरूपतया तदुच्यते, इत्येवं गृहीत्वा विभजन्ते । * यत्र नान्यदित्यादि, सर्वमितीत्यन्तम् * । तथाचात्र नित्यनिरवधिसुखात्मकं भूमानमुपक्रम्य तस्माद् भूम्न आत्मनः सकाशात् प्राणादिसर्वान्तानां देहान्तःस्थानामाविर्भाव उक्तः । तेन तस्य भूताजन्यत्वादशरीरत्वम् । आत्मरतिरित्यादिना भोगस्योक्तत्वात्तदायतनत्वेन शरीरत्वमतस्तथेत्यर्थः । ननु ब्रह्मणः सकाशादेव तैत्तिरीयादावपि सृष्टेरुक्तत्वात् कोऽत्र विशेष इत्यत आहुः–

न्यात्मत एवेदꣳ सर्वमिति। तेनाऽशरीरत्वं सिद्धयति। अन्ययप्रयोगेणाऽविकृतादेव पुरुषोत्तमात् प्राणाद्याविर्भाव उच्यते। अत्र ल्यब्लोपे पञ्चमी । पूर्वं विरहदशायां प्राणादयो भगवत्येव लीना आसंस्तस्तत्प्राकट्ये तत एव प्राणादयोऽपि सम्पन्ना इति तत्प्राप्तेर्निमित्तत्वं यतो विभूतिरूपाणामपि पुरुषोत्तमे लयो नानुपपन्नः

अन्वयेत्यादि । * अत्रेति * आत्मत इति शब्दे। तथाच तत्राकाशवाय्वादिभावापन्नात् सोच्यतेऽत्र तु भूमरूपादेवेति विशेष इत्यर्थः। नन्वत्र भक्तस्यैव व्यवस्थोच्यत इत्यत्र किं गमकमत आहुः। * पूर्वमित्यादि * । तथाच यत इदमवस्थाद्वयं क्रमेणोक्त्वा भगवद्दर्शनोत्तरं प्राणाद्याविर्भावं वदतीति भगवत्प्राप्त्यनन्तरभावित्वकथनमेव तद्गमकमित्यर्थः। नन्वानन्दमयाधिकरणे विषयश्रुतौ, एवं विदो भक्तस्य एतल्लोकत्यागोऽस्माल्लोकात् प्रेत्येत्यनेनोक्तः, सोऽत्र, वाङ्मनसीत्यादिना, सोऽध्यक्षे तदुपगमादिभ्य इत्यन्तेन व्युत्पादितः । या पुनस्तदग्रे, एतमन्नमयमात्मानमुपसंक्रामतीत्यादिना विभूतिरूपाणां प्राप्तिरुक्ता फलानुभवोपयोगिनी साऽत्र सम्पद्याविर्भावादिसूत्राभ्यामुक्त्वा, ब्राह्मेणेत्यादिद्वादशाहसूत्रान्तैर्व्युत्पाद्यते । फलानुभवस्त्वतिविगाढभावेन सर्वात्मभावे सत्येव भवतीति तद्बोधनार्थं या पूर्वं विरहदशा सा तत्र ब्रह्मवित्प्रपाठकश्रुतौ, यतो वाचो निवर्त्तन्त इत्यारभ्य, उभे ह्येवैष एते आत्मानꣳ स्पृणुत इत्यन्तेन भृगुप्रपाठके च, हावु हावु इत्यारभ्य, अहं विश्वं भुवनमभ्यभवां सुवर्णज्योतीरित्यन्तेनोक्ता। तथा सति यस्तादृशः स आनन्दमयं ब्रह्मस्वरूपमात्मादेशोक्तप्रकारेणाऽहङ्कारादेशोक्तप्रकारेण वाऽनुभवतीति सिद्धयत्यतो विभूतिरूपाणां प्राणादीनां लयाङ्गीकारोऽनुपपन्न इत्यत आहुः। * विभूतीत्यादि * । अहङ्कारादेशे आत्मादेशे च सर्वस्मिन् स्वाभेदस्यात्माभेदस्य च भानोक्त्यां लयस्यार्थादेव बोधितत्वात् । अथ तत्र तेषां भक्तानां पार्थक्येन प्राणाद्यभावनमेवाभिप्रेतं, न सर्वात्मना लय इत्युच्यते, तदाऽपि तस्यां दशायां ब्रह्मणा सह सर्वकामाशनरूपस्यात्मरतिरित्यादिनोक्तस्यानुभवस्याभावात् फलतस्तौल्यमेव। वस्तुतस्तु तदग्रे, तस्य ह वा एतस्येत्यादिना आत्मतः

आत्मरतिरित्यादिना, सोऽश्नुत इत्यनेन च शरीरत्वम् । जैमिनिरप्यत एव ब्राह्मणेति मनुते । एकस्य विरुद्धोभयधर्मवत्त्वमऽमन्वानं प्रति वैदिकं दृष्टान्तमाह । द्वादशाहवदिति । यः कामयेत प्रजायेयेति स द्वादशरात्रेण यजेतेति चोदनया द्विरात्रेण यजेतेत्यादिवन्नियतकर्तृकत्वेनाहीनत्वं गम्यते । द्वादशाहमृद्धिकामा उपेयुः । य एवं विद्वांसः सत्रमुपयन्तीति श्रुत्या च सत्रत्वं बहुकर्तृकस्य गम्यते । एवमेव द्वादशाङ्गशरीरेन्द्रियप्राणान्तःकरणात्मभिरश्नुत इति सत्रतुल्यत्वम् । वस्तुतो भगवद्विभूतिरूपत्वेन ब्रह्मात्मत्वेनैकरूपत्वमतो द्वादशाहवदुभयविधम् । सत्रे प्रत्येकं चेतनानां यजमानानां फलभागित्ववदत्रापि तादृग्भक्तदेहादीनामपि ब्रह्मात्मकत्वाच्चेतनत्वमेवेत्यप्यनेन दृष्टान्तेन ज्ञाप्यते । अत एव श्रीभागवते, देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनामिति गीयते॥१२॥

प्राणादीनामाविर्भावश्रावणात्तदन्यथाऽनुपपत्त्यैव लयाङ्गीकारोऽतो नानुपपन्न इत्यर्थः । एवमशरीरत्वबोधिकां श्रुतिं व्याख्याय शरीरत्वसाधिकां श्रुतिमाहुः * आत्मरतिरित्यादि * । तेन तैत्तिरीयसमाप्तौ या दशोक्ता सा फलानुभवस्य प्रथमावस्थेति बोधितम् । स्वोक्ते पूर्वसूत्रसम्मतिमाहुः * जैमिनिरित्यादि * । एवं हेतुं व्युत्पाद्य दृष्टान्तं व्युत्पादयन्ति । * एकस्येत्यादि * । दार्ष्टान्तिके योजयन्ति । * एवमेवेत्यादि * । तेन, ब्रह्मभावात्तु भक्तानां गृह एव विशिष्यत इति सूचितम् तथाच भक्तानामेव भोगरूपकार्यबलेन सत्रतुल्यत्वम् । अन्येषां तु तदभावादहीनतुल्यत्वमिति भक्ताभक्तव्यवस्थाबोधनादभक्तस्य बादरेः पूर्वकक्षाविश्रान्तत्वात् तदुक्तमपि युक्तम् । जैमिनेस्तु सर्वत्र दृष्ट्या उत्तरकक्षाविश्रान्तत्वात्तदुक्तमपि युक्तमिति तस्य तस्य तथात्वबोधनायैव स्वमतकथनमित्यर्थः । मर्यादामार्गीया अपि भगवल्लोक एतादृशदेहेनैव यथाधिकारं चतुर्विधमुक्तिभाजस्तिष्ठन्ति । ज्ञापनेनापि पूर्वोक्तं साधयितुमाहुः * अत एवे-

तत्त्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥

अथेदं चिन्त्यते । भगवत्स्वरूपे प्राकृतशरीर इवावस्था दृश्यन्त तत्कालीनैः पुम्भिरिति कथमप्राकृतत्वमुपपद्यत इति तत्रोपपत्तिमाह । तद्दर्शनस्य वास्तववस्तुविषयकत्वव्यवच्छेदेन पूर्वपक्ष-

---

त्यादि * तथाच यत्र जयविजयादीनामप्येवं तत्र पुष्टिमार्गीयस्य का वार्त्तेत्यर्थः । एवं प्रसङ्गेन भगवल्लोकप्राप्तिरूपं फलमुक्तमिति ज्ञेयम् ।

अन्ये तु बादरिसूत्रे, मनसैतान् कामान् पश्यन् रमत इति श्रुतौ मनसेतिविशेषनिर्देशबलान्मुक्तस्य देहेन्द्रियाद्यभावं, जैमिनिसूत्रे च, स एकधा भवतीत्यादिविकल्पामननाद्देहेन्द्रियसद्भावं, बादरायणसूत्रे, उभयश्रुत्यनुरोधान्मुक्तस्य सङ्कल्पेन कदाचित्तदभावं कदाचित्सद्भावं च व्याकुर्वन्ति । तत्र मुक्तसङ्कल्पो यदि परमेश्वरसङ्कल्पानुसारी तदा तद्व्यापारभूतो यदि तद्विरुद्धस्तदा अकिञ्चित्करत्वादप्रयोजक इति ध्येयम् ॥ १२ ॥

तत्त्वभावे सन्ध्यवदुपपत्तेः ॥ एवमत्र फलानुभवप्रकारमध्ये देहरूपः प्रकारो विचारितः । अथात्मा प्रकरणादित्यादिसूत्रद्वयोक्तस्य फलस्य प्रकारं विचारयतीत्याशयेनाधिकरणमवतारयन्ति । * अथेत्यादि * । एवमष्टसूत्र्या पूर्वसूत्रद्वयोक्तदेहस्वरूपनिरूपणोत्तरम् इदमग्रिमसूत्रद्वयोक्तं भगवत्स्वरूपमनेन प्रकारेण विचार्यते । यद्यपि गुणोपसंहारे भगवतो निर्दोषत्वं, वेधाद्यधिकरणे, अनन्तगुणपूर्णत्वादिकं च, व्याप्तिश्च समञ्जसमित्यवान्तराधिकरणे विचारितं, तथापि तदेव स्वरूपं फलरूपमिति तत्र न विचारितम् । साधनप्रकरणत्वात् । अतः फलरूपमन्यद्भविष्यतीत्याशङ्कानिरासाय तदेवात्र फलमिति बोधनार्थमवमरसङ्गत्या पुनः परामृश्यते । तथाचात्र फलत्वेन प्रतिपाद्यमानं भगवत्स्वरूपं प्रकृतिसम्बन्धविशिष्टं, न वेति संशयः । अवस्थादर्शनादाद्यमिति पूर्वपक्षः । तद्दर्शनस्य भ्रान्तत्वान्नेति सिद्धान्त इत्याशयेन सूत्रमवतारयन्ति । * भगवदित्यादि * * तत्रेति * प्राकृतावस्थादर्शने ।व्याकुर्वन्ति । * तद्दर्शनस्येत्यादि *

व्युदासाय तुशब्दः । तत्र प्राकृततुल्यदर्शनमभावे तथात्वस्याभाव एव भवति, न तु तत्र प्राकृता धर्माः सन्ति। नन्वविद्यमानानामर्थानां कथं दर्शनमुपपद्यत इत्यत आह। सन्ध्यवदिति। स्वप्ने यथा वासनावशादविद्यमानानामप्यर्थानां भवति तथा भगवदिच्छावशात् तत्रापि प्राकृततुल्यत्वदर्शनस्योपपत्तेर्न प्राकृतत्वं तत्र ज्ञेयमित्यर्थः। तथाच श्रुतिः। सन्ध्यं तृतीयꣳ स्वप्नस्थानं तस्मिन् सन्ध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानं च। अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दांश्च पश्यति। स यत्रायं प्रस्वपितीत्युपक्रम्य, स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयञ्ज्योतिर्भवति, न तत्र रथा न रथयोगा न पन्थानो भवन्तीत्यादिरूपा। एवमेव भगवानासुराणां प्राकृतगुणे तमस्येव दुःखात्मके लयं चिकीर्षुः स्वस्मिन् प्राकृतत्वबुद्धिसंपादनाय तादृशीमिव लीलां दर्शयत्यतो, न प्राकृतत्वशङ्कागन्धोऽप्यत्र । अत एव भगवतोक्तं, मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयका इत्युपक्रम्य, ततो यान्त्यधमां गतिमिति। तेषामासुरत्वेन मुक्त्यनधिकारित्वात् तथा करणमतः सुष्ठूक्तं—सन्ध्यवदुपपत्तेरिति ॥ १३ ॥

श्रुतिस्तु बृहदारण्यके ज्योतिर्ब्राह्मणे। दार्ष्टान्तिके योजयन्ति। * एवमित्यादि *। * अभ्यसूयका इति * गुणेषु दोषारोपकाः। इयमेवोपपत्तिर्ब्रह्माण्डपुराणेऽप्युक्ता, शिवतत्त्वविवेकेऽनूदिता। तथाहि। "निर्दोषश्चेत् कथं विष्णुर्मनुष्येषु प्रजायते। चिन्ताश्रमव्रणाज्ञानदुःखयुग्दृश्यते कथम्। एवं मे संशयो ब्रह्मन् हृदि शल्य इवार्पित" इति नारदप्रश्ने "स्त्रीपुंमलानुषङ्गात्मा देहो नास्य विजायते। किन्तु निर्दोषचैतन्यसुखनित्यां स्वकां तनुम्। प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा। तथाऽप्यसुरमोहार्थं परेषां च क्वचित् क्वचित्। दुःखा-

भावे जाग्रद्वत् ॥ १४ ॥

लौकिकवद्भासमाने लीलापदार्थे यद्दर्शनं भक्तानां तत् तु भावे विषये विद्यमाने सति भवति । अत्र दृष्टान्तमाह । जाग्रद्वत् । यथा मोहाऽभाववतः पुंसः सत एवार्थस्य दर्शनं तथेति । एताभ्यां सूत्राभ्यामेतदुक्तं भवति । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति श्रुत्या भक्तकामपूरणाय भगवाँल्लीलां करोतीति गम्यते । यद्दर्शनश्रवणस्मरणैर्भक्तानां दुःखं भवति तादृशीमपि तां करोतीति श्रूयते । यथा सौभयुद्धे मोहवचनानि, हस्तादायुधच्युतिः, प्रभासीयलीला च । उक्तरीत्या, सोऽश्नुत इति श्रुत्या परब्रह्मत्वमवगम्यते । उक्तलीलया तद्वैपरीत्यं च । एवं सत्येकस्या वास्तवत्वमन्यस्या अवास्तवत्वं वाच्यम् । ते ते धामान्युष्मसि, विष्णोः कर्माणि पश्यत, तद्विष्णोः परमं पदं, तद्विप्रासो विपन्यव इत्यादिश्रुतिभिः, सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं

ज्ञानश्रमार्दीश्च दर्शयेच्छुद्धसद्गुणः । क्व व्रणादि क्व चाज्ञानं स्वतन्त्राचिन्त्यसद्गुणे । दौर्लभ्याच्चैव मोक्षस्य दर्शयेत्तानजो हरिः । कृष्णो ह्यत्यक्तदेहोऽपि त्यक्तदेहस्य देहवत् । लोकानां दर्शयामास स्वरूपसदृशाकृतिम्" इति ब्रह्मणोक्तम् ॥ १३ ॥

भावे जाग्रद्वत् ॥ एवं दोषदर्शने उपपत्तिमुक्त्वा गुणदर्शने उपपत्तिमाहेत्याशयेन सूत्रमुपन्यस्य व्याकुर्वन्ति । *लौकिकवदित्यादि* अत्र पूर्वसूत्राद् उपपत्तेरिति पदमनुवर्त्तते । अर्थस्तु स्पष्टः । तथाच गुणोपसंहारपादे, व्याप्तेश्च समञ्जसं, सर्वाभेदादन्यत्रेमे इति सूत्रद्वये व्यापकस्य रसरूपस्यैव भगवतो भक्तानां तत्तद्रसानुभावनाय तथा तथा मायापसारणेन तत्तत्परिमाणादिप्राकट्येन बाल्यपौगण्डाद्यनुभावनात् तेषां विद्यमानानामेवार्थानामनुभव इत्युपपादनात्तथोपपत्तेरित्यर्थः । एवं सूत्रद्वयं व्याख्याय सूत्रद्वयोक्तिप्रयोजनमाहुः । * एताभ्यामित्यादि * ।

नारायणं देवमक्षरं परमं पदम्। विश्वतः परमान्नित्यं विश्वं नारायणं हरिम्।विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति, पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतमित्यादिभिश्च शुद्धब्रह्मणस्तद्विपरीतदर्शनेऽवश्यं हेतुर्वाच्यः । स त्वासुरव्यामोहनमेवेति पूर्वसूत्रेणोपपादितः । भक्तेभ्यः स्वरूपानन्ददानाय, लोकवत्तु लीलाकैवल्यमिति न्यायेन या लीलाः करोति, यथा रिङ्गणादिलीला भगवतो नैसर्गिकधर्मरूपानन्दात्मकत्वेन विद्यमाना एव, ता भक्ताः पश्यन्तीति द्वितीयसूत्रेणोक्तम् । अत एव लीलाया अनेकरूपत्वाद् ब्रह्मणश्च श्रुतौ सैन्धवदृष्टान्तेनैकरसत्वनिरूपणाच्छुद्धब्रह्मधर्मत्वं न सम्भवतीति शङ्कानिरासाय कैवल्यमित्युक्तम् । साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिषु याऽन्यधर्मराहित्यलक्षणा केवलतोक्ता सा लीलात्मिकैव लीलाविशिष्टमेव शुद्धं परं ब्रह्म, न कदाचित् तद्रहितमित्यर्थः पर्यवस्यति । तेन स्वरूपात्मकत्वं लीलायाः पर्यवस्यति । तेन च नित्यत्वम् । एतद् विद्वन्मण्डने प्रपञ्चितम् ।

---

* इत्यादिभिश्चेति * लीलानां भगवतश्च नित्यत्वं शुद्धब्रह्मत्वं चावगम्यत इति शेषः ।

अत्र, तेन इतिश्रुतिरग्रे व्याख्येया। विष्णोः कर्माणीत्यादयस्तु विद्वन्मण्डने सम्यग्व्याख्याताः।ताश्च पूर्वकाण्डस्था इत्यतः, सहस्रशीर्षमिति तैत्तिरीयाणां महानारायणोपनिषत्स्थानुवाकीया उक्ता । एवं द्विविधा लीलास्तासां नित्यत्वं च प्रामाणिकमिति प्रतिपाद्य पूर्वसूत्रप्रयोजनं स्फुटीकुर्वन्ति । * शुद्धेत्यादि * तथाच तदर्थानां लीलानाम्, आसुरव्यामोहकत्वेनैव रूपेण नित्यत्वं, न तु प्रतीयमानेन रूपेणेत्यर्थः । द्वितीयस्यार्थमाहुः * भक्तेभ्य इत्यादि * । एवं द्वितीयस्य तात्पर्यमुक्त्वा लीलानां स्वरूपात्मकत्वं निगमयितुं लीलाकैवल्यसूत्रार्थं स्फुटमनुवदन्ति * अत एवेत्यादि * । एतस्य सूत्रार्थस्योपपादनसा-

अथवा लीलैव कैवल्यं, जीवानां मुक्तिरूपम् । तत्र प्रवेशः परमा मुक्तिरिति यावदित्यर्थः ॥ १४ ॥

— —— —

पेक्षत्वात् प्रकारान्तरेणार्थमाहुः * अथवेत्यादि * एवं फलरूपस्य भगवतः स्वरूपं सूत्रद्वयेन विचारितम् ।

अत्र सर्वेऽपि पूर्वसूत्रे, तन्वभाव इति पाठमङ्गीकृत्यैवं व्याकुर्वन्ति । सङ्कल्पादेवेति सूत्रे पित्रादिसमुत्थानमुक्तसङ्कल्पादुक्तम् । स एव सङ्कल्पो द्वादशाहसूत्रेऽतःशब्देन परामृश्यते । तेन मुक्तो द्वादशाहवदशरीरः सशरीरश्च सिद्ध्यति । तत्राशरीरस्य यो भोगः स तन्वभावेऽपि ब्रह्मसृष्टैरेव पदार्थैः सन्ध्यवत् स्वाप्निकपदार्थभोगवत् सिध्यति । तनुसद्भावपक्षे तु लीलार्थमीश्वरेण सृष्टैर्मुक्तेन वा स्वसङ्कल्पादेव सृष्टैर्जाग्रद्वद् वहिर्भुङ्क्त इति । तन्नास्माकं रोचते । एवमभ्युपन्यासादितिसूत्रेऽपहतपाप्मादिसत्यसङ्कल्पान्तानां धर्माणामुक्तेऽप्यङ्गीकारेण तत्सङ्कल्पादेव तदनुरूपभोगोपपत्तेर्विशेषतस्तदुपपादनप्रयोजनाभावेनैनत्सूत्रद्वयस्यानातिप्रयोजनत्वप्रसङ्गात् । अथ सूत्रे तथा पाठ इति तदनुरोधेन तथा व्याख्यानमित्युच्यते, तदा तु सूत्रे तन्वभाव इत्यत्र तनुशब्दस्याभावशब्देन समासेऽनाचिचेति वैकल्पिकं नकारस्य द्वित्वं, तथा तत् नु अभाव इति पदच्छेदेऽपि, परोऽनुनासिकेऽनुनासिको वेति नकारद्वित्वमिति तत्त्वभावपदस्य सैद्धान्तिकोऽर्थ एव युक्तः । द्वित्वाभावश्चेत् तदा, तन्वभाव इत्यत्र सप्तमीसमासमङ्गीकृत्य भगवत्तनौ तदभाव इत्यर्थो वक्तव्यः । भगवता स्वस्वरूप आसुराणामन्यथाभानस्य कारणेन तद्भानस्यावश्यमुपपादनीयत्वात् । अन्यथा आसुरदृष्टेषु सत्यत्वबुद्धौ देवानां मोक्षप्रतिबन्धापत्तेरिति । तदेतत् प्रागेव ब्रह्माण्डवाक्योपन्यासपूर्वकं विचारितमित्युपरम्यते ।

ये मायावादिनो मोक्षे भोगं नाङ्गीकुर्वन्ति तान् प्रति भास्कराचार्यैरेवं दूषणमुच्यते । ससम्बोधं मोक्षं श्रुतिसिद्धमाश्रित्याचार्येणायं विभागो दर्शितः श्रोतृणामनुग्रहाय, न नास्तिक्यमवलम्ब्य भ्रान्त्या वा सूत्राणामन्यथार्थत्वं कल्पनीयम् । श्रुतीनां नार्थवादत्वम् ।

प्रदीपवदावेशस्तथाहि दर्शयति ॥ १५ ॥

ननु पूर्णज्ञानक्रियाशक्तिमता ब्रह्मणा तुल्यभावेन तत्रापि प्रधानभावं प्राप्य कामभोगकरणमपूर्णज्ञानक्रियावतो भक्तस्यानुपपन्नमित्याशङ्कायां तत्रोपपत्तिमाह । न हि तदा नैसर्गिकज्ञानक्रियाभ्यां तथा भोक्तुं शक्तो भवति, किन्तु भगवाँस्तस्मिन्नाविशति यदा तदाऽयमपि तथैव भवतीति सर्वमुपपद्यते । एतदेवाह । प्रदीपवदिति । यथा प्राचीनः प्रकृष्टो दीपः स्नेहयुक्तायां वर्त्त्यामर्वाचीनायामाविष्टः स्वसमानकार्यक्षमां तां करोति स्नेहाधीनस्थितिश्च भवति स्वयं तथाऽत्रापीत्यर्थः । अत्र प्रमाणमाह । तथाहि दर्शयति श्रुतिः । भर्त्ता सम्भ्रियमाणो बिभर्त्ति, एको देवो बहुधा

———

सर्वत्रार्थवादत्वप्रसङ्गात् । निःसम्बोधे तु मोक्षे न प्रेक्षापूर्वकारी प्रवर्त्तते । संसारावस्थायां तावद्देवलोकादिषु पर्यायेण सुखतारतम्यं लभन्ते, मुक्तः पुनः सुषुप्तवन्न किञ्चित् । स्वरूपचैतन्यं तु विद्यमानमप्यसत्समेव । न हि तच्चैतन्यान्तरेण संवेद्यते । तस्यैवाभावात् । नच स्वचैतन्यतः संविदस्तु । चैतन्यव्यतिरिक्तसंवित्त्यनभ्युपगमात् । अभ्युपगमे च भेदप्रसङ्गान्मायावादहानिः स्यादेव । ससंबोधे पुनर्मोक्षे सर्वमुपपन्नं सल्लक्षणं बोधस्य रूपम् । मनः सर्वज्ञं सर्वशक्तिभिन्नाभिन्नरूपं हि । तेनाऽस्तु तद्वगतिर्नातोऽन्यथेति ॥१४॥३॥

प्रदीपवदावेशस्तथाहि दर्शयति ॥ एवमधिकरणत्रयेण फलप्राप्त्युपकरणं फलस्वरूपं च विचार्य फलानुभवोपकरणं विचारयति । तत्र भगवद्भोगरूपोऽनुभवो जीवस्य सम्भवति, न वेति संशयः । भक्तस्य स्वतोऽसामर्थ्यं भोगश्रुतिश्च संशयबीजम् । तदेतन्मनसिकृत्य सूत्रमवतारयन्ति ।* नन्वित्यादि * । व्याकुर्वन्ति * नहीत्यादि * । * नैसर्गिकज्ञानक्रियाभ्यामिति * मुक्तौ भगवत्कृपयाऽभिव्यक्ताभ्यां, हानौ तूपायनेतिसूत्रे व्युत्पादिताभ्यां जैवाभ्यां ताभ्याम् । भर्त्ता सन्निति श्रुतिस्तु तैत्तिरीयारण्यके पुरुषसूक्तोत्तर-

निविष्ट इति । सर्वान् कामानित्युक्तत्वाद् यस्य कामस्य भोगो यथा निवेशे सति तत्तथा तदा निवेश इति बहुधा निवेश उक्तः । अयं निवेशो नान्तर्यामित्वेन, तस्यैकधैव प्रवेशात् । निसर्गतः सर्वेषां जीवानां भगवान् भवस्येव प्रभुर्यद्यपि तथापि यं स्वीयत्वेन वृणुते तस्य विवाहितः पतिरिव भर्त्ता सन् वरणजस्नेहातिशयेन भक्तेनापि भ्रियमाणः सन्, स भक्त इव स्वयमपि तं स्वस्मिन् बिभर्त्ति । अत एव स्नेहराहित्येनायोगोलकादिकं विहाय प्रदीपं

———

नारायणानन्तरं भर्तृसूक्तारम्भेऽस्ति । एवं तां विवृण्वन्ति । सर्वान् कामानित्यारभ्य गतिष्वितीत्यन्तम् । ननु भर्त्तृसूक्ते तदग्रिमानुवाकेषु च प्रभासीयलीलैव प्रायशः प्रतीयते, किं बहुना, एतद्गुत्तराऽर्द्धेऽपि यदा भारं तन्द्रयते स भर्त्तु निधाय भारं पुनरस्तमेतीति भारवहनालस्यं भारस्तत्त्यागोऽस्तगमनं चोच्यते । अग्रे च, तमेव मृत्युममृतं माहुरित्यादि । तत् कथमत्रैवं व्याख्यातमिति चेद् उच्यते । पूर्वं हि पुरुषसूक्ते सृष्टिलीलोक्ता । तत उत्तरनारायणे स्थितिलीलोक्ता । तत्र, ह्रीश्च ते लक्ष्मीश्च पत्न्यावित्यनेन भोगलीलां सूचयित्वा इष्टं मनिषाण, अमुं मनिषाण, सर्वं मनिषाणेतिवाक्यत्रये ऐहिकामुष्मिकमिष्टं ब्रह्मविद्भिः प्रार्थितम् । ततो भर्तृसूक्तारम्भे इयमृगिति पूर्वग्रन्थे उत्तरग्रन्थे चेयमुपयुज्यते इति पूर्वसम्बद्धार्थोऽत्र व्याख्यातः । तृतीयस्कन्धे तु, भर्त्तुः पादावनुस्मरन्नित्यत्रोक्ता । अतस्तत्रोत्तरग्रन्थसम्बद्धोऽर्थ इति मया विद्वन्मण्डनव्याख्याने प्रभासलीलाप्रसङ्गे उत्तरग्रन्थानुसारेण व्याख्यातेति न दोषः । नन्वत्र मुक्तस्य यानि त्रिधा भवति पञ्चधेत्यादिनोक्तानि शरीराणि सृजन्ते तानि सात्मकानि निरात्मकानि वेति संशये, निरात्मकानि सृष्ट्वा, यथा प्रदीप एकोऽनेकभावं विकारशक्तियोगादापद्यते तथा मुक्त एकोऽप्यनेकशरीराण्यैश्वर्ययोगादाविशतीत्युच्यते, न तु पूर्वोक्तोऽर्थ इति शङ्कायामाहुः । * अत एवेत्यादि * यत उक्त एवाऽर्थोऽभिप्रेतोऽत एवायं दृष्टान्त उक्तो, नायोगोलकादिरतस्तथेत्यर्थः । भर्त्तृसूक्तश्रुतावयमेवाऽर्थोऽभिप्रे-

दृष्टान्तमुक्तवान् व्यासः । अत एव देवपदमुक्तम् । स्वरूपानन्ददानाद्भावोद्दीपनात् पूतनादिमुक्तिदानेन स्वमाहात्म्यद्योतनाद्वैकुण्ठादिस्थितेश्च । तदुक्तं निरुक्ते—दिवो दानाद्वा, दीपनाद्वा, द्योतनाद्वा, द्युस्थानो भवतीति वा यो देव इति। किञ्च । भक्तानां कामभोजनार्थं क्रीडाकरणात् क्रीडायामेव जयेच्छाकरणाद्भक्तैः सह व्यवहारकरणाद्भक्तेषु स्वमाहात्म्येच्छादिद्योतनाद्, न पारयेऽहं, न त्वादृशीं प्रणयिनीमित्यादिभिः स्तुतिकरणाद्भक्तप्रपत्तिदर्शनेन कालीयदमनादौ मोदकरणात् तेष्वेव भक्तिमदकरणात् ते स्वप्नेऽपि प्रियमेव पश्यन्तीति स्वप्नकरणात्तेषां कान्तिकरणादिच्छाकरणाद्वा तन्निकटे गमनादपि देवः। तदुक्तं धातुपाठे—दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिष्विति । एवं सति युक्तमेव तेषां तथात्वमिति हिशब्देनाऽऽह ॥ १५ ॥

नन्वऽस्थूलमनण्वह्रस्वमित्याद्यनन्तरं पठ्यते— न तदश्नोति कश्चन न तदश्नोति कश्चनेति, उक्तश्रुतौ च ब्रह्मणा सह जीवस्य भोग उच्यते । तथाच सगुणनिर्गुणभेदेन विषयभेदोऽवश्यं वाच्यो विरोधपरिहारायेत्यत उत्तरं पठति ।

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

त इत्यत्र गमकमाहुः । * अत एव देवेत्यादि * तथाच देवपदार्थोऽऽत्रस्यमेवात्र गमकमित्यर्थः। सौत्रस्य हिशब्दस्यार्थमाहुः * एवं सतीत्यादि * तेन यदा भगवान् जीवस्य स्वदत्ते देहे स्वेन सह सर्वभोगकामभोगं कारयितुमिच्छति तदा स्वयमपि तदनुगुणप्रकारेण तस्मिन् देहे आविशतीति तादृश आवेश एव भोगोपकरणम् । गुणगानगृहकार्यादिदशायां तु यथासम्भवं या रामानुजभास्कराचार्याभ्यां मुक्तव्यवस्थोक्ता सैवाभिमतेत्यर्थाद् बोधितम् ॥ १५ ॥

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ सूत्रमवतारयन्ति । * नन्वस्थूलेत्यादि * श्रुतावश्नोतीत्यस्य विकरणव्यत्ययेन

इहायमाशयः । प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इत्याद्यधिकरणैः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रुतिभिश्च प्राकृता एव धर्मा निषिध्यन्ते ब्रह्मण्यप्राकृता एव बोध्यन्तेऽन्यथा तद्बोधनमेव न स्यान्निषेधकवाक्य एव तद्बोधनमपि न स्यादेतस्यैवाक्षरस्य प्रशासन इत्यादिरूपमतोऽचिन्त्यानन्तशक्तेर्भगवतः का वा कार्याऽक्षमता यया प्राकृतान् गुणान्दूरीकुर्यादतो निर्गुणमेव सदा सर्वत्र भगवद्रूपमिति मन्तव्यम् । एवं सति, तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्तीति छान्दोग्यश्रुतेः प्रस्वापदशायां न कश्चिद् ब्रह्माश्नाति तच्च न कश्चनेति तद्विषयिणी निषेधिका श्रुतिर्ब्रह्मविदाप्नोति परमिति श्रुत्युक्तपरब्रह्मप्राप्तिदशाविषयिणी भोगबोधिका सेति न विरोधगन्धोऽपि । एतदेवाह । स्वाप्ययः प्रस्वापः, स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षत इति श्रुतेः । सम्पत्तिर्ब्रह्मसम्पत्तिरुक्तरीत्या पुष्टिमार्गीयो मोक्ष एतयोरन्यतरा-

---

अशनमेवार्थ इति पूर्वं व्याख्यातम् । अतोऽत्र भोग उच्यत इत्यर्थः । व्याकुर्वन्ति । * इहायमित्यादि * । * निषेधिका श्रुतिरिति * भोगनिषेधिका, न तदश्नोतीतिश्रुतिः । अन्यतरापेक्षमित्येतदग्रे, आविष्कृतमाविष्करणं भगवत्प्राकट्यमिति यावत् । हि यतो हेतोरतो युक्तम्—एतावती बुद्धिर्बोध्या । दहराधिकरणे एतत्सूत्रोपन्यासे आविष्कृतपदस्य भगवदाविर्भावार्थकताया अङ्गीकृतत्वात् । तथा चात्रेदं सम्पद्यते । आद्ये प्रकारे यद्यपि, तद्यथा प्रियया स्त्रियेत्यादिना सम्परिष्वङ्गो ब्रह्मकृतो जीवस्योक्तस्तथापि, न बाह्यं किञ्चन वेद नान्तरमिति ज्ञानाभावशेषत्वेनोक्त इत्यस्थूलादिश्रुतौ सकलप्रापञ्चिकधर्माभावकथने प्रापञ्चिकभोगाभावोऽप्युक्तः । द्वितीयप्रकारे तु ज्ञानसद्भावाद् भोग इति विरोधाभावात् स्वरूपे सगुणनिर्गुणभेदकल्पनमसङ्ग-

पेक्षमुभयश्रुत्युक्तमित्यर्थः । भगवत्कर्तृकभोगस्य लीलारूपत्वात् तस्याश्च, लोकवत्तु लीलाकैवल्यमित्यत्र मुक्तित्वेन निरूपणात् तत्प्राप्तेः सम्पद्रूपत्वं युक्ततरमिति हिशब्दार्थः ॥ १६ ॥

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

तमित्यर्थः । तदेतन्निगमयितुं हिरण्यशब्दस्यार्थमाहुः। * भगवत्कर्तृकेत्यादि * । एवमनेनापि प्रकारेण फलस्वरूपमेव विचारितं भवति ॥

शाङ्करास्तु—मुक्तस्यानेकशरीरावेशलक्षणैश्वर्याऽभ्युपगमे, तत्केन कं विजानीयादित्यादिश्रुतिविरोधशङ्कायां, तत्केन कं, सलिल एक इत्यादौ यद्विशेषविज्ञानवारणं तत् सुषुप्तिकैवल्यावस्थयोरन्यतरापेक्षम् । कुतः । आविष्कृतं हि यतो हेतोस्तत्रैव तदधिकारवशादाविष्कृतं यत्र सुप्तो न कञ्चनकामं कामयते, न कञ्चन स्वप्नं पश्यतीत्यनेन । एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति । यत्र त्वस्य सर्वमात्मैवाभूदित्यनेन च प्रकटीकृतः । इदं तु सगुणविद्याविपाकस्थानं स्वर्गादिवदवस्थान्तरम् । यत्रैतदैश्वर्यमुपवर्ण्यतेऽतो न दोष इत्येवं सूत्रार्थमाहुः । तेषामियं सम्पत्त्यवस्थातो हीनावस्थेत्यभिप्रायः । तदेतदन्ये न क्षमन्ते । तथाहुर्भास्कराचार्या रामानुजाचार्याश्च—अत्र सम्पत्तिपदेन, वाङ् मनसि सम्पद्यत इत्यादिनोक्ता मरणावस्था परामृश्यते । अतः सुषुप्तौ मरणावस्थायाश्च विशेषविज्ञानवारणम् । यत्र सुप्तः, एतेभ्यो भूतेभ्य इति श्रुतिभ्यां यतस्तत्रैव तदधिकारवशादाविष्कृतम् । तेन शरीरेन्द्रियविषयनिबन्धनं यद्विशेषविज्ञानं तदेव वार्यते, इत्यदोषः । न तु परं भावं प्राप्तस्य विद्याकर्मसामर्थ्यात्सर्वविषयं सामान्यज्ञानमाविर्भूतं तन्न वार्यत इत्यदोषः । यत इन्द्रप्रजापतिसंवादे एव सुषुप्तौ निःसम्बोधत्वमुक्त्वाऽग्रे मुक्तमधिकृत्य, स वा एष एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोक इति सर्वज्ञत्वकथनादिति । अस्मन्मते त्वेतावान् विशेषः । शाङ्करोक्तमुक्ताऽवस्था प्रथमा कक्षा । एताभ्यामुक्ताऽवस्था तु मध्यमकक्षा । भाग भगवत्साहित्याभावादिति ॥ १६ ॥ ४ ॥

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ एवं भोगोप-

ब्रह्मणा सह भोगकारणं लौकिकव्यापारयुतमुत नेति संशये तद्युतमिति पूर्वः पक्षस्तथा सति मुक्तित्वभङ्गात् पूर्वोक्तमनुपपन्नमिति प्राप्ते, आह । जगदित्यादि । पूर्वोक्तस्य जगत्सम्बन्धी लौकिको यो व्यापारः कायवाङ्मनसां तद्वर्ज्जं तद्रहितं भोगकरणम् । तत्र हेतू आह । प्रकरणादसंनिहितत्वाच्चेति । ब्रह्मविदाप्नोति परमित्युपक्रमेण मुक्तिप्रकरणात् तत्र लौकिकव्यापारोऽसम्भावितः। किञ्च, लीलायाः कालमायाद्यतीतत्वेन प्राकृतं जगद् दूरतरमितोऽपि हेतोर्न तत्सम्भवः । कदाचिल्लोके लीलाप्रकटनेच्छायां तदधिष्ठानत्वयोग्ये मथुरादिदेशेऽतिशुद्धे गोलके चक्षुरिन्द्रियमिव स्थापयित्वा लीलां करोति। तदापि लीलामध्यपातिनां

करणं विचार्य भोगप्रकारं विचारयितुमधिकरणान्तरमारभत इत्याशयेन विषयसंशयपूर्वपक्षान् वदन्तोऽधिकरणमवतारयन्ति । * ब्रह्मणा सहेत्यादि * । संशयबीजं तु भोगे लौकिकव्यापारयुक्तत्वस्य लोके दर्शनम् । एतस्य भोगस्य सायुज्यमुक्त्युत्तरभावित्वं च ज्ञेयम् । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति । * पूर्वोक्तस्येत्यादि * । * पूर्वोक्तस्येति * । प्राप्तसायुज्यस्य पुष्टिभक्तकायवाङ्मनसामित्यत्र टजभावः समासान्तस्याऽनित्यत्वेन वैकल्पिकत्वाज्ज्ञेयः । असन्निहितत्वं व्याकुर्वन्ति । * किञ्चेत्यादि * । एतेनाक्षरब्रह्मण्येव सम्भोगो बोधितः । निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नम इति द्वितीयस्कन्धे तथा सिद्धत्वात् । तर्हि, ते ते धामानीत्यादिश्रुतिषु भूमौ भोगः कथमुच्यत इत्यत आहुः । * कदाचिदित्यादि * । * कदाचिदिति * । जगद्बुद्दिधीर्षाऽवसरे । * स्थापयित्वेति * । अक्षरं स्थापयित्वा । तथाच तस्मात्तथोच्यत इत्यर्थः । नन्वेवमक्षरस्य भूमौ प्रकटने तत्र स्थितानां भक्तानां भूमिसम्बन्धजगुणदोषसंसर्गाल्लौकिकव्यापारप्रसङ्गो दुर्वार इत्यत आहुः * तदापीत्यादि * ननु प्रमाणाभावे दृष्टान्तमात्रस्याऽकिञ्चित्करत्वाच्च भक्ता-

न लौकिकव्यापारसम्भवः । न हि चक्षुरिन्द्रियं गोलककार्यं करोति । न वा तन्नाशे नश्यति । एतत्सर्वं, दिवीव चक्षुराततमिति श्रुतिव्याख्याने विद्वन्मण्डने प्रपञ्चितम् । किञ्च । छान्दोग्ये, भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इत्युक्त्वा भूम्नो लक्षणमाह । यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमेति । अत्र, नान्यद्विजानातीत्येतावतैव चारितार्थ्येऽपि यदिन्द्रियव्यापारो निषिद्धस्तत्राप्यन्यविषयकस्तेन भगवद्विषयकः स सिद्धो भवतीति जगद्व्यापारराहित्यं सिद्धम् । तत्र तेन भगवान एव स्वतन्त्रं फलत्वमुक्तं भवति । न हि सुखस्यान्यत् प्रयोजनमस्ति ॥ १७ ॥

नां लौकिकव्यापारराहित्यसिद्धिरित्यत आहुः । * एतादित्यादि * । * प्रपञ्चितमिति * । चक्षुरिति द्वितीयैकवचनान्तं पदमित्यादिना प्रपञ्चितम् । तस्मिन् व्याख्यान आग्रहवाद इति शङ्का स्यादिति तदर्थं भूमविद्याश्रुतिमुदाहरन्ति । * किञ्च, छान्दोग्य इत्यादि * । * इन्द्रियव्यापार इति * । पश्यति शृणोतिभ्यामुक्तः सः । तथाचास्यां श्रुतौ लौकिकव्यापारराहित्यस्य सिद्धत्वात्तत्र तथा व्याख्याने नाग्रहवाद इत्यर्थः । अत्र यत्पारिशेष्यात्सिद्धं तस्य फलमाहुः । * तेनेत्यादि * । तत्र हेतुः । * न हीत्यादि * । न हि भूमविद्यायां प्रतिपाद्यमानस्य भूमरूपस्य सुखस्य फलत्वातिरिक्तमन्यत् प्रयोजनं कथमप्यस्ति तस्मात् तथेत्यर्थः ।

यत्तु भाष्यान्तरेऽस्मिन् सूत्रे ब्रह्मसायुज्यं ब्रह्मसाम्यं वा प्राप्तस्य जीवस्यैश्वर्यादिकं जगत्सृष्टिव्यापाररहितमेव भवतीति विचारितम् । तदस्माकमतं, नेतरोऽनुपपत्तेरित्यानन्दमयाधिकरणे एव साधितमिति न काचिन्न्यूनतेति बोधितम् । यत्तु निरङ्कुशजगत्कर्तृत्वस्यैव ब्रह्मलक्षणत्वाद् ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्या जीवस्य ब्रह्मभावे बोधिते तस्यापि तदभेदाज्जगद्व्यापारोऽस्तु, तथा सतीदं सूत्रमवान्तरमुक्तिविषयमिति कश्चित्, तदसङ्गतम् । वेदस्तुतौ, समममुजानतां

प्रत्यक्षोपदेशादितिचेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

नन्वेतत्प्रकरण एव छान्दोग्ये पठ्यते, सर्वं ह पश्यतीति सर्वविषयकप्रत्यक्षमुपदिश्यत इत्यन्यविषयव्यापाररहितं नोपपद्यत इत्याशङ्क्य समाधत्ते । आधिकारिकेत्यादिना । अत्रेदमुच्यते । सोऽश्नुते, लोकवत्तु लीलाकैवल्यमित्यादिभिर्नित्यलीलामध्यपातित्वं तस्योच्यते । नान्यत पश्यतीत्यादिश्रुतिवशाज्जगद्व्यापार-

---

यदमतं मतद्युतयेति जीवे तादृशनियन्तृत्वभावस्य ब्रह्मविदसम्मतत्वकथनेन तादृशजगत्कर्तृत्वादेरपि निरासबोधनादतः सायुज्येऽपि तदभावः सूत्रकाराभिमत इति ज्ञेयम् । तथाच यथा भूमिसम्बन्धिनो मथुरादिदेशस्य लौकिकत्वं, तत्र स्थापितस्य चालौकिकत्वं, तथा तत्र स्थितानां लौकिकदेहे निविष्टत्वाल्लौकिकत्वं तदन्तःस्थापितानां सदेहानामेव लीलास्थानामलौकिकत्वम् । तेन लौकिकालौकिकोभयकार्यकरणं तादृशतादृशतत्तज्ज्ञानविषयत्वं नानुपपन्नं, नापि लीलासाङ्कर्यप्रसङ्गः । चक्षुरिन्द्रियदृष्टान्तेनैवोपपादितत्वादित्यर्थः ॥ १७ ॥

प्रत्यक्षोपदेशादितिचेन्नाधिकारिकमण्डलस्थोक्तेः ॥ सूत्रं व्याकुर्वन्ति । * नन्वेत्यादि * । ननु भूमविद्यास्थस्य, नान्यत् पश्यतीत्यादिवाक्यस्य बलेन भक्तस्याऽक्षरे ब्रह्मणि जगद्व्यापाररहितो भोग इति यदुक्तं तन्नोपपद्यते । यत एतत्प्रकरण एव छान्दोग्ये भक्तस्य जगद्व्यापारः पठ्यते । स को वेत्यत आहुः । सर्वं ह पश्यः पश्यतीति । जगद्विषयकप्रत्यक्षरूपः स इत्यतस्तथेत्याशङ्क्य समाधत्त इत्यर्थः । समाधानांशव्याख्यानाय हेत्वंशस्फुरणे तेनाशङ्कान्तरस्यापि निवृत्तिमालोच्य तमप्यर्थं संग्रहीतुं प्रकारान्तरेणावतारयन्ति । * अत्रेदमित्यादि * । अत्र अवतारणग्रन्थे, इदं वक्ष्यमाणमधिकमुच्यते, न तु तावन्मात्रमित्यर्थः । किं तदित्याकाङ्क्षायाम् आक्षेप्यं विषयमाहुः । सोऽश्नुत इत्यादि * । * तस्येति * । भक्तस्य । एवं विषयमनूद्य तत्र विचारः क्रियत इत्याहुः । * अत्रेत्यादि * ।

वर्ज्जं भोगकरणं पूर्वसूत्रेणोक्तम्। अत्रेदं विचार्यते। नान्यत् पश्यतीति प्रकरण एव सर्वं ह पश्यतीति सर्वविषयकं दर्शनमुच्यते तत् कथं पूर्वोक्तमुपपद्यत इति। किञ्च। एकस्यैव भक्तस्य देशकालभेदेन क्रियमाणाऽनेकलीलासम्बन्धित्वं भवति। तच्च लीलानित्यतायां न घटते। यतस्तत्तद्देशतत्तत्कालसम्बन्धिनी सा नित्या। एवं सत्येकस्यानेकरूपत्वं जीवस्य न सम्भवतीति तन्नित्यत्वमपि न सिद्ध्यतीति। तत्रोच्यते। श्रुतौ सर्वपदेन न जगदुच्यते, किन्तु यस्यां यस्यां लीलायां देशकालभेदेन क्रियमाणायामधिकृतो य

अत्रास्मिन् सूत्रे इदम्। उक्ताभ्यां श्रुतिभ्यां सूत्राभ्यां च यदुक्तं तद्विचार्यत इत्यर्थः। विचारमाहुः। * नान्यदित्यादि *। अत्र, नान्यदित्यारभ्य पूर्वोक्तमुपपद्यत इत्यन्तेन पूर्वोक्तवाशङ्कानूदिता। सोऽश्नुत इत्यादिविषयिणीं द्वितीयामाहुः। * किञ्चेत्यादि *। सोऽश्नुते, स वा एष एवं पश्यन्, सर्वं हि पश्यः पश्यतीत्यादिश्रुतौ श्रीभागवतादिषु च एकत्वकथनेन भक्तानामेकस्यैव रूपस्य प्रत्यक्षोपदेशाद् एकस्यैव भक्तस्य देशकालभेदेन क्रियमाणाऽनेकलीलासम्बन्धित्वमुक्तं भवति। तच्च लीलानित्यतायां न घटते। यतस्तद्देशकालसम्बन्धिनी तत्तद्विशेषणविशिष्टैव नित्या ध्वंसाद्यप्रतियोगिनी। एवं देशकालभक्तविशिष्टायाः लीलाया नित्यत्वे सति देशकालयोरन्यान्यत्ववद् भक्तस्याप्यनेकरूपत्वं वाच्यम्। तच्चानुक्तत्वाज्जीवस्य न सम्भवति, इति एवं विशेषणविघटने तस्याः लीलायाः नित्यत्वमपि न सिद्ध्यतीत्यतो न घटत इत्यर्थः। प्रत्यक्षोपदेशादित्यत्र प्रथमपक्षे षष्ठीतत्पुरुषो द्वितीयपक्षे च कर्मधारयो ज्ञेयः। एवमाशङ्कांशं द्वेधा व्याख्याय समाधानांशं व्याकुर्वन्ति। * तत्रोच्यत इत्यादि *। तथाचाधिकारोऽत्र भक्तानां लीलानुभवयोग्यतासम्बन्धाधिकारिकं तेषां मण्डलं समूहस्तत्र यस्तिष्ठति तस्योक्तेः कथनात् श्रुतौ तथोच्यत इति नानुपपन्नं किञ्चित्। श्रौतस्य दर्शनविषयवाचकस्य सर्वपदस्य सङ्कोचितवृत्तिकत्वात्तद्विषयकदर्शने-

एको भक्तस्तस्यैव तावन्ति रूपाणि सन्ति तान्याधिकारिकाणी-त्युच्यन्ते। तेषां मण्डलं समूहस्तत्र स्थितवस्तुमात्रमुच्यत इति नानुपपन्नं किञ्चित् । अत एवाग्रे पठ्यते । सर्वमाप्नोति सर्वश इति, स एकधा भवति त्रिधा भवति पञ्चधा भवति सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः । शतं च दश चैकश्च सहस्राणि च विंशतिरिति । यथा मण्डलवर्त्तिषु पुंसु नैकस्य प्राथम्येन प्राधान्यं वक्तुं शक्यं तथैतेष्वपि रूपेष्विति ज्ञापनाय मण्डलपदमुक्तम् ॥ १८ ॥

विकारावर्त्ति च तथाहि स्थितिमाह ॥ १९ ॥

नन्वेवं सति श्वस्त्वद्देहमायास्य इति प्रभुणोक्ते तदाशया त-

ऽपि भोगस्य जगद्व्यापाररहितत्वं नानुपपन्नम् । तथा, सोऽश्नुत इत्यादावेकवचनस्य भक्तस्वरूपविषयकत्वात् स भक्तस्तद्देशत-त्तत्कालभेदेन क्रियमाणा लीलाः आधिकारिकदेहसमूहस्थः पश्यतीति तत्तद्विशेषणविशिष्टानां लीलानां तदनुभवितुर्भक्तस्य च नित्यत्वं नानुपपन्नमित्यर्थः । ननु सर्वपदार्थसङ्कोचे भक्तरूपबाहुल्ये च किं मानमित्यत आहुः । * अत एवेत्यादि * । * अग्र इति * । सर्वं ह पश्यः पश्यतीत्यस्याग्रे । तथाच सर्वमाप्नोतीति वाक्ये सर्वैः प्रकारैः सर्वप्राप्तिश्रावणात् सर्वं पश्यतीति वाक्यस्थसर्वपदेन विवक्षितग्रहणस्यैव युक्तत्वात् । तथा स एकधेति वाक्ये भक्तस्य बहुधा भवनश्रावणात्, सोऽश्नुत इत्यादावपि बहुभी रूपैर्भोगरूपस्य लीलानुभवस्य युक्तत्वादिति । ननु मण्डलपदेन चक्राकारेण परिणतः समूह उच्यते, न तु सामान्यसमूहोऽतः कथमेवमुच्यत इत्यतो मण्डलपदस्य तात्पर्यमाहुः । * यथेत्यादि * । तथाचैतज्ज्ञापनाय मण्डलपदं, न तु समूहस्य चक्राकारेण परिणतेर्ज्ञापनायेत्यर्थः ॥ १८ ॥

विकारावर्त्ति च तथा हि स्थितिमाह ॥ एवं श्रुतिविरोधं परिहृत्य लौकिकविरोधं परिहरतीत्याशयेन सूत्रमवतारयन्ति * नन्वेवं सतीत्यादि * एवं सतीति * तत्तल्लीलातत्तद्देशतत्तत्कालतत्तद्-

त्स्थितिर्नोपपद्यते । नियतत्वाल्लीलायास्तस्य कालस्य तदागमनस्य च तदापि वर्त्तमानत्वात् । तथा प्रभूक्तिरपि नोपपद्यत इत्याशङ्क्य समाधत्ते । इह भगवल्लीलाप्रकृतिस्तद्विरुद्धोऽर्थो विकार इत्युच्यते । तत्र न वर्त्तते तज्ज्ञानं तादृशं च भवति । यत्स्वरूपं प्रति तथा वदति तस्य स्वगेहे तदा भगवत्स्थितिज्ञानं न भवतीत्यर्थः ।

भक्तदेहानां नित्यत्वे सति । व्याकुर्वन्ति । * इहेत्यादि * । * इहेति * । भगवत्सम्बन्ध्यर्थविचारे, भगवल्लीलाप्रकृतिः, रसात्मककृत्स्नगुणवत्त्वात्, अनुकृत्यधिकरणसिद्धकारणत्वाद्वा । तद्विरुद्धोऽर्थो लौकिकः स हि विकार इत्युच्यते तत्प्रतिकृतिभूतयत्किञ्चित्सद्गुणवत्त्वात् । कार्यत्वाद्वा । तत्र लौकिके विकारभूतेऽर्थे न वर्त्तते तद् ब्रह्मणा सह भोगकरणम् । अत आधिकारिकमण्डलस्थं सर्वं तदन्तःपातिज्ञानं च विकारावर्त्ति तादृशं तत्समानाकारं च भवति । अत एवेतः पूर्वम्, आत्मत आशा आत्मत आविर्भावतिरोभावावित्यादि श्रावितम् । अन्यथा तन्न वदेत् । तदेतदत्र सर्वं चकारेण सूच्यते । तथाच, स एकधा भवतीति श्रुतिबलेनैकस्य भक्तस्य यान्यनेकानि रूपाण्यङ्गीकृतानि तानि योगिकायव्यूहवन्न नानादेशवर्त्तीनि, किन्तु तथैकस्मिन्नेव भगवत्स्वरूपे विद्यमानानि प्रद्युम्नादिव्यूहरूपाणि तत्कार्ये प्रकटीभवन्त्यपि न स्वरूपाद्भिन्नतया प्रतीयन्ते । तथा भक्तशरीराण्यप्येकस्मिन्नेव वर्त्तमानानि तत्कार्ये बहिर्भवन्ति । एवं यत्स्वरूपं प्रति, श्वस्त्वद्गृहमायास्य इति वदति तस्य स्वगृहे प्रथमदिने भगवत्स्थितिज्ञानं न भवति तस्य विरहानुभवयितृरूपं बहिर्भवति, पूर्वोक्तं चान्तः । ततो द्वितीयदिने पूर्वोक्तं बहिर्भवति विरहानुभवयितृ चान्तस्तयोरन्तर्भावबहिर्भावौ तेन न ज्ञायेते एकमेव स्वमनुभवतीत्येवं लीलारसालत्वार्थे दिङ्मात्रेण प्रदर्श्यते । वस्तुतस्तु यथा नित्यव्यापकशब्दवादिजैमिनीयमते व्यञ्जकस्य वायोर्ध्वनेर्वा अभावेन न वर्णात्मकशब्दस्य सर्वत्र सदा ज्ञानं, यथा च नित्यव्यापकात्मवादिकाणादादिमते स्वदेहादन्यत्र तद्वृत्तिलाभस्थानभूतदेहाभावेन न स्वात्मज्ञानं, त-

उपलक्षणं चैतदतो यद्देशकालविशिष्टा यादृशी या लीला तस्या-स्तादृश्या एव तल्लीलामध्यपातिनो भक्तस्य ज्ञानं, नान्यविषयक-मिति ज्ञेयम् । अत एव द्वितीयस्यापि, मह्यं पूर्वमुक्तमासीत्तेनागत इत्येव ज्ञानं भवति । तदैव हि रसोदयोऽतो रसस्वरूपमध्यपाति-त्वाल्लीलाया रसस्य च भगवदात्मकत्वाद्भगवद्रूपत्वेन सर्वमुपप-द्यते लीलायाम् । अत्र प्रमाणमाह । तथाहि स्थितिमाहेति । स-र्वमाप्नोति सर्वश इति श्रुतिरेकस्यैव भक्तस्य सर्वशः सर्वैः प्रकारैः सर्वलीलारसमाप्नोतीति वदन्त्युक्तरीत्यैव लीलायां स्थितिमाहेत्यर्थः अतो वस्तुत्वेवेदमलौकिकमीदृशमिति मन्तव्यं वैदिकैरिति भावः । अलौकिकेऽर्थे लौकिकरीत्यनुसरणं न युक्तं, किन्त्वलौकिकरीत्य-नुसरणमेव युक्तमिति हि शब्देन द्योत्यते । एतेन, रसो वै स इति श्रुतेर्लीलाविशिष्ट एव प्रभुस्तथेति तादृश एव परमफलमिति ज्ञापितं भवति ॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

याऽत्र लीलादिव्यञ्जकभगवदिच्छाभावेन न भगवत्स्थित्यादिज्ञानं भवतीत्यर्थः । एवं सूत्रैकदेशं व्याख्याय तेनानुक्तस्यान्यस्यापि तथा सिद्धिमाहुः । * उपलक्षणमित्यादि * । तथाच "अचिन्त्याः खलु ये भावास्तांस्तर्केण प्रसाधयेत् । प्रकृतिभ्यः परं यच्च तदचि-न्त्यस्य लक्षणमि"ति मत्स्यपुराणवाक्यात् । अत एवं श्रुतिमूलक-तर्कादपि सर्वं सुस्थमित्यर्थः । उपपादनप्रकारस्य प्रामाणिकत्वाय सूत्रशेषमवतारयन्ति । * अत्रेत्यादि * । सिद्धमाहुः । * अत इ-त्यादि * । तथाच, नैषा तर्केणेति श्रुतेः, अलौकिकास्तु ये भावा न तांस्तर्केण योजयेदिति स्मृतेश्च श्रुत्यनुसारेणैव निर्णयमिति सि-द्धस्तथेत्यर्थः ॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ भगवत्सम्बन्धिपदार्थानां श्रु-

नच लौकिकयुक्तिविरोधोऽत्र बाधकत्वेन मन्तव्यः, किन्तु साधकत्वेन । यतः प्रत्यक्षाऽनुमाने श्रुतिस्मृती अपि लौकिकयुक्त्यप्रसारणाल्लौकिके भगवत्सम्बन्धिन्यर्थेऽन्यथाभावनं निषेधति, नैषा तर्केण मतिरापनेया । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च । अलौकिकास्तु ये भावा न तांस्तर्केण योजयेत् । श्रीभागवते च— न हि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाशयदुरवग्रहवादिनां विवादानवसर इत्यादिवाक्यैरचिन्त्यानन्तशक्तिमत्त्वेन भगवत्स्वरूपस्यैव परमफलत्वं प्रदर्श्यते । किञ्च । ता वां वास्तून्युष्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरीति ऋग्वेदे पठ्यते, किञ्चित्पाठभेदेन यजुःशाखायामपि । ता तानि वास्तूनि वां गोपीमाधवयोः सम्बन्धीनि गमध्यै प्रमादत्वेन प्राप्तुमुष्मसि कामयामहे । तानि कानीत्याकाङ्क्षायां गूढाभिसन्धिमुद्घाटयति, यत्र श्रीगोकुले गावो भूरिशृङ्गा बहुशृङ्गा रुरुप्रभृतयो वसन्तीति शेषः । ग्राम्यारण्यपशूपलक्षणार्थमुभयोरेव ग्रहणम् । अत्राह । भूमावेव तदुरुगायस्य बहुगीयमा-

---

त्स्वागम्यस्वरूपं पूर्वोक्तमर्थमेव दृढीकर्त्तुं सूत्रान्तरं पठतीत्याशयेन सूत्रं व्याकुर्वन्ति । * नचेत्यादि * । भाष्यमत्र निगदव्याख्यातम् । अत्र नैषा तर्केणेति काठकश्रुतेर्जीवप्रश्नोत्तरवर्त्तित्वेन तया भगवत्सम्बन्धिनामर्थानां तर्कागोचरत्वसाधनं न युक्तमित्याशङ्क्य, ब्रह्मप्रकरणस्थायाः, परास्य शक्तिरिति द्वितीयस्याः श्वेताश्वतरश्रुतेरुपन्यासः । अलौकिकास्त्वित्यस्याः स्मृतेः प्रसिद्धत्वेन विषयान्तरे चारितार्थ्यमाशङ्क्य श्रीभागवतषष्ठस्कन्धीयस्य, न हि विरोधमि-

नस्य वृष्णः । भक्तेषु कामान् वर्षतीति वृषा तस्य पदं स्थानं वैकुण्ठं ततोऽपि परममधिकमत्र विचित्रलीलाकरणात् । भूरि यमुनापुलिननिकुञ्जगोवर्द्धनादिरूपत्वेन बहुरूपम् । तथाच तत्रस्थानि तानि कामयामह इति वाक्यार्थः सम्पद्यते । एतेन लीलासम्बन्धिवस्तूनां यत्र फलत्वेन बहुरूपप्रार्थनं तत्र तल्लीलाकर्त्तुः परमफलत्वे किं वाच्यमित्याशयो ज्ञाप्यते । अथ ह वा व तव महिमाऽमृतसमुद्रविप्रुषा सकृल्लीढया स्वमनसि निष्पन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतसुखलेशाभासाः परमभागवता इति श्रीभागवते । एतेनापि कैमुतिकन्यायेन प्रभोरेव स्वतः पुरुषार्थत्वं ज्ञाप्यते । फलप्रकरणत्वात्तदेवाचार्यतात्पर्यविषय इति ज्ञायते ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

इतोऽपि हेतोः पुरुषोत्तमस्वरूपमेव परमं फलमिति ज्ञायते ।

ति वाक्यस्योपन्यासः । एवमेतैः प्रमाणैर्लीलाया अलौकिकत्वं निगमयित्वा तन्मुखेनापि भगवतः फलत्वनिगमनाय किञ्चेत्यादिना शाखाद्वयस्थश्रुत्युपन्यासः । ऋक्शाखास्थश्रुतेर्यास्केन सूर्यकिरणपरतया निर्वचनात् तदर्थभ्रमनिरासाय यजुःशाखापाठस्मारणम् । तेन यास्कोक्तस्य शृङ्गादिपदनिरुक्तमात्रार्थत्वं, न तु तत्तात्पर्यकत्वम् । ऋचो विष्णुसूक्तस्थत्वात्, तैत्तिरीयपाठे च विष्णुपदाद् अग्रेऽपि, विष्णोः कर्माणि पश्यतेत्यादिमन्त्रदर्शनाच्च । एतदुपष्टम्भायैव, अथ ह वा वेति श्रीभागवतवचनोपन्यास इति । शेषं स्फुटम् ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ सूत्रमवतारयन्ति । * इतोऽपीत्यादि * । * इतोऽपीति * । मात्रं कात्स्न्येऽवधारणे । भोगमात्रे भोगे एव यत् साम्यं भक्तेन सह तौल्यमस्यां श्रुतौ सहपदेन भाव्यते,

यतः, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति श्रुतौ भक्तसाम्यमुच्यते । तच्च पुरुषोत्तम एव सम्भवति । यतः सख्यं दत्वा तत्कृतात्मनिवेदनमङ्गीकुर्वन्नऽतिकरुणः स्वस्वरूपानन्दमनुभावयँस्तं प्रधानीकरोति । अन्यथा भक्तोऽनुभवितुं न शक्नुयात् । युक्तं चैतत् । प्राप्तं फलं स्वाधीनं भवत्येवान्यथा फलत्वमेव न स्यात् । तथाचाऽस्माल्लिङ्गादपि प्रभोरेव परमफलत्वं सिद्ध्यति । न तत्समश्चाभ्याधिकश्च दृश्यत इति श्रुतिविरोधपरिहाराय मात्रपदम् । नचात्र कामभोगस्य फलत्वं शङ्कनीयम् । आप्नोति परमितेतद्व्याकृतिरूपत्वात् स्वरूपानुभवरूपत्वाद् भोगस्य । अनुभूयमानस्यैव हि सुखस्य लोके पुरुषार्थत्वोक्तेः ॥ २१ ॥

एवं भगवतः स्वतः पुरुषार्थरूपत्वमुक्त्वा कर्मफलभोगानन्तरमावृत्तिवदत्राप्यावृत्तिर्भविष्यतीत्याशङ्कानिरासायोत्तरं पठति ।

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

तस्माल्लिङ्गादपि । तद् व्याकुर्वन्ति * यत इत्यादि * पुरुषोत्तम एवेत्येवकारेणाक्षरं व्यावर्त्यते । तत्र हेतुः । * यतः सख्यमित्यादि * । नन्वत्र कामानामेव प्राप्तेरुक्तत्वात्तद्भोगस्यैव फलत्वमस्त्विति चेत्तत्राहुः । * नचेत्यादि * । आप्नोति परमित्यतद्व्याकृतिरूपत्वादिति * । आप्नोतिपरमिति यद्वाक्यं तद्व्याख्यानरूपत्वात् । ननु यदि भगवत एव फलत्वं तदा कामानामशनं किमिति विवरणत्वेनोच्यत इत्यत आहुः । * स्वरूपेत्यादि * । तत्र युक्तिमाहुः । * अनुभूयमानस्येत्यादि * । तथाच फलत्वव्युत्पादनार्थं, तत्र तु फलत्वार्थमित्यर्थः । एवमनया पञ्चसूत्र्या भोगप्रकारविचारोऽपि भगवतः परमफलत्वबोधनायैवेति ज्ञापितम् । इदमेवाचार्यैः पुष्टिप्रवाहमर्यादायां पुष्टिफलविचारे "भगवानेव हि फलं स यथाऽऽविर्भवेद् भुवि । गुणस्वरूपभेदेन तथा तेषां फलं भवेदि"त्यनेनोक्तं ज्ञेयम् ॥ २१ ॥

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ सूत्रमवतारयन्ति * एवमित्या-

अनावृत्तिर्भक्तानां ज्ञानिनां चोच्यते । तत्र मानं शब्दः । स च—तयोर्ध्वमायन्नऽमृतत्वमेति, न तेषां पुनरावृत्तिरेतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्त्तन्ते, ब्रह्मलोकमभिसम्पद्यते, न च पुनरावर्त्तत इत्यादिरूपस्तु ज्ञानिनां तामाह । न हि भक्तानां नाड्यादिमयुक्तममृतत्वम् । "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह" इत्यादिवाक्येभ्यः । किन्तु, यमेवेति श्रुतेर्वरणमात्रलभ्यः पुरुषोत्तमः । एवं सति ब्रह्म-

---

दि * । व्याकुर्वन्ति । * अनावृत्तिरित्यादि * ननूक्तः शब्दो ज्ञानिनामेव तामाहेत्यत्र गमकमाहुः । * न हीत्यादि * । काठके ज्ञानं प्रस्तुत्य, यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिता इति वैराग्यं चोक्त्वा ततः, शतं चैका च हृदस्य नाड्य इत्यनेनोत्क्रमस्योक्तत्वाद् बृहदारण्यके शारीरब्राह्मणेऽपि तथात्वादन्यत्रापि तथैवेति नाड्यादूर्ध्वगतिहेतुभूतयोर्ज्ञानवैराग्ययोर्भक्तस्य श्रेयस्करत्वाभावेऽप्रोक्तम् । तत्कार्यभूतनाडीगतिप्रयुक्तममृतं न शक्यं वक्तुमतो ज्ञानिनामेव तेन शब्देन तदुच्यत इत्यर्थः । तर्हि भक्तस्याऽनावृत्तिः कुतोऽवगन्तव्येत्यत आहुः । किन्त्वित्यादि * । किन्तु, यमेवेति श्रुतेर्वरणलभ्यः पुरुषोत्तमो भक्तानाममृतत्वम् । स च अक्षरात् परतः पर इति श्रुतेर्यस्मात् क्षरमतीतोऽहमिति गीतावाक्याच्चाक्षरात् परः । एवं वरणलभ्यस्यात्मनोऽक्षरात् परत्वे सति ब्रह्मविदाप्नोति परमिति श्रुतेर्विरोधपरिहारपूर्वकं यद् व्याख्यानं वरणसाहित्ये सर्वकामाशनरूपो ब्रह्मस्वरूपानन्दानुभवो, वरणसाहित्याभावे तु लोकत्वेनाक्षरप्राप्तौ तदानन्दानुभवोऽक्षरसायुज्यं वा यथाऽधिकारमिति पूर्वमुक्तं तद्रीत्या अक्षराधिष्ठातारं पुरुषोत्तमं परं ब्रह्म वरणेन प्राप्तस्य निर्दोषत्वाद् आवृत्तिहेतूनामविद्याकामकर्मणाममभावात् प्रपञ्चेऽनावृत्तिः सम्भवति । तथाचात्र परशब्दे प्राप्यस्याक्षरात् परत्वप्रकाशनसामर्थ्याल्लिङ्गादनावृत्तिर्भक्तानामवगन्तव्येत्यर्थः । ननूभयव्यामोहसूत्रे भक्तव्यामोहस्यापि कचिदुक्तत्वात्तादृशेच्छया कदाचिदावर्त्तिः स्यादिति शङ्कायामाहुः ।

विदाप्नोति परमिति श्रुतेर्विरोधपरिहारपूर्वकोक्तव्याख्यानरीत्या भक्तस्य परं ब्रह्म प्राप्तस्य निर्दोषत्वादावृत्तिहेत्वभावात् प्रपञ्चेऽनावृत्तिः सम्भवति । तादृशं प्रतीश्वरेच्छापि न तथा भवितुमर्हति । "ये दारागारपुत्राप्तप्राणान् वित्तमिमं परम् । हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे" इति भगवद्वाक्यात् परमाप्तिरूपत्वाच्च भोगस्य न नाशसम्भावना । किञ्च यत्रैकस्यैव भक्तस्य देशकालभेदेनानेकविधलीलासम्बन्धित्वेऽपि तत्तल्लीलासम्बन्धित्वमनश्वरमुच्यते तत्र सर्वथा तदभावः कथं वक्तुं शक्यो ब्रह्मणापि । अपरञ्च । कालसाध्यो हि नश्वरः स्याद् न हि पुरुषोत्तमे कालः प्रभवितुं शक्नोति । न यत्र कालोऽनिमिषां परः प्रभुरित्यादिवाक्येभ्यः । तथाच ज्ञानमार्गीयभक्तिमार्गीययोरनावृत्तौ तुल्यत्वेऽपि फलप्राप्तौ वैलक्षण्यात् पूर्ववाक्येन भक्तानामाहाऽनावृत्तिमुत्तरवाक्येन ज्ञानिनामिति ज्ञायते । नच फलप्रकरणान्तेऽनावृत्त्युक्तेः संसाराभाव एव जीवस्य परमं फलमित्याचार्याभिप्रायो ज्ञायत इति वाच्यम् । ब्रह्मविदः परप्राप्तिं फलत्वेनोक्त्वा तत्स्वरूपस्य सर्वकामभोगत्वेन श्रुत्या निरूपणात् । स च स्वस्वाधिकाराऽनुसारेण

---

* तादृशं प्रतीत्यादि * । तथाच ये सर्वात्मभावप्रपत्तिरहिता उक्तभोगात्मकस्वरूपानुभवरहिताश्च तान् प्रत्येव तथेच्छेति, नात्र तत्सम्भवनाऽपीत्यर्थः । समूलकाषमावृत्तिशङ्कानिवृत्त्यर्थं कैमुतिकेनाऽपि तदभावं साधयन्ति * किञ्चेत्यादि * ननु लीलायां देशकालसम्बन्धस्य पूर्वमुक्तत्वाल्लीलानित्यत्वोपपादनमात्रेण कथं शङ्कायाः, समूलकाषं निवृत्तिरित्यतस्तत्र कालस्यासामर्थ्ये प्रमाणमाहुः । * अपरं चेत्यादि * । एवं लीलायाः स्वरूपानुभवस्य च नित्यत्वमुपपाद्य सिद्धमाहुः । * तथाचेत्यादि * । ज्ञानमार्गीयफलस्योत्कर्षमाशङ्क्य समादधते * नचेत्यादि,इत्यमुक्तेत्यन्तम् * । * स चेति *

निवेदितार्थाङ्गीकाररूप एवेति ज्ञेयम् । तेन स एव परमं फलमनावृत्तिस्त्वार्थिकी। परं त्वावृत्तौ सम्भवन्त्यां परमफलत्वं नोपपद्यत इति ज्ञानदुर्बलशङ्कानिरासायेयमुक्ता। पुष्टिमार्गीयभक्तविशेषप्रवर्त्तकनिवर्त्तकवेणुशब्दाद्भगवन्निकटगतावऽनावृत्तिः पूर्वेणोक्ता, मर्यादामार्गीयाणां वेदरूपाच्छब्दात्तदुक्तसाधनादनावृत्ति द्वितीयेनेत्यपि तात्पर्यविषयः श्लिष्टोऽर्थो ज्ञेयः। तथा सति परमफलमग्रे स्वत एव भावीति भाव इत्यलं विस्तरेण ॥ २२ ॥

भोगश्च । * स एवेति * । उक्तरीत्याऽनुभूयमानः पुरुषोत्तम एव । * आर्थिकीति * । परप्रकाशनसामर्थ्याल्लिङ्गात्परप्राप्तिरूपवाक्यार्थबलेन प्राप्ता। तथाच श्रुत्या समर्पितायाः परप्राप्तेरेव मुख्यत्वात्तत्रैवाचार्याभिप्रायो, न तु लैङ्गिक्यामनावृत्तावित्यर्थः। यद्यपि द्विरुक्तिः समाप्तिबोधनार्था, तथापि तत्र श्लेषेणार्थान्तरमपि बोध्यत इत्याहुः । * पुष्टीत्यादि * । वाङ्मनसि दर्शनाच्छब्दाच्चेति सूत्रे तथा साधितत्वात्तथेत्यर्थः । एवमाचार्याशयः पुष्टिमार्गीयफलस्यैव मुख्यत्व इति साधितम् । एवमत्र पादे, ब्रह्मविदाप्नोति परमिति श्रुत्युक्तं ब्रह्मैव सन् ब्रह्माप्येतीति श्रुत्युक्तं च फलं सपरिकरं विचारितम् ॥ २२ ॥

शङ्कराचार्यास्तु–सगुणब्रह्मोपासनात् सहैव मनसेश्वरसायुज्यं प्राप्तानां किं सावग्रहमैश्वर्यं भवत्युत निरवग्रहमिति -संशये, आप्नोति स्वराज्यमिति सर्वेऽस्मै देवा बलिमावहन्तीति, तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिश्रुतिभ्यो निरङ्कुशमैश्वर्यं भवतीति प्राप्तम् । तत्र जगदुत्पत्त्यादिव्यापारं वर्जयित्वैवाऽणिमाद्यैश्वर्यं भवतीति साङ्कुशमेव तत् । जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्येति सिद्धान्तीक्रियते । तत्र हेतुः–प्रकरणमितरेषामसन्निहितत्वञ्च । यत्र हि, सदेव सोम्येदमग्र इत्यादौ जगद्व्यापारः श्रूयते । तत्र परमेश्वर एव प्रकृतो, नेतरेषां सन्निधानं तस्मात् । नच, आप्नोति स्वाराज्यमिति प्रत्यक्षोपदेशविरोधः । एतदग्रे आप्नोति

मनसस्पतिमित्यनेन आधिकारिको यः सवितृमण्डलादिषु विशेषायतनेष्ववस्थित ईश्वरः पूर्वसिद्धः सर्वमनसां पतिस्तत्प्राप्तिश्रावणात्तदायत्तैव स्वाराज्यप्राप्तिरिति बोधनात् । तदग्रे, वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिः, एतत्ततो भवतीति फलस्य तत एव श्रावणाच्च । एवं सूत्रद्वयं व्याख्याय विकारावर्त्तिसूत्रे त्वेवं वदन्ति । परमेश्वररूपं विकारावर्त्ति च । तावानस्य महिमा ततो ज्यायांश्च पूरुष इत्याम्नायो यतस्तस्य परमेश्वरस्य द्विरूपां स्थितिमाह तच्च निर्विकारं रूपं विकारालम्बना न प्राप्नुवन्ति । अतत्क्रतुत्वात् । अतो यथा द्विरूपं परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठन्ते । एवं सगुणेऽपि निरवग्रहमैश्वर्यमनवाप्य सावग्रहाय एवावतिष्ठन्त इति । अग्रिमसूत्रे च, न तत्र सूर्यो भातीति प्रत्यक्षा श्रुतिर्न तद्भासयते सूर्य इति गीतास्मृतिश्च परमेश्वरस्य विकाराऽवर्त्तित्वं दर्शयतः । तदेवं विकारावर्त्तित्वं परस्य ज्योतिषः प्रसिद्धमित्यभिप्राय इति । अग्रे तु भोगमात्रसाम्येनैश्वर्यस्य सावग्रहत्वं व्याख्याय तेन सातिशयत्वं प्राप्ते शब्दादनावृत्ति व्याहृत्य सम्यग्दर्शनानां विध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिस्तदाश्रयणेनैव सगुणशरीराणानामनावृत्तिसिद्धेरिति कैमुतिकमुक्त्वा समापयन्ति ॥

तन्मते विकारावर्त्यादिसूत्रद्वयमनतिप्रयोजनम् । जीवस्य सावग्रहैश्वर्यसाधने रूपद्वयबोधकयोस्तयोरनुपयोगात् । नच दृष्टान्तार्थमुपयोगः । विकारावर्त्तिनोऽप्राप्तौ अतत्क्रतुत्वस्य हेतोरिवात्र सावग्रहैश्वर्ये हेतोरकथनेन दृष्टान्तमात्रस्याप्रयोजकत्वात् । नच वाचस्पतिना निरवग्रहत्वस्योपासनविध्यगोचरत्वादुपासके तदक्रतुत्वस्य समर्थिततया अतत्क्रतुत्वस्यैव तत्रापि हेतुत्वमुक्तप्रायमेवेति वाच्यम् । मनोमयः प्राणशरीर इति हार्दोपासनवाक्ये सर्वकर्मेति विशेषणस्य सर्वं विश्वं तेनेश्वरेण क्रियत इति जगत्सर्वं कर्मास्य स सर्वकामो स हि सर्वस्य कर्त्तेतिश्रुतेरित्येवं व्याख्याततया निरवग्रहत्वस्य विध्यगोचरताया वक्तुमशक्यत्वात् । नचोपासनासु पुरुषस्य विध्यधीनत्वेनास्वातन्त्र्यात् फलदशायां तथात्वमिति युक्तम् । पूर्वावस्थाधर्मस्य तदानीमुपगमे बद्धत्वस्यापि तदा प्राप्त्यापत्त्या मुक्तिविप्लवस्यैवापत्तेः । यच्च स्वातन्त्र्ये प्रातिभत्वप्रसङ्गादित्युक्तं,

तत्र नवनवोल्लासशालिनी बुद्धिः प्रतिभा, तत्सम्बन्धत्वमिति यदि तदा तु, स यदि पितृलोककामो भवतीत्यादिना नवनवबुद्धीनां श्रुत्यैव सूचनात्तत्प्रातिभत्वे स्वातन्त्र्यस्य दुरपोहताया एव सिद्धेः । तथाच "युक्तिभिरतिशिथिलाभिः समादधानो दृढान् दोषान् । वाचस्पतिरपि भाष्यव्याख्याव्याजेन दूषणं व्यक्ती"त्यव सिद्धम् । नचैवं सिद्धान्तेऽपि मनोमयवाक्योक्तोपासकस्य तथात्वापत्त्या जगद्व्यापारापत्तिरितिशङ्कनीयम् । न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुत्या तादृशस्य फलस्य ततो व्यभिचारणात् । यथा क्रतुरिति पुरुषविशेषणबोधकं पदं प्रकारांशे पुरुषाधिकारस्यापि निविष्टत्वात् समत्वाद्याकाङ्क्षायाश्च, तेनार्हति ब्रह्मणा स्पर्द्धितुं क इति, उषति ह वै स तं योऽस्मात् पूर्वो बुभूषतीति श्रुतिभ्यां निषिद्धत्वेन तादृशोपासनेऽधिकारस्य निवृत्तेश्च । नचायमेव समाधिः शाङ्करेऽपि मतेऽस्त्विति वाच्यम् । तन्मते निर्गुणस्य रूपस्य सर्वाभ्यधिकत्वेन सगुणेऽभ्यधिकराहित्याभावेनाधिकसाहित्ये प्राप्ते उक्तरीत्या समसाहित्यस्यापि वक्तुं शक्यतया तद्राहित्यस्यापि दुरुपपादत्वेनैतच्छ्रुतिविषयतायास्तत्र वक्तुमशक्यत्वात् । समाभ्यधिकनिषेधावधिकतया निर्गुणबोधकत्वे च सगुणे समसाहित्यस्यैवापत्तेश्च । अधिकारविचारेणाऽतत्क्रतुत्वसाधने च निरवग्रहतायाः प्राप्तेरेवाभावेन स्वातन्त्र्यशङ्काया एवानुदयात् स्वातन्त्र्ये प्रातिभत्वप्रसङ्गस्यैवाऽभावादिति दिक् ॥

भास्कराचार्यास्तु—सिद्धान्ते, अविभागेन दृष्टत्वादित्यारभ्य परमकारणे सायुज्यं गतानां निरवधिकमैश्वर्यमिति स्थितम् । ये पुनर्वेदान्ते द्वैतवादिनो मन्यन्ते, मुक्ताः पृथगवतिष्ठन्त इति, तन्मतमभ्युपगम्य सावधिकमैश्वर्यं तेषामपि प्रतिपादयितुं जगद्व्यापारवर्जाधिकरणमारभत इत्युक्त्वा, जगद्व्यापारादिसूत्रं पूर्ववदेव व्याख्याय, विकारावर्त्तिसूत्रे, पारमेश्वरं पुनरैश्वर्यं नित्यसिद्धं, विकारावर्त्ति, स्वमहिमप्रतिष्ठत्वात्, तावानस्य महिमेति श्रुतेः । कार्यब्रह्मलोकवर्त्तिनां मुक्तानां सङ्कल्पादेवेति श्रुतेः । तदैरम्मदीयं सरस्तदश्वत्थः सोमसवन इति बहुविधमैश्वर्यं प्रकीर्त्य तत्रेश्वरायत्तमित्युपपन्नम् । दर्शयत इति सूत्रे, परस्य ज्योतिषो विकारावर्त्तित्वं विकारानुग्राहकत्वं च, न तत्र सूर्यो भातीत्यादि श्रुतिस्मृती दर्शयत इत्युक्तवन्त ॥

तन्मते विकारावर्त्यादिसूत्रयोर्यद्यपि न वैयर्थ्यं, तथापि दहरविशोकब्रह्मलोकस्य कार्यत्वं यदङ्गीकृतमेतैरन्यैश्च । तच्चिन्त्यम् । तत्कार्यत्वबोधकप्रमाणानुपलम्भात् । नच प्रभुविमितं हिरण्मयमिति वेश्मविशेषणे विमितमितिपदे निर्मितत्वकथनादेकदेशस्य कार्यत्वे सर्वस्य तथात्वं शङ्क्यम् । विमितपदस्य विशेषेण मितं ज्ञातमित्यर्थकतयाऽपि नेतुं शक्यत्वेन ततो निर्णयाभावात् । नापि, तृतीयस्यामितो दिवीति ब्रह्माण्डान्तर्वर्त्तित्वश्रावणात्तन्नाशे एतन्नाशात्कार्यत्वमिति वाच्यम् । नास्य जरयैनज्जीर्यतीत्यादिना आत्मरूपताबोधनेनास्याः शङ्कायाः प्रागेव निरस्तत्वात् । नच तदन्यदेव, नेदमिति वाच्यम् । एकप्रकरणगतत्वेन पूर्वम्, एतत्सत्यं ब्रह्मपुरमित्यनेनोक्तस्य ब्रह्मपुरस्य, तदरश्च ह वैण्यश्चार्णवौ ब्रह्मलोक इत्यादिना परिकरपूर्वकं तत्प्रपञ्चनस्यैव भासमानतया भेदस्य वक्तुमशक्यत्वात् । उपबृंहितं चैतद् वाराहे चातुर्मास्यमाहात्म्ये चतुर्दशाध्याये क्षीरसमुद्रं प्रकृत्य "तन्मध्ये मम लोकस्तु परितो वलयाकृतिः । योजनानां तु लक्षाणि विंशतिस्तस्य विस्तृतिः । श्वेतद्वीप इति ख्यातः प्रलयेऽपि न नश्यती"त्युक्त्वा, तत्र श्रीभूदुर्गात्मकभागत्रयं तत्परिमाणं संस्थां चोक्त्वा, तत्र भूदुर्गाभागयोस्तत्स्थानां चावान्तरप्रलये नाशाभावमुक्त्वा, तस्मिन् स्थाने लयं याते प्रविशन्त्युदरे ममेति ब्रह्मणो लये भूदुर्गाभागस्थानां स्वोदरे स्थितिमुक्त्वा "श्रीभागे संस्थिता ये तु न तेषां प्रलये भयम् । शाश्वतः स तु मे लोको न नश्येद् ब्रह्मणो लये । मुक्ता एव तु मां तत्र वीक्षन्ते सर्वदैव तु । कल्पान्तप्रभवो वह्निर्जलं वा भूमिदुर्गयोः । भागौ न स्पृशते तौ हि चक्रेण परिरक्षितौ । तत्र स्थास्तु जनाः सर्वे मोदन्ते सर्वदैव तु । कल्पान्तप्रभवां बाधां न ते जानन्ति जातुचित् । श्वेतद्वीपादधस्तात्तु पृथ्वी तिष्ठति पीठवत् । स्पृष्टौ स्पृशति तद्द्वीपं प्रलये तु वियुज्यते । मम शक्त्यैव स द्वीपः सदा तिष्ठति शाश्वतः । भूमिश्रीभागयोर्मध्ये लक्षयोजनविस्तृतः । अरनामा सुधाऽम्भोधिर्मुक्तामुक्तनिषेवितः । अर्धे तस्य तु भूभागः श्रीभागस्यार्धमेव च । लक्षयोजनमध्ये तु द्वीपाकारोऽस्ति तत्तटम् । दशयोजनसाहस्रं विस्तृतिस्तस्य कीर्त्तिता । अर्धनाशो भवेत्तस्य प्रलये च पुनः पुनः । अर्धो भागस्तु मुक्तानां क्रीडास्थानं न नश्यति । दुर्गाश्रीभागयोर्मध्ये ण्यनामाऽमृतसागरः । तस्याऽप्येवं विभागोऽस्ति नि-

स्यानित्यविभेदतः । अर-ण्याख्यौ सुधासिन्धू मम लोकत्रयेऽपि च । वर्त्तेते मम भक्तानां क्रीडायै सर्वकामदा"विति । लोकत्रयं तु वैकुण्ठाऽनन्तासन-श्वेतद्वीपभेदेन तत्रैवोक्तम् । तेषु छान्दोग्योक्तो वैकुण्ठाख्यो ज्ञेयः । तृतीयस्याऽमितो दिवीति विशेषणेन उच्चस्थत्वबोधनादिति । अतः स लोको न कार्यः, किन्तु नित्य एवेति निश्चयः । लोकस्य ब्रह्मरूपत्वादेव च न तत्प्रभोरपि स्वप्रतिष्ठत्वहानिरिति सर्वमनवद्यम् ॥

रामानुजाचार्यास्तु—मुक्तस्यैश्वर्यं जगत्सृष्ट्यादिपरमपुरुषाऽसाधारणम् ? उत तद्रहितं केवलपरमपुरुषानुभवविषयमिति ? संशये, जगदीश्वरत्वमपीति पूर्वः पक्षः । निरञ्जनः परमं साम्यमुपैतीति श्रुतेर्मुक्तस्य सङ्कल्पत्वश्रुतेश्च । तत्र सिद्धान्तस्तु जगद्व्यापारवर्जं मुक्तैश्वर्यं निरस्तनिखिलतिरोधानस्य मुक्तस्य निर्व्याजब्रह्मानुभवरूपमैश्वर्यम् । तत्र हेतुः-प्रकरणादित्यादि । अर्थस्तु पूर्ववदेव । श्रुतयः परं बह्व्य उपन्यस्ताः । अग्रिमसूत्रे च, स स्वराड् भवतीत्यादिभिर्जगन्नियमनरूपं व्यापारमाशङ्क्य आधिकारिकमण्डलस्थोक्तेरित्यस्य अधिकारे नियुक्ता ये हिरण्यगर्भादयो मण्डलं तेषां लोकाः तत्स्थाँ भोगा मुक्तस्याकर्मवश्यस्य भवन्तीत्ययमर्थस्तस्य सर्वेषु लोकेषु कामचारो भवतीत्यादिनोच्यते । तथाच कर्माऽप्रतिहताज्ञानो मुक्तो विकारिलोकान् ब्रह्मभूताननुभवतीत्यनेन वाक्येनोच्यते. न जगद्व्यापार इत्युक्त्वाऽग्रिमसूत्रेषु मुक्तस्य सत्यसङ्कल्पत्वं परमपुरुषसाम्यं च परमपुरुषासाधारणनिखिलजगन्नियमनश्रुत्याऽनुगुण्येन वर्णनीयमिति साधयन्ति ॥ तेन तन्मतं सिद्धान्ताद् अविरुद्धमित्युपरम्यते ॥

तन्मतचौरस्तु—रामानुजाचार्यवदेव सूत्राणि व्याख्याय शिवलोकस्य सर्वतः परत्वं परब्रह्मणः शिवाकारत्वं चोक्तवान् । तत्तु तदुपन्यस्तेन्द्रप्रजापतिसंवादश्रुतेरपि विरुद्ध्यते । तत्र, स उत्तमः पुरुष इत्यनेन परज्योतिषः पुरुषोत्तमत्वेन प्रतिपादनात् । अग्रे च श्यामाच्छबलं प्रपद्ये इत्यादिना श्यामवर्णश्रावणाच्च लोकोऽपि ततः पूर्वं दहरविद्योक्त एव सन्निहितः । स चारण्याख्यार्णवद्वयव्याप्तो वाराहपुराणवाक्यैर्भगवल्लोकत्वेन निश्चितः । अथर्वशिरःशिखाद्याश्च विद्याः भगवद्विद्यानां न तुल्याः । अथर्वशिरःशिखाध्यायिशतमेकमेकेन

मन्त्रराजजापकेन तत्समिति नृसिंहपूर्वतापनीये श्रावणात्। अतस्तत्प्रतिपाद्यस्य रूपस्य न भगवत्तुल्यत्वम्। वेद्योत्कर्षत एव विद्योत्कर्षसिद्धेरिति। एतत् पूर्वं पूर्वमपि किञ्चिदुक्तं प्रहस्ताख्ये वादे च मया निपुणतरमुपपादितमिति न पुनः प्रपञ्च्यते॥

माध्वास्तु—जगद्व्यापारसूत्रे, सर्वान् कामानाप्त्वा अमृतः समभवदिति काञ्चन श्रुतिं लिखित्वा तस्या जीवप्रकरणगतत्वाज्जीवानां जगज्जननादिसामर्थ्यविदूरत्वाच्च सृष्ट्यादिभ्योऽन्यानेव कामानाप्नोतीत्युक्त्वा "स्वाधिकानन्दसम्प्राप्तौ सृष्ट्यादिव्यापृतिष्वपि। मुक्तानां नैव कामः स्यादन्यान् कामाँस्तु भुञ्जते। तद्योग्यता नैव तेषां कदाचित् क्वापि विद्यते। नचायोग्यं विमुक्तोऽपि प्राप्नुयान्न च कामयेदि"ति वाराहवचनं लिखन्ति। अग्रिमसूत्रे च, सर्वस्मै देवा बलिमावहन्तीति श्रुत्या ब्रह्मविदि जगदैश्वर्यमस्तीत्याशङ्क्य, तत्र आधिकारिकमण्डलस्थ आधिकारिकसमूहाधिपतिर्ब्रह्मा, तत्रोच्यत इत्युक्त्वा "आत्मेत्येवं परं देवमुपास्यं हरिमव्ययम्। केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन। अत्रैव च स्थितिस्तेषामन्तरिक्षे च केचन। केचित् स्वर्गे महर्लोके जने तपसि चाऽपरे। केचित् सत्ये महाज्ञाना गच्छन्ति क्षीरसागरम्। तत्रापि क्रमयोगेन ज्ञानाधिक्यात् समीपगाः। सालोक्यं स्वस्वरूपत्वं सामीप्यं योग एव च। इमामारभ्य सर्वत्र यावत् सुक्षीरसागरम्। पुरुषोऽनन्तशयनः श्रीमन्नारायणाभिधः। मानुषा वर्णभेदेन तथैवाश्रमभेदतः। क्षितिपा मनुष्यगन्धर्वा देवाश्च पितरश्चराः। आजानजाः कर्मजाश्च तात्त्विकाश्च शचीपतिः। रुद्रो ब्रह्मेति क्रमशस्तेषु चैवोत्तमोत्तमाः। नित्यानन्दे च भोगे च ज्ञानैश्वर्यगुणेषु च। सर्वे शतगुणोद्रिक्ताः पूर्वस्मादुत्तरोत्तरम्। पूज्यन्ते चावरैस्ते तु सर्वपूज्यश्चतुर्मुखः। स्वजगद्व्यापृतिस्तेषां पूर्ववत् समुदीरिता। सयुजः परमात्मानं प्रविश्य च बहिर्गताः। चिद्रूपान् प्राकृताँश्चापि विना भोगांस्तु काँश्चन। भुञ्जते मुक्तिरेवं ते विस्पष्टं समुदाहृते"तिगारुडवाक्यानि लिखन्ति। तेन तन्मते मुक्तानां मुक्तेश्च तारतम्यं सिद्ध्यति। विकारवर्तिसूत्रे च "स्वाधिकारेण वर्तन्ते देवा मुक्तावपि स्फुटम्। बलिं हरन्ति मुक्ताय विरञ्च्याय च पूर्ववत्। सब्रह्मकास्तु ते देवा विष्णवेऽत्र विशेषतः। न विकाराधिकारास्तु मुक्तानामन्य एव तु। विकाराधिकृता ज्ञेया ये नियुक्तास्तु विष्णुने"ति

वाराहवचनं लिखन्ति । तेन तन्मते मनुष्यादीनां चतुर्मुखान्तानां स्वस्वव्यापारकरणं तत्राधिकारश्च सिद्ध्यति । कश्चित्तु, मुक्तौ तारतम्यमस्ति, न वेति सन्देहे तारतम्ये प्रमाणाभावात्तदङ्गीकरणे च निरञ्जनः परमं साम्यमुपैतीति श्रुतिविरोधान्मुक्तेः स्वर्गसंसारसाम्यापत्तेर्मुक्तानां स्वसमाभ्यधिकदर्शने दुःखेर्ष्यादिप्रसङ्गाच्च न मुक्तेस्तारतम्यमिति पूर्वपक्षः । सिद्धान्तस्तु—तैत्तिरीये, सैषा नन्दस्य मीमांसा भवति ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाऽकामहतस्येत्यादिश्रुत्या मनुष्यगन्धर्वप्रभृतिब्रह्मान्तानां श्रोत्रियत्वमकामहतत्वं च श्रावितम् । वाजसनेयके च, अथ ये शतं कर्मदेवानामानन्दाः स एक अजानजानां देवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहत इत्यादिश्रुत्याऽजानजानारभ्य ब्रह्मलोकस्थानन्दपर्यन्तमकामहतत्वमवृजिनत्वं, च श्रावितम् । अकामहतत्वं च कामकृतोपद्रवरहितत्वं, न त्वकामत्वं हतशब्दवैयर्थ्यात् । अवृजिनत्वं च पापरहितत्वं, दुःखरहितत्वं वा । अवृजिनत्वाकामहतत्वयोश्च यत्राप्ताः कामास्तत्र माममृतं कृधीति श्रुत्या, स हि मुक्तोऽकामहत इति ब्रह्माण्डवाक्येन च मुक्तलिङ्गत्वम् । नचैतयोरपरोक्षज्ञानिलिङ्गत्वमिति शङ्क्यम् । प्रारब्धप्रापतत्कार्यदुःखयोस्तस्मिन्नपि सत्त्वात् । श्रोत्रियत्वमपि मुक्तस्यैव मुख्यम् । "प्राप्तश्रुतिफलत्वात्तु श्रोत्रियाः प्राप्तमोक्षिणः । त एव चाप्तकामत्वात् तथाऽकामहता मता" इति भारतोक्तेः । एवं सत्येतेषां मुक्तलिङ्गत्वम् । एवं सत्येतयोः श्रुत्योरुत्तरोत्तरमानन्दाधिक्यकथनं मुक्तितारतम्ये पर्यवस्यति । किञ्च । अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुरित्यादितैत्तिरीयश्रुतौ मनोवेगे सर्वेषामसाम्यकथनात् । "मुक्तानामपि सिद्धानां नारायणपरायणः । स दुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने" इति श्रीभागवतवाक्ये, मुमुक्षोरमुमुक्षुस्तु परो ह्येकान्तभक्तिमानिति पुराणान्तरवाक्ये, अन्ये त्वेवमजानन्त इति, स्त्रियो वैश्यास्तथा शूद्रा इति गीतावाक्ये च साधनतारतम्येन फलतारतम्यप्रतिपादनात् । अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसीति वाक्ये चाल्पभक्तिसाध्यमुक्तितोऽधिकभक्तिसाध्यमुक्तेराधिक्यप्रतिपादनात् । अस्मदादिमुक्तभोगो, मुक्तचतुर्मुखभोगान्निकृष्टः अस्मदादिभोगत्वात् संसार-

जानीत परमं तत्त्वं यशोदोत्सङ्गलालितम् ॥
तदन्यदिति ये प्राहुरासुराँस्तानहो बुधाः ॥ १ ॥

स्याऽस्मदादिभोगवदित्यनुमानादपि मुक्तौ तारतम्यमेव पर्यवस्यतीति प्रमाणाभावरूपो हेतुरसिद्धः ।दुःखाभावसत्यकामत्वादिना सरःसागरयोरिव स्वयोग्यानन्दपूर्त्या च मुक्तानां ब्रह्मसाम्यश्रुत्युपपत्तेस्तद्विरोधरूपो हेतुरप्यसिद्धः । बहुजन्मभिर्गतदोषत्वे ब्रह्माऽपरोक्षाद् द्वैश्वर्यादिसम्भावनाया एवाभाव इति सोऽप्यसिद्धः । अतो मुक्तितारतम्यं निष्प्रत्यूहमिति वदन्ति । तत्र यदि मुक्तेस्तारतम्यं तदापि मुक्तिं प्रति तत्तदुपासनाया भक्तेर्वा तदनुरूपाया एव कारणत्वमिति तत्क्रतुन्यायादेव तारतम्यक्रमादिसिद्धिरिति किमनेन विचारेणेति प्रकृतानुपयोगात्तदनुचिन्तनप्रयोजनस्याऽप्यनुपलब्धेश्च तत्र वयमुदासीनाः ॥

प्रकृतमनुसरामः ॥ अत्रैतत् सिद्धम् । ज्ञानमार्गीयाणां तद्रीत्याऽदृश्यत्वादिगुणकाक्षरोपासनं तत्क्रतुन्यायेन तादृशेऽक्षरे ब्रह्मैव सन् ब्रह्माऽप्येतीतिश्रुत्युक्तो लयः । अक्षरस्य, तद्धाम परमं ममेति वाक्योक्तभगवद्धामत्वज्ञानपूर्वकं नित्यभगवल्लोकत्वेन भगवदभिन्नत्वेन दहराद्युक्तरीत्योपासने यथाधिकारं सालोक्यादिचतुष्टयप्राप्तिः । आदित्याद्युपासनानामङ्गोपासनात्वात् पञ्चाग्न्युपासनाया अपि तत्रैव प्रवेशस्योपादितत्वादर्चिरादिक्रमेण गत्याऽमानवेन पुरुषेण भगवल्लोकप्राप्तिरैश्वर्यादिभोगश्च । उपासनायां मर्यादाभक्तिसाहित्ये तु वैकुण्ठादिलोकेषु भगवत्सेवकत्वमधिकम् । तदा रामानुजभाष्योक्तरीत्या भगवदनुभवः । तत्रापि भक्तेरुक्तत्वे तु भगवच्चरणे कौस्तुभादौ वा प्रवेशेन भगवत्सायुज्यम् । अनुग्रहविशेषेण पुष्टिभक्तौ तु, भक्त्या मामभिजानातीत्युक्तरीत्या स्वस्मिन् प्रवेश्य भूमविद्योक्तरीत्या पुनः प्रथमाविर्भाव्य भजनानन्दानुभावने, सोऽश्नुत इति श्रुत्युक्तरीतिकं भोगं कारयतीति ॥ २२ ॥

एवं सर्वं शास्त्रं व्याख्याय स्वीयशिक्षार्थं संक्षेपेण तदर्थमुपदिशन्ति । * जानीतेत्यादि * । * तदन्यदिति * तत् परमं तत्त्वम् । अन्यद् यावद्धर्मशून्यम् ॥ १ ॥

नानामतध्वान्तविनाशनक्षमो
वेदान्तहृत्पद्मविकासने पटुः ॥
आविष्कृतोऽयं भुविभाष्यभास्करो
मुधा बुधा धावत नाऽन्यवर्त्मसु ॥ २ ॥
पुरन्दरमदोद्धवप्रचुरवृष्टिसम्पीडित-
स्वकीयवरगोकुलाऽवनपरायणो लीलया ॥
स्मिताऽमृतसुवृष्टिभिः परिपुपोष तान् यो गिरिं
दधार च स एव हि श्रुतिशिरस्सु संराजते ॥ ३ ॥
श्रीकृष्णकृपयैवाऽयं सिद्धान्तो हृदि भासते ॥
तेनाऽधिकं वरीवर्त्ति न वक्तव्यं हरेर्नृणाम् ॥ ४ ॥
भाष्यपुष्पाञ्जलिः श्रीमदाचार्यचरणाऽम्बुजे ॥
निवेदितस्तेन तुष्टा भवन्तु मयि ते सदा ॥ ५ ॥

इति श्रीमद्वेदव्यासमतवर्त्तिश्रीवल्लभाचार्यविरचिते
ब्रह्मसूत्राऽणुभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः
समाप्तः ॥ समाप्तश्चतुर्थोऽध्यायः ॥४॥४॥

———

भाष्यविभावनार्थमुपदिशन्ति । * नानेत्यादि * ॥ २ ॥

अत्रोक्तस्य फलस्य भगवत्कृपाधीनत्वाद्भगवतः कृपालुत्वं स्वीयरक्षकत्वेन स्फुटीकुर्वन्ति * पुरन्दरेत्यादि * । हिर्हेतौ ॥ ३ ॥

भाष्यविभावनयाऽर्थस्फुरणेऽपि भगवत्कृपाया एव कारणत्वं न पाण्डित्यादेरित्याशयेनाहुः * श्रीकृष्णेत्यादि * ॥ ४ ॥

गुणोपसंहारपादमारभ्य सार्द्धाध्यायस्य स्वयं करणात्तदाचार्येषु निवेदयन्तः समाप्तौ मङ्गलं कर्त्तव्यमिति शिष्टाचारं च शिक्षयन्त आचार्याणां प्रसादमाशासते * भाष्येत्यादि * अर्थस्तु श्लोकानां स्फुट इति शुभम् ॥ ५ ॥

क्रीडन् श्रीबालकृष्णः परमकरुणया मन्मनः प्रेरयित्वा
भाष्यार्थं योऽतिगूढं प्रकटितमकरोत् सम्प्रदाये निवृत्ते ॥
तं नित्याऽकुण्ठशक्तिं वृतनिखिलनिजाऽज्ञानसंसारहारं
स्मृत्वा स्मृत्वोपकारं प्रमुदितमुदितः स्वप्रभुं सन्नमामि ॥१॥
मायावादादिवादैर्व्यवहितमिव तं ब्रह्मवादं प्रकाश्य
श्रीमत्कृष्णाज्ञया तद्गतिपथ उदितो दैवजीवाऽवनार्थम् ॥
यैस्तान् श्रीकृष्णरूपान् प्रथितगुणगणान् श्रीमदाचार्यवर्यान्
ध्यायं ध्यायं नमामि स्वहितमवहितस्तत्कृपार्द्रार्द्रदृष्ट्या ॥ २ ॥
श्रीविट्ठलेशाङ्घ्रिसरोजयुग्मं नमामि यैर्दासजनाऽवनाय ॥
पुष्टिप्रकारः श्रुतिगूढ आविष्कृतो निरस्तोन्मदमायिवादः ॥३॥
श्रीविट्ठलेशपादाब्जप्रसादवरलाभतः ॥
प्रकाशमणुभाष्यस्य वितन्वन् पुरुषोत्तमः ॥ ४ ॥
तदीयचरणद्वन्द्वे निवेद्य कुसुमाञ्जलिम् ॥
तदीयदास्यलाभाय प्रसादमभिवाञ्छति ॥ ५ ॥
यदत्र सदसद्वापि जीवबुद्ध्या मयोदितम् ॥
तत् क्षमन्त्वपराधं मे कृपया दीनवत्सलाः ॥ ६ ॥
प्रलयजलदवृष्टेर्गोव्रजस्यावनाय
स्वमृदुकरनखाग्रन्यस्तगोवर्द्धनाद्रिः ॥
वदनविधुमयूखैर्नेत्रतापं निजाना-
मपनयतु हृदीशः स्थापयन् पादपद्मम् ॥ ७ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य
श्रीपीताम्बरात्मजस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे
चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥
समाप्तोऽयमध्यायः ।
सम्पूर्णश्चाऽयं भाष्यप्रकाशः ॥

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
Nos. 99, 100, 103, 107, 110, 114, 117, 118, 119, 120, 124, 125, 127, 128 & 129.

श्रीमदणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितभाष्यप्रकाशाख्यव्याख्यासमेतम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा रत्नगोपालभट्टेन संशोधितम् ।

ANU BHÂSAYA,

ON BRAHMASUTRA BY SRÎ VALLABHÂCHÂRYA,
With the Commentary called Bhâshya Prakâsa,
By Goswâmi Srî Purushottamjee Mahârâj.
EDITED BY RATNA GOPÂL BHATTA.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,
BENARES.

1907.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

श्रीकृष्णाय नमः ।

अथैतत् किल श्रीवल्लभाचार्यविरचितं ब्रह्मसूत्राणुभाष्यं गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितप्रकाशाख्यव्याख्यासहितं समुद्रय प्रकाशितं वरीवर्ति । तत्र श्रीवल्लभाचार्याः पूर्वपुरुषपरम्परातः स्वयञ्च बहुसोमयाजिनस्तैलङ्गवेल्लनाटीज्ञातीय-खम्भंपाटीवारु-इत्युपनामवतः श्रीलक्ष्मणभट्टदीक्षितस्य सूनुतया, पञ्चत्रिंशदधिकपञ्चदशशततमे १५३५ विक्रमार्कवत्सरे पूर्णिमान्तगणनया माधवकृष्णैकादश्याम् आविर्भूताः ।

श्रीपुरुषोत्तमचरणास्तु श्रीवल्लभाचार्यात्मजगोस्वामिश्रीश्रीविट्ठलनाथदीक्षितसूनुषु तार्तीयीकश्रीबालकृष्णजीतः पुरुषगणनया पञ्चमीं संख्यां भूषयन्तः प्रादुर्भूताः ।

तत्र श्रीवल्लभाचार्यशुद्धाद्वैतसम्प्रदायस्य मूलभूतोऽयं भाष्यग्रन्थः । स च शुद्धलिखितपुस्तकतः संशोध्य संमुद्रितः ।

भाष्यप्रकाशस्तु अत्यन्तं दुर्लभः । स च श्रीवल्लभाचार्यकुलकमलदिवाकर—श्रीश्रीमुकुन्दराय—श्रीगोपाललालप्रभुसेवाप्रवीण-श्रीमत्प्रभुचरणगोस्वामिश्रीविट्ठलनाथदीक्षिततनूजनुः-श्रीमहाराजगोस्वामि- श्रीयदुनाथजीवंशावतंस-षष्ठगृहतिलककाशीवास्तव्यगोस्वामिश्रीगिरिधरजीमहाराजैः श्रीरामकृष्णभट्टाय वितीर्णं शस्तं पुस्तकं समवलम्ब्य प्रकाशितः ।

अत्र संमुद्रणे निरुक्तपुस्तकाधारेण लेखितं सकलप्राचीनदुर्लभग्रन्थसम्पादनशील- श्रीयुतगोविन्ददासमहाशयसकाशादपरं प्रकाशपुस्तकमानीय संमेलनाय मन्निकटे स्थापितवतो नानाविधदर्शनप्रकाशनपरायणश्रीयुतहरिदासगुप्ताभिधमहाशयस्य प्रोत्साहनेन यथामति संशोधितवानस्मि ग्रन्थरत्नद्वयम् । तत्र मत्प्रमादाज्जातानां स्खलितानां क्षमापने सन्तो मया प्रार्थनीया एवेत्यलं विस्तरतः ॥

सत्पक्षपातिनो हंसा नूनं नालीकवल्लभाः ॥
गुणं गृह्णीत, मा दोषं नीरक्षीरविवेकिनः ॥ १ ॥

रत्नगोपालभट्टः ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।।।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ५ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड २)	५	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम् । श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्तिः स०	१	०
व्याकरणमिताक्षरा । श्रीमदन्नंभट्टप्रणीता खण्डानि १०	१०	०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख०	१०	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्विरचिता खण्डे २	२	०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३	३	०
श्रीमदणुभाष्यम् । श्री[illegible]वल्लभाचार्यविरचितम् । गोस्वामिश्रीपुरुषोत्त[illegible]हाराजविरचितभाष्यप्रकाशाख्यव्याख्या समेतम् [illegible] १५	१५	०
तत्त्वशेखरः । श्री[illegible]काचार्यप्रणीतः । तथा—तत्त्वत्रयचुलुकसंग्रहः । कुमार[illegible]चार्यश्रीमद्वरदगुरुविरचितः ।	१	०
श्रीभाष्यवार्तिक[illegible]श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्रतिपादनपर[illegible]	१	०

ब्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस